श्री गोकुलदास संस्कृत ग्रन्थमाला ८४

॥ श्रीः ॥

# शुक्लयजुर्वेदमाध्यन्दिनीयसंहिता

M.Katyayana

(प्रास्ताविकसंहितामन्त्राणामकाराद्यनुक्रमणिकावेदपारायणविध्य-
नुवाकसूत्राध्यायाष्टविकृतियाज्ञवल्क्यशिक्षाप्रतिज्ञासूत्र-
सर्वानुक्रमसूत्रपारस्करगृह्यसूत्रादिसमलङ्कृता)

प्राक्कथन

याज्ञिकसम्राट् पण्डित वेणीरामशर्मा गौड

**चौखम्भा ओरियन्टालिया**

वाराणसी दिल्ली

प्रकाशक

चौखम्भा ओरियन्टालिया

पो. आ. चौखम्भा, पो. बा. नं. १०३२

गोकुल भवन, के. ३७/१०९, गोपाल मन्दिर लेन

वाराणसी-२२१००१ (भारत)

टेलीफोन : ६३३५४ टेलीग्राम : गोकुलोत्सव

शाखा—बंगलो रोड, ९ यू. बी. जवाहर नगर

(नजदीक करोड़ीमल कॉलेज)

दिल्ली—११०००७ टेलीफोन : २९११६१७, २३८७९०

© चौखम्भा ओरियन्टालिया

प्रथम संस्करण १९९१

मूल्य रु. १२५.००

मुद्रक—श्रीगोकुल मुद्रणालय, गोपाल मन्दिर लेन, वाराणसी

अथ प्रास्ताविक-संहितामन्त्राणामकाराद्यनुक्रमणिका-वेदपारायणविध्यनुवाकसूत्राध्यायाष्टविकृति-
याज्ञवल्क्यशिक्षा-प्रतिज्ञासूत्र-सर्वानुक्रमसूत्र-पारस्करगृह्यसूत्रादिसमलङ्कृता

# शुक्लयजुर्वेदमाध्यन्दिनीयसंहिता प्रारभ्यते ॥

याज्ञवल्क्य ऋषि
यजुर्वेद

हेमाद्रिकृतचतुर्वर्गचिंतामणिस्थव्रतखंडोक्तविश्वकर्मशास्त्रवचनानुसारेण शिक्षासहितवेदस्वरूपाणि.




ऋग्वेदः श्वेतवर्णःस्यात्
द्विभुजो रासभाननः॥
अक्षमालायुतः सौम्यः
प्रीतश्चाध्ययनोद्यतः॥१॥

अजास्यः पीतवर्णःस्यात्
यजुर्वेदोऽक्षसूत्रधृक्॥
वामे कुलिशपाणिस्तु
भूतिदो मंगलप्रदः॥२॥

नीलोत्पलदलाभासः
सामवेदो हयाननः॥
अक्षमालान्वितो दक्षे
वामे कंबुधरः स्मृतः॥३॥

अथर्वणाभिधो वेदो
धवलो मर्कटाननः॥
अक्षसूत्रं च खट्वाङ्गं
बिभ्राणो यजनप्रियः॥४॥

शिक्षा शुभ्राभयकरा
ज्ञानमुद्रान्विता शुभा॥
अक्षसूत्रा सकुंडीका
द्विभुजा दंडपंकजा॥५॥

# अथ शुक्लयजुर्वेदसंहितानुक्रमणिका ।


| विषयाः | पृष्ठाङ्काः | विषयाः | पृष्ठाङ्काः |
|---|---|---|---|
| १ संशोधयितुः प्रास्ताविकम् | ५-१६ | ८ याज्ञवल्क्यशिक्षा | ९०१-९२६ |
| २ संहितामन्त्राणामकाराद्यनुक्रमणिका | १७-६८ | ९ प्रतिज्ञासूत्रम् | ९२७-००० |
| ३ वेदपारायणविधिः | ६९-७४ | १० सर्वानुक्रमसूत्रम् | ९२८-२१२ |
| ४ अनुवाकसूत्राध्यायः | ७५-८२ | ११ पारस्करगृह्यसूत्रम् | ९७४-१०३१ |
| ५ संहितायाः पूर्वविंशतिः | ८३-५४८ | १२ पारस्करगृह्यसूत्रपरिशिष्टं (श्राद्धसूत्रम् | १०३२-१०३६ |
| ६ संहिताया उत्तरविंशतिः | ५४९-८४० | १३ " " (स्नानसूत्रम्) | १०३७-१०३८ |
| ७ अष्टविकृतिमन्त्राः | ८४१-९०० | १४ " " (भोजनसूत्रम् | १०३८-१०४१ |

श्रीजगद्धात्र्यै परदेवतायै नमो नमः ॥

# प्रास्ताविकम्

भो समाराधितभारतीचरणाम्बुजा विद्वांसः!

> मंत्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।
> स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥ (पा. शि.)

सन्दृश्यते शब्दानां साधुत्वासाधुत्वाववोधाय सम्यक्तया शुद्धोच्चारणाय च व्याकरणशास्त्राध्ययनस्यावश्यकता । न शक्नोत्यनधीततच्छास्त्रः कोऽपि सुस्पष्टतया शब्दप्रयोजनं शब्दोच्चारणं च प्रयोगविज्ञानमपि ज्ञातुं कर्तुञ्च वैदिकोऽवैदिको वा । एतत्प्रतिपादनाय पूर्वोक्तः श्लोकः स्वविरचितायां शिक्षायां महर्षिणा पाणिनिनोपनिबद्धः । तथैव सामान्यतया शब्दप्रयोगविधावुच्चारणवेलायामपि तत्तत्पदानां विपरीतासंगतार्थदुर्बोधत्वादिदोपनिवारणाय सर्वथा "**व्याकरणशास्त्रज्ञानस्य**" बोध अत्यावश्यक इति प्रतिपादयता केनचिद्विदुपा "**यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम् ॥ स्वजनः श्वजनो मा भूत्सकलं शकलं सकृच्छकृत्**" इति मनसि कृत्वा मत्पुत्रः "स्वजनस्य श्वजनेन, सकलस्य शकलेन, सकृत्पदस्य शकृदुच्चारणेन" च प्रयोगो न कुर्यादिति स्वपुत्रं लक्ष्यीकृत्यैव विरचितोऽयं श्लोक इत्यपि वक्तुं शक्यत एव । अत एव अपशब्दवारणाय सामान्यतया शब्दशास्त्रज्ञानं मूर्ध्नि

तिष्ठतीति सर्वैरपि स्वीकृतम्। तर्हि ये वैदिकाश्चतुर्षु वेदेषु कृतपरिश्रमाः स्वस्ववेदमंत्रोच्चारणं विधाय वैदिककर्मणि तांश्च मन्त्रान् संप्रयुज्य यजमानस्य कल्याणाय प्रत्यहं संहितापाठेन रुद्रपाठेन जपेनाग्नावाहुतिप्रक्षेपेण च वेदमंत्राणां प्रयोगं विदधते तेषां तूदात्तानुदात्तस्वरितादीनां ज्ञानं तत्तन्मंत्रोच्चारणे तत्तत्स्वराणां तत्र तत्र सन्निवेशनं हस्तचालनविधौ ह्रस्व ৩ं दीर्घ ६॰ प्लुत ३ प्रभृतीनां तथैव ? ६ ÷ म् न् लोकाँ १ ॥ शत्रूँ २ ॥ इत्यादिषु चिह्नेषु कुत्र कया रीत्याऽङ्गुलिनिर्देशः कार्य इत्यादि ज्ञानमपि शब्दशास्त्रज्ञानमन्तरा कथं स्यात्।

एतदर्थमेव पाणिनिना पूर्वोक्तश्लोके स्पष्टतया **"स्वरतो वर्णतो हीनो मंत्रो मिथ्याप्रयुक्तो मंत्रार्थं नाभिव्यनक्ति उतान्वर्थरहितः सन् वाग्वज्रो भूत्वा यजमानं हन्यात् यथा इन्द्रस्य नाशाय कृतेऽपि इन्द्रशत्रुशब्दप्रयोगे स्वरतोऽपराधेन वृत्रासुर एव हतः।"** एवं मा भूयादित्येतदर्थं मंत्रप्रयोगे स्वर-वर्णार्थज्ञानस्य प्राधान्यमिति सुस्पष्टमभिहितम्। अतः शब्दानां साधुत्वबोधाय व्याकरणज्ञानेन सह वेदमंत्राणां स्वरसन्धिज्ञानमुच्चारणज्ञानं याज्ञवल्क्यशिक्षाज्ञानं कात्यायनमहर्षिप्रणीतशुक्लयजुःप्रातिशाख्यज्ञानञ्च वैदिकानामत्यावश्यकमेवेति प्रतिभाति।

महर्षिणा याज्ञवल्क्येन शिक्षायां **स्वरप्रकरणे मात्राधिकारः, अध्ययनविधिः, हस्तचालनविधिः, स्वरसंहिताविधिः, वर्णप्रकरणे दैवताद्यधिकारः, सन्ध्यधिकारः, वर्णोच्चारणाधिकारः, पदाधिकारः, प्रकीर्णाधिकारश्च;** एवं प्रकरणानि निर्माय तत्तत्प्रकरणे सर्वोऽपि विधिः स्पष्टतया सोदाहरणः प्रदर्शितः, सोऽवश्यं वैदिकैः परिशीलनीयः। गुरोः सकाशात्परंपरया वा तज्ज्ञानप्राप्तिमन्तरा वेदाध्ययनकर्तारो वेदपाठकाश्च केवलं स्वकीयबुद्ध्या वेदाध्ययनं संपादयितुं नार्हेयुरिति प्रदर्शनाय कानिचित् पदानामुदाहरणान्येतेभ्यः प्रकरणेभ्य उद्धृत्य कियद्वेदस्य दुर्बोधत्वमिति सर्वेषां ज्ञानाय मया प्रदीयते।

अध्ययनविधौ स्वरप्रकरणम् । तत्रोदात्तानुदात्तस्वरितादीनां ज्ञानाय तेषां लक्षणम्, तत्तत्स्वराणां स्थानम्, वर्णः, दैवतम्, जातिः, गोत्रम्, छन्दश्च । यथा–उदात्तस्वरस्य शुक्लो वर्णः, अग्निदैवतम्, ब्राह्मणजातिः, भारद्वाजगोत्रम्, गायत्रीच्छन्दः ॥ अनुदात्तस्य लोहितो वर्णः, सोमदैवतम्, क्षत्रियजातिः, गौतमगोत्रम्, त्रिष्टुप्छन्दः ॥ स्वरितस्वरस्य श्यामो वर्णः, सूर्यदैवतम्, वैश्यजातिः, गार्ग्यस-गोत्रम्, जगतीच्छन्दः ॥ सामवेदे ये सप्त स्वराः षड्ज-ऋषभ-गान्धार-मध्यम-पञ्चम-धैवत-निषादादयो गानविधौ उक्तास्तेषां यजुर्वेदे तु त्रिभिरुदात्तानुदात्तस्वरितस्वरैरेव व्यवहार (उच्चारणम्) उक्तः । यथा–उच्चौ निषाद-गान्धारौ उदात्तस्वरे, नीचौ ऋषभ-धैवतौ अनुदात्तस्वरे, शेषाः षड्ज-मध्यम-पञ्चमाः स्वराः स्वरितस्वरेऽन्तर्भूताः । एतेन त्रिषु स्वरेषु तेषां स्वराणामन्तर्भूतत्वं ज्ञेयम् । अक्ष्णोर्निमेषमात्रेण यो स्वरः समुच्चार्यते स काल एकमात्राकालः स ह्रस्वस्वरः ॥ तावान्द्विः द्विमात्राकालो दीर्घस्वरो ज्ञेयः । तावानेव त्रिमात्राकालः प्लुतस्वरो ज्ञेयः ॥ सर्वत्र मंत्रोच्चारणे कण्डिकाया अर्धोच्चारणे जाते द्विमात्राकालो विरामः कार्यः । यथा "निधीनान्त्वा निधिपतिꣳ हवामहे वसो मम"। अत्र ममेति पदोच्चारणानन्तरं द्विमात्राकालं विरामं कृत्वैवाग्रिमाया अर्धकण्डिकाया उच्चारणं कर्तव्यम् । तथैव मंत्रसमाप्तावपि "त्वम-जासिगर्ब्भधम्" इत्यत्र त्रिमात्राकालो विरामः कार्यः । एवमेव वेदमंत्राणां पाठविधौ केवले मंत्रोच्चारणे वा सर्वत्राध्ययनस्यायं नियमो बोध्यः, करणीयश्च वैदिकैरेवंविधो विरामः । वैदिकैर्वेदमंत्रोच्चारणावसरे प्रणवस्यादावुच्चारणं (त्रिमात्रिकं) प्लुतं कृत्वा "भूर्भुवः स्वः" इति तिसृणां व्याहृतीनां तथैव सावित्रीमंत्रस्याप्युच्चारणमन्तरा संहितापाठो मंत्रपाठो वा नारम्भणीयः ।

सर्वानुक्रमसूत्रे प्रथमेऽध्याये "ऋषिच्छन्ददेवतादीन्येतान्यविदित्वा योऽधीतेऽनुब्रूते जपति जुहोति यजति याजयते तस्य ब्रह्म निर्वीर्यं भवति यातयामं भवत्यथान्तराश्च गर्तं वाऽऽपद्यते स्थाणुं वर्च्छेति प्रमीयते पापीयान् भवतीति"। तथैव "अथ विज्ञाये-

तानि योऽधीते तस्य वीर्यवदथ योऽर्थवित्तस्य वीर्यवत्तरं भवति जपित्वा हुत्वेष्ट्वा तत्फलेन युज्यते" इत्युक्तम् । अतश्च ऋषिच्छन्दोदेवता-दीनामिव मंत्राणां वर्णजातिदैवतानामपि ज्ञानेन वेदाध्ययनकर्तॄणां तत्तत्कर्मणि मंत्रप्रयोगञ्च विदधतां फलाफलत्वेन योगो जायते तदपि न विस्मरणीयं वैदिकैः ।

**हस्तचालनविधावुदात्तादिस्वराणां ज्ञानम्**–वेदेषूदात्तानुदात्तस्वरितादयः स्वरा हस्तस्य चालनद्वारैव प्रदर्श्यन्ते । वेदपाठकाः स्वदक्षिणहस्तम् उपर्यधो मध्ये वामदक्षिणभागयोर्वा नयन्तस्तत्तत्स्वरान् दर्शयन्ति । यथा–उदात्तस्वरे हस्तस्योर्ध्वगमनम् (दक्षिणकर्णसमीपे इति यावत्), उदात्तस्वरोच्चारे गात्राणामायामेनोर्ध्वगमनं भवति ततश्च यः स्वरो निष्पद्यते तस्य स्वरस्य "उदात्तसंज्ञा" उक्ता । यथा–अग्ना ३ इ पत्क्नी । लाजी ३ न् ॥ अनुदात्तस्वरे हस्तस्याधोनयनम् हृदयप्रदेशे च नयनम् ॥ यस्य स्वरस्योच्चारणे गात्राणां मार्दवेन नीचैरधोगमनं भवति ततश्च यः स्वर उत्पद्यते तस्य "अनुदात्तसंज्ञा" उक्ता । यथा–"आर्पेत्रऽऋषीणाम्" ॥ स्वरित-स्वरे हस्तस्य मध्येऽधो वा सन्निवेशनम् । गात्राणामूर्ध्वाधोगमनेनोदात्तानुदात्तस्वरयोः समाहारेण यः स्वर उद्भवति तस्य "स्वरितसंज्ञा" उक्ता । यथा "धा॒न्य॒मसि" वैष्ण॒व्यौ॒" । एवं तत्तत्स्वरोच्चारे हस्तस्य सन्निवेशोऽपि त्र्यङ्गुलान्तरायो (न तु स्वमनसैव लघुर्दीर्घो वा हस्तप्रक्षेपः) हस्तचालनद्वारा तत्र तत्र तत्तत्स्वरप्रदर्शनपूर्वको नातिदीर्घो ह्रस्वो वा कार्यः । स्वदक्षिणवामपार्श्वयोस्तिर्यग्घस्तचालने स्वरविधौ तु षडङ्गुलान्तरं बोध्यम् । अत्रोपर्यधोभागे निर्दिष्टानामुदात्तानुदात्तस्वरितस्वराणां प्रचयस्वराणाञ्च विज्ञानं लेखद्वारा न प्रदर्शनयोग्यमतस्तद्वेदाध्ययनकाल एव स्वगुरोः सकाशाद्याज्ञवल्क्यशिक्षातो महर्षिकात्यायनप्रणीतशुक्लयजुःप्रातिशाख्यस्याध्ययनद्वारा चावश्यं वेदपाठकैः संपादनीयं नान्यथा वेदाध्ययनं फलजनकं भवेत्स्वस्य परस्य वा ।

**वेदे सन्धिप्रकरणम्**—वेदे चतुर्विधः सन्धिरुक्तः। लोपाऽऽगमविकाराः प्रकृतिभावश्च। तस्यापि ज्ञानमावश्यकं वेदविदाम्। यत्र द्वयोः स्वरयोर्मध्ये मंत्रादौ सन्ध्यभावस्तत्र विवृत्तिनामा एका वृत्तिर्विज्ञेया। साऽपि "पिपीलिका-पाकवती-वत्सानुसारिणी-वत्सानुसृजितेति चतुर्विधा। तथा च "करिणी कुर्वणी चैव हरिणी हरिता तथा। तद्धद्धंसपदा नाम पञ्चैताः स्वरभक्तयः" ॥ इति स्वरभक्तयोऽपि पञ्चविधा वर्तन्ते। आसामपि लक्षणान्युदाहरणानि च शिक्षाया ज्ञेयानि। यत्र मंत्राणां मध्येऽनुस्वारस्य ꣳ इत्याकारकेन चिह्नेन गुरुभूतोच्चारणं, ꣴ इत्याकारकेन चिह्नेन लघुभूतोच्चारणमपि यथा निर्दिष्टं तत्तत्र तथैवोच्चारणीयं प्रदर्शनीयञ्च। वेदे वकारस्य कुत्र (व) गुरुभूतोच्चारणं यकारस्य यकारोच्चारणं कुत्र विभाषयाऽऽम्रेडितपदे कथमुच्चारणं कुत्र च वकारस्येषत्स्पृष्टत्वं-(लघुभूतोच्चारणम्) तत्सर्वमपि महर्षिणा कात्यायनेन योगिवर्येण याज्ञवल्क्येन च स्वस्वविरचिते ग्रन्थे सुस्पष्टं सोदाहरणं निर्दिष्टम्। तत उद्धृत्य कतिपयाः श्लोका लिख्यन्ते मया दिग्दर्शनाय। "पादाद्यञ्च पदाद्यञ्च तथाऽवग्रहकालिकम्। सुस्पष्टं (कालविलम्बेन गुरुभूतम्) तं विजानीयात्तत्तत्कालविलम्बनम् ॥ वकारस्त्रिविधः प्रोक्तो गुरुर्लघुर्लघूत्तरः। आदौ गुरुर्लघुर्मध्ये पादान्ते च लघूत्तरः ॥ सन्धिजौ च पदान्तीयावुपसर्गपरौ लघू। अथ-मा-न-स-शब्देभ्यो विभाषाऽऽम्रेडिते यवौ ॥ पञ्चमादुत्तरो यो वो यदि नैकपदे भवेत्। संहितायां लघुः सोऽथ पदकाले गुरुर्भवेत् ॥ यो वां वा वै मंत्रपाठे लघवो गुरवः पदे। उपसर्गपरो यस्तु स वकारो लघुर्मतः" ॥ इति वकारस्य सुस्पृष्टत्वमीषत्स्पृष्टत्वञ्च ज्ञेयम्। तथाच यकारस्य जकारोच्चारणे "पादादौ च पदादौ च संयोगावग्रहेषु यः। जशब्द इति विज्ञेयो योऽन्यः स य इति स्मृतः ॥ हकाररेफसंयुक्त ऋवर्णादय एव वा। सुस्पृष्टं तं विजानीयाद्यकारो नान्ययुग् यदि ॥ उपसर्गात्परो यस्तु पदादिरपि दृश्यते। ईषत्स्पृष्टो (जकारोच्चारणरहितः) यथा वियन् पदच्छेदे परो भवेत् ॥ विभाषया यकारश्च नित्यमाम्रेडितेऽपि च। यत्र यत्रेति मा यज्ञं तथामेति-

पदादिभिः ॥ अथात उत्तरो यः स्यात्तथा नेतिपदात्परः । भवतीत्यपि पूर्वेव तथा च सपदादपि ॥ अथावयमादित्यादावथो ये अस्य दृश्यते । न यत्परो यथा च स्यात्सपदे तदुदाहृतः ॥ यदेव लक्षणं यस्य वकारस्यापि तद्भवेत् । यत्र यत्र विशेषः स्यादिदानीं स स कथ्यते ॥ त्वदर्थवाचिनौ वो वां वा वै यदि निपातजौ । आदेशाश्च विकल्पार्थो ईषत्स्पृष्टास्तु ते स्मृताः ॥ एते श्लोका अवश्यं सार्था अध्येतव्याः ॥

**वेदे स्वरसन्धिप्रकरणम्**—उदात्तादयः परे स्वराः । "अभिनिहित-क्षैप्र-प्रश्लिष्ट-तैरोव्यञ्जन-तैरोभाव-पादवृत्त-ताथाभाव्य-भेदेन सप्तविधा अपि जात्येन सह अष्टौ स्वरितस्वराः । तेषां नीचस्वरपरा अभिनिहित-क्षैप्र-प्रश्लिष्टा ज्ञेयाः । वेदः असि वेदोसि । भागः असि भागोसि । कः असि कोसि । इत्यादौ "अकारे च" (शु. य. प्रा. ४ अ. ४३ सू.) इत्यनेनोकारे कृते "एदोद्भ्यामकारः" (शु. य. प्रा. ३ अ. सू. ६१) इति पूर्वरूपे वेदोसि । अत्र अभिनिहिताख्यः स्वरः । यत्र इवर्ण उवर्णश्च यकारं वकारं क्रमेणानुदात्तेऽसवर्णस्वरे परे प्राप्नोति तत्र क्षैप्राख्यः स्वरः । यथा-त्रि-अम्बकम्-त्र्यम्बकम् । यत्र इवर्ण इवर्णेन सह संयुतो (दीर्घः) उदात्तानुदात्तस्वरविशिष्टो भवति तत्र प्रश्लिष्टाख्यः स्वरः । यथा अभि-इन्धताम्-अभीन्धताम् । यत्रोदात्तपूर्वः स्वरः तस्मात्परः स्पर्शादिवर्णो व्यञ्जनयुतस्तत्र तैरोव्यञ्जनाख्यः स्वरः । यथा-इडे-रन्ते-हव्ये-काम्ये चन्द्रे इत्यादौ बोध्यम् । एवं गोपताविति गो पतौ इत्यत्र तैरोविरामः । यत्र स्वरितमध्ये विवृत्तिः (स्वरयोर्मध्ये सन्ध्यभावः) तत्र पादवृत्ताख्यः स्वरः । यथा-श्वित्रऽआदित्योर्मर्त्यानाम् । यत्र द्वयोरुदात्ताक्षरयोर्मध्ये विरामस्तत्र ताथाभाव्याख्यः स्वरः । यथा-तनू-नप्त्र इति तनू नप्त्रे इत्यादौ ।

**वर्णप्रकरणे वर्णदैवताद्यधिकारः**—तत्र स्वराणां नानाविधवर्णत्वं प्रतिपादितम् । स्पर्शवर्णानां कृष्णत्वम् । अन्तःस्थानां

कपिलत्वम् । ऊष्माक्षराणाम् असवर्णत्वम् । एवं तत्तद्वर्णानां तत्तद्वर्णभेदेन मुखनासिकस्थानाद्युच्चारितत्वेन नीलत्वं पीतत्वं श्वेतत्वं हरितत्वम् अतिनीलत्वञ्च कथितम् । एवमेव कण्ठ्याद्युच्चार्यमाणानां वर्णानां दैवताधिकारे आग्नेयत्वं नैर्ऋत्यत्वं सौम्यत्वं वायवत्वं रौद्रत्वम् आश्विनत्वं शेषाणां वैश्वदेवत्वञ्च पदानां दैवतत्त्वमुक्तम् । स्वराणां ब्राह्मणत्वम् । प्रथमद्वितीयतृतीयचतुर्थवर्गाणामाद्याक्षराणां चतुर्णां ( क च ट त प, ख छ ठ थ फ, ग ज ड द ब, घ झ ढ ध भ ) क्षत्रियत्वम् । पञ्चानां वर्गानामन्तिमा ये ङ ञ ण न माः तथाच ये अन्तस्थाः य र ल वा एतेषां वैश्यत्वम् । ऊष्माणः स ष श हाः हकारश्च तेषां शूद्रत्वं बोध्यम् ।

**वर्णप्रकरणे सन्ध्यधिकारः**—सन्ध्यधिकारश्चतुर्विधः । लोपागमविकाराः प्रकृतिभावश्चेति । यथा—लोपे अयक्ष्माः मा अयक्ष्मामा । शततेजाः वायुः शततेजावायुः ॥ अत्रोभयत्र विसर्गस्य लोपः । आगमे यथा-प्रत्यङ्सोमः प्रत्यङ्क्सोमः । प्राङ्सोमः प्राङ्क्सोमः । अत्र ककारस्यागमो विधीयते । तथैवात्र अस्मान्त्सीते । त्रीन्त्समुद्रान् । अत्र तकारागमो जातः । विकारे-आ इदम् । एदम् । आ इमे एमे । आ इध्मः एध्मः । प्र इषितः प्रेषितः । अत्र गुणो विधीयते । प्रकृतिभावे-यथा-आशुः शिशानः । युञ्जानः प्रथमम् । अदितिः षोडशाक्षरेण । इन्द्राग्नीऽआगतम् इत्यादिषु विसर्गस्य सन्धेश्च प्रकृतिभावः ॥

**अध्ययनविधिर्वेदाध्ययने नियमाश्च**—अध्ययनविधौ वेदपाठचिकीर्षुः प्राङ्मुख उदङ्मुखः पूज्यपूजकयोर्मध्ये प्राचीतिन्यायेन वा कुशकंबलाद्यासने उपविश्य नान्यमतिः स्वदक्षिणोरुभागे स्वदक्षिणहस्तकूर्परं निधाय स्वयमन्यैः सह वा प्रणवव्याहृतीसावित्रीपूर्वकं मधुरस्वरैर्वेदपाठं विदध्यात् । तत्रापि काकस्वरं, शङ्कितं, भीतम्, उद्घृष्टम्, अव्यक्तं, मूर्ध्निगतं (अत्युच्चस्वरेणोच्चारणम्), स्थानवर्जितम् (उदात्तानुदात्तस्वरितादीनां तत्तत्स्थानानुच्चारणम्), विरसं, (शृण्वतामानन्दजनकादिधर्मरहितम्), विस्वरं, विश्लिष्टं,

विषमाहतं, व्याकुलं (चित्तविक्षेपादिना पठनम्), तालहीनम् (मंत्राणां याथातथ्येन स्वरसहितोच्चारणरहितम्) इत्यादयश्चतुर्दशाध्ययन-दोषाः परिवर्जनीया एव।

वैदिकाः स्वस्य प्रमादेनोद्भूतान्यज्ञानेन कृतान्यपि सर्वपापानि वेदाध्ययने नित्यं निरताः सन्तः ऋक्संहितां यजुःसंहितां साम-संहितां वा सरहस्यां ज्ञात्वा पठन्तस्त्रिभिः पाठैर्दहन्ति अपि तु वेदमाश्रित्य पापं कुर्वतां वेदपाठञ्च कुर्वतां पापानि न नाशमायान्तीत्यपि तत्रैव प्रतिपादितम्। यथा "न वेदबलमाश्रित्य पापकर्मरतिर्भवेत्। अज्ञानाच्च प्रमादाच्च दह्यन्ते कर्म नेतरत्"। तथा च न कदापि *स्वररहितो वेदपाठः कार्यः। ये स्वरविहीनम् ऋक्-यजुः-सामवेदाध्ययनं कुर्वन्ति ते अनूच ऋगादिभिर्दग्धा मरणानन्तरं वियोनिं सङ्गच्छन्ते॥ †तथैव स्वरज्ञानेन सहार्थज्ञानमपि कर्मणां सिद्धये वेदविद्भिरवश्यं बोद्धव्यम्। अज्ञानेनोच्चारिता एकाऽपि स्वरादिरहिता मात्राऽनर्थजनका भूत्वोभयं (यजमानमृत्विजञ्च) पातयति। वेदाध्ययनं कुर्वद्भिरेते "चुंलु-नौका-स्फुटो-दण्डी स्वस्तिको-मुष्टिकाकृतिः। एते वै हस्तदोषाः स्युः पँरशुश्चैव सप्तमः॥" इति सप्त हस्तदोषाः सुतरां परित्याज्या अत्र। वेदमंत्रोच्चारण-काले वर्णान्न हन्यान्नापि वेदमंत्रान्गानसदृशं गायेन्नापि शरीरमितस्ततः कम्पयेत्। वेदारम्भे प्रथमतो (प्रारम्भे) येन मध्यम-नीचोच्चप्लुतस्वरेणाध्ययनं समारब्धं तेनैव स्वरेण समापयेन्न तु मध्ये मंत्राणां नीचोच्चस्वरं विदध्यात्। दृष्टिरपि स्वकीयहस्ताग्रे संस्थाप्य मंत्रार्थमनुचिन्तयेत्। हस्तस्य चालनेऽपि हस्तस्योपरि वामदक्षिणभागयोर्यथागमनं तथैव मुखेन वर्णोच्चारणं स्वरप्रक्षेपश्च सर्वं युगपत् कुर्यात्।

* "हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम्। ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति॥" † "हस्तेन वेदं योऽधीते स्वरवर्णार्थसंयुतम्। ऋग्यजुःसामभिः पूतो ब्रह्मलोके महीयते॥"

न कदापि हस्तभ्रष्टः स्वरभ्रष्टो वा वेदपाठफलं प्राप्नोति। स्वकीयकण्ठस्वरस्य माधुर्यत्वसंपादनाय प्रत्यहं वेदपाठकर्त्रा "आम्रपालाशविल्वानामपामार्गशिरीषयोः। वाग्यतः प्रातरुत्थाय भक्षयेद्दन्तधावनम् ॥ खादिरश्च कदम्बश्च करवीरकरञ्जकौ। एते कण्टकिनः पुण्याः क्षीरिणस्तु यशस्विनः" इति वृक्षानां दन्तधावनं कर्तव्यं तेनास्य कण्ठस्य सूक्ष्मत्वं माधुर्यञ्च जायते॥ तथैव "त्रिफलां लवणाक्तेन भक्षयेच्छिष्यकः सदा। क्षीणमेधाजनन्येषा स्वरवर्णकरी तथा" ॥ एतेन लवणेन सहिता त्रिकला भाक्ष्येत्युपायोऽपि मेधाविवर्धनः प्रदर्शितः । अध्ययनवेलायां मध्येऽवसाने दक्षिणवामयोः स्वरयोश्चोर्ध्वक्षेपेऽधःक्षेपे च यत्र यत्राङ्गुलिनिर्देशः प्रदर्शितस्तत्र तत्र शिक्षानुसारेण कुमारीकुचयोरिव वत्सस्य शृङ्गयोरिव एतादृश ÷ उभयक्षेपः, ꣳ एतादृशोऽधःक्षेपः, एतादृशः ꣳ ꣴ दक्षिणवामयोः क्षेपोऽनुस्वारस्यैतादृशो ꣳ ह्रस्वः, एतादृशो ꣴ दीर्घः, मकारे मुष्टाकृतिस्तकारे कुण्डलाकृतिर्नकारे नखाग्रे स्पर्शनम् इत्यादि सर्वं गुरोः सकाशाज्ज्ञातव्यम् । अध्ययनविधौ के च संदेहमधिगच्छन्ति विद्याप्राप्तुवद्भिश्च के के दोषाः परिवर्जनीया इत्यपि तत्रोक्तम् । एतद्विषये भगवान् महर्षियाज्ञवल्क्यः स्वयं शिक्षायां कथयति वा यश्च वेदाध्ययनकाले उपांशु (अस्पष्टमात्रास्वरवर्णम्) अधीते यश्चाध्ययनकाले वित्रसन् (अनवधानपूर्वकम्) भीत इव पठति सोऽपि सर्वदा पाठकाले संदेहं प्राप्नोत्येव । यश्च जडः, अलसः, अतिरोगग्रस्तः, विस्तृतमनाश्च सोऽपि विद्यां नाधिगच्छति । अपि तु यश्च अहेर्गणाद् इव, सम्मानान्नरकाद् इव, स्त्रीभ्यो राक्षसीभ्य इव भयं हृदि सङ्गच्छते स एव विद्यामवाप्नोति । अथवा गुरोः शुश्रूषया पुष्कलधनप्रदानेन प्रतिविद्यया वा विद्या प्राप्यते नान्य उपायो विद्याप्राप्तये ।

**वेदमंत्रोच्चारे कया रीत्या नादः कार्यः**—तत्तत्पदानां नादविधावपि शाखायां वानरा इव "इहेहैषाम्" इत्यादौ, भाद्रपदे मेघा इव "शुक्रन्दुदुहे" इत्यादौ, कामलुब्धः कुक्कुट इव "कुक्कुटोसि" इत्यादौ, पुत्रवती नारी स्नेहाद्यथा मधुरं स्वपुत्रं चुम्बते तद्वत्

"युञ्जानः" इत्यादौ, हयं दृष्ट्वा वडवा स्वां योनिं शनैः शनैर्विकुरुते तद्वत् "सन्दुन्दुभे" इत्यादौ, दुर्दुरस्य-मण्डूकस्योदरं यथा प्रफुल्लते तद्वत् "अपाम्फेनेन" इत्यादौ भाराक्रान्तो यथा श्वासं गृह्णाति तद्वत् "अङ्ग्यः संम्भृतः" इत्यादौ, कामातुरा नारी यथा स्वं पतिं जारं वा "सि सि" इति शब्दविशेषेण यथाह्वयति तद्वत् "सिꣳहासि" इत्यादौ, आकाशे स्वीयौ पक्षौ विस्तार्यानन्तरं गृध्रस्तौ यथा संकोचयति तद्वत् "याद्भ्रींनस्ते" इत्यादौ, यथानादं वर्णाः प्रयोक्तव्याः। नात्र वेदोच्चारणेषु केनापि मनःपूतमुच्चारणं कर्तुं शक्यते। परंपरयाऽप्राप्तविद्या गुरूणां सन्निधौ स्थित्वा ये वेदविद्यां क्रमपुरःसरं नाधीतास्तेऽन्यशास्त्रेषु पारीणा अपि न याज्ञवल्क्यमहर्षिभिर्विरचितशिक्षा-निर्दिष्टवर्णोच्चारणाद्यनुकूलोच्चारणं तथाच कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्याध्ययनमन्तरा द्वित्वादिकञ्च सुस्पष्टतरं कर्तुं प्रभवन्ति।

**ऋग्यजुःसाममंत्राणां सागरत्वम्**।—शिक्षायां महर्षिणा याज्ञवल्क्येन "संहितासारबहुलः पदसंज्ञासमाकुलः। क्रमसन्धिसमाकीर्णो दुस्तरो मंत्रसागरः॥ ऋक्संहितां त्रिरभ्यस्य यजुषां वा समाहितः। साम्नां वा सरहस्याञ्च सर्वपापैः प्रमुच्यते॥ संहिता नयते सूर्यं पदञ्च शशिनः पदम्। क्रमश्च नयते सूक्ष्मं यत्तत्पदमनामयम्॥ कालिन्दी संहिता ज्ञेया पदमुक्ता सरस्वती। क्रमेणाऽऽवर्तिता गंगा शम्भोर्वाणी तु नान्यथा॥ यथा महाह्रदं प्राप्य क्षिप्तो लोष्टो विनश्यति। एवं दुश्चरितं सर्वं वेदे त्रिवृति मज्जति"॥ एतैः पञ्चभिः श्लोकैर्महर्षिणा ऋग्यजुःसाममंत्राणां दुस्तरं सागरत्वमुक्तम्। तथैव ऋग्यजुःसाममंत्राणां तिसृभिरावृत्तिभिर्महा-पापादीनां नाशसामर्थ्यमपि द्योतितम्। एवञ्च संहितापाठः कर्तारमादित्यलोकं नयति, पदपाठश्चन्द्रस्य लोकं प्रापयति। क्रमपाठ-श्चानामयमविक्रियं ब्रह्मणश्चिदात्मकस्य स्वरूपं नयति। वेदमंत्राणां गङ्गादिस्वरूपत्वमपि तत्रैव-यथा संहिताया कालिन्दी-यमुनास्वरूपं पदानां सरस्वतीस्वरूपं क्रमस्य गंगायाः स्वरूपं च ज्ञेयम्। यथा यमुनाद्या नद्यः स्वजले स्नानकर्तारं पवित्रीकुर्वन्ति तथैव वेदानां संहिता- ॥५॥

पदक्रमपाठकर्तारोऽपि तानधीत्य यमुनाप्रभृतिनदीषु कृतस्नानसदृशं पावित्र्यं लभन्त इति। एतदन्यच्चावश्यकं भगवता योगिवर्येण महर्षिणा याज्ञवल्क्येन कात्यायनेन च वैदिकानां हितकाम्यया सर्वं स्वे स्वे ग्रन्थे व्याख्यातम्। तत उद्धृत्य दिग्दर्शनरूपेण किञ्चिन्मयाऽत्र प्रदत्तम्॥

किञ्च विदितं भवतामस्मिन्भारतवर्षे बहूनां संस्कृतमुद्रणालयानां मध्ये पञ्च दशैव परिगणिता एव मूर्ध्नि मुद्रणालया वर्तन्त इति। तेषामपि मोहमयी(मुंबई)स्थः "**निर्णयसागरनामा मुद्रणालयः**" सर्वेषां मूर्ध्नि तिष्ठतीति च। अस्मिन्मुद्रणालये प्रायः संस्कृतभाषाया महाराष्ट्रीयभाषाया हिन्दीभाषायाश्च विविधा ग्रन्थाः प्रकाश्यन्ते। वेदवैदिककाव्यसाहित्यन्यायधर्मशास्त्रप्रभृतिसर्वेषु विषयेषु प्रकाश्यमाना ग्रन्थाः शुद्धाः सुस्पष्टाक्षरा विश्वसनीयाश्चेति प्रसिद्धमेव। प्रायो द्वित्रिषु वर्षेष्वपरिसमाप्तेषु सर्वविषयाणां ग्रन्थानां प्रकाशनं परंपरया भवत्येवानिशम्। पूर्वमियं शुक्लयजुर्वेदसंहिता तच्छास्त्रविद्द्वारैव संशोधिताऽऽसीत्। अधुना क्रियमाणे मुद्रापणे तस्याधिकारिवर्गैर्मह्यं संशोधनायोक्तम्। मया त्वस्याः संशोधने सर्वेषां वैदिकब्राह्मणानां पूर्वतोऽप्यधिकतरं समुपयोगः स्यादिति विचारितम्। ततोऽहं याज्ञवल्क्यमहर्षिभिर्विरचितयाज्ञवल्क्यशिक्षानुसारेण कात्यायनमहर्षिभिश्च विरचितकात्यायनशुक्लप्रातिशाख्यसूत्रानुसारेण च संशोधनाय प्रवृत्तोऽस्मि तथापि मन्येऽहं यद्दुस्तरेऽस्मिन्मंत्रसमुदायरूपमहासागरे मदीयावगाहनं मम "बालचेष्टैव" एतत्तत्तच्छास्त्रज्ञातार एवावबोधिष्यन्तीति। कात्यायनमहर्षिप्रणीतं श्रीशुक्लयजुःप्रतिशाख्यसूत्रम् अष्टाध्यायैर्युक्तं वर्तते तदप्यधुना दुर्लभतरम्। मया च तस्योपरि "आनन्दपुरवास्तव्यैर्वंशसुतोषटनामभिः सुप्रसिद्धैः पण्डितप्रवरैर्विरचितं कालिकातायां मुद्रापितं भाष्यं समाकलय्य मंत्रेषु यकारयकारयोर्भेदो वकारेऽपि द्वित्वैकत्वयोर्भेदः ꣳ ꣴ ꣵ ꣶ ँ व ह्य-त्क्न-ष्ण-द्वित्त्वादिकं तथैव व्याकरणरीत्या यत्र स्थले तथाविधं रूपं न जायते तत्र तथाविधस्य रूपस्य वैदिकव्याकरणरीत्या प्रदर्शनार्थं "अमृतवर्षिणी टिप्पणीं" कृत्वा यथामति यथाशक्ति यथाज्ञानं मंत्राणां संशोधन-

पुरःसरमियं संहिता तत्तच्छास्त्रेषु कृतपरिश्रमाणां विद्यासंपन्नानां भवतां पुरः समुपस्थाप्यते । शुक्लयजुर्वेदमंत्राणां द्वित्वादिकस्य संशोधनं कियद्दुर्बोधमनेकविधञ्च वरीवर्तते तत्तु त एव कल्प्स्यन्ते नात्र सामान्यतया सर्वेषामवसरः । प्रथमाध्यायमारभ्य त्र्यध्यायपर्यन्तं मदीयप्रकृतेरस्वास्थ्येन तत्तथैवान्यदपि दृष्टिदोषवशान्मानुषदोषत्वाद्वा क्वचित् संशोधने स्खलनं भवेत्तु तदेतत् ''नीरक्षीरविवेकन्यायेन'' द्रक्ष्यन्ति भवन्तो बहुश्रुता इति प्रार्थ्यते ।

मयात्र न विस्मर्तुं योग्यं मदीयपरमसुहृद्भिर्वेदवेदाङ्गविद्भी **"राजपिप्पलाप्रदेशान्तर्वर्तिनर्मदातटस्थभालोदग्राम-निवासिभिरपि सम्प्रति मुम्बापुरीवास्तव्यैः पंड्योपाह्वैः शास्त्रिवर्यैस्तुलजाशंकरधीरजरामशास्त्रिभिः"** प्रारंभत आसमाप्ति प्रातिशाख्यशिक्षादिद्वारा संशोधने टिप्पण्याञ्च समयाभावेऽपि स्वस्य यत्साहाय्यं स्वकीयं मत्वा परिदत्तम् ।

इति शम् ।

शके १८७२ चैत्रशुक्लप्रतिपदि रविवासरे

ता. १९-३-५०

इति प्रार्थयते मोहमयीकृतनिवासो विदुषामनुचरः

आचार्यावटङ्कत्रिकमजीतनुजनूरमृतलालशास्त्री

(जामनगर-वास्तव्यः)

# ॥ अथ श्रीवाजसनेयसंहितामन्त्राणामकाराद्यनुक्रमणिका ॥

| | अ० | मं० | | अ० | मं० | | अ० | मं० |
|---|---|---|---|---|---|---|---|---|
| अक्क्रुन्नकर्म्मं | ३ | ४७ | अग्नयेगृहपतये | १० | २३ | अग्निन्तम्मन्ये | १५ | ४१ |
| अक्क्रन्ददग्निः { | १२ १२ १२ | ६ २१ ३३ | अग्नयेत्वामह्यम् | ७ | ४७ | अग्निन्दूतम् | २२ | १७ |
| अक्क्षन्नमीमदन्त | ३ | ५१ | अग्नयेनीकवतेप्प्रथमजान् | २४ | १६ | अग्निःपुशुरासीत् | २३ | १७ |
| अक्क्षराजायकितवम् | ३० | १८ | अग्नयेनीकवतेरोहिताञ्जिः | २९ | ५९ | अग्निःपृथुर्द्धर्म्मणः | १० | २९ |
| अग्नऽआयूंषि { | १९ ३५ | ३८ १६ | अग्नयेपीवानम् | ३० | २१ | अग्निःप्प्रियेषु | १२ | ११७ |
| अग्नऽइन्द्रवरुण | ३३ | ४८ | अग्नयेस्वाहासोमाय | २२ | ६ | अग्निमुदृद्यहोतारम् { | ११ २८ २८ | ४५ २३ ४६ |
| अग्नयेकव्यवाहनाय | २ | २९ | अग्नयेस्वाहासोमायस्वाहेन्द्राय | २२ | २७ | अग्निँय्युनज्मि | १८ | ५१ |
| अग्नयेकुटरून् | २४ | २३ | अग्ना३ऽइपत्क्नीवन् | ८ | १० | अग्निरस्मिजन्मना | १८ | ६६ |
| अग्नयेगायत्राय | २९ | ६० | अग्नावग्निश्चरति | ५ | ४ | अग्निरेकाक्क्षरेण | ९ | ३१ |

सं. अ. १

| | अ० | मं० | | अ० | मं० | | अ० | मं० |
|---|---|---|---|---|---|---|---|---|
| अग्निर्ऋषिः पवमानः | २६ | ९ | अग्निस्तिग्मेन | १७ | १६ | अग्ने त्वम्पुरीष्यः | १२ | ५९ |
| अग्निर्ज्योतिर्ज्योतिः | ३ | ९ | अग्निꣳ स्तोमेन | २२ | १५ | अग्ने त्वꣳ सुजागृहि | ४ | १४ |
| अग्निर्ज्योतिषा | १३ | ४० | अग्निꣳ हृदयेन | ३९ | ८ | अग्ने दक्षधायः | २ | २० |
| अग्निर्देवता | १४ | २० | अग्निꣳ होतारम् | १५ | ४७ | अग्ने दिवोऽअर्णम् | १२ | ४९ |
| अग्निर्मूर्द्धा दिवः | 3<br>13<br>15 | 12<br>14<br>20 | अग्नीषोमयोरुज्जितिम् | २ | १५ | अग्ने नय सुपथा | 5<br>7<br>40 | 36<br>43<br>16 |
| अग्निर्वृत्राणि | ३३ | ९ | अग्नेऽअङ्गिरः | १२ | ८ | अग्ने पक्षतिर्वायोः | २५ | ४ |
| अग्निश्च पृथिवी | २६ | १ | अग्नेऽअच्छावदेह नः | ९ | २८ | अग्ने पत्नीरिहावह | २६ | २० |
| अग्निश्च मऽआपश्च | १८ | १४ | अग्ने गृहपते | २ | २७ | अग्ने पवस्व | ८ | ३८ |
| अग्निश्च मऽइन्द्रश्च | १८ | १६ | अग्ने जातान् | १५ | १ | अग्ने पावक रोचिषा | १७ | ८ |
| अग्निश्च मे घर्मश्च | १८ | २२ | अग्ने तमद्याश्वम् | 15<br>17 | 44<br>77 | अग्ने प्रेहि प्रथमः | १७ | ६९ |
| अग्निष्वात्तानृतुमतः | १९ | ६१ | अग्ने तव | १२ | 106 | अग्नेऽभ्यावर्त्तिन् | १२ | ७ |
| अग्निष्वात्ताः पितरः | १९ | ५९ | अग्ने त्वन्नः | 3<br>15<br>25 | 25<br>48<br>47 | अग्ने ब्रह्म गृभ्णीष्व | १ | १८ |

| | अ० | मं० | | अ० | मं० | | अ० | मं० |
|---|---|---|---|---|---|---|---|---|
| अग्नेयत्तेंदिवि | १२ | ४८ | अग्नेव्रतपास्त्वे | ५ ५ | ६ ४० | अच्छिन्नस्यते | ७ | १४ |
| अग्नेयत्तेंशुक्रम् | १२ | १०८ | अग्नेशर्द्धंमहते | ३३ | १२ | अजस्रमिन्दुम् | १३ | ४३ |
| अग्नेयुक्ष्वाहि | १३ | ३६ | अग्नेसहस्राक्ष | १७ | ७१ | अजारेपिशङ्गिला | २३ | ५६ |
| अग्नेरनीकम् | ८ | २४ | अग्नेसहस्वपृतनाः | ९ | ३७ | अजीजनोहिपवमान | २२ | १८ |
| अग्नेर्ज्जनित्रम् | ५ | २ | अग्नेस्त्वनूरसि | १ ५ | १५ १ | अजोह्यग्नेरजनिष्ट | १३ | ५१ |
| अग्नेर्भागोसि | १४ | २४ | अग्नेस्वाहाकृणुहि | २७ | २२ | अतिनिहोऽअतिस्रिधः | २७ | ६ |
| अग्नेर्वोपन्नगृहस्य | ६ | २४ | अग्रेणीरसि | ६ | २ | अतिविश्वाःपरिष्ठाः | १२ | ८४ |
| अग्नेवाजजिद्वाजंम् | २ | ७ | अग्नेबृहन्नुपसाम् | १२ | १३ | अत्यन्याँ२ऽअगान्नान्याम् | ५ | ४२ |
| अग्नेवाजस्य | १५ | ३५ | अङ्गान्यात्मन् | १९ | ९३ | अत्रपितरोमादयद्ध्वम् | २ | ३१ |
| अग्नेवेहोत्रम् | २ | ९ | अङ्गिरसोनः | १९ | ५० | अत्रातिरूपमुत्तमम् | २९ | १८ |
| अग्नेव्रतपतेव्रतंचरिष्यामि | १ | ५ | अचिक्रदद्वृषा | ३८ | २२ | अथैतानष्टौ | ३० | २२ |
| अग्नेव्रतपतेव्रतमचारिषम् | २ | २८ | अच्छायमेति | २७ | १४ | अदब्धेभिःसवितः | ३३ ३३ | १९ ८४ |

| | अ० | मं० | | अ० | मं० | | अ० | मं० |
|---|---|---|---|---|---|---|---|---|
| अदि॑तिर्द्यौरदि॑तिः | २५ | २३ | अ॒द्भ्यः स्वाहा॑ | २२ | २५ | अनु॑तेशुष्मं॑स् | ३३ | ६७ |
| अदि॑तिष्ट्वादे॒वी | ११ | ६१ | अ॒द्याद्दे॒वाऽउदि॑ता | ३३ | ४२ | अनु॑त्तमा॑तेमघवन् | ३३ | ७९ |
| अदि॑त्त्यास्त्वक् | ४ | ३० | अधायथा॑नः | १९ | ६९ | अनु॑त्त्वामा॒ताम॑यताम् | ४ | २० |
| अदि॑त्त्यास्त्वापृ॒ष्ठे | १४ | ५ | अधाहृस्यग्ने॒क्रतो॑ः | १५ | ४५ | अनु॑त्त्वारथो॒ऽअनु | २९ | १९ |
| अदि॑त्त्यास्त्वामू॒र्द्धन् | ४ | २२ | आधि॑नऽइन्द्रै॒षाम् | ३३ | ४७ | अनु॑नोद्द्यानु॑मतिः | ३४ | ९ |
| अदि॑त्त्यैरास्न्नासि॒विष्णो॑ | १ | ३० | आधि॑पत्क्न्यसि | १५ | १४ | अनु॑वीरैरनु॑पुष्प्यास्म्म | २६ | १९ |
| अदि॑त्त्यैरास्न्ना॑सी | ३८ | ३ | अद्ध्य॑वोचदधिवक्त्का | १६ | ५ | अनै॑जदेकुम्मन॑सः | ४० | ४ |
| अदि॑त्त्यैरास्न्नास्यदि॑तिष्ठे | ११ | ५९ | अद्ध्व॑ठ्य॑ऽअद्रि॑भिः | २० | ३१ | अन्तर॑ग्ने॒रु॒चात्त्वम् | १२ | १६ |
| अदि॑त्त्यै॑व्युन्द॑नम् | २ | २ | अनु॒ड्ड्वा॒ह्वयं॑ः | १४ | १० | अन्त॒रा मि॒त्रावरु॑णा | २९ | ६ |
| अद॑श्रमस्यकु॒तव॑ः | ८ | ४० | अनु॒ड्ड्वाहम॒न्वार॑भामहे | ३५ | १३ | अन्त॒श्चरतिरोचना | ३ | ७ |
| अ॒द्भ्यः क्षी॒रंव्य॑पिबत् | १९ | ७३ | अना॑धृष्टापु॒रस्त्ता॑त् | ३७ | १२ | अन्त॒स्ते॒द्द्यावा॑पृथि॒वी | ७ | ५ |
| अ॒द्भ्यः सम्भृ॑तः | ३१ | १७ | अ॒नाधृ॒ष्ष्यो॒जा॒तवे॑दाः | २७ | ७ | अ॒न्धन्तमः प्रवि॑शन्ति | [illegible] | [illegible] |

| | अ० | मं० | | अ० | मं० | | अ० | मं० |
|---|---|---|---|---|---|---|---|---|
| अन्धस्स्थान्धं० | ३ | २० | अपाधमदभिशस्तीः | ३३ | ९५ | अपोदेवामधुमतीः | १० | १ |
| अन्नपतेन्नस्य | ११ | ८३ | अपान्त्वेमन् | १३ | ५३ | अपोदेवीरुपसृज | ११ | ३८ |
| अन्नात्परिस्रुतोरसम् | १९ | ७५ | अपाःपृष्ठमसि | ११/१३ | २०/२ | अप्नस्वतीमश्विना | ३४ | २९ |
| अन्यदेवाहुर्विद्यायाः | ४० | १३ | अपाम्पुरः | ६ | १० | अप्स्वग्नेसधिष्टवमौ | १२ | ३६ |
| अन्यदेवाहुःसम्भवात् | ४० | १० | अपाम्फेनेननमुचेः | १९ | ७१ | अप्स्वन्तरमृतम् | ९ | ६ |
| अन्यवापोर्द्धमासानाम् | २४ | ३७ | अपामिदन्न्ययनम् | १७ | ७ | अबोद्ध्यग्निःसमिधा | १५ | २४ |
| अन्यावोऽअन्याम् | १२ | ८८ | अपारुम्पृथिव्यै | १ | २६ | अभिगोत्राणिसहसा | १७ | ३९ |
| अन्वग्निरुषसा | ११ | १७ | अपाछंरसम् | ९ | ३ | अभित्यन्देवःसवितार | ४ | २५ |
| अन्विदनुमतेत्त्वम् | ३४ | ८ | अपितेषुत्रिषु | २३ | ५० | अभित्त्वाशूरनोनुमो | २७ | ३५ |
| अपश्यङ्गोपाम् | ३७ | १७ | अपेतवीतविचसर्पता | १२ | ४५ | अभिधाऽअसिभुवनमसि | २२ | ३ |
| अपाघमपकिल्बिषम् | ३५ | ११ | अपेतोयन्तु | ३५ | १ | अभिप्रवन्तसमनेव | १७ | ९६ |
| अपाङ्गम्भन् | १३ | ३० | अपोऽअद्य | २० | २२ | अभिभूरसि | १० | २८ |
| अपातामश्विनाघर्म्मम् | ३८ | १३ | | | | | | |

| | अ० | मं० | | अ० | मं० | | अ० | मं० |
|---|---|---|---|---|---|---|---|---|
| अभियुज्ज्ङ्गणीहि नः | २६ | २१ | अयन्दक्षिणाविश्वकर्म्मात | | | अयम्पश्चाद्विश्वव्यचास्तस्यरथ | १५ | १७ |
| अभीमम्महिमादिवम् | ३८ | १७ | स्वरथस्वनश्च | १५ | १६ | अयम्पुरोभुवः | १३ | ५४ |
| अभीषुणःसखीनाम् { | २७, ३६ | ४१, ६ | अयन्नोऽअग्निः { | ५, ७ | ३७, ४४ | अयम्पुरोहरिकेशः | १५ | १५ |
| अभ्यर्षतसुष्टुतिम् | १७ | ९८ | अयमग्निःपुरीष्यः | ३ | ४० | अयंवाम्मित्रावरुणा | ७ | ९ |
| अभ्यादधामिसमिधम् | २० | २४ | अयमग्निर्गृहपतिः | ३ | ३९ | अयंवेनः | ७ | १६ |
| अभ्यावर्त्तस्वपृथिवि | १२ | १०३ | अयमग्निर्वीरतमः | १५ | ५२ | अयꣳसहस्रमृषिभिः | ३३ | ८३ |
| अभ्रिरसिनार्य्यसि | ११ | १० | अयमग्निःसहस्रिणः | १५ | २१ | अयꣳसोऽअग्निः | १२ | ४७ |
| अमीषाञ्चित्तम् | १७ | ४४ | अयमिहप्रथमः { | ३, १५, ३३ | १५, २६, ६ | अरथैतस्थ | १० | ३ |
| अमुत्रभूयादध | २७ | ९ | अयमुत्तरात् | १५ | १८ | अर्द्धऽऋचैरुक्थानाम् | १९ | २५ |
| अमेवनःसुहवाः | २६ | २४ | अयमुपर्य्यर्वाग्वसुः | १५ | १९ | अर्द्धमासाःपरूꣳषि | २३ | ४१ |
| अयन्तेयोनिर्ऋत्वियः { | ३, १२, १५ | १४, ५२, ५६ | अयम्पश्चाद्विश्वव्यचास्तस्य | | | अर्म्मेभ्योहस्तिपम् | ३० | ११ |
| अयन्दक्षिणाद्विश्वकर्म्मा | १३ | ५५ | चक्षुः | १३ | ५६ | अर्य्यमणम्बृहस्पतिम् | ९ | २७ |

| | अ० | मं० |
|---|---|---|
| अर्वाञ्चोऽअद्य | ३३ | ५१ |
| अवतत्य धनुष्ट्वम् | १६ | १३ |
| अवपतन्तीरवदन् | १२ | ९१ |
| अवभृथनिचुम्पुणः | ३<br>८ | ४८<br>२७ |
| अवरुद्रमदीमहि | ३ | ५८ |
| अवसृष्टापरापत | १७ | ४५ |
| अविर्न्नमेषः | १९ | ९० |
| अवेष्टा दन्दशूकाः | १० | १० |
| अवोचामकवये | १५ | २५ |
| अꣳशुना ते | २० | २७ |
| अꣳशुरꣳशुष्टे | ५ | ७ |
| अꣳशुश्च मे | १८ | १९ |

| | अ० | मं० |
|---|---|---|
| अश्मन्नूर्जम् | १७ | १ |
| अश्मन्वती रीयते | ३५ | १० |
| अश्मा च मे | १८ | १३ |
| अश्याम तङ्कामम् | १८ | ७४ |
| अश्वस्तूपरः | १२<br>३५ | ९०<br>४ |
| अश्वस्तूपरः | २४ | १ |
| अश्वस्य त्वा | ३७ | ९ |
| अश्वावतीर्ग्गोमतीः | ३४ | ४० |
| अश्वावतीꣳ सोमावतीम् | १२ | ८१ |
| अश्विनं कृतस्य ते | २० | ३५ |
| अश्विना गोभिः | २० | ७३ |
| अश्विना घर्म्मम् | ३८ | १२ |

| | अ० | मं० |
|---|---|---|
| अश्विना तेजसा | २० | ८० |
| अश्विना नमुचेः | २० | ५९ |
| अश्विना पिबताम् | २० | ९० |
| अश्विना भिषजम् | २० | ६४ |
| अश्विना हविः | २० | ६७ |
| अश्विभ्याञ्चक्षुः | १९ | ८९ |
| अश्विभ्याम्पच्यस्व | १० | ३१ |
| अश्विभ्याम्पिन्वस्व | ३८ | ४ |
| अश्विभ्याम्प्रातःसवनम् | १९ | २६ |
| अश्वो घृतेन | २९ | १० |
| अषाढँ युत्सु पृतनासु | ३४ | २० |
| अषाढासि सहमाना | १३ | २६ |

| | अ० | मं० | | अ० | मं० | | अ० | मं० |
|---|---|---|---|---|---|---|---|---|
| अष्टौव्यख्यत् | ३४ | २४ | अस्माद्त्वमधि | ३५ | २२ | अह्नैपारावतान् | २४ | २५ |
| असंख्यातासहस्राणि | १६ | ५४ | अस्मिन्महत्यर्णवे | १६ | ५५ | अन्हुतमसि | १ | ९ |
| असवेस्वाहावसवेस्वाहा | २२ | ३० | अस्मेरुद्रामेहना | ३३ | ५० | आकूतिमग्निम् | ११ | ६६ |
| असिसुमोऽअस्यादित्यः | २९ | १४ | अस्मेवोऽअस्त्विन्द्रियम् | ९ | २२ | आकूत्यैप्रयुजे | ४ | ७ |
| असुन्वन्तमयजमानम् | १२ | ६२ | अस्यप्रत्नामनु | ३ | १६ | आकृष्णेनरजसा | ३३ / ३४ | ४३ / ३१ |
| असुर्य्यानामतेलोकाः | ४० | ३ | अस्याजरासः | ३३ | १ | आक्रन्दयबलम् | २९ | ५६ |
| असौयस्ताम्रः | १६ | ६ | अस्येदिन्द्रोवावृधे | ३३ | ९७ | आक्रम्यवाजिन् | ११ | १९ |
| असौयासेना | १७ | ४७ | अहः केतुना | ३७ | २१ | आगत्यवाज्यद्ध्वानम् | ११ | १८ |
| असौयोवसर्प्पति | १६ | ७ | अहरहरप्रयावम् | ११ | ७५ | आगन्मविश्ववेदसम् | ३ | ३८ |
| अस्कन्नमद्य | २ | ८ | अहानिशम्भवन्तुनः | ३६ | ११ | आग्नेयः कृष्णग्रीवः | २९ | ५८ |
| अस्ताव्यग्निः | १२ | २९ | अहाव्यग्नेहविः | २० | ७९ | आग्रयणअसि | १८ | २० |
| अस्माकमिन्द्रः | १७ | ४३ | अहिरिवभोगैः | २९ | ५१ | आघायेऽअग्निम् | ७ | ३२ |

| | अ० | मं० |
|---|---|---|
| आक्न्याजानु | १९ | ६२ |
| आच्छच्छन्दः | १५ | ५ |
| आजंघ्नन्ति | २९ | ५० |
| आजिघ्रकलशम् | ८ | ४२ |
| आजुह्वानऽईड्यः | २९ | २८ |
| आजुह्वानासरस्वती | २० | ५८ |
| आजुह्वानःसुप्रतीकः | १७ | ७३ |
| आतम्भज | १२ | २७ |
| आतत्तऽइन्द्रायवः | ३३ | २८ |
| आतिथ्यंरूपम् | १९ | १४ |
| आतिष्ठन्तम्परि | ३३ | २२ |
| आतिष्ठवृत्रहन् | ८ | ३३ |
| आतूनऽइन्द्र | ३३ | ६५ |
| आतेवत्सः | १२ | ११५ |
| आत्मनेमे | ७ | २८ |
| आत्मन्नुपस्थे | १९ | ९२ |
| आत्मानन्ते | २९ | १७ |
| आत्वाजिघर्मि | ११ | २३ |
| आत्वाहार्षम् | १२ | ११ |
| आदित्यङ्गर्भम् | १३ | ४१ |
| आदित्यैर्नः | २९ | ८ |
| आधत्तपितरः | २ | ३३ |
| आनऽइडाभिः | ३३ | ३४ |
| आनऽइन्द्रोदूरात् | २० | ४८ |
| आनऽइन्द्रोहरिभिः | २० | ४९ |
| आनेऽएतुमनः | ३ | ५४ |
| आनासत्त्यात्रिभिः | ३४ | ४७ |
| आनोनियुद्भिः | २७ | २८ |
| आनोभद्राः | २५ | १४ |
| आनोमित्रावरुणा | २१ | ८ |
| आनोयज्ञन्दिविस्पृशम् | ३३ | ८५ |
| आनोयज्ञम्भारती | २९ | ३३ |
| आन्त्राणिस्थालीः | १९ | ८६ |
| आपतयेत्वा | ५ | ५ |
| आपयेस्वाहा | ९ | २० |
| आपवस्व | ८ | ६३ |

| | अ० | मं० | | अ० | मं० | | अ० | मं० |
|---|---|---|---|---|---|---|---|---|
| आपश्चित् | ३३ | १८ | आयङ्गौःपृश्निः | ३ | ६ | आरोदसीऽअपृणत् | ३३ | ७५ |
| आपोऽअस्म्मान्मातरः | ४ | २ | आयद्विषेन्नृपतिम् | ३३ | ११ | आवाचोमद्ध्यमरुहत् | १५ | ५१ |
| आपोदेवीः | १२ | ३५ | आयन्तुनःपितरःसोम्यासः | १९ | ५८ | आवायोभूषशुचिपाः | ७ | ७ |
| आपोहुष्ठत् | २७ | २५ | आयातमुप | ३३ | ८८ | आविर्म्मर्य्याः | १० | ९ |
| आपोहिष्ठामयोभुवः | ११, ३६ | ५०, १४ | आयात्विन्द्रः | २० | ४७ | आविश्श्वतः | ११ | २४ |
| आप्प्यायस्वमदिन्तम | १२ | ११४ | आयासायस्वाहा | ३९ | ११ | आवोदेवासः | ४ | ५ |
| आप्प्यायस्वसमेतुते | १२ | ११२ | आयुर्म्मेपाहि | १४ | १७ | आशुःशिशानः | १७ | ३३ |
| आब्रह्मन्ब्राह्मणः | २२ | २२ | आयुर्यज्ञेन | ९, १८, २२ | २१, २९, ३३ | आशुस्त्रिवृद्धान्तः | १४ | २३ |
| आमन्द्रैरिन्द्र | २० | ५३ | आयुष्मानग्ने | ३५ | १७ | आश्रावयेति | १९ | २४ |
| आमावाजस्यप्रसवः | ९ | १९ | आयुष्यंवर्चस्यम् | ३४ | ५० | आसन्दीरूपम् | १९ | १६ |
| आमूरजप्प्रत्यावर्त्तय | २९ | ५७ | आयोष्ट्वासदने | १५ | ६३ | आसीनासोऽअरुणीनाम् | १९ | ६३ |
| | | | आरात्रिपार्थिवम् | ३४ | ३२ | आसुतेसिञ्चत | ३३ | २१ |

| | अ० | मं० |
|---|---|---|
| आसुष्व्यर्यन्ती | २९ | ३१ |
| आहम्पितृन् | १९ | ५६ |
| इच्छन्तित्त्वा | ३४ | १८ |
| इडऽएहि | ३, ३८ | २७, २ |
| इडाभिरग्निरीड्ड्य॑ः | २१ | १४ |
| इडाभिर्भुक्षानाप्नोति | १९ | २९ |
| इडामग्ने | १२ | ५१ |
| इडायास्त्वापदे | ३४ | १५ |
| इडेरन्तेहव्ये | ८ | ४३ |
| इदमापः | ६ | १७ |
| इदमुत्तरात् | १३ | ५७ |
| इदम्पितृभ्यः | १९ | ६८ |

| | अ० | मं० |
|---|---|---|
| इदम्मेब्रह्म | ३२ | १६ |
| इदंविष्णुर्विचक्रमे | ५ | १५ |
| इदःहविः | १९ | ४८ |
| इन्दुर्दक्षः | १८ | ५३ |
| इन्द्रऽआसान्नेता | १७ | ४० |
| इन्द्रगोमन्निहायाहि | २६ | ४ |
| इन्द्रघोषस्त्वा | ५ | ११ |
| इन्द्रन्दुरः कवष्यः | २० | ४० |
| इन्द्रन्दैवीर्विशः | १७ | ८६ |
| इन्द्रंविश्वाः | १२, १५, १७ | ५६, ६१, ६१ |
| इन्द्रमरुत्वऽइह | ७ | ३५ |
| इन्द्रमिद्धरी | ८ | ३५ |

| | अ० | मं० |
|---|---|---|
| इन्द्रवायूऽइमे | ७, ३३ | ८, ५६ |
| इन्द्रवायूबृहस्पतिम् | ३३ | ४५ |
| इन्द्रवायूसुसन्दृशा | ३३ | ८६ |
| इन्द्रश्चमरुतश्च | ८ | ५५ |
| इन्द्रश्चसम्राट् | ८ | ३७ |
| इन्द्रः सुत्रामास्ववान् | २० | ५१ |
| इन्द्रः सुत्रामाहृदयेन | १९ | ८५ |
| इन्द्रस्यक्रोडः | २५ | ८ |
| इन्द्रस्यरूपम् | १९ | ९१ |
| इन्द्रस्यवज्रोमरुताम् | २९ | ५४ |
| इन्द्रस्यवज्रोसि | ९, १० | ५, २१ |
| इन्द्रस्यवृष्णः | १७ | ४१ |

| | अ० | मं० | | अ० | मं० | | अ० | मं० |
|---|---|---|---|---|---|---|---|---|
| इन्द्रस्यस्यूरसीन्द्रस्य | ५ | ३० | इन्द्रायेन्दुम् | २० | ५७ | इमम्मैवरुण | २१ | १ |
| इन्द्रस्यौजस्स्थ | ३७ | ६ | इन्द्रेमम्प्रतराम् | १७ | ५१ | इमꣳसाहस्रम् | १३ | ४९ |
| इन्द्राग्नीऽअपादियम् | ३३ | ९३ | इन्द्रेहिमत्स्यन्धसः | ३३ | २५ | इमꣳस्तनमूर्ज्जस्वन्तम् | १७ | ८७ |
| इन्द्राग्नीऽअव्यथमानाम् | १४ | ११ | इन्द्रोविश्श्वस्य | ३६ | ८ | इमाऽउत्त्वापुरूवसो | ३३ | ८१ |
| इन्द्राग्नीऽआगतम् | ७ | ३१ | इन्द्रोवृत्रम् | ३३ | २६ | इमान्तेधियम् | ३३ | २९ |
| इन्द्राग्नीमित्रावरुणा | ३३ | ४९ | इन्धानास्त्वा | ३ | १८ | इमागिरऽआदित्त्येब्भ्यः | ३४ | ५४ |
| इन्द्राग्न्योःपक्षतिः | २५ | ५ | इमञ्जीवेब्भ्यः | ३५ | १५ | इमातेवाजिन् | २९ | १६ |
| इन्द्रायत्त्वा { | ६, ३८ | ३२, ८ | इमन्देवाः | ९, १० | ४०, १८ | इमानुकम्भुवना | २५ | ४६ |
| इन्द्रायाहिचित्रभानो | २० | ८७ | इमन्नोदेव | ११ | ८ | इमामगृब्भ्णन्नशनाम् | २२ | २ |
| इन्द्रायाहितूतुजानः | २० | ८९ | इमम्मूर्णायुम् | १३ | ५० | इमामेऽअग्नऽइष्टकाः | १७ | २ |
| इन्द्रायाहिधियेषितः | २० | ८८ | इमम्माहिꣳसीरेकशफम् | १३ | ४८ | इमारुद्रायतवसे | १६ | ४८ |
| इन्द्रायाहिवृत्रहन् | २६ | ५ | इमम्माहिꣳसीर्द्विपादम् | १३ | ४७ | इमौतेपक्षावजरौ | १८ | ५२ |

| | अ० | मं० | | अ० | मं० | | अ० | मं० |
|---|---|---|---|---|---|---|---|---|
| इयन्तेसुज्ञिया | ४ | १३ | इषेरायेरमस्व | १३ | ३५ | ईशानायुपरस्वतः | २४ | २८ |
| इयंवेदिःपरः | २३ | ६२ | इष्कर्त्तारमध्वरस्य | १२ | ११० | ईशावास्यम् | ४० | १ |
| इयुत्त्यग्रंऽआसीत् | ३७ | ५ | इष्कृतिर्नामवः | १२ | ८३ | उक्ताःसञ्चराऽएताः { | २४<br>२४ | १५<br>१० |
| इयंदुस्यायुः | १० | २५ | इष्टोऽअग्निराहुतः | १८ | ५७ | उक्ताःसञ्चराऽएताःशुनासी- | २४ | १९ |
| इयमुपरि | १३ | ५८ | इष्टोयज्ञः | १८ | ५६ | उक्थेभिर्वृत्रहन्तमा | ३३ | ७६ |
| इरुज्यन्नग्ने | १२ | १०९ | इहरतिरिह | ८ | ५१ | उक्षासमुद्रः | १७ | ६० |
| इरावतीधेनुमती | ५ | १६ | इहैवाग्नेऽअधि | २७ | ४ | उखाङ्कृणोतु | ११ | ५७ |
| इषमूर्जमहमितः | १२ | १०५ | ईडितोदेवैर्हरिवान् | २० | ३८ | उग्रँल्लोहितेन | ३९ | ९ |
| इषश्चोर्जश्च | १४ | १६ | ईडेन्यश्चासि | २९ | ३ | उग्रश्चभीमश्च | ३९ | ७ |
| इषिरोविश्वव्यचा | १८ | ४१ | ईदृक्षासऽएतादृक्षासः | १७ | ८४ | उग्राविघनिना | ३३ | ६१ |
| इषेत्वोर्जेत्वा | १ | १ | ईदृङ्चान्यादृङ्च | १० | ८१ | उच्चातेजातम् | २६ | १६ |
| इषेपिन्वस्वोर्जे | ३८ | १४ | ईमर्मान्तासः | ३४ | २१ | उच्छुष्माऽओषधीनाम् | १२ | ८२ |

| | अ० | मं० | | अ० | मं० | | अ० | मं० |
|---|---|---|---|---|---|---|---|---|
| उतनोहिर्बुध्न्यः | ३४ | ५३ | उदीचीमारोह | १० | १३ | उद्वयन्तमसस्परि | २०, २७, ३५, ३८ | २१, १०, २४, १४ |
| उतस्म्मास्य | ९ | १५ | उदीरतामवरः | १९ | ४९ | उन्नतऽऋषभः | २४ | ८ |
| उतेदानीम् | ३४ | ३७ | उदुतिष्ठ | ११ | ४१ | उपज्मन्नुप | १७ | ६ |
| उरक्राममहते | ११ | २१ | उदुत्तमम् | १२ | १२ | उपत्वाग्ने | ३ | ४ |
| उत्तानायामव | ३४ | १४ | उदुत्यञ्जातवेदसम् | ७, ८, ३३ | ४१, ४१, ३१ | उपनःसूनवः | ३३ | ७७ |
| उत्तिष्ठन्नोजसा | ८ | ३९ | उदुत्वाविश्वे | १२, ३७ | ३१, ५२ | उपप्रयन्तोऽअध्वरम् | ३ | ११ |
| उत्तिष्ठब्रह्मणस्पते | ३४ | ५६ | उदेनमुत्तराम् | १७ | ५० | उपप्रागाच्छसनम् | २९ | २३ |
| उत्थायबृहती | ११ | ६४ | उदेपाम्बाहू | ११ | ८२ | उपप्रागात्परमम् | २९ | २४ |
| उत्सक्थ्याऽअव | २३ | २१ | उदूग्राभश्च | १७ | ६४ | उपप्रागात्सुमन्मेधायि | २५ | ३० |
| उत्सादेभ्यःकुब्जम् | ३० | १० | उदिवंस्तभानाम् | ५ | २७ | उपयामगृहीतोसिध्रुवोसि | ७ | २५ |
| उदक्रमीत् | ११ | २२ | उद्धर्षयमघवन् | १७ | ४२ | उपयामगृहीतोसिप्रजापतये | २३ | ४ |
| उदग्नेतिष्ठ | १३ | १२ | उद्बुध्यस्वाग्ने | १५, १८ | ५४, ६१ | उपयामगृहीतोसिबृहस्पतिसुतस्य | ८ | ९ |

| | अ० | मं० |
|---|---|---|
| उपयामगृहीतोसिमधवेत्त्वा | ७ | ३० |
| उपयामगृहीतोसिसावित्रोसि | ८ | ७ |
| उपयामगृहीतोसिसुशर्म्मासि | ८ | ८ |
| उपयामगृहीतोसिहारिरसि | ८ | ११ |
| उपयामगृहीतोसीन्द्रायत्त्वा | ७ | २२ |
| उपयामगृहीतोस्यग्नयेत्त्वा | ८ | ४७ |
| उपयामगृहीतोस्यन्तः | ७ | ४ |
| उपयामगृहीतोस्यश्विभ्याम् | २० | ३३ |
| उपयामगृहीतोस्याग्रयणः | ७ | २० |
| उपयामगृहीतोस्यादित्येभ्यः | ८ | १ |
| उपयामगृहीतोस्याश्विनम् | १९ | ८ |
| उपश्वासयपृथिवीम् | २९ | ५५ |
| उपहूताऽइह | ३ | ४३ |
| उपहूताःपितरः | १९ | ५७ |
| उपहूतोद्यौष्पितोपमाम् | २ | ११ |
| उपह्वरेगिरीणाम् | २६ | १५ |
| उपावसृजत्त्मन्या | २९ | ३५ |
| उपावीरस्युपदेवान् | ६ | ७ |
| उपास्मैगायतानरः | ३३ | ६२ |
| उभापिबतम् | ३४ | २८ |
| उभाभ्यान्देव | १९ | ४३ |
| उभावामिन्द्राग्नी | ३ | १३ |
| उभेसुश्चन्द्र | १५ | ४३ |
| उरुविष्णो | [illegible] | [illegible] |
| उशन्तस्त्वा | १९ | ७० |
| उशिक्त्वन्देव | ८ | ५० |
| उशिक्पावकः | १२ | २४ |
| उशिगसि | ५ | ३२ |
| उपस्तश्चित्रम् | ३४ | ३३ |
| उपासानक्तम् | २० | ६१ |
| उपासानक्ता | २० | ४१ |
| उस्रावेतम् | ४ | ३३ |
| उपेयुर्ह्वी | २१ | १७ |
| ऊर्क्चमेसूनृताचमे | १८ | ९ |
| ऊर्गस्याङ्गिरस्यूर्णम्प्रदाः | ४ | १० |
| ऊर्जंवहन्तीः | २ | ३४ |

| | अ० | मं० | | अ० | मं० | | अ० | मं० |
|---|---|---|---|---|---|---|---|---|
| ऊर्ज्जोनपाज्जातवेदः | १२ | १०८ | ऋजवेत्त्वासाधवेत्त्वा | ३७ | १० | ऋताषाडृतधामा | १८ | ३८ |
| ऊर्ज्जोनपातम् | २७ | ४४ | ऋजीतेपरि | २९ | ४९ | ऋतुथेन्द्रः | २० | ६५ |
| ऊर्द्ध्वऽऊषुणः | ११ | ४२ | ऋतञ्चमेमृतञ्चमे | १८ | ६ | ऋधगित्था | ३३ | ८७ |
| ऊर्द्ध्वमेनम् | २३ | २७ | ऋतꣳसत्यम् | ११ | ४७ | एकयाच | २७ | ३३ |
| ऊर्द्ध्वाऽअस्यसमिधः | २७ | ११ | ऋतजिच्च | १७ | ८३ | एकयास्तुवत | १४ | २८ |
| ऊर्द्ध्वामारोह | १० | ११ | ऋतयेस्तेनहृदयम् | ३० | १३ | एकस्त्वष्टुः | २५ | ४२ |
| ऊर्द्ध्वामेनाम् | २३ | २६ | ऋतवस्तऽ | २३ | ४० | एकस्मैस्वाहा | २२ | ३४ |
| ऊर्द्ध्वाम्भवप्रति | १३ | १३ | ऋतवस्ते | २६ | १४ | एकाचमे | १८ | २४ |
| ऋक्सामयोःशिल्पे | ४ | ९ | ऋतवस्थऽऋतावृधः | १७ | ३ | एजतुदशमास्यः | ८ | २८ |
| ऋचंवाचम् | ३६ | १ | ऋतञ्चसत्यञ्च | १७ | ८२ | एणय्यह्नामण्डूकः | २४ | ३६ |
| ऋचेत्त्वारुचेत्त्वा | १३ | ३९ | ऋतवानम्महिषम् | १२ | १११ | एतत्ताननाथ | १८ | ६० |
| ऋचोनामास्मि | १८ | ६७ | ऋतावानंवैश्वानरम् | २६ | ६ | एतत्तेरुद्रावसम् | ३ | ६१ |


॥ १४ ॥

| | अ० | मं० | | अ० | मं० | | अ० | मं० |
|---|---|---|---|---|---|---|---|---|
| एतन्तैदेवसवितः | २ | १२ | एवुश्छन्दः | १५ | ४ | एह्यूपुत्रवांणि | २६ | १३ |
| एतंऽसंधस्त्थ | १८ | ५९ | एवेदिन्द्रम् | २० | ५४ | ऐन्द्रःप्प्राणः | ६ | २० |
| एताऽअंर्षन्ति | १७ | ९३ | एषच्छागःपुरोऽ | २५ | २६ | ओजंश्चमे | १८ | ३ |
| एताऽउंवःसुभगाः | २९ | ३ | एषतैंगायत्रः | ४ | २४ | ओमांसश्चर्षणीधृतः | ७ | ३३ |
| एताऽऐन्द्राग्ग्नाः | २४ | ८ | एषतैनिर्ऋते | ९ | ३५ | ओषंधयुःप्प्रातिगृभ्णीत | ११ | ४८ |
| एतावंद्रूपम् | १९ | ३१ | एषतेरुद्रभागः | ३ | ५७ | ओषंधयुःसमं | १२ | ९६ |
| एतावांनस्य | ३१ | ३ | एषवुस्तोमः | ३४ | ४८ | ओषंधीःप्प्रति | १२ | ७७ |
| एदमंगन्म | ४ | १ | एषस्यवाजी | ९ | १४ | ओषंधीरिति | १२ | ७८ |
| एधोंस्येधिषीमहिं { | २० ३८ | २३ २५ | एषातेंऽअग्ने | २ | १४ | कुकुभंःरूपम् | ८ | ४९ |
| एनाविश्श्वांन्यर्यऽआ | २६ | १८ | एषातेंशुक्रतनूः | ४ | १७ | कत्र्यंस्यविष्ठाः | २३ | ५७ |
| एनावोंऽअग्निम् | १५ | ३२ | एषावुःसासुत्त्या | ९ | १२ | कुदाचुनप्प्रयुंच्छसि | ८ | ३ |
| एभिन्नोंऽअर्कैः | १५ | ४६ | एषोहंदेवः | ३२ | ४ | कुदाचुनस्तुरींरसि { | ३ ८ | ३४ २ |

| | अ० | मं० | | अ० | मं० | | अ० | मं० |
|---|---|---|---|---|---|---|---|---|
| कुल्याऽइव | १७ | ९७ | कायुस्वाहा | २२ | २० | कुलायिनीघृतवती | १४ | २ |
| कयात्वन्नऽऊत्या | ३६ | ७ | कार्षिरसि | ६ | २८ | कुविदुङ्गयवम् { | १० ११ २३ | ३२ ६ ३८ |
| कयानश्चित्रः | २७ ३६ | ३९ ४ | काव्ययोराजानैषु | ३३ | ७२ | कृणुष्वपाजः | १३ | ९ |
| कल्पन्तान्ते | ३५ | ९ | कास्विदासीत् { | २७ २६ | ११ ५३ | कृष्णग्रीवाऽआग्नेयाः { | २४ २४ २४ | [illegible] ६ १४ |
| कवष्युोनव्यचस्वतीः | २० | ६० | किᳬस्वित्सूर्य्यसमम् | २३ | ४७ | कृष्णाभौमाः | २४ | १० |
| कस्त्वाच्छ्यति | २३ | ३९ | किᳬस्विदासीत् | १७ | १८ | कृष्णोसि | २ | १ |
| कस्त्वायुनक्ति | १ | ६ | किᳬस्विद्वनङ्कः | १७ | २० | केतुङ्कृण्वन् | २९ | ३७ |
| कस्त्वाविमुञ्चति | २ | २३ | कुक्कुटोसि | १ | १६ | केष्वन्तःपुरुषः | २३ | ५१ |
| कस्त्वासत्यः | २७ ३६ | ४० ५ | कुतस्त्वमिन्द्र | ३३ | २७ | कोऽअस्यवेदभुवनस्य | २३ | ५९ |
| काऽईमरे | २३ | ५५ | कुम्भोवनिष्टुः | १९ | ८७ | कोऽदात्कस्माऽ | ७ | ४८ |
| काण्डात्काण्डात् | १३ | २० | कुर्वन्नेवेहकर्म्माणि | ४० | २ | कोऽसिकतमः { | [illegible] | [illegible] |
| कामङ्कामदुघे | १२ | ७२ | | | | कःस्विदेकाकी { | [illegible] | [illegible] |



३४

| | अ० | मं० | | अ० | मं० | | अ० | मं० |
|---|---|---|---|---|---|---|---|---|
| ऋमंदृव्वमुग्निना | १७ | ६५ | गायुत्रञ्छन्दौसि | ३८ | ६ | घृतम्मिमिक्षे | १७ | ८८ |
| ऋव्यादंमुग्निम् | ३५ | १९ | गायुत्रीत्रिष्टुप् | २३ | ३३ | घृतवंतीभुवंनानाम् | ३४ | ४५ |
| क्षुत्रस्यंत्वापुरस्याय | ३८ | १९ | गायुत्रेणंत्त्वा | १ | २७ | घृताचीस्त्थः | २ | १९ |
| क्षुत्रस्युयोनिंरसि | २० | १ | गावुऽउपांवता | [illegible] | [illegible] | घृताच्यसिजुहूः | २ | ६ |
| क्षुत्रस्योल्वंमसि | १० | ८ | गृहामाविंभीत | ३ | ४१ | घृतेनुसीतां | १२ | ७० |
| क्षुत्रेणाग्नेस्वायुः | २७ | ५ | गोत्रभिदंङ्गोविदंम् | १७ | ३८ | घृतेनाक्तौपुशून् | ६ | ११ |
| क्षुपोरांजन् | १५ | ३७ | गोभिुर्न्नसोमंम् | २० | ६६ | घृतेनाअन्त्सम्पुथः | २९ | २ |
| खुड्गोवैंश्वदेवः | २४ | ४० | गोमंदुपुणांसुत्त्या | २० | ८१ | चक्षुंपःपिता | १७ | २५ |
| गुणानांन्त्वा | २३ | १९ | ग्रहांऽऊर्ज्जाहुतयः | ९ | ४ | चत्तंस्रश्चमुष्टौचंमे | १८ | २५ |
| गुन्धुर्वस्त्त्वां | २ | ३ | ग्रीष्मेणंऽऋतुनां | २१ | २४ | चतुंस्त्रिंशत्तन्तंवः | ८ | ६१ |
| गर्भोऽअुस्योषंधीनाम् | १२ | ३७ | घर्म्मैतत्तेपुरीषम् | ३८ | २१ | चतुंस्त्रिंशद्वाजिनंः | २५ | ४१ |
| गर्भोदेवानांम् | ३७ | १४ | घृतङ्घृतपावानः | ६ | १९ | चतुंःस्रक्तिर्न्नाभिंः | ३८ | २० |

| | अ० | मं० | | अ० | मं० | | अ० | मं० |
|---|---|---|---|---|---|---|---|---|
| चत्वारिशृङ्गात्रयः | १७ | ९१ | जवोयस्ते | ९ | ९ | तँय्युज्ञम्बुर्हिषि | ३१ | ९ |
| चन्द्रमाऽअप्स्वन्तरा | ३३ | ९० | जिह्वामेभुद्रम् | २० | ६ | तंवोदुस्मम् | २६ | ११ |
| चन्द्रमामनसः | ३१ | १२ | जीमूतस्येवभवति | २९ | ३८ | तच्चक्षुर्देवहितम् | ३६ | २४ |
| चित्तिञ्जुहोमि | १७ | ७८ | जुषाणोबुर्हिः | २० | ४ | ततोविराडजायत | ३१ | ५ |
| चित्पतिर्मा | ४ | ४ | ज्यैष्ठ्यञ्चमे | १८ | ४ | तत्सवितुर्वरेण्यम् | ३ २२ ३० | ३५ ९ २ |
| चित्रन्देवानाम् | ७ १३ | ४२ ४६ | ज्योतिरसि | ५ | ३५ | तत्सूर्यस्य | ३३ | ३७ |
| चिदसितयादेवतया | १२ | ५३ | तऽआयजन्त | १७ | २८ | तदश्विना | १९ | ८२ |
| चिदसिमनासि | ४ | १९ | तम्पत्नीभिः | १५ | २० | तदस्यरूपममृतम् | १९ | ८१ |
| चोदयित्रीसूनृतानाम् | २० | ८५ | तम्प्रत्नथा | ७ | १२ | तदिदासभुवनेषु | ३३ | ८० |
| जनयत्यैत्वा | १ | २२ | तत्त्वायामि | १८ २१ | ४९ २ | तदेजतितन्नैजति | ४० | ५ |
| जनस्यगोपाः | १५ | २७ | तन्त्वाशोचिष्ठ | ३ | २६ | तदेव | ३२ | १ |
| जनिष्ठाऽउग्रः | ३३ | ६४ | तन्त्वासमिद्भिः | ३ | ३ | तद्विप्रासोविपन्यवः | ३४ | ४४ |

| | अ० | मं० | | अ० | मं० | | अ० | मं० |
|---|---|---|---|---|---|---|---|---|
| तद्विष्णोः परमम् | ६ | ५ | तपसे स्वाहा | ३९ | १२ | तस्मा ऽअरङ्गमाम वः | ११ ३२ | ५३ १२ |
| तनूनपाच्छुचिव्रतः | २१ | १३ | तप्सायनीमे | ५ | ९ | तस्मादश्वा | ३१ | ८ |
| तनूनपात्पथः | २९ | २६ | तमिद्गर्भम् | १७ | ३० | तस्माद्यज्ञात्सर्वहुतः सम्भृतम् | ३१ | ७ |
| तनूनपादसुरः | २७ | १२ | तमिन्द्रम्पशवः | २० | ६९ | तस्माद्यज्ञात्सर्वहुत ऽऋचः | ३१ | ६ |
| तनूपा ऽअग्नेसि | ३ | १७ | तमीशानञ्जगतः | २५ | १८ | तस्य वयᳬसुमतौ | २० | ५२ |
| तनूपाभिषजा | २० | ५६ | तमुत्त्याद्दध्यङ् | ११ | ३३ | तस्यास्तेसत्यसवसः | ४ | १८ |
| तन्तुन्नारायस्पोषेण | १५ | ७ | तमुत्त्यापात्थ्यः | ११ | ३४ | ता ऽअस्यसूददोहसः | १३ १५ | ५५ १० |
| तन्नस्तुरीपम् | २७ | २० | तरणिर्विश्वदर्शतः | ३३ | ३६ | ता ऽउभौचतुरः पदः | २३ | २० |
| तन्नोवातः | २५ | १७ | तवभ्रमासः | १३ | १० | तान ऽआवोढम् | २० | ८३ |
| तन्मित्रस्य | ३३ | ३८ | तवंवायवृतस्पते | २७ | ३४ | तानासत्या | २० | ७४ |
| तपश्चतपस्यश्च | १५ | ५७ | तवशरीरम् | २९ | २२ | तान्पूर्वया | २५ | १६ |
| तपसेकौलालम् | ३० | ७ | तवायᳬसोम | २६ | २३ | ताभिषजा | २० | ७५ |

| | अ० | मं० | | अ० | मं० | | अ० | मं० |
|---|---|---|---|---|---|---|---|---|
| ताᳮसंवितुः | १७ | ७४ | तेजोंसिशुक्क्रम् | २२ | १ | त्रीन्त्संमुद्रान् | १३ | ३१ |
| तिरश्चीनं÷ | ३३ | ७४ | तेनोऽअर्वन्तः | ९ | १७ | त्र्यम्बकँय्यजामहे | ३ | ६० |
| तिस्रऽइडा | २१ | १९ | तेहिपुत्रासं÷ | ३ | ३३ | त्र्यविंयोगायुत्र्यै | २४ | १२ |
| तिस्रस्त्रेधा | २० | ६३ | त्रयादेवाः | २० | ११ | त्र्यविंश्चमे | १८ | २६ |
| तिस्रोदेवीर्बुर्हिः | २७ | १९ | त्रातारमिन्द्रम् | २० | ५० | त्र्यायुषञ्जमदग्नेः | ३ | ६२ |
| तिस्रोदेवीर्हविषा | २० | ४३ | त्रिधाहितम्पुणिभिं÷ | १७ | १२ | त्वन्नोऽअग्नेतवं | ३४ | १३ |
| तीव्रान्घोषान् | २९ | ४४ | त्रिᳬंशद्धामुविराजति | ३ | ८ | त्वन्नोऽअग्नेवरुणस्य | २१ | ३ |
| तुभ्युन्ताऽअङ्गिरः | १२ | [illegible] | त्रिपादूर्ध्वः | ११ | ४ | त्वमंग्नेऽईडितः | १९ | ६६ |
| तेऽअस्ययोषणे | २७ | १७ | त्रीणितऽआहुः | २९ | १५ | त्वमंग्नेद्युभिं÷ | ११ | २७ |
| तेऽआचरन्ती | २९ | ४१ | त्रीणिपुदा | ३४ | ४३ | त्वमंग्नेप्रथमः | ३४ | १२ |
| तेजं÷पशूनाम् | १९ | ९५ | त्रीणिशता | ३३ | ७ | त्वमंग्नेव्रतपाः | ४ | १६ |
| तेजोंसितेजं÷ | १९ | ९ | त्रिवृदंसि | १५ | ९ | त्वमुङ्गप्रशंᳬसिषः | ६ | ३७ |

| | अ० | मं० | | अ० | मं० | | अ० | मं० |
|---|---|---|---|---|---|---|---|---|
| त्वमिन्द्रप्प्रतूर्त्तिष्ष्व | ३३ | ६६ | त्वामग्ग्नेऽअङ्गिरसः | १५ | २८ | दिग्व्भ्यःस्वाहा | ३९ | २ |
| त्वमिमाऽओषधीः | ३४ | २२ | त्वामग्ग्नेपुष्क्करात् | १५ | २२ | दिवःपृथिव्व्याः | २९ | ५३ |
| त्वमुत्तमास्योषधे | १२ | १०१ | त्वामग्ग्नेयजमानाः | १२ | २८ | दिवस्प्परि | ३२ | १८ |
| त्वँय्यविष्ठ | १३ १८ | ३२ ७७ | त्वामग्ग्नेवृणते | २७ | ३ | दिविधाऽइमम् | ३८ | ११ |
| त्वयाहिनः | १९ | ५३ | त्वामद्यऽऋषे | २१ | ६१ | दिविपृष्टः | ३३ | ९२ |
| त्वष्टातुरीपः | २१ | २० | त्वामिद्धिहवामहे | २७ | ३७ | दिविविष्णुः | २ | २५ |
| त्वष्टादधच्छुष्ममम् | २० | ४४ | त्वाँहिमन्द्रतमम् | ३३ | १३ | दिवोमूर्द्धासि | १८ | ५४ |
| त्वष्टावीरन्देवकामम् | २९ | ९ | त्वेऽअग्ग्नेस्वाहुतः | ३३ | १४ | दिवोवाविष्णऽउत | ५ | १९ |
| त्वँसोमपितृभिः | १९ | ५४ | दक्षिणामारोह | ११ | ७८ | दीक्षायैरूपम् | १९ | १३ |
| त्वँसोमप्प्रचिकितः | १९ | ५२ | दधिक्क्राव्णोऽअकारिषम् | २३ | ३२ | दीर्घायुस्त्ते | १२ | १०० |
| त्वाङ्गन्धर्व्वाः | १२ | ९८ | दँष्ट्राव्भ्यामलिम्लून् | ११ | ७८ | दुरोदेवीर्द्दिशः | २१ | १६ |
| त्वाञ्चित्रश्श्रवस्तम | १५ | ३१ | दस्रायुवाकवः | ३३ | ५८ | | | |

| | अ० | मं० | | अ० | मं० | | अ० | मं० |
|---|---|---|---|---|---|---|---|---|
| दृतेदृꣳहंमा | ३६ | १८ | देवम्बर्हिर्वैयोधसम् | २८ | ३५ | अ. मं. अ. मं. अ. मं. अ. | मं. | |
| दृतेदृꣳहंमामित्रस्यं | ३६ | १८ | देवम्बर्हिर्वारितीनाम् | २१ | ५७ | १ २१ ५ २६ ६ ३० ११ | ९ | |
| दृशानोरुक्क्मः | १२/१२ | १/२५ | देवम्बर्हिर्वारितीनान्देवमिन्द्रः | २८ | २१ | १ २४ ६ १ ९ ३० ११ | २८ | |
| | | | | | | ५ २२ ६ ९ ९ ३८ १८ | ३७ | |
| दृष्ट्वापरिस्रुतं | १९ | ७९ | देवम्बर्हिर्वारितोनान्देवमि- | | | २० ३ ३७ १ ३८ १ | | |
| दृष्ट्वारूपेव्याकरोत् | १९ | ७७ | न्द्रंवयोधसम् | २८ | ४४ | | | |
| दृꣳहस्वदेवि | ११ | ५९ | देवश्रुतौदेवेष्वाघोषतम् | ५ | १७ | देवस्यंसवितुर्मतिम् | २२ | १४ |
| देवऽइन्द्रः | २१/२८ | ५५/१९ | देवसवितः | ११/३० | १/१ | देवस्याहꣳसवितुःसवे | २/२ | १३/१३ |
| देवकृतस्यैनसः | ८ | १३ | देवसवितरेषते | ५ | ३९ | देवहूर्य्यज्ञऽआच | १७ | ६२ |
| देवन्देवंवोवसे | ३३ | ९१ | देवस्त्वासवितः | ११ | ६३ | देवागातुविदः | ८ | २१ |
| देवम्बर्हिःसरस्वती | २१ | ४८ | देवस्यचेततः | २२ | ११ | देवादेवानांभिषजा | २१ | ५३ |
| देवम्बर्हिरिन्द्रम् | २८ | १२ | देवस्यत्वासवितुःप्रसवे | १ | १० | देवादैव्याहोतारा | २८ | ४० |

| | अ० | मं० |
|---|---|---|
| देवानांभद्रासुमतिः | २५ | १५ |
| देवान्दिवमगन् | ८ | ६० |
| देवायज्ञमतन्वत | १९ | १२ |
| देवासोहियष्मा | ३३ | ९४ |
| देवीऽउषासानक्ता | २८ | ३७ |
| देवीऽउषासानक्तेन्द्रम् | २८ | १४ |
| देवीऽउषासावश्विना | २१ | ५० |
| देवीऽऊर्जाहुतीदुघे | २१ २८ २८ | ५३ १६ ३९ |
| देवीजोष्ट्रीवसुधिती | २८ २८ | १५ ३८ |
| देवीजोष्ट्रीसरस्वती | २१ | ५१ |
| देवीद्यावापृथिवी | ३७ | ३ |

| | अ० | मं० |
|---|---|---|
| देवीरापऽएषवो | ८ | २६ |
| देवीरापःशुद्धाः | ६ | १३ |
| देवीरापोऽअपान्नपात् | ६ | २७ |
| देवीर्द्वारऽइन्द्रम् | २८ | १३ |
| देवीर्द्वारोऽअश्विना | २१ | ४९ |
| देवीर्द्वारोवयोधसम् | २८ | ३६ |
| देवीस्तिस्रस्तिस्रः | २८ २१ | १८ ५४ |
| देवेनंनोमनसा | ३४ | २३ |
| देवेभ्योहि | ३३ | ५४ |
| देवोअग्निःस्विष्टकृत् | २८ २८ २८ | ५८ ३३ ४५ |
| देवोदेवैः | २१ २८ | ५६ २० |
| देवोनराशंसः | २८ | ४२ |

| | अ० | मं० |
|---|---|---|
| देवोवनस्पतिः | २८ | ४९ |
| देव्यौवम्र्यः | ३७ | ४ |
| देहिमेददामिते | ३ | ५० |
| दैव्याऽअध्वर्यवस्त्वा | २३ | ४२ |
| दैव्यामिमाना | २० | ४२ |
| दैव्यायधर्त्रे | १७ | ५६ |
| दैव्यावध्वर्यूऽ | ३३ ३३ | ३३ ७६ |
| दैव्याहोताराऽऊर्ध्वम् | २७ | १८ |
| दैव्याहोताराप्रथमा | २९ | ३२ |
| दैव्याहोतारा | २१ | १८ |
| द्याम्मालेखीः | ५ | ४३ |
| द्युभिरक्तुभिः | ३४ | ३० |

| | अ० | मं० | | अ० | मं० | | अ० | मं० |
|---|---|---|---|---|---|---|---|---|
| द्यौः शान्तिः | ३६ | १७ | द्वेसृतीऽअंशृणवम् | १९ | ४७ | धूरसिधूर्व | १ | ८ |
| द्यौरासीत्पूर्वचित्तिः | २३ / २३ | १२ / ५४ | धन्वनागाः | २९ | ३९ | धूर्ष्ट्वीरस्यपाग्ने | १ | १७ |
| द्यौस्तेपृथिव्युम् | २३ | ४३ | धुर्त्तादिवः | ३७ | १६ | ध्रुवक्षितिध्रुवयोनिः | १४ | १ |
| द्यौस्तेपृष्ठम् | ११ | २० | धाताराति: | ८ | १७ | ध्रुवसदंत्वा | ९ | २ |
| द्रप्सश्चस्कन्द | १३ | ५ | धानाःकरम्भः | १९ | २१ | ध्रुवासिधरुणा | १३ | १६ |
| द्रविणोदाःपिपीषति | २६ | २२ | धानानांरूपम् | १९ | २२ | ध्रुवासिधरुणेतः | १३ | ३४ |
इन्द्रोवीर्य्यमकृणोदूर्द्धोंध्वरऽआस्त्थात् ॥८॥ अग्ग्नेव्वेः ॥ अग्ग्ने

वेहोत्त्रंव्वेर्द्दूत्त्यमवतान्त्वान्द्यावापृथिवीऽअवत्त्वन्द्यावापृथिवी

स्विष्टकृद्देवेभ्यऽइन्द्रऽआज्ज्येनहविषाभूत्स्वाहासञ्ज्योतिषा

ज्ज्योतिः ॥९॥ [३-२] मयीदम् ॥ मयीदमिन्द्रऽइन्द्रियन्दधा

त्त्वस्म्मान्नायोमघवानःसचन्ताम् ॥ अस्म्माकꣳसन्त्त्वाशिषः

संहि. सत्त्यानःसन्त्वाशिषऽउपहूतापृथिवीमातोपमाम्पृथिवी मा पू. अ.
॥२०॥ ताह्वयतामग्निराग्नीध्रात्स्वाहा॥१०॥उपहूतोद्यौः॥ उपहूतो
द्यौष्पितोपमान्द्यौष्पिताह्वयतामग्निराग्नीध्रात्स्वाहा॥ देव
स्यत्त्वासवितुःप्प्रसवेश्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्याम् ॥
प्रतिगृह्णाम्म्यग्नेष्ट्वास्येनप्प्राश्नामि॥११॥ एतन्ते। देवसवित
र्यज्ञम्प्राहुर्ब्बृहस्प्पतयेब्ब्रह्मणे॥ तेनयज्ञमव तेनयज्ञपतिन्तेन ॥१०॥
मामव॥१२॥ मनोजूतिः॥ मनोजूतिर्ज्जुषतामाज्ज्यस्यबृहस्प्प

तिर्य्यज्ञमिमन्तनोत्त्वरिष्टँय्यज्ञꣳसमिमन्दधातु ॥ विश्वेदेवास

ऽइहमादयन्तामो ॥ ३म्प्रतिष्ठ ॥१३॥ एषाते ॥ एषातेऽअग्नेस

मित्तयाव्वर्द्धस्वचाचप्प्यायस्व ॥ व्वर्द्धिषीमहिचव्वयमाचप्प्यासि

षीमहि ॥ अग्नेव्वाजजिद्वाजन्त्वाससृवाꣳसंव्वाजजितꣳसम्मा

र्ज्जिम ॥१४॥ [५-३] अग्नीषोमयोरुज्जितिम् ॥ अग्नीषोमयोरु

ज्जितिमनूज्जेषंव्वाजस्यमाप्प्रसवेनप्प्रोहामि॥अग्नीषोमौतमपनु

दताँय्योस्म्मान्द्वेष्टियञ्चव्वयन्द्विष्म्मोव्वाजस्यैनम्प्रसवेनापोहा

॥ ११ ॥ मि ॥ इन्द्राग्ग्न्योरुज्जितिमनूज्जेषंव्वाजंस्यमाप्प्रसवेनप्प्रोहांमि ॥
इन्द्राग्ग्नीतमपंनुदतांँस्योस्म्मान्द्वेष्टियञ्चंव्वयन्द्विष्ष्मोव्वाजंस्यै
नम्प्रसवेनापोंहामि ॥ १५ ॥ व्वसुंब्भ्यस्त्त्वा । रुद्रेब्भ्यंस्त्त्वादि
त्त्येब्भ्यंस्त्त्वासञ्जानाथान्द्यावापृथिवीमित्त्रावरुंणौत्त्वाव्वृष्ट्या
वताम् ॥ व्यन्तुव्वयोक्क्तꣳरिहांणामरुतांम्पृषंतीर्गच्छव्वशापृश्निर्
ब्भूत्त्वादिवंङ्गच्छततोंनोव्वृष्टिमावह ॥ चक्षुष्प्पाऽअंग्ग्नेसिचक्षुं ॥ ११ ॥
र्म्मेपाहि ॥ १६ ॥ यम्पंरिधिम् ॥ यम्पंरिधिम्पर्य्यधंत्थाऽअग्ग्नेदेव

पणिभिंर्गुंह्यमांनꣳ॥ तन्तंऽएतमनुजोषंम्भराम्म्येषनेत्त्वदंपचे
तयांताऽअग्नेश्प्रियम्पाथोपीतम् ॥ १७॥ सꣳस्रवभांगास्त्थे
षाबृहन्तंः प्प्रस्तरेष्ठाश्परिधेयांश्चदेवाः ॥ इमांव्वाचंमभिविश्श्वे
गृणन्तंऽआसद्यास्मिन्न्बर्हिषिंमादयद्ध्वꣳस्वाहाव्वाट् ॥ १८ ॥
घृताचीस्त्थꣳ॥ घृताचीस्त्थोधुर्य्यौपातꣳसुम्नेस्त्थंः सुम्नेमां
धत्तम् ॥ यज्ञनमंश्चतऽउपचयज्ञस्यंशिवेसन्तिष्ठस्वस्विष्टेमेस
न्तिष्ठस्व ॥१९॥ [५-४]अग्नेदब्धायो ॥ शीतमपाहिमादिद्योः

॥१२॥ पाहिप्प्रसिँत्त्यैपाहिदुरिँष्ट्ट्यैपाहिदुरद्दमन्न्याऽअविषन्नंः पितुङ्कृ
णुसुषदायोनौस्वाहाव्वाडग्ग्नयेसंव्वेशपतयेस्वाहासरँस्वत्त्यैयशो
भगिन्न्यैस्वाहा ॥ २० ॥ व्वेदोसि ॥ व्वेदोसियेनत्त्वन्देवव्वेददेवे
भ्योव्वेदोभवस्तेनमह्यंव्वेदोभूयाः ॥ देवागातुविदोगातुंव्वित्त्वा
गातुमित ॥ मनसस्प्पतऽइमन्देवयज्ञँस्वाहाव्वातेधाः ॥२१॥
सम्बर्हिः ॥ सम्बर्हिरङ्क्ताँहविषाघृतेनसमादित्त्यैर्व्वसुभिःसम्म ॥१२॥
रुद्भिः ॥ समिन्द्रोव्विश्वदेवेभिरङ्क्तान्दिव्यन्नभोगच्छतुयत्स्वाहा

॥ २२ ॥ कस्त्त्वां ॥ कस्त्त्वाव्विमुंञ्चतिसत्त्वाव्विमुंञ्चतिकस्म्मै
त्त्वाव्विमुंञ्चतितस्म्मैत्त्वाव्विमुंञ्चति ॥ पोषांयुरक्षंसाम्भागोसि
॥ २३ ॥ [४] संव्वर्च्चंसा ॥ संव्व[1]र्च्चंसापयंसासन्तनूभिरगंन्म
हिमनंसासꣳशिवेनं ॥ त्वं[2]ष्ट्वांसुदत्त्रोव्विदंधातुरायोनुंमार्ष्टुतन्न्वो
यद्विलिंष्टम् ॥२४॥ दिविव्विष्ण्णुं÷ ॥ दिविव्विष्ण्णुर्व्यंक्रꣳस्तजा
गंतेनच्छन्दंसाततोनिर्भंक्तोयोस्म्मान्द्वेष्टियञ्चंव्वयन्द्विष्म्मो

---

१ संव्वर्च्चसा । अत्र "परं तु रेफहकाराभ्याम्" ( शु. य. प्रा. ४ अ. १७१ सू. ) इत्यनेन रकारात्परस्य चकारस्य द्वित्वम् । २ त्वष्टा । अत्र ऊष्मान्तस्थाभ्यश्च स्पर्शः ( शु. य. प्रा. ४ अ. १०२-सू. ) इत्यनेन टकारस्य द्वित्वम् । एवं दिवि विष्णुः । द्विष्मः । योस्मान् । इत्येतादृशेषु बोध्यम् ।

न्तरिक्षेव्विष्णुर्व्यक्रᳪंस्तत्रैष्टुभेनच्छन्दसाततोनिर्भक्तोयो
स्मान्द्वेष्टियञ्चव्वयन्द्विष्मः पृथिव्यांव्विष्णुर्व्यक्रᳪंस्तगाय
त्रेणच्छन्दसाततोनिर्भक्तोयोस्मान्द्वेष्टियञ्चव्वयन्द्विष्मो
स्मादन्नादस्यैप्प्रतिष्ठायाऽअगन्मस्वः सञ्ज्योतिषाभूम ॥२५॥
स्वयम्भूरसि ॥ स्वयम्भूरसिश्श्रेष्ठोरश्मिर्वर्चोदाऽअसिवर्चोमे
देहि ॥ सूर्यस्यावृतमन्वावर्त्ते ॥ २६ ॥ अग्नेगृहपते । सुगृ
हपतिस्त्वयाग्नेहङ्गृहपतिनाभूयासᳪं सुगृहपतिस्त्वम्मयाग्ने

गृहपंतिनाभूयाꣳ॥ अस्त्थूरिणौगार्हपत्त्यानिसन्तुशतꣳहिमाꣳ
सूर्य्यस्यावृतमन्वावर्त्ते ॥ २७ ॥ अग्ग्नेव्रतपते । व्रतमंचारिषु
न्तदंशकन्तन्मेराधीदमहँय्यऽएवास्मिसोस्मि ॥ २८ ॥
[ ५ ] अग्ग्नयेकव्व्यवाहनाय । स्वाहासोमायपितृमतेस्वाहा ॥
अपंहताऽअसुंरारक्षाꣳसिवेदिषदः ॥ २९ ॥ येरूपाणि ।
प्प्रतिमुञ्चमानाऽअसुंराःसन्तःस्वधयाचरन्ति ॥ परापुरोनि
पुरोयेभरन्त्यग्निष्टाँल्लोकात्प्रणुदात्यस्मात् ॥ ३० ॥ अत्र

संहि. पितरः ॥ अत्रपितरोमादयध्वँयथाभागमावृषायध्वम् ॥ पू. अ.
॥ १४ ॥ अमीमदन्तपितरोयथाभागमावृषायिषत ॥ ३१ ॥ नमोवः ॥ २ ॥
पितरोरसायनमोवःपितरःशोषायनमोवःपितरोजीवायनमो
वःपितरःस्वधायैनमोवःपितरोघोरायनमोवःपितरोमन्यवेन
मोवःपितरःपितरोनमोवोगृहान्नःपितरोदत्तसतोवःपितरोदे
ष्मैतद्वःपितरोवासऽआधत्त ॥ ३२ ॥ आधत्त । पितरो ॥ १४ ॥
गर्भङ्कुमारम्पुष्करस्रजम् ॥ यथेहपुरुषोसत् ॥ ३३ ॥ ऊर्ज्ज

वृहन्तीः ॥ ऊर्ज्जं॑वृहन्ती॑रमृतंघृतम्पयः॑कीलालम्परिस्रुतम् ॥ स्वधास्त्थतर्पयंतमेपितॄन् ॥ ३४ ॥ [ ६ ] इतिश्रीवाजसनेय संहितायांद्वितीयोऽध्यायः ॥ २ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाकसूत्रम् । समिधाग्निं, भूर्भुवःस्वश्चतुष्का, वग्निर्ज्योतिर्द्वे, उपप्रयन्तोऽअध्वरंपाङ्क्तिंशतिः, भूर्भुवःस्वश्चतस्रो, गृहामातिस्रः, प्रघासिनोहवामहे पञ्च, पूर्णादर्विद्वे, ऽअक्षन्नमीमदन्तषडे, पते

१ ऊर्जम् । अत्र "परं तु रेफहकाराभ्याम्" ( शु. य. प्रा. ४ अ. १०१ सू. ) रेफहकाराभ्यां परं व्यञ्जनं द्विरुच्यते । तेन रकारात्परस्य जकारस्य द्विर्भावः

सप्त, दश ॥ १० ॥ त्रिषष्टिः ॥ ६३ ॥ हरिः ॐ ॥ सुमिधा
ग्निम् ॥ सुमिधाग्निन्दुंवस्यतघृतै[1]र्बोधयतातिंथिम् ॥ आस्मिंर्
न्हृव्याजुंहोतन ॥ १ ॥ [2]सुसंमिद्धायशोचिषें । घृतन्तीव्रञ्जुंहोतन ॥
अग्नयेंजातवेंदसे ॥ २ ॥ तन्त्वां । सुमिद्धिंरङ्गिरोघृतेनंवर्द्ध
यामसि ॥ बृहच्छोंचायविष्ठ्य ॥ ३ ॥ उपंत्वा । ग्नेहुविष्म्मंतीर्घृ
ताचींर्य्यन्तुहर्य्यत ॥ जुषस्वंसुमिधोमर्म ॥ ४ ॥ [४-१] भूर्भुवंः ॥ ॥ १५ ॥

१ घृतैर्बोधयता । अत्र परं तु रेफहकाराभ्याम् ( शु. य. प्रा. ४ अ. १०१ सू. ) इत्यनेन रकारात्परस्य बकारव्यञ्जनस्य द्वित्वम् । २ सुसमिद्धाय । अत्र भाविभ्यः सः षं समानपदे ( शु. य. प्रा. ३ अ. ५६ सू. ) इत्यनेन सुकारात्परस्य सकारस्य षकारे प्राप्ते अनुसन्तनोतु बृहस्पतिसुतस्यसुसमिद्धाय० ( शु. य. प्रा. ३ अ. ८२ क. ) इत्यनेन सकारस्य प्रकृतिभावः न षत्वम् ।

भूर्भुवःस्वर्द्यौरिवभूम्नापृथिवीवंवरिम्णा ॥ तस्यास्तेपृथिविदे
वयजनिपृष्ठेग्निमन्नादमन्नाद्यायादधे ॥५॥ आयम् ॥ आयङ्गौः
पृश्निरक्रमीदसदन्मातरम्पुरः ॥ पितरञ्चप्रयन्त्स्वः ॥ ६ ॥
अन्तश्चरति । रोचनास्यप्राणादपानती ॥ व्यख्यन्महिषोदि
वम् ॥ ७ ॥ त्रिंशद्धाम ॥ त्रिंशद्धामविराजतिवाक्पतङ्गायधी
यते ॥ प्रतिवस्तोरहद्युभिः ॥८॥ [४-२] अग्निर्ज्योतिः ॥ अ

१ वाक्पतिः । अत्र स्वरात्संयोगादिर्द्विरुच्यते सर्वत्र ( शु. य. प्रा. ४ अ. १०० सू. ) इत्यनेन ककारस्य द्वित्वम्, तत्र पूर्वः ककारो द्विरुक्तिजः पकारः संयोगः ।

संहि. ग्निर्ज्ज्योतिर्ज्ज्योतिरग्निःस्वाहासूर्य्योज्ज्योतिर्ज्ज्योतिꣳसूर्य्यꣳ पू. अ.
॥ १६ ॥ स्वाहा ॥ अग्निर्व्वर्च्चोज्ज्योतिर्व्वर्च्चꣳस्वाहासूर्य्योव्वर्च्चोज्ज्योतिर्व्वर्च्चꣳ ॥ ३ ॥
स्वाहा ॥ ज्योतिꣳसूर्य्यꣳसूर्य्योज्ज्योतिꣳस्वाहा ॥ ९ ॥ सजूर्द्दे
वेन । सवित्रासजूरात्र्येन्द्रंवत्त्या ॥ जुषाणोऽअग्निर्व्वेतुस्वाहा ॥
सजूर्द्देवेनसवित्रासजूरुषसेन्द्रंवत्त्या ॥ जुषाणःसूर्य्योव्वेतुस्वाहा
॥ १० ॥ [ २-३ ] उपप्प्रयन्तोऽअद्ध्वरम् ॥ उपप्प्रयन्तोऽअद्ध्वर ॥ १६ ॥

१ उपप्प्रयन्तोऽअद्ध्वरम् अत्र एदोद्भ्यां पूर्वमकारः ( शु. य. प्रा. ४ अ. ६१ सू. ) इत्यनेन सर्वत्र पूर्वरूपे प्राप्ते प्रकृतिभाव ऋक्षु ( शु. य. प्रा. ४ अ. ८१ सू. ) इत्यनेन गाहमानादिभिः सूत्रैरभिनिहितेभ्योऽन्यत्र ऋक्षु प्रकृतिभावविधानसामर्थ्यान्न पूर्वरूपम् ।

म्मन्त्रंवोचेमाग्नये ॥ आरेऽअस्म्मेचंशृण्वते ॥ ११ ॥ अग्नि
र्म्मूर्द्धा । दिवः[1]ककुत्पतिः पृथिव्याऽअयम् ॥ अपाᳪंरेताᳪंसि
जिन्वति ॥ १२ ॥ उभावाम् ॥ उभावामिन्द्राग्नीऽआहुवध्यै
ऽउभाराधसः सहमादयध्यै ॥ उभादातारा विषाᳪंरयीणामुभा
वाजस्यसातयेहुवेवाम् ॥ १३ ॥ अयन्ते ॥ अयन्तेयोनिर्ऋत्त्वि
योयतोजातोऽअरोचथाः ॥ तञ्जानन्नग्नऽआरोहाथानोवर्द्धया

१ दिवःककुत्पतिः । अत्र दिवोऽककुत्पृथिव्योः ( शु. य. प्रा. ३ अ. २४ सू. ) इत्यनेन अककुत्पृथिव्योर्विसर्जनीयस्य सकारविधानान्नात्र सकारः ककुत्परत्वात् ।

रयिम् ॥ १४ ॥ अयमिह । प्प्रथमोधायिधातृभिर्होतायजिष्ठो

ऽअद्ध्वरेष्ष्वीड्यः ॥ यमप्प्नवानोभृगवोव्विरुरुचुर्व्वनेषुचित्रंव्वि

भ्वंव्विशेविशे ॥ १५ ॥ अस्यप्प्रत्नाम् ॥ अस्यप्प्रत्नामनुद्युतꣳ

शुक्रन्दुदुह्रेऽअह्रयः ॥ पयः सहस्स्रसामृषिम् ॥ १६ ॥ तनूपाऽ

अग्नेऽसितन्न्वम्मेपाह्यायुर्दाऽअग्नेस्यायुर्म्मेदेहिव्वर्च्चोदाऽअग्ने

सिव्वर्च्चोमेदेहि ॥ अग्नेयन्न्मेतन्न्वाऽऊनन्तन्न्मऽआपृण ॥ १७ ॥ ॥१७॥

इन्धानास्त्वा । शतꣳहिमाद्युमन्तꣳसमिधीमहि ॥ व्वयस्वन्तो

वयस्कृतꣳसहस्वन्तꣳसहस्कृतम् ॥ अग्नेसपत्नदम्भनमदब्धा
सोऽअदाभ्यम् ॥ चित्रावसोस्वस्तितेपारमशीय ॥ १८ ॥
सन्त्वम् ॥ सन्त्वमग्नेसूर्य्यस्यवर्च्चसागथाꣳसमृषीणाꣳस्तुते
न ॥ सम्प्रियेणधाम्नासमहमायुषासंवर्च्चसासम्प्रजयासꣳराय
स्पोषेणग्ग्मिषीय ॥ १९ ॥ अन्धस्स्थ ॥ अन्धस्स्थान्धोवो
भक्षीयमहस्स्थमहोवोभक्षीयोर्ज्जस्स्थोर्ज्जंवोभक्षीयरायस्पोषं

---

१ अन्धसःस्थ इतिपदे प्रत्ययसवर्ण्णम्मुदि शाकटायनः (३ अ. ९ क.) इत्यनेन शषसेषु मुत्संज्ञकेषु परेषु विसर्गस्य परसवर्णं भवति तेन सकारे मुदि परसवर्णं प्राप्तं परन्तु जित्परे मुदि तु लुङ्मुदि जित्परे (३ अ. १३ क.) इत्यनेन स्थे जित्परे मुदि सति विसर्गस्य लोपः। तत ऊष्मान्तस्थाभ्यश्च स्पर्शः (४ अ. १०२ क.) इत्यनेन द्वित्वे पस्य चर्त्वे अन्धस्स्थ इति॥

संहि. स्त्थरायस्पोषंवोभक्षीय ॥ २० ॥ रेवतीरमद्ध्वम् ॥ रेवतीरमं पू. अ.
॥१८॥ द्ध्वमस्म्मिन्न्योनावस्म्मिन्न्गोष्ठेस्म्मिँल्लोकेस्म्मिन्न्क्षये ॥ इहैव ॥३॥
स्त्तमापंगात ॥ २१ ॥ सहितासि । विश्वरूप्प्यूर्ज्जामाविश
गौपत्त्येनं ॥ उपत्त्वाग्ग्नेदिवेदिवेदोषावस्त्तर्द्धियावयम् ॥ नमोभ
रन्तऽएमसि ॥ २२ ॥ राजन्तमद्ध्वराणाम् ॥ राजन्तमद्ध्वराणाङ्गो
पामृतस्यदीदिविम् ॥ वर्द्धमानꣳस्वेदमे ॥ २३ ॥ सनः ॥ सनः ॥१८॥
पितेवसूनवेग्ग्नेसूपायनोभव ॥ सचस्वानःस्वस्त्तये ॥ २४ ॥

अग्नेत्त्वम् ॥ अग्नेत्त्वन्नोऽअन्तमऽउतत्राताशिवोभवावरू
त्थ्यः ॥ वसुरग्निर्वसुश्श्रवाऽअच्छानक्षिद्युमत्तमꣳरयिन्दाः
॥ २५ ॥ तन्त्वा ॥ तन्त्वाशोचिष्ठदीदिवꣳसुम्नायनूनमीमहे
सखिभ्यः ॥ [1]सनोबोधिश्रुधीहवमुरुष्याणो[2]ऽअघायतस्सम
स्मात् ॥ २६ ॥ इडऽएहि ॥ [3]इडऽएह्यदितऽएहिकाम्म्याऽएत ॥

---

१ सः नो बोधिः । अत्र व्यञ्जने च ( शु. य. प्रा. २ अ. १६ सू. ) इत्यनेन सः इति पदस्य विसर्जनीयस्य लोपे सनोबोधिः इति सिध्यति ।

२ उरुष्याणः । अत्र उरुष्यानः इति पदम् । अत्र निषण्णावरथवाहणमिन्द्र० ( शु. य. प्रा. ३ अ. ८७ सू. ) इत्यनेन नकारस्य णकारे, स्वरात्संयोगादि-र्द्विरुच्यते सर्वत्र ( शु. य. प्रा. ४ अ. १०० सू. ) इत्यनेन षस्य द्वित्वम् ।

३ इडेएहि इतिपदम् । अत्र सन्ध्यक्षरमयवायावम् ( शु. य. प्रा. ४-अ-४७ सू. ) इत्यनेन इडे इति एकारस्य अयादेशे यवयोः पदान्तयोः स्वरमध्ये लोपः ( ४ अ. १२५ सू. ) इत्यनेन यकारस्य लोपे पुनः स्वरसन्धिप्राप्तौ "न परकालः" ( शु. य. प्रा. ३ अ. ४ सू. ) इति निषेधः ।

संहि. मयिंवहृकामुधरंणम्भूयात् ॥ २७ ॥ सोमानछंस्वरंणं । कृणु १ अ.

॥ १९ ॥ हिब्रंह्मणस्पते॥ कक्षीवन्तुँय्यऽऔशिजः ॥ २८ ॥ योरेवान् ॥ ॥ २ ॥

योरेवान्योऽअमीवुहावसुवित्पुष्टिवर्द्धनः ॥ सनंःसिषक्तुय

स्तुरः ॥ २९ ॥ मानः ॥ मानःशंसोऽअररुषोधूर्त्तिःप्प्रणु

ङ्मर्त्त्यस्य ॥ [2]रंक्षाणोब्रह्मणस्पते ॥ ३० ॥ महित्रीणाम् ॥

---

१ "पुष्टिवर्द्धनः" अत्र ऊष्मान्तस्थाभ्यश्च स्पर्शः ( शु. य. प्रा. अ. सू. १०२ ) इति सूत्रेण पुष्टिपदं शषसहानां चतुर्णां वर्णानाम् ऊष्मसंज्ञात्वात् षकारोष्मणः परस्य स्पर्शसंज्ञकस्य टकारस्य द्वित्वं जातम् । तेनैकषकारो द्वौ टकारौ च संयोगः । तत्र प्रथमष्टकारः क्रमजो ज्ञेयः । अन्येष्वप्येतादृशेषु स्थलेषु द्वित्वं बोध्यम् । तथा पुष्टिवर्द्धनः इत्यत्र वर्द्धनः इति पदे परं तु रेफहकाराभ्याम् ( ४-१०१ ) इत्यनेन रकारोत्तरवर्तिनः धकारस्य द्वित्वं जातम् । धकारस्य दकारः । २ रक्षाणः । रक्षा नः इतिपदम् । अत्र निषण्णाय रथवाहणम् ( शु. य. प्रा. ३ अ. ८७ सू. ) इत्यनेन नकारस्य णकारो निपात्यते । ॥ १९ ॥

120

माहींत्रीणामवोस्त्तुद्युक्षम्मित्रस्यार्य्यम्मणः ॥ दुराधर्षंव्वरुणस्य ॥ ३१ ॥ नहितेषाम् ॥ नहितेषाममाचननाध्वंसुव्वारणेषु ॥ ईशे रिपुरघशंꣳसः ॥ ३२ ॥ तेहि । पुत्रासोऽअदितेः प्प्रजीवसेम र्त्याय ॥ ज्योतिर्य्यच्छन्त्यजस्रम् ॥३३॥ कदाचन । स्त्तरीर सिनेन्द्रंसश्चसिदाशुषे ॥ उपोपेन्नुमघवन्भूयऽइन्नुतेदानंन्देवस्य पृच्यते ॥ ३४ ॥ तत्त्सवितुः ॥ तत्त्सवितुर्व्वरेण्ण्यम्भर्ग्गोदेवस्य धीमहि ॥ धियोयोनः प्प्रचोदयात् ॥ ३५ ॥ शतम् ॥ १०० ॥

परिंते । दूडभोरथोस्म्माँ२ ॥ ऽअंग्न्नोतुव्विश्श्वतः ॥ येनरक्षं
सिदाशुषः ॥ ३६ ॥ [२६-४] भूर्भुवः ॥ भूर्भुवस्स्वः
सुप्प्रजाः प्प्रजाभिः स्याᳮसुवीरोव्वीरैः सुपोषः पोषैः ॥ नर्य्य
प्प्रजाम्मेपाहिशᳮस्यंपशून्मेपाह्यथर्य्यपितुम्मेपाहि ॥ ३७ ॥
आगंन्म । व्विश्श्ववेदसमस्म्मब्भ्यंव्वसुवित्तमम् ॥ अग्ग्नेसम्म्राड
भिद्युम्न्नमभिसहऽआयंच्छस्व ॥ ३८ ॥ अयमग्ग्निः ॥ अय ॥ २० ॥

१ दूडभो रथः । दुःदभः इतिपदम् अत्र "उकारं दुर्दे (शु. य. प्रा. ३ अ. ४२ सू.)" इत्यनेन दुरित्यस्य विसर्गस्य उकारो दकारे परे दन्त्यश्च मूर्धन्यत्वमापद्यते । तेन दकारस्य उकारे दस्य मूर्धन्ये दुउडभः । सवर्णयोरुकारयोः सवर्णदीर्घः । २ सुप्प्रजाः अत्र "स्वरात्संयोगादिर्द्विरुच्यते सर्वत्र (४ अ. १०० सू.)" इत्यने प्रजाशब्दघटितप्रकारे परे पकारस्य द्वित्वम् । एवं वरेण्ण्यम् । पुत्त्रासः । शुम्भम् एतादृशेषु स्थलेषु ज्ञेयम् ।

मग्निर्गृहपतिर्ग्गार्हपत्त्यꣳप्प्रजायाव्वसुवित्तमः ॥ अग्ग्नेगृहपते
भिद्युम्न्नमभिसहऽआयंच्छस्व ॥ ३९ ॥ अयमग्ग्निः ॥ अय
मग्ग्निःपुरीष्ष्योरयिमान्पुष्टिवर्द्धनः ॥ अग्ग्नेपुरीष्ष्याभिद्युम्न्न
मभिसहऽआयंच्छस्व ॥ ४० ॥ [४-५] गृहामा । विभीतमा
वैपद्ध्वमूर्ज्जम्बिब्भ्रतऽएमसि ॥ ऊर्ज्जम्बिब्भ्रद्वःसुमनाः सुमेधा
गृहानैमिमनसामोदमानः ॥ ४१ ॥ येषामद्ध्येति । प्प्रवसन्न्येषु

१ "प्रवसन्न्येषु" इत्यत्र "स्वरात्संयोगादिर्द्विरुच्यते सर्वत्र ( १०० शु. य. प्रा. ४ अ. सू. )" इत्यनेन नकारस्य द्वित्वम् ।

सौमनसोबहुः ॥ गृहानुपह्वयामहेतेनोजानन्तुजानतः ॥४२॥
उपहूताऽइह । गावऽउपहूताऽअजावयः ॥ अथोऽअन्नस्य
कीलालऽउपहूतोगृहेषुनः ॥ क्षेमायवःशान्त्यैप्रपद्येशिवꣳ
शग्मꣳशँय्योःशँय्योः ॥ ४३ ॥ [ ३-६ ] प्रघासिनोहवाम
हे । मरुतश्चरिशादसः ॥ करम्भेणसजोषसः ॥ ४४ ॥
यद्ग्रामे ॥ यद्ग्रामेयदरण्येयत्सभायाँयदिन्द्रिये ॥ यदेन
श्चकृमावयमिदन्तदवयजामहेस्वाहा ॥ ४५ ॥ मोषूणः ॥

[1]मोषूणऽइन्द्रात्रपृत्सुदेवैरस्तिहि[2]ष्म्मातेशुष्मिन्नवयाः ॥ मह
श्चिद्यस्यमीढुषोयव्याहविष्म्मतोमरुतोवन्दतेगीः ॥४६॥ अक्र
न्कर्म्म । कर्म्मकृतःसहवाचामयोभुवा ॥ देवेभ्यःकर्म्मकृ
त्वास्तम्प्रेतसचाभुवः ॥ ४७ ॥ अवभृथनिचुम्पुण । निचेरुर
सिनिचुम्पुणः ॥ अवदेवैर्देवकृतमेनोयासिषमवमर्त्यैर्म्मर्त्यकृ
तम्पुरुराव्णोदेवरि[3]षस्पाहि ॥ ४८ ॥ [५-७] पूर्णादर्वि ॥

---

१ मो षूणः । अत्र मो षूनः इतिपदम् । "निषण्णाय रथवाहणम् ( ३ अ. ८७ सू. )" इत्यनेन णकारस्य निपातः । २ हिष्म्माते । अत्र हेर्मिथोदयः ( ३ अ. ६८ सू. ) इत्यनेन मकारोदये हिशब्दात्परस्य सकारस्य षकारः । तत "ऊष्मान्तस्थाभ्यश्च स्पर्शः" इति द्वित्वम् । ३ देवरिषस्पाहि । अत्र "अध्वनो रजसो रिषः स्पृशस्पातौ ( ३ अ. २८ सू. )" इत्यस्मिन् पातौ इति धातुग्रहणात् पाधातो रूपे परेऽपि रिषः विसर्गस्य सकारः । तत ऊष्मान्तस्थाभ्यश्च स्पर्शः ( ४ अ. १०२ सू. ) इत्यनेन पकारस्य द्वित्वम् ।

पूर्णादर्विपरापतसुपूर्णापुनरापत । वस्नेवविक्रीणावहाऽइष

मूर्जंशतक्रतो ॥ ४९ ॥ देहिमे ॥ देहिमेददामितेनिमेधेहि

नितेदधे ॥ निहारंहरासिमेनिहारन्निहराणितेस्वाहा ॥ ५० ॥

[ २-८ ] अक्षन्नमीमदन्त ॥ अक्षन्नमीमदन्तह्यवप्रियाऽअ

धूषत ॥ अस्तोषतस्वभानवोविप्रानविष्ठयामतीयोजान्विन्द्र

तेहरी ॥ ५१ ॥ सुसन्दृशन्त्वा ॥ [1]सुसन्दृशन्त्वावयम्मघवन्व

---

१ सुसन्दशम् । अत्र "भाविभ्यः सः षं समानपदे ( ३ अ. ५९ सू. )" इत्यनेन वत्वापत्तौ "अनुसन्तनोतु बृहस्पतिसुतस्यसुसमिद्धायसुसन्दशम्" ( शु. य. प्रा. ३ अ. ८२ सू. ) इत्यनेन प्रकृतिभावः न षत्वम् ।

न्दिषीमहिं ॥ प्रनूनस्पूण्णर्वन्धुरस्तुतोयासिवशाँ २ ॥ ऽअनु
योजान्विन्द्रतेहरीं ॥ ५२ ॥ मनोनु ॥ मनोन्वाह्वामहेनारा
शर्ठ्ठंसेनस्तोमेन ॥ पितॄणाञ्चमन्मभिः ॥ ५३ ॥ आनं ॥
आनंऽएतुमनःपुनःक्क्रत्वेदक्षायजीवसें ॥ ज्योक्क्सूर्य्यन्दृशे
॥ ५४ ॥ पुनर्नः । पितरोमनोददातुदैव्योजनः ॥ जीवंव्रा
तर्ठ्ठसचेमहि ॥ ५५ ॥ व्वयर्ठ्ठसोम । व्रतेतवमनस्तनूषुबिब्भ्र
तः ॥ प्रजावन्तःसचेमहि ॥ ५६ ॥ [ ६-९ ] एषते । रुद्र

भागःसहस्वस्राम्बिकयातञ्जुषस्वस्वाहैषतेरुद्रभागऽआखुस्ते[1]
पशुः॥५७॥अवंरुद्रम्॥ अवंरुद्रमंदीमह्यवंदेवन्त्र्यम्बकम्॥
यथांनो[2]वस्यंसस्करद्यथांनः[3]श्रेयंसस्करद्यथांनोव्यवसाययांत्
॥ ५८ ॥ भेषजमंसि । भेषजङ्गवेश्वांयपुरुषायभेषजम् ॥
सुखम्मेषायंमेष्यै ॥ ५९ ॥ त्र्यम्बकँय्यजामहे । सुगन्धिम्पु

---

१ आखुःते। अत्र "तथयोः सम् ( ३ अ. ८ सू. )" इत्यनेन तकारे परे सत्वे आखुस्ते इति रूपम्। २ वस्यसस्करत् अत्र "समानपदे च ( ३ अ. ३० क. )" इत्यप्राप्तौ "कन्निष्करत्क्रधिषु ( ३ अ. ३२ सू. )" इत्यनेन करत्परे विसर्जनीयस्य सकारः। तत "ऊष्मान्तस्थाभ्यश्च स्पर्शः" इति ककारस्य द्वित्वम्। ३ श्रेयसस्करत् अत्र "समानपदे च ( ३ अ. ३० सू. )" इत्यनेन समानपदे विसर्गस्य ककारे परे सकारः। तत "ऊष्मान्तस्थाभ्यश्च-स्पर्शः ( ४ अ. १०२ सू. )" इत्यनेन ककारस्य द्वित्वम्।

ष्टिवर्द्धनम् ॥ उर्व्वारुकमिवबन्धनान्मृत्योर्म्मुक्षीयमामृतात् ॥
त्र्यम्बकँय्यजामहेसुगन्धिम्पतिवेदनम् ॥ उर्व्वारुकमिवबन्धं
नादितोमुक्षीयमामुतः ॥ ६० ॥ एतत्ते । रुद्रावसन्तेनं
परोमूजवतोतीहि ॥ अवततधन्न्वापिनाकावसःकृत्तिवासाऽ
अहिंसन्नःशिवोतीहि ॥ ६१ ॥ त्र्यायुषञ्जमदग्नेःकश्यप
स्यत्र्यायुषम् ॥ यद्देवेषुत्र्यायुषन्तन्नोऽअस्तुत्र्यायुषम् ॥६२॥
शिवोनामं ॥ शिवोनामासिस्वधितिस्तेपितानमस्तेऽअस्तुमा

मांहिꣳसीः ॥ निर्वर्त्तयाम्म्यायुषेन्नाद्यायप्प्रजननायरायस्प्पो
षायसुप्प्रजास्त्वायसुवीर्य्याय ॥ ६३ ॥ १० ॥ [७-१०]
इतिश्रीवाजसनेयसंहितायांतृतीयोऽध्यायः ॥ ३ ॥ श्रीवेदपुरु
षायनमः ॥ अनुवाकसूत्रम् ॥ एदंद्वे, महीनाम्पयश्चतस्र, आकू
त्याऋक्सामयोर्द्विकौ, व्रतंकृणुतषडे,याते चतस्रो, वस्व्य
सितिस्र, एषतेद्वे, शुक्रंत्वाचतस्रो,ऽऽदित्यास्त्वगष्टौ, दश सप्त ॥२४॥
त्रिꣳशत् ॥ १० ॥ ३७ ॥ ४ ॥ हरिःॐ ॥ एदम् ॥ ऐदमगन्म

---

१ एदमगन् । अत्र आ इदम् अत्र ''कण्ठ्यादिवर्ण एकारम् ( ४ अ. ५३ सू. )'' इत्यनेन कण्ठ्यात्परः इवर्णः पूर्वस्वरः परश्च एकारमापद्यते। तेन एदमगन् ।

देवयजंनम्पृथिव्यायत्रंदेवासोऽअजुंषन्तव्विश्श्वें ॥ ऋक्सामा
ब्भ्यांᳬसन्तरंन्तोयजुंब्भींरायस्प्पोषेंणसमिषामंदेम ॥ इमाऽ
आपᳬशमुंमेसन्तुदेवीरोषंधेत्रायंस्वस्वाधिंतेमैनᳬहिᳬसीः ॥ १ ॥
आपोंऽअस्म्मान् ॥ आपोंऽअस्म्मान्मातरᳬंशुन्धयन्तुघृतेनं
नोघृतप्प्वᳬपुनन्तु ॥ व्विश्श्वᳬहिरिप्प्रम्प्रवहंन्तिदेवीरुदिदांब्भ्यᳬ

१ हिंसीः । ( हिᳬसीः ) अत्र अनुस्वाराच्च तत्पूर्वात् ( शु. य. प्रा. ३ अ. ५७ सू. ) इत्यनेन षकारापत्तौ अनुसन्तनोतु ( शु. य. प्रा. ३ अ. ८२ सू. ) इत्यनेन प्रकृतिभावे अथानुस्वारस्य गृमित्यादेशः शषसहरेफेषु ( शु. य. प्रा. परिशिष्ट सू. ) इत्यनेन अनुस्वारस्य दीर्घगूंत्वम् । २ शुन्धयन्तु । अत्र स्वरात्० इति सूत्रेण द्वित्वे प्राप्तेऽपि स्ववर्गीये चानुत्तमे ( शु. य. प्रा. ४ अ. ११५ सू. ) इत्यनेन स्ववर्गीये द्वित्वनिषेधादत्र नकारात्परे स्ववर्गीये धकारे नकारस्य न द्वित्वम् । एवमेवैतादृशेषु स्थलेषु ज्ञेयम् । यथा पुनन्तु । शान्तिः । मात्छन्दः । सन्तु । अन्तरिक्षात् । अजुषन्त । सन्तरन्तः ।

शुचिरापूतऽएमि ॥ दीक्षातपसोस्त्तनूरसितान्त्वाशिवाᳫंशु
ग्ग्मामपरिदधेभद्द्रंव्वर्ण्णम्पुष्ष्यन्[१] ॥२॥ [२-१] महीनाम्पयः ॥
महीनाम्पयोसिवर्च्चोदाऽअसिवर्च्चोमेदेहि ॥ वृत्रस्यासिकनीनं
कश्चक्षुर्दाऽअसिचक्षुर्म्मेदेहि ॥ ३ ॥ चित्पतिर्म्मा ॥ चित्पति
र्म्मापुनातुवाक्पतिर्म्मापुनातुदेवोमासवितापुनात्वच्छिद्रेणप
वित्रेणसूर्य्यस्यरश्मिभिः ॥ तस्यतेपवित्रपतेपवित्रपूतस्यय
त्कामम्पुनेतच्छकेयम् ॥४॥ आवः ॥ आवोदेवासऽईमहेव्वामम्प्र

१ पुष्ष्यन् । अत्र स्वरात्संयोगादिर्द्विरुच्यते सर्वत्र (शु. य. प्रा. अ. १०० सू.) इत्यनेन षकारस्य द्वित्वम् ।

यत्त्यद्द्वरे ॥ आवोदेवासऽआशिषोयज्ञियासोहवामहे ॥ ५ ॥
स्वाहायज्ञम् ॥ स्वाहायज्ञम्मनसःस्वाहोरोरन्तरिक्षात्त्स्वाहा
द्यावापृथिवीब्भ्याᳪस्वाहाव्वातादारभेस्वाहा ॥ ६ ॥ [४-२]
आकूत्त्यैप्प्रयुजे ॥ आकूत्त्यैप्प्रयुजेग्ग्नयेस्वाहामेधायैमनसेग्ग्न
येस्वाहादीक्षायैतपसेग्ग्नयेस्वाहासरस्वत्त्यैपूष्णेग्ग्नयेस्वाहा ॥
आपोदेवीर्ब्बृहतीर्व्विश्वशम्भुवोद्यावापृथिवीऽउरोऽअन्तरिक्ष ॥
बृहस्पतयेहविषाव्विधेमस्वाहा ॥ ७ ॥ व्विश्वोदेवस्य ॥ व्विश्वो

संहि. देवस्यंनेतुर्म्मर्त्तौवुरीतसुख्यम् ॥ विश्वौरायऽइषुध्यातिद्युम्नंवृ पू. अ.
॥२६॥ णीतपुष्यसेस्वाहां ॥८॥ [२-३] ऋक्सामयोःशिल्पे ॥ ऋक्सा ॥४॥
मयोःशिल्पेस्त्थस्तेवामारंभेतेमांपातमास्ययज्ञस्योदृचंः ॥ श
र्म्मासिशर्म्ममेयच्छनमंस्तेऽअस्तुमामांहिꣳसीः ॥ ९ ॥ ऊर्ग
सि ॥ ऊर्गस्याङ्गिरस्यूर्णम्म्रदाऽऊर्ज्जंमयिंधेहि ॥ सोमस्यनी
विरसिविष्णोःशर्म्मासिशर्म्मयजमानस्येन्द्रस्ययोनिरसिसुस ॥२६॥
स्याःकृषीस्कृधि ॥ उच्छ्रयस्ववनस्पतऽऊर्ध्वोमांपाह्यꣳहसऽ

आस्ययज्ञस्योदृचः ॥ १० ॥ [२-४] व्रतङ्कृणुत । व्रतङ्कृणुता
ग्निर्ब्रह्माग्निर्यज्ञो वनस्पतिर्यज्ञियः ॥ दैवीन्धियम्मनाम
हेसुमृडीकामभिष्टयेवर्चोधाँयज्ञवाहसꣳसुतीर्थानोऽअसद्व
शे॥येदेवामनोजातामनोयुजोदक्षक्रतवस्तेनोवन्तुतेनःपान्तु
तेभ्यःस्वाहा ॥ ११ ॥ श्वात्राःपीताः ॥ श्वात्राःपीताभवतयूय
मापोऽअस्माकमन्तरुदरेसुशेवाः ॥ ताऽअस्मभ्यमयक्ष्मा

---

१ अत्र वृतम् कृणुत इति पदम् । स्पर्शे परपञ्चमम् (शु. य. प्रा. ४ अ. १२ सू.) इत्यनेन मकारस्य स्पर्शवर्णपरे स्पर्शवर्णस्य पञ्चमाक्षरो भवति तेन ङकारः । एतन्ते तत्र नकारः ।

ऽअंनमीवाऽअनांगसꣳस्वदंन्तुदेवीरमृताऽऋतावृधः ॥ १२ ॥
इयन्तें । यज्ञियांतनूरपोमुंञ्चामिनप्प्रजाम् ॥ अꣳहोमुचꣳ
स्वाहांकृताꣳपृथिवीमाविंशतपृथिव्यासम्भंव ॥ १३ ॥ अग्ने
त्त्वम् ॥ अग्नेत्त्वꣳसुजागृहिव्वयꣳसुमंन्दिषीमहि ॥ रक्षांणोऽ
अप्प्रंयुच्छन्प्प्रबुधेंनꣳ[1]पुनंस्कृधि ॥ १४ ॥ पुनर्म्मनंः ॥ पुनर्म्मनꣳपु
नरायुर्म्मऽआगन्पुनंःप्प्राणश्पुनंरात्मामऽआगन्पुनश्चक्षुꣳ 

१ पुनस्कृधि । अत्र ऊष्मान्तस्थाभ्यश्च स्पर्शः ( शु. य. प्रा. ४ अ. १०२ सू. ) इत्यनेन ककारस्य द्वित्वे प्राप्ते ऋवर्णे ( शु. य. प्रा. ४ अ. १११ सू. ) इत्यनेन ऋवर्णपरे स्पर्शे निषेधान्न ककारस्य द्वित्वम् । यत्र यत्र ऊष्मभ्योऽन्तःस्थेभ्यश्च परः स्पर्शवर्णः ऋविशिष्टश्चेत्तत्र तत्र द्वित्वाभावो ज्ञेयः । यथा-कृपीस्कृधि ।

पुनश्श्रोत्रम्मऽआगन् ॥ वैश्वानरोऽअदब्धस्तनूपाऽअग्निर्न्नः
पातुदुरितादवद्यात् ॥ १५ ॥ त्वमग्ने । व्रतपाऽअसिदेवऽ
आमर्त्त्येष्ष्वा ॥ त्वंय्यज्ञेष्ष्वीड्यः ॥ रास्वेयत्त्सोमाभूयो
भरदेवोनः सविताव्वसोर्द्दाताव्वस्वदात् ॥ १६ ॥ [६-५]
एषाते । शुक्रतनूरेतद्वर्च्चस्त्तयासम्भवब्भ्राजङ्गच्छ ॥ जूरसि
धृतामनसाजुष्टाव्विष्ष्णवे ॥ १७ ॥ तस्यास्त्ते । सत्त्यसवसः
प्प्रसवेतन्न्वोयन्त्रमशीयस्वाहा ॥ शुक्रमसिचन्द्रमस्यमृतमसिवै

श्वदेवमसि ॥ १८ ॥ चिदसि । मनासिधीरसिदक्षिणासिक्ष
त्रियासियज्ञियास्यदितिरस्युभयतःशीर्ष्णी ॥ सानःसुप्राची
सुप्रतीच्येधिमित्रस्त्वापदिबध्नीताम्पूषाध्वनस्पात्विन्द्रायाध्यक्षाय ॥ १९ ॥ अनुत्वा । मातामन्यतामनुपितानुभ्राता
सगर्भ्योनुसखासयूथ्यः ॥ सादेविदेवमच्छेहीन्द्रायसोमंरुद्रस्त्वावर्त्तयतुस्वस्तिसोमसखापुनरेहि ॥ २० ॥ [४-६] ॥२८॥
वस्व्यसि ॥ वस्व्यस्यदितिरस्यादित्यासिरुद्रासिचन्द्रासि ॥

बृहस्प्पतिष्ट्वासुम्न्नेरम्म्णातुरुद्द्रोव्वसुंभिराचंके ॥ २१ ॥ अदि
त्यास्त्वा । मूर्द्धन्नाजिंघर्म्मिदेवयजंनेपृथिव्याऽइडांयास्प्पद
मंसिघृतवत्स्वाहा ॥ अस्म्मेरंमस्वास्म्मेतेबन्धुस्त्वेरायोमेरायो
माव्वयङ्घ्रायस्प्पोषेणव्वियौष्म्मतोतोरायः ॥ २२ ॥ समंकख्ये[1] ।
देव्याधियासन्दक्षिणयोरुचंक्षसा ॥ मामऽआयुःप्प्रमोषीम्मोऽ
अहन्तवंव्वीरंव्विदेयतवदेविसन्दृशि ॥ २३ ॥ [ ३-७ ] एषते ।

१ समकख्ये । अत्र स्वरात्संयोगा० (शु. य. प्रा. ४ अ. १०० सू.) इत्यनेन खकारस्य द्वित्वे जाते प्रथमाद्वितीयास्तृतीयैश्चतुर्थाः (शु. य. प्रा. ४ अ. १०८ सू.) इत्यनेन खस्थाने ककारो विहितः ।

गायत्रोभागऽइतिमेसोमायब्रूतादेषतेत्रैष्टुभोभागऽइतिमेसो
मायब्रूतादेषतेजागतोभागऽइतिमेसोमायब्रूताच्छन्दोनामा
नाꣳसाम्म्राज्ज्यङ्गच्छेतिमेसोमायब्रूतादास्म्माकोसिशुक्रस्ते
ग्ग्रह्योव्विचितस्त्वाव्विचिन्न्वन्तु ॥ २४ ॥ अभित्त्यम् ॥ अभि
त्त्यन्देवꣳ[1]सवितारमोण्ण्योः कविक्क्रतुमर्च्चामिसत्त्यसवꣳरत्नधा
मभिप्प्रियम्मतिङ्कविम् ॥ ऊर्द्ध्वायस्यामतिर्ब्भाऽअदिद्द्युतत्त्सवीं ॥२९॥

१ देवꣳसवितारमोण्ण्योः । अत्र देवम् इत्यस्य मकारस्य अनुस्वारं रोष्मसु मकारः ( शु. य. प्रा. ४ अ-१ सू. ) इत्यनेन उष्मणि सकारे परे अनुस्वारे अथानुस्वारस्य गूंमित्यादेशः शषसहरेफेषु ( का. प. १ सू. ) इत्यनेन ( गूंकारे ) कृते गूंविशिष्टं रूपम् । एवम् उरुꣳहिराजा । अꣳहोमुचः । इत्यादिस्थलेषु गूंकारोऽनेन ज्ञेयः । वयꣳसुम. । अग्ने त्वꣳसुजा. । सोमꣳरुद्रस्त्वा. ।

मनिर्हिरण्यपाणिरमिमीतसुक्रतुः कृपास्वः ॥ प्रजाभ्यस्त्वा
प्रजास्त्वानुप्राणन्तुप्रजास्त्वमनुप्राणिहि ॥२५॥ [२-८]
शुक्रन्त्वा । शुक्रेणक्रीणामिचन्द्रञ्चन्द्रेणामृतममृतेन ॥ सग्मे
तेगोरस्मेतेचन्द्राणितपसस्तनूरसिप्रजापतेर्वर्ण्णः परमेणप
शुनाक्रीयसेसहस्रपोषम्पुषेयम् ॥२६॥ मित्रोनः ॥ मित्रोनऽए
हिसुमित्रधऽइन्द्रस्योरुमाविशदक्षिणमुशन्नुशन्तꣳस्योनःस्यो
नम् ॥ स्वानभ्राजाङ्घारेबम्भारेहस्तसुहस्तकृशानवेतेवः सोम

संहि. ऽयंणास्त्वाब्रंक्षद्धम्मावौदभन् ॥ २७ ॥ परिमा । ग्नेदुश्चंरिता पू. अ.
॥३०॥ द्वाधस्वामासुचंरितेभज ॥ उदायुंषास्वायुषोदंस्थाममृताँ २ ॥ ॥४॥
ऽअनुं ॥ २८ ॥ प्रतिपन्थांम् ॥ प्रतिपन्थांमपद्महिस्वस्तिगा
मंनेहसंम् ॥ येनविश्वाःपरिद्विषोंवृणक्तिविन्दतेवसु ॥ २९ ॥
[ ४-९ ] आदिंत्त्यास्त्वक् ॥ आदिंत्त्यास्त्वगस्यादिंत्त्यैसदऽआ
सींद ॥ अस्तंभ्नाद्यांवृषभोऽअन्तरिंक्षममिंमीतवरिमाणंपृ ॥३०॥
थिव्याः ॥ आसींदद्विश्वाभुवंनानिसम्राड्विश्वेत्तानिवरुंणस्य

व्व्रतानि ॥ ३० ॥ वनेषु वि ॥ वनेषुव्व्यन्तरिक्षन्ततानवाजम

र्वत्सुपयंऽउस्रियासु ॥ हृत्सुक्रतुंव्वरुणोव्विक्ष्वग्निन्दिवि

सूर्य्यमदधात्सोममद्रौ ॥ ३१ ॥ सूर्य्यस्यचक्षुः ॥ सूर्य्यस्य

चक्षुरारोहाग्नेरक्ष्णःकनीनकम् ॥ यत्रैतशेभिरीयसेभ्राजमा

नोविपश्चिता ॥ ३२ ॥ उस्रावेतम् ॥ उस्रावेतन्धूर्षाहौयुज्ये

थामनश्रूऽअवीरहणौब्रह्मचोदनौ ॥ स्वस्तियजमानस्यगृहा

---

१ अत्र स्वरात्संयोगा० (शु. य. प्रा. ४ अ. १०० सू.) इत्यनेन द्वित्वे प्राप्ते न क्षवृचित्रिश्विसतयेभ्यस्त्रैकम् (शु. य. प्रा. ६ अ. २७ सू.) इत्यनेनैतेभ्यः परस्य त्रशब्दस्य द्वित्वं न भवति तेन क्षत्र, वृत्र, चित्रम् । श्वित्रम्, सत्रस्य । तत्र गच्छ, यत्र पूर्वे । इत्येतेषु द्वित्वाभावो ज्ञेयः ।

न्गच्छतम् ॥ ३३ ॥ भद्रोमे । सिप्प्रद्ध्यंवस्वभुवस्प्पतेव्विश्श्वा
न्यभिधामानि ॥ मात्त्वापरिपरिणोव्विदन्मात्त्वापरिपन्थिनो
व्विदन्मात्त्वाव्वृकाऽअघायवोव्विदन् ॥ श्येनोभूत्त्वापरापतयज
मानस्यगृहान्गच्छतन्नौसँस्कृतम् ॥ ३४ ॥ नमोमित्रस्य ॥ नमो
मित्रस्यव्वरुणस्यचक्षसेमहोदेवायतदृतꣳसपर्य्यत ॥ दूरेदृशेदेव
जातायकेतवेदिवस्पुत्रायसूर्य्यायशꣳसत ॥ ३५ ॥ व्वरुणस्यो ॥ ३१ ॥
त्तम्भनम् ॥ व्वरुणस्योत्तम्भनमसिव्वरुणस्यस्कम्भसर्ज्जनीस्त्थो

व्वरुणस्यऽऋतसदंन्यसिव्वरुणस्यऽऋतसदंनमासिव्वरुणस्यऽऋत
सदंनमासीद ॥ ३६ ॥ यातें ॥ यातेधामानिहुविषायजन्ति
तातेव्विश्वांपरिभूरस्तुयज्ञम् ॥ गयस्फानंः प्रतरणःसुवीरो
वीरहाप्प्रचरासोमदुर्य्यान् ॥ ३७ ॥ [८-१०] इतिश्रीवाज
सनेयसंहितायांचतुर्थोऽध्यायः ॥ ४ ॥ श्रीवेदपुरुषायनमः ॥
अनुवाकसूत्रम्–अग्नेस्तनू, रापतयेत्वाचतुष्कौ, तप्तायनीमेद्वे,
इन्द्रघोषस्त्वास्तिस्रो, युंजतेमनाष्टौ, देवस्यत्वाचतस्रो, देव
१४५

संहि. स्यत्वापंच, विभूरसिचतस्रो, ज्योतिरसिष, डुरुव्विष्णोतिस्रो, पू. अ.
॥ ३२ ॥ दश त्रिचत्वारिंᳬशत् ॥ [ अ. ५ मं. ४३-अनु० १० ] हरिःॐ॥ ॥ ५ ॥
अग्नेस्त्तनूः ॥ अग्नेस्त्तनूंरसिव्विष्णवेत्त्वासोमंस्यतनूंरसिव्वि
ष्णवेत्त्वातिंथेरातित्थ्यमंसिव्विष्णवेत्त्वाऽश्येनायंत्त्वासोम
भृतेव्विष्णवेत्त्वाग्नयेत्त्वारायस्पोषदेव्विष्णवेत्त्वा ॥ १ ॥
अग्नेर्ज्जनित्रम् ॥ अग्नेर्ज्जनित्रमसिव्वृषणौस्त्थऽउर्व्वश्यस्या ॥ ३२ ॥
युरंसिपुरूरवाऽअसि ॥ गायत्रेणंत्त्वाच्छन्दसामन्थामित्रैष्टुभे

नत्त्वाच्छन्दंसामन्थामि जागतेनत्त्वाच्छन्दंसामन्थामि ॥ २ ॥
भवंतन्नः ॥ भवंतन्नःसमंनसौसचेतसावरेपसौ ॥ मायज्ञꣳ
हिꣳसिष्टम्मायज्ञपतिंजातवेदसौशिवौभंवतमद्यनः ॥ ३ ॥
अग्नावग्निः ॥ अग्नावग्निश्चरतिप्प्रविष्टऽऋषीणाम्पुत्रोऽअ
भिशस्तिपावा ॥ सनःस्योनःसुयजायजेहदेवेभ्योहव्यꣳ
सदमप्प्रयुच्छन्त्स्वाहा ॥ ४ ॥ [ ४-१ ] आपतयेत्त्वा ॥ आ
पतयेत्त्वापरिपतयेगृह्णामितनूनप्त्रेशाक्वरायशक्वनऽओजिं

संहि. ष्ठाय ॥ अनांधृष्टमस्यनाधृष्ष्यन्देवानामोजोनंभिशस्त्त्यभि पू. अ.
॥ ३३॥ शस्त्तिपाऽअंनभिशस्त्तेन्न्यमञ्जंसासत्त्यमुपंगेषꣳ स्वितेमाधाꣳ ॥ ५ ॥
॥ ५ ॥ अग्ग्नेंव्व्रतपाꣳ ॥ अग्ग्नेंव्व्रतपास्त्त्वेव्व्रंतपायातवंतनूरियꣳ
सामयियोममंतनूरेपासात्त्वयिं ॥ सहनौंव्व्रतपतेव्व्रतान्न्यनुंमे
दीक्षान्दीक्षापंतिम्मंन्न्यंतामनुतपस्त्तपंस्प्पातिꣳ ॥ ६ ॥ अꣳ
शुरंꣳशुष्टे । देवसोमाप्प्यांयतामिन्द्रांयैकधनविदें ॥ आतुब्भ्य ॥ ३२
मिन्द्रꣳप्प्यायंतामात्त्वमिन्द्रांयप्प्यायस्व ॥ आप्प्यांययास्म्मा

न्त्सर्व्वान्त्सुन्त्यामे धयोस्सुरिस्त्ततेदेवसोमसुत्त्यामंशीय ॥ एष्ट्रा
रायुहं प्प्रेषे भगाय ऽऋतमृतवादिभ्योनमोद्यावापृथिवीभ्याम्
॥ ७॥ यातै ॥ यातेऽअग्नेयहंशयातनूर्व्वर्षिष्ठागह्वरेष्ठा ॥ उग्ग्रं
व्वचोऽअपावधीत्त्वेषंव्वचोऽअपावधीत्त्स्वाहा ॥ यातेऽअग्नेरजहं
शयातनूर्व्वर्षिष्ठागह्वरेष्ठा ॥ उग्ग्रंव्वचोऽअपावधीत्त्वेषंव्वचोऽ
अपावधीत्त्स्वाहा ॥ यातेऽअग्नेहारिशयातनूर्व्वर्षिष्ठागह्वरेष्ठा ॥
उग्ग्रंव्वचोऽअपावधीत्त्वेषंव्वचोऽअपावधीत्त्स्वाहा ॥८॥ [४-२]

संहि. तप्तायंनीमे ॥ तप्तायंनीमेसिव्वित्तायंनीमेस्यवंतान्मानाथिता पू. अ.
३४ ॥ दवंतान्माव्यथितात् ॥ व्विदेदग्निर्न्नभोनामाग्नेऽअङ्गिरऽआयुं ॥ ५ ॥
नानाम्नेहियोस्याम्पृथिव्यामासियत्तेनाधृष्टन्नामंयज्ञियन्तेन
त्वादंधेव्विदेदग्निर्न्नभोनामाग्नेऽअङ्गिरऽआयुंनानाम्नेहियो
द्वितीयंस्याम्पृथिव्यामसियत्तेनांधृष्टन्नामंयज्ञियन्तेनत्वादंधे
व्विदेदग्निर्न्नभोनामाग्नेऽअङ्गिरऽआयुंनानाम्नेहियस्तृतीयं ॥ ३४ ॥
स्याम्पृथिव्यामसियत्तेनांधृष्टन्नामंयज्ञियन्तेनत्वादंधे ॥ अनु

त्त्वादेववीतये ॥ ९ ॥ सिꣳह्यसि । सपत्नसाहीदेवेभ्यःकल्प
स्वासिꣳह्यसिसपत्नसाहीदेवेभ्यःशुन्धस्वासिꣳह्यसिसपत्न
साहीदेवेभ्यःशुम्भस्व ॥ १० ॥ [२-३] इन्द्रघोषस्त्वा ॥ इन्द्र
घोषस्त्वावसुभिःपुरस्तात्पातुप्रचेतास्त्वारुद्रैःपश्चात्पातुम
नोजवास्त्वापितृभिर्दक्षिणतःपातुविश्वकर्म्मात्त्वादित्यैरुत्तर
तःपात्त्विदमहन्तप्तंवार्बहिर्द्धायज्ञान्निःसृजामि ॥ ११ ॥

---

१ अत्र अनुस्वारं रोष्मसु मकारः (शु. य. प्रा. ४ अ० १ सू.) इत्यनेन मकारस्यानुस्वारे कृते अथानुस्वारस्य गुमित्यादेशः शषसहरेफेषु (शु. य. प्रा. परिशि. सू.) इत्यनेन दीर्घगुंकारे प्राप्ते नानुस्वारः (शु. य. प्रा. ४ अ. १०९ सू.) इत्यनेन स्योन इति संयोगे परे सकारे न दीर्घगुंकारः किन्तु ह्रस्वः ।

 सिꣳह्यसि ॥ सिꣳह्यसिस्वाहासिꣳह्यस्यादित्यवनिःस्वाहा 
॥३५॥ सिꣳह्यसिब्रह्मवनिःक्षत्रवनिःस्वाहासिꣳह्यसिसुप्रजाव ॥५॥
नीरायस्पोषवनिःस्वाहासिꣳह्यस्यावहदेवान्यजमानायस्वा
हाभूतेभ्यस्त्वा ॥ १२ ॥ ध्रुवोसि । पृथिवीन्दृꣳहध्रुवक्षिदस्य
न्तरिक्षन्दृꣳहाच्युतक्षिदसिदिवन्दृꣳहाग्नेःपुरीषमसि ॥ १३ ॥
[ ३-४ ] युञ्जतेमनः ॥ युञ्जतेमनऽउतयुञ्जतेधियोविप्राविप्रा ॥३५॥
प्रस्यबृहतोविपश्चितः ॥ विहोत्रादधेवयुनाविदेकऽइन्मही

देवस्यसवितुःपरिष्टुतिᳬस्वाहा ॥ १४ ॥ इदंव्विष्ण्णुः ॥ इदं
व्विष्ण्णुर्व्विचक्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपाᳬसुरेस्वाहा
॥१५॥ इरावतीधेनुमती ॥ इरावतीधेनुमतीहिभूतᳬसूयवसिनी
मनवेदशस्या ॥ व्यस्कभ्नारोदसीव्विष्ण्णवेतेदाधर्त्थपृथिवीम्
भितोमयूखैᳬस्वाहा ॥ १६ ॥ देवश्रुतौदेवेषु ॥ देवश्रुतौदेवेष्ष्वा
घोषतम्प्राचीप्प्रेतमध्वरङ्कल्प्पयन्तीऽऊर्द्ध्वंय्यज्ञन्नयतम्माजिह्व
रतम् ॥ स्वङ्गोष्ठमावदतन्देवी[1]दुर्य्येऽआयुर्म्मानिर्व्वादिष्टम्प्रजा

१ अत्र रकारात्परस्य यकारस्य परंतु रेफहकाराभ्याम् (शु. य. प्रा. ४ अ. १०१ सू.) इत्यनेन द्वित्वम् ।

१५३

ऽमानिर्व्वादिष्टमत्त्ररमेथांव्वर्ष्म्मन्न्पृथिव्याः ॥ १७ ॥ व्विष्ण्णोर्न्नु ।
कंव्वीर्य्याणिप्प्रवोचँऽयःपार्त्थिवानिव्विममेरजाꣳसि ॥ योऽ
अस्कभायदुत्तरꣳसधस्त्थंव्विचक्रमाणस्त्रेधोरुगायोव्विष्ण्णवे
त्त्वा ॥ १८ ॥ दिवोवा । व्विष्ण्णऽउतवापृथिव्यामहोवाव्वि
ष्ण्णऽउरोरन्तरिक्षात् ॥ उभाहिहस्ताव्वसुनापृणस्वाप्प्रयच्छद
क्षिणादोतसव्याद्विष्ण्णवेत्त्वा ॥ १९ ॥ प्रतत् ॥ प्रतद्विष्ण्णु ॥३६॥

१ अत्र ऊष्मान्तस्थाभ्यश्च स्पर्शः ( शु. य. प्रा. ४ अ. १०२ सू. ) इत्यनेन द्वित्वम् ॥ यथा–विष्ण्णाऽउत वा । विष्ण्णऽ उरोर० । द्विष्ण्णवे त्वा । प्रतद्विष्ण्णुः । विष्ण्णोरराटम् । इत्यादिषु बोध्यम् ।

स्त्तवतेव्वीर्य्येणमृगोनभीमः कुचरोगिरिष्ठाः ॥ यस्योरुषुत्रिषु

व्विक्क्रमणेष्ष्वधिक्षियन्तिभुवनानिव्विश्श्वा ॥ २० ॥ व्विष्ण्णोरररा

टम् ॥ व्विष्ण्णोररराटमसिव्विष्ण्णोः श्नप्प्त्रेस्त्थोव्विष्ण्णोः स्यूरं

सिव्विष्ण्णोर्द्ध्रुवोसि ॥ व्वैष्ण्णवमसिव्विष्ण्णवेत्त्वा ॥२१॥ [८-५]

देवस्यत्त्वा । सवितुः प्प्रसवेश्श्विनोर्ब्बाहुब्भ्याम्पूष्ण्णोहस्त्ता

ब्भ्याम् ॥ आददेनार्य्यसीदमहः रक्षसाङ्ग्रीवाऽअपिकृन्तामि ॥

बृहन्नसिबृहद्ग्रवाबृहतीमिन्द्रायव्वाचंव्वद ॥ २२ ॥ रक्षोहणंव्व

लगहनम् ॥ रक्षोहणंब्वलगहनंव्वैष्णवीमिदमहन्तंब्वलगमुत्किं
रामियम्मेनिष्टयोयममात्योनिचखानेदमहन्तंब्वलगमुत्किरा
मियम्मेसमानोयमसमानोनिचखानेदमहन्तंब्वलगमुत्किरा
मियम्मेसबन्धुर्यमसबन्धुर्न्निचखानेदमहन्तंब्वलगमुत्किरा
मियम्मेसजातोयमसजातोनिचखानोत्कृत्याङ्किरामि ॥ २३ ॥
स्वराडसि । सपत्नहासत्रराडस्यभिमातिहाजनराडसिरक्षोहा ॥ ३७ ॥
सर्व्वराडस्यमित्रहा ॥ २४ ॥ रक्षोहणोवः ॥ रक्षोहणोवोव्व

लगुहनꣳप्रोक्षामिव्वैष्णवान्न्रंक्षोहणौवोव्वलगहनोवंनयामिव्वैष्णवान्न्रंक्षोहणौवोव्वलगहनोवंस्तृणामिव्वैष्णवान्न्रंक्षोहणौवांव्वलगहनाऽउपंदधामिव्वैष्णवीरंक्षोहणौवांव्वलगहनौपर्यूहामिव्वैष्णवीव्वैष्णवमंसिव्वैष्णवास्थं ॥ २५॥ [ ४-६ ] देवस्यंत्वा । सवितुःप्प्रंसवेश्विनोर्बाहुब्भ्यांम्पूष्णोहस्ताब्भ्याम् ॥ आदंदेनाऽर्य्यसीदमहꣳरक्षसाङ्ग्रीवाऽअपिकृन्तामि ॥ यवोसियवयास्म्मद्द्वेषोयवयारांतीर्दिवेत्त्वान्तरिक्षायत्त्वापृथिव्यैत्त्वा

शुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि ॥ २६ ॥ उद्दि
॥३८॥ वम् ॥ उद्दिवꣳ स्तभानान्तरिक्षम्पृणदृꣳहस्व पृथिव्यान्द्युतान ॥५।
स्त्वा मारुतो मिनोतु मित्रावरुणौ ध्रुवेण धर्म्मणा ॥ ब्रह्मवनि
त्वा क्षत्रवनि रायस्पोषवनि पर्य्यूहामि ॥ ब्रह्म दृꣳह क्षत्रन्दृꣳ
हायुर्दृꣳह प्रजान्दृꣳह ॥ २७ ॥ ध्रुवासि । ध्रुवोयं यजमानो
स्मिन्नायतने प्रजया पशुभिर्भूयात् ॥ घृतेन द्यावापृथिवी ॥ ३८
पूर्य्येथामिन्द्रस्य च्छदिरसि विश्वजनस्य च्छाया ॥ २८ ॥ परि

त्वा । गिर्व्वणोगिरऽइमाभवन्तुविश्वतः ॥ वृद्धायुमनुवृद्धयो
जुष्टाभवन्तुजुष्टयः ॥ २९ ॥ इन्द्रस्यस्यूः ॥ इन्द्रस्यस्यूरसी
न्द्रस्यद्ध्रुवोसि ॥ ऐन्द्रमसिवैश्वदेवमसि ॥ ३० ॥ [ ५-७ ]
विभूरसि । प्रवाहणोवह्निरसिहव्यवाहनः ॥ श्वात्रोसिप्रचे
तास्तुथोसिविश्ववेदाऽउशिगसि ॥ ३१ ॥ उशिगसि । कवि
रङ्घारिरसिबम्भारिरवस्यूरसिदुवस्वाञ्छुन्ध्यूरसिमार्ज्जालीयः
सम्म्राडसिकृशानुःपरिषद्योसिपवमानोनभोसिप्रतक्कामृष्टो

सिहव्यसूदंनऽऋतधामासिस्वर्ज्ज्योतिꣳसमुद्द्रोसि ॥ ३२ ॥
समुद्द्रोसि। विश्वव्यचाऽअजोस्येकपादहिरसिबुध्न्योवागस्यैन्द्र
मसिसदोस्यृतस्यद्वारौमामासन्ताप्तमध्वनामध्वपतेप्रमातिर
स्वस्तिमेस्मिन्पथिदेवयानेभूयान्मित्रस्यमा ॥ ३३ ॥ मित्र
स्यमा ॥ मित्रस्यमा चक्षुषेक्षध्वमग्नयꣳसगराꣳसगरास्स्थ
सगरेणनाम्नारौद्रेणानीकेनपातमाग्नयꣳपिपृतमाग्नयोगोपा ॥ २९।
यतमानमोवोस्तुमामाहिꣳसिष्ट ॥ ३४ ॥ [ ४-८ ] ज्योति

रसि । विश्वरूपंविश्वेषान्देवानाॅसमित् ॥ त्वꣳसोमतनू
कृद्भ्योद्वेषोभ्योन्यकृतेभ्यऽउरुयन्तासिवरूथꣳस्वाहाजुषा
णोऽअप्तुराज्यस्यवेतुस्वाहा ॥ ३५ ॥ शतम् ॥ २०० ॥
अग्नेनय । सुपथारायेऽअस्मान्विश्वानिदेववयुनानिवि
द्वान् ॥ युयोध्यस्मज्जुहुराणमेनोभूयिष्ठान्तेनमऽउक्तिंविधेम
॥ ३६ ॥ अयन्नः ॥ अयन्नोऽअग्निर्वरिवस्कृणोत्त्वयम्मृधः

पुरऽएतुप्प्रभिन्दन् ॥ अयंव्वाजाञ्जयतुव्वाजसातावयꣳशत्त्रू
ञ्जयतुजहृषाणꣳस्वाहा ॥ ३७ ॥ उरुव्विष्णो ॥ उरुव्विष्णो
व्विक्क्रमस्वोरुक्क्षयायनस्कृधि ॥ घृतङ्घृतयोनेपिबप्प्रप्प्रयज्ञपतिं
न्तिरस्वाहा ॥ ३८ ॥ देवसवितः ॥ देवसवितरेषतेसोमस्तꣳ
रक्षस्वमात्त्वादभन् ॥ एतत्त्वन्देवसोमदेवोदेवाँ २ ॥ ऽउपा
गाऽइदमहम्मनुष्ष्यान्त्सहरायस्प्पोषेणस्वाहानिर्व्वरुणस्यपा ॥४०॥

१ अत्र वाजान् जयतु इति पदे तकारवर्गश्चकारवर्गे चकारवर्गम् । (शु. य. प्रा. ४ अ. १५ सू.) इत्यनेन वाजान् पदघटिततवर्गस्य नकारस्य जयतुपदघटिते चकारवर्गे परे चवर्गत्वं जातम् । तेन वाजाञ्जयतु । एवं शत्रूञ्जयतु ।

शांन्मुन्द्ये ॥ ३९ ॥ अग्ग्नेव्व्रतपाः ॥ अग्ग्नेव्व्रतपास्त्त्वेव्व्रतपाया
तवतनूर्म्मय्य्यभूंदेषासात्त्वयियोममंतनूस्त्त्वय्य्यभूंदियःसाम
यिं ॥ यथायथन्नौव्व्रतपतेव्व्रतान्यनुंमेदीक्षान्दीक्षापतिरमꣳ
स्तानुतपस्त्तपंस्प्पातिः ॥ ४० ॥ [ ६-९ ] उरुव्विंष्णो ॥ उरुव्विं
ष्णोव्विक्रंमस्वोरुक्षयांयनस्कृधि ॥ घृतङ्घृंतयोनेपिबप्प्रप्प्रयज्ञ
पतिन्तिरस्वाहां ॥ ४१ ॥ अत्त्यन्न्यान् ॥ अत्त्यन्न्याँ २ ॥
ऽअगान्नान्न्याँ २ ॥ ऽउपांगामर्व्वाक्त्वापरेब्भ्योविंदम्परोवंरे

शु. य. संहि. ॥४१॥
ब्भ्यः ॥ तन्त्वाजुषामहेदेवव्वनस्प्पतेदेवयुज्यायैदेवास्त्त्वान्देव पू. अ.
युज्यायैजुषन्तुंव्विष्ण्णवेत्त्वा ॥ ओषधेत्त्रायस्वुस्वाधितेमैनं ॥५॥
हिंᳫसीः ॥ ४२ ॥ द्याम्मा ॥ द्याम्मालेखीरन्तरिक्षम्माहिंᳫ
सीःपृथिव्व्यासम्भव ॥ अयंᳫहित्त्वास्वाधितिस्त्तेतिजानःप्प्राणि
नायमहतेसौभगाय ॥ अतस्त्वन्देवव्वनस्प्पतेशतवल्शोव्वि
रोहसहस्रवल्शाव्वियᳫरुहेम ॥ ४३ ॥ [ ३-१०१ ] ॥ ॥४१॥
इति श्रीवाजसनेयसंहितायां पंचमोऽध्यायः ॥ ५ ॥ ॥

श्रीवेदपुरुषायनमः ॥ अनुवाकसूत्रम् ॥ देवस्यत्त्वाषड्, पावी
रसिपंच, माहिःषट्, संतेतिस्रः, समुद्रंगच्छ, हविष्मतीरिमा
द्विकौ, हृदेत्वापंच, देवस्यत्वाष्टौ, अष्टौ सप्तत्रिꣳशत् ॥
[अ. ६ मं. ३७ अनु. ८] हरिः ॐ ॥ देवस्यत्त्वा । सवितुःप्प्रसवे
ऽश्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्त्ताब्भ्याम् ॥ आददेनार्य्यसीदम
हꣳरक्षसाङ्ग्रीवाऽअपिकृन्तामि ॥ यवोसियवयास्म्मद्द्वेषोयव
यारातीर्द्दिवेत्त्वान्तरिक्षायत्त्वापृथिव्यैत्त्वाशुन्धन्ताँल्लोकाः

पितृषदनाऽ॑पितृषदनमसि ॥ १ ॥ अग्रेणीरसि । स्वावेशऽ
उन्नेतृणामेतस्यविन्त्तादधित्वास्थास्यतिदेवस्त्वामविताम्मद्धाँ
नकुसुपिप्पलाभ्युस्त्वौषधीभ्यऽ॑ ॥ द्यामग्रेणास्पृक्षऽआ
न्तरिक्षम्मद्धयेनाप्प्राऽ॑पृथिवीमुपरेणादृᳬहीऽ॑ ॥ २ ॥ याते ॥
यातेधामान्युश्मसिगमद्धयैयत्रगावोभूरिशृङ्गाऽअयासऽ ॥
अत्राहतदुरुगायस्यविष्णोऽ॑परमम्पदमवभारिभूरि ॥ ब्रह्म
वनित्त्वाक्षत्रवनिरायस्पोषवनिपर्य्यूहामि ॥ ब्रह्मदृᳬहक्ष

१ अत्र देवः त्वा इति पदम् । तथयोः सम् ( शु. य. प्रा. ३ अ. ८ सू. ) इत्यनेन त्वाघटिते तकारे परे विसर्जनीयस्य सत्वे देवस्त्वेति ।

त्रन्द्दृꣳहायुर्द्दृꣳहप्प्रजान्द्दृꣳह ॥ ३ ॥ व्विष्ण्णोꣳकर्म्माणि ।
पश्श्यतयतोव्व्रतानिपस्पशे ॥ इन्द्रस्ययुज्ज्यꣳसखा ॥ ४ ॥
तद्विष्ण्णोः । परमम्पदꣳसदापश्श्यन्तिसूरयः ॥ दिवीवचक्षु
राततम् ॥ ५ ॥ परिवीरसि ॥ परिवीरसिपरित्त्वादैवीर्व्विशो
व्व्ययन्ताम्परीमँय्यजमानꣳरायोमनुष्ष्याणाम् ॥ दिवश्सूनु
रस्येषतेपृथिव्व्याँल्लोकऽआरण्ण्यस्तेपशुः ॥ ६ ॥ [ ६-१ ] उपा
वीरसि ॥ उपावीरस्युपदेवान्दैवीर्व्विशꣳप्प्रागुरुशिजोवह्नित

मान् ॥ देवस्त्वष्टर्वसुरमहव्व्यातेस्वदन्ताम् ॥ ७ ॥ रेवतीर
मद्ध्वम् ॥ रेवतीरमद्ध्वम्बृहस्प्पतेधारया[1]व्वसूनि ॥ ऋतस्यत्त्वा
देवहविःपाशेनप्प्रतिमुञ्चामिधर्षा[2]मानुषः ॥ ८ ॥ देवस्यत्त्वा ।
सवितुःप्प्रसवेश्विनोर्बाहुब्भ्याम्पूष्णोहस्ताब्भ्याम् ॥ अग्नी
षोमाब्भ्याञ्जुष्टन्नियुनज्मि ॥ अद्भयस्त्वौषधीब्भ्योनुत्त्वा
मातामन्न्यतामनुपितानुब्भ्रातासगब्भ्योनुसखासयूत्थ्यः ॥ ॥ ४३ ।

१ धारय वसूनि पदम् । अत्र अश्वरश्मिमतिसुमतिश्वसुतचारयघृणिसेदिमेन्द्रियधारय० ( शु. य. प्रा. ३ अ. ९८ सू. ) इत्यनेन वकारे परे धारयवटिताकारस्य दीर्घत्वं विधीयते । तेन धारयावसूनि । २ अत्र पिबासोमम् ( शु. य. प्रा. ३ अ. १२९ सू. ) इत्यनेन धर्ष इत्यकारस्य दीर्घः ।

अग्नीषोमाभ्यान्त्वाजुष्टम्प्रोक्षामि ॥ ९ ॥ अपाम्पेरुः ॥
अपाम्पेरुरस्यापोदेवीःस्वदन्तुस्वात्तञ्चित्सद्देवहविः ॥ सन्ते
प्प्राणोव्वातेनगच्छताᳬसमङ्गानियजत्रैःसँय्यज्ञपतिराशिषा
॥ १० ॥ घृतेनाक्तौ । पशूँस्त्रायेथाᳬरेवतियजमानेप्प्रिय
न्धाऽआविश ॥ उरोरन्तरिक्षात्सजूर्द्देवेनव्वातेनास्यहविष
स्त्मनायजसमस्यतन्न्वाभव ॥ व्वर्षोव्वर्षीयसियज्ञेयज्ञपतिन्धाः
स्वाहादेवेभ्योदेवेभ्यःस्वाहा ॥ ११ ॥ [ ५-२ ] माहिः ॥

माहिँर्भूर्म्मापृदाकुर्न्नमँस्त्तऽआतानानुर्व्वाप्प्रेहि ॥ घृतस्यँकु
ल्याऽउपँऽऋतस्यपत्थ्याऽअनु ॥ १२ ॥ देवीरापः । शुद्धाव्वो
ह्वुँसुपरिविष्टादेवेषुसुपरिविष्टाव्वयम्परिवेष्टारोभूयास्म ॥ १३ ॥
व्वाचन्ते ॥ व्वाचन्तेशुन्धामिप्प्राणन्तेशुन्धामिचक्षुस्त्तेशुन्धा
मिश्श्रोत्रन्तेशुन्धामिनाभिन्तेशुन्धामिमेढ्रन्तेशुन्धामिपायु
न्तेशुन्धामिचरित्राँस्त्तेशुन्धामि ॥ १४ ॥ मनस्त्ते ॥
मनस्त्तऽआप्यायतांव्वाक्कऽआप्यायताम्प्राणस्त्तऽआप्याय

ताञ्चक्षुंस्त्तऽआप्प्यांयताꣳश्श्रोत्रंन्तऽआप्प्यांयताम् ॥ यत्तेंक्रू
रँय्यदास्त्थितन्तत्तऽआप्प्यांयतान्निं[1]ष्ट्यांयतान्तत्तेंशुद्ध्यतुशम
होब्भ्यः ॥ ओषंधेत्त्रायंस्वस्वधिंतेमैनꣳहिꣳसीः ॥ १५ ॥ रक्षं
साम्भागः ॥ रक्षंसाम्भागोंऽसिनिंरस्त्तꣳरक्षंऽइदमहꣳरक्षोभि
तिष्ठामीदमहꣳरक्षोंवंबाधऽइदमहꣳरक्षोंधमन्तमोंनयामि ॥ घृ
तेनंद्यावापृथिवीप्प्रोर्ण्णुवाथांव्वायोव्वेस्त्तोकानांमग्ग्निराज्ज्यंस्यव्वे

---

१ निष्ट्यायताम् । अत्र निःस्त्यायताम् इति पदम् । अत्र नेःस्त्यास्तनोः ( शु. य. प्रा. ३ अ. ७० सू. ) इत्यनेन नेरुपसर्गात्परयोः स्त्यास्तन्योर्धात्वोः सकारस्य षकारो भवति संहितायाम् । इति षत्वे षात्तथौ मूर्धन्यम् इति ष्टुत्वे ( शु. य. प्रा. ३. अ. ८० सू. ) ऊष्मान्तस्थाभ्यश्च स्पर्शे इत्यनेन टकारस्य द्वित्वम् ।

तुस्वाहास्वाहांकृतेऽऊर्द्ध्वंनभसम्मारुतङ्गच्छतम् ॥ १६ ॥
इदमापः ॥ इदमापुःप्रवंहतावद्यञ्चमलंञ्चयत् ॥ यच्चाभिदु
द्रोहानृतंयच्चशेपेऽअंभीरुणम् ॥ आपोमातस्मादेनंसुःपवं
मानश्चमुञ्चतु ॥ १७ ॥ [ ६-३ ] सन्तैं ॥ सन्तेमनोमनं
सासम्प्राणःप्राणेनंगच्छताम् ॥ रेडंस्यग्निष्ट्वांश्रीणात्त्वापं
स्त्वासमंरिणन्वातंस्यत्त्वाध्राज्यैपूष्णोरंहंह्यांऽऊष्मणोव्य
थिषत्प्रयुंतन्द्वेषः ॥ १८ ॥ घृतङ्घृतपावानः ॥ घृतङ्घृतपा

वानꣳपिबतुब्बसांब्बसापावानꣳपिबतान्तरिंक्षस्यहुविरंसिस्वाहा ॥

दिशंः प्प्रुदिशंऽआदिशोंव्विदिशंऽउद्दिशोंदिग्ग्भ्यश्स्वाहा ।१९।

ऐन्द्रश्प्प्राणश् ॥ ऐन्द्रश्प्प्राणोऽअङ्गेंऽअङ्गेनिदीध्यदैन्द्रऽउदानो

ऽअङ्गेंऽअङ्गेनिधींतꣳ ॥ देवंत्त्वष्टुर्ब्भूरिंतेसꣳसंमेतुसलंक्ष्मायद्वि

षुरूपम्भवांति ॥ देवत्त्रायन्तमवंसेसखायोनुंत्त्वामातापितरों

मदन्तु ॥ २० ॥ [३-४] समुद्रङ्गंच्छ ॥ समुद्रङ्गंच्छस्वाहा

न्तरिंक्षङ्गंच्छस्वाहांदेवꣳसंवितारंङ्गंच्छस्वाहांमित्त्रावरुंणौगच्छ

स्वाहाहोरात्रेगंच्छुस्वाहाच्छन्दाᳪंसिगच्छुस्वाहाद्यावांपृथिवी
गंच्छुस्वाहायुज्ञङ्गंच्छुस्वाहासोमंङ्गच्छुस्वाहांदिव्यन्नभोगच्छु
स्वाहाग्निंवैंश्वानुरङ्गंच्छुस्वाहामनोंमेहार्द्दियच्छुदिवंन्तेधूमो
गंच्छतुस्वुर्ज्योतिः पृथिवीम्भस्म्मनापृंणुस्वाहा॥२१॥मापः॥
मापोमौषंधीर्हिंᳪसीर्द्धाम्न्नोधाम्न्नोराजुँस्त्ततोंव्वरुणनोमुञ्च ॥
यदाहुरघ्न्याऽइतिव्वरुणेतिशपामहेततोंव्वरुणनोमुञ्च ॥ सुमि
त्रियानुऽआपुऽओषंधयᳪसन्तुदुर्म्मित्रियास्त्तस्म्मैसन्तुयो

स्म्मान्द्वेष्ट्टियञ्चव्वयन्द्विष्म्मः ॥ २२ ॥ [२-५] हविष्म्मती
रिमाः ॥ हविष्म्मतीरिमाऽआपोहविष्म्माँ २ ॥ ऽआविवा
सति ॥ हविष्म्मान्देवोऽअध्वरोहविष्म्माँ २ ॥ ऽअस्त्तुसूर्य्यः
॥ २३ ॥ अग्नेर्व्वः ॥ अग्नेर्व्वोऽपन्नगृहस्यसदसिसादयामीन्द्रा
ग्न्योर्भागधेयीस्त्थमित्रावरुणयोर्भागधेयीस्त्थविश्श्वेषान्दे
वानाम्भागधेयीस्त्थ ॥ अमूर्य्याऽउपसूर्य्येयाभिर्व्वासूर्य्यः
सह ॥ तानोहिन्न्वन्त्वध्वरम् ॥ २४ ॥ [२-६] हृदेत्त्वा ॥

हृदेत्त्वामनसेत्त्वादिवेत्त्वासूर्य्यायत्त्वा ॥ ऊर्द्ध्वमिमम्मध्वरन्दि
विदेवेषुहोत्त्रायच्छ ॥ २५ ॥ सोमराजन् ॥ सोमराजन्विं
[1]श्वास्त्वम्प्रजाऽउपावरोहविश्वास्त्वाम्प्रजाऽउपावरोहन्तु ॥
शृणोत्त्वग्निस्समिधाहवम्मेशृण्वन्त्वापोधिषणाश्चदेवीः ॥
[2]श्रोताग्ग्रावाणोविदुषोनयज्ञꣳशृणोतुदेवस्सविताहवम्मेस्वाहा
॥ २६ ॥ देवीरापः ॥ देवीरापोऽअपान्नपाद्योवऽऊर्म्मिर्हवि ॥४७॥

१ अत्र विश्वाऽऊष्मान्तं परिद्विषस्त्वं स्वाम् (शु. य. प्रा. ४ अ. २७ सू.) इत्यनेन विश्वापदम् ऊष्मान्तं (सान्तम्) जाते विश्वास्त्वम् विश्वास्त्वाम् ।
२ श्रोताग्ग्रावाणः । पिबासोमम् (शु. य. प्रा. ३ अ. १२९ सू.) इत्यनेन श्रोत इति क्रियापदस्थह्रस्वाकारस्य दीर्घः ।

ष्य ऽइन्द्रियावान्मदिन्तमः ॥ तन्देवेब्भ्योदेवत्रादत्तशुक्रपे
ब्भ्योयेषाम्भागस्थस्वाहा ॥ २७ ॥ कार्षिरसि ॥ कार्षिरसि
समुद्रस्यत्त्वाक्षित्त्याऽउन्नयामि ॥ समापोऽअद्भिरग्ग्मतसमो
षधीभिरोषधीः ॥ २८ ॥ यमग्ने ॥ यमग्नेपृत्सुमर्त्त्यमवा
वाजेषुयञ्जुनाः ॥ सयन्ताशश्वतीरिषः स्वाहा ॥ २९ ॥ [५-७]
देवस्यत्त्वा ॥ देवस्यत्त्वासवितुःप्प्रसवेश्विनोर्ब्बाहुब्भ्याम्पूष्णो
हस्ताब्भ्याम् ॥ आददेरावासिगभीरमिममध्वरङ्कृधीन्द्रायसु

षूतंमम् ॥ उत्तमेनंपुविनोर्ज्जँस्वन्तुम्मधुंमन्तुम्पर्यस्वन्तंनिग्ग्रा
भ्यास्त्थदेवश्श्रुतंस्तुर्प्पयंतमामनोमे ॥ ३० ॥ मनोमे । तर्प्प
यतुव्वाचंम्मेतर्प्पयतप्प्राणम्मेतर्प्पयतचक्षुंम्मेतर्प्पयतश्श्रोत्रंम्मे
तर्प्पयतात्त्मानंम्मेतर्प्पयतप्प्रजाम्मेतर्प्पयतपुशून्मेतर्प्पयतग
णान्मेतर्प्पयतगणामेमावितृंपन् ॥ ३१ ॥ इन्द्रांयत्त्वा ॥ इन्द्रां
यत्त्वाव्वसुंमतेरुद्रवंतऽइन्द्रांयत्त्वादित्त्यवंतऽइन्द्रांयत्त्वाभिमा ॥४८॥
तिग्घ्ने ॥ श्येनायंत्त्वासोमभृतेग्ग्नयेंत्त्वारायस्प्पोषदे ॥ ३२ ॥

सत्तें । सोमदिविज्योतिर्यत्पृथिव्याँऽयदुरावन्तरिक्षे । तेना
स्मैयजमानायोरुरायेकृध्यधिदात्रेव्वोचः ॥ ३३ ॥ श्वात्रास्त्थ ॥
श्वात्रास्त्थवृत्रतुरोराधोगूर्त्ताऽअमृतस्यपत्क्नीः ॥ तादेवीर्देवत्रे
मँऽयज्ञन्नयतोपहूताः सोमस्यपिबत ॥ ३४ ॥ माभेः ॥
माभेर्म्मासंविक्क्थाऽऊर्ज्जन्धत्स्वधिषणेवीड्वीसतीवीडयेथामू
र्ज्जन्दधाथाम् ॥ पाप्माहतोनसोमः ॥ ३५ ॥ प्रागपा
सं. ९ क् ॥ प्रागपागुदगधराक्सर्वतस्त्त्वादिशऽआधावन्तु ॥ अम्ब

निष्प्परसमुरीर्व्विदाम् ॥ ३६ ॥ त्वमुङ्ग ॥ त्वमुङ्गप्प्रशᳫंᳫसिषोदेवश्शविष्ठुमर्त्त्यम् ॥ नत्त्वदुन्न्योमघवन्नास्त्तिमर्ड्डितेन्द्द्रब्रवीमितेव्वचः ॥ ३७ ॥ [८-८] इति श्रीवाजसनेयसंहितायां षष्ठोऽध्यायः ॥ ६ ॥ श्रीवेदगुरुपाय नमः ॥ अनुवाकसूत्रम् ॥ व्वाचस्पतयेत्रिको, पयामगृहीतोसित्रिका, वायोद्दिका, यंव्वांद्दिको, यावामेका, तंप्प्रत्क्कथाचतस्रो,ऽयंव्वेनस्त्रिका,



१ निष्पर अत्र निः इति विसर्गस्य आविर्निरिड इडाया वसतिर्वरिवः (शु. य. प्रा. ३ अ. २३ सू.) इत्यनेन यथायोगं ककारपकारपरयोः विसर्जनीयस्य षकारः क्रियते इति षकारे कृते निष्परः । तत ऊष्मान्तस्थाश्चयश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन पकारस्य द्वित्वम् ।

श्वेदेवासस्त्रिका, इन्द्राय मूर्द्धानंद्विकौ, यस्तएका, प्राणायमे
तिस्त्रो, मघवऽएकेन्द्राग्नीऽआगतमेका, धैको, मासऽएका, वि
श्वेदेवासऽआगतऽएके, न्द्रमरुत्वऽएका, मरुत्वन्तंवृषभमेका,
मरुतान्त्वा, सजोषाऽइन्द्रऽएका, मरुत्वाँ २ ॥ ऽइन्द्रऽएका,
महाँ २ ॥ ऽइन्द्रऽएका, महाँ २ ॥ ऽइन्द्रऽएको, द्वुत्यमष्टौ
पंचविंꣳशतिरष्टाचत्वारिꣳशत् [अ. ७ मं. ४८ अनु. २५]

---

१ इति शतपथब्राह्मणपाठः ।

हरिः ॐ॥ वांचस्प्पतयेपवस्ववृष्ण्णोऽअꣳशुभ्याङ्गभस्तिपूतः॥
देवोदेवेभ्यः पवस्वयेषांभागोसि ॥ १ ॥ मधुमतीर्न्नः ॥ मधुम
तीर्न्नऽइषस्कृधियत्तेसोमादाभ्यन्नामजागृवितस्मैतेसोमसो
मायस्वाहास्वाहोर्वन्तरिक्षमन्वेमिस्वाङ्कृतोसि ॥ २ ॥ स्वाङ्कृ
तोसि । विश्वेभ्यऽइन्द्रियेभ्योदिव्येभ्यःपार्थिवेभ्योमन
स्त्वाष्टुस्वाहात्वासुभवसूर्य्यायदेवेभ्यस्त्वामरीचिपेभ्योदे ॥५०॥

१ वाचस्प्पतये अत्र प्रकृत्या कखयोः पफयोश्च (शु. य. प्रा. ३ अ. ११ सू.) इत्यनेन विसर्गस्य प्रकृतिभावे प्राप्ते पतितालव्यस्वरोदये (शु. य. प्रा. ३ अ. ३५ सू.) इत्यनेन पतिशब्दे परे विसर्जनीयस्य सकारे कृते ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन पकारस्य द्वित्वम् ।

वांॅशोयस्म्मैत्त्वेडेतत्त्सत्त्यमुंपरिप्प्रुतांभङ्गेनंहुत्तोसौफट्प्रा
णायंत्त्वाव्यानायंत्त्वा ॥ ३ ॥ [३-१] उपयामगृंहीतोसि ॥
उपयामगृंहीतोस्यन्तर्यंच्छमघवन्पाहिसोमंम् ॥ उरुष्ष्यराय
ऽएषोयजस्व ॥ ४ ॥ अंन्तस्ते[1] ॥ अन्तस्तेद्यावापृथिवीदधा
म्म्यन्तर्दधाम्म्युर्व्वन्तरिक्षम् ॥ सजूर्देवेभिरवरैःपरैश्चान्तर्या
मेमघवन्मादयस्व ॥ ५ ॥ स्वाङ्कृतोसि ॥ स्वाङ्कृतोसिविश्वेभ्यऽ

---

१ अन्तस्ते । अत्र स्वरात्संयोगादिर्द्विरुच्यते सर्वत्र (शु. य. प्रा. ४ अ. १०० सू.) इत्यनेन नकारस्य द्वित्वे प्राप्ते स्ववर्गीये चानुत्तमे (शु. य. प्रा. ४ अ. ११५ सू.) इत्यनेन स्ववर्गीये तकारे परे द्वित्वनिषेधान्न द्वित्वम् ।

इन्द्रियेभ्यौदिव्येभ्युꣳपार्त्थिवेभ्योमनस्त्वाष्टुस्वाहात्त्वासु

॥५१॥ भवसूर्य्यायदेवेभ्यस्त्वामरीचिपेभ्यऽउदानायत्त्वा ॥ ६ ॥ ॥ ७ ॥

[ ३-२ ]आवायो ॥ आवायो भूषशुचिपाऽउपनꣳसहस्रन्तेनि

युतोविश्ववार ॥ उपोतेऽअन्धोमद्यमयामियस्यदेवदधिषेपूर्व

पेयंवायवेत्त्वा ॥ ७ ॥ इन्द्रवायूऽइमे । सुताऽउपप्रयोभिराग

तम् ॥ इन्दवोवामुशन्तिहि ॥ उपयामगृहीतोसिवायवऽइन्द्र ॥५१॥

१ इन्द्रवायुभ्याम् । अत्र पूर्वौ द्वन्द्वेष्ववायुषु (शु. य. प्रा. ३ अ. १२८ सू.) इत्यनेन अवायौ द्वन्द्वसमासे पूर्वस्य पदान्तस्याकारस्य दीर्घविधाना- च्चात्रेन्द्रशब्दाकारस्य दीर्घाकारो वायुशब्दपरत्वात् ।

वायुभ्यान्त्वैषतेयोनिः सजोषोभ्यान्त्वा ॥ ८ ॥ [ २-३ ]
अयंव्वाम् ॥ अयंव्वाम्मित्रावरुणासुतश्सोमंऽऋतावृधा ॥ म
मेदिहश्रुतङ्हवम् ॥ उपयामगृहीतोसिमित्रावरुणाभ्यान्त्वा
॥ ९ ॥ रायाव्वयम् ॥ रायाव्वयꣳससवाꣳसोमदेमहव्येनदेवा
यवसेनगावः ॥ तान्धेनुम्मित्रावरुणायुवन्नोव्विश्वाहाधत्तमनं
पस्फुरन्तीमेषतेयोनिर्ऋतायुभ्यान्त्वा ॥ १० ॥ [ २-४ ]
यावाम् ॥ यावाङ्कशामधुमत्त्यश्विनासूनृतावती ॥ तया

यज्ञम्मिमिक्षतम् ॥ उपयामगृहीतोस्यश्विभ्यान्त्वैषतेयोनि
र्माध्वीभ्यान्त्वा ॥ ११ ॥ [१-५] तम्प्रत्नथां । पूर्व
थांविश्वथेमथांज्येष्ठतातिम्बर्हिषदंꣳस्वर्विदम् ॥ प्रतीचीनं
वृजनन्दोहसेधुनिमाशुञ्जयन्तमनुयासुवर्द्धसे ॥ उपयामगृ
हीतोसिशण्डायत्त्वैषतेयोनिर्वीरताम्पाह्यपमृष्टꣳशण्डोदेवा
स्त्वांशुक्रपाःप्रणयन्त्वनाधृष्टासि ॥ १२ ॥ सुवीरोवीरान् ॥ ॥५२॥
सुवीरोवीरान्प्रजनयन्परीह्यभिरायस्पोषेणयजमानम् ॥

सञ्जग्ग्मानोदिवापृथिव्याशुक्रश्शुक्रशौचिषानिरस्त्तःशण्डः
शुक्रस्याधिष्ठानमसि ॥१३॥ अच्छिन्नस्यते। देवसोमसुवीर्य्यं
स्यरायस्प्पोषस्यददितारः स्याम ॥ साप्प्रथमासँस्कृतिर्व्विश्श्ववा
रासप्प्रथमोव्वरुणोमित्रोऽअग्निश्श॥१४॥ सप्प्रथमश्श॥ सप्प्रथमो
बृहस्प्पतिश्चिकित्त्वाँस्त्तस्म्माऽइन्द्रायसुतमाजुहोतस्वाहा ॥
तृम्पन्तुहोत्त्रामद्ध्वोयाश्स्विष्टायाश्सुप्रीताःसुहुतायत्त्स्वाहाया

१ तथयोः सम् ( शु. य. प्रा. ३ अ. १३६ सू. ) इत्यनेन नकारस्य सकारे अनुनासिकमुपधा प्रागन्तस्थायाः ( शु. य. प्रा. ३ अ. १३१ सू. ) इत्यनेन चोपधायामनुनासिके कृते रूपम्। नात्र धामन्छत्रून्. ( शु. य. प्रा. ३ अ. १४६ सू. ) इति निषेधस्तवंपरत्वाभावात् ॥ २ तृम्पन्तु होत्राः। अत्र ऋपरेभ्यः ( शु. य. प्रा. ३ अ. ८५ सू. ) इत्यनेन समानपदे विधीयमानं णत्वं प्राप्तं परञ्च तवर्गं च ( शु. य. प्रा. ३ अ. ९४ सू. ) इत्यनेन निषेधान्न णत्वम्।

डुग्ग्नीत् ॥ १५ ॥ [ ४-६ ] अयंव्वेनः ॥ अयंव्वेनश्चोदय
त्पृश्निगब्भाज्ज्योतिर्ज्जरायूरजसोव्विमाने ॥ इममपाᳫंसङ्गमे
सूर्य्यस्यशिशुन्नव्विप्प्रामतिभीरिहन्ति ॥ उपयामगृहीतोसिम
र्कायत्त्वा ॥ १६ ॥ मनोन । येषुहवंनेषुतिग्ग्मंव्विपᳫंशच्च्यांव्वनु
थोद्द्रवन्ता ॥ आयश्शर्य्याभिस्त्तुविनृम्म्णोऽअस्याश्श्रीणीता
दिशङ्गभस्त्तावेषतेयोनिः प्प्रजाश्पाह्यपमृष्टोमर्कोदेवास्त्त्वाम
न्थिपाश्प्प्रणयन्त्वनाधृष्टासि ॥ १७ ॥ सुप्प्रजाः । प्प्रजाः

प्प्रंजनयन्त्परीह्याभिरायस्प्पोषेणयजमानम् ॥ सञ्जग्मानो
दिवापृंथिव्यामन्थीमन्थिशौचिषानिरंस्त्तोमक्कौमन्थिनोधि
ष्ठानमसि ॥ १८ ॥ [३-७] येदेवासः ॥ येदेवासोदिव्येका
दशस्त्थपृंथिव्यामद्ध्येकादशस्त्थ ॥ अप्प्सुक्षितोमहिनैकादश
स्त्थतेदेवासोयज्ञमिममञ्जुषद्ध्वम् ॥ १९ ॥ उपयामगृंहीतोसि ॥
उपयामगृंहीतोस्याग्ग्रयणोसिस्वाग्ग्रयणःपाहियज्ञम्पाहियज्ञ
पंतिंव्विष्ण्णुस्त्त्वामिंन्द्रियेणंपातुव्विष्ण्णुन्त्त्वम्पांह्यभिसवंना

निपाहि ॥ २० ॥ सोमः पवते ॥ सोमः पवतेसोमः पवतेस्मै
ब्रह्मणेस्मैक्षत्रायास्मैसुन्वतेयजमानायपवतऽइषऽऊर्जेप
वतेद्भ्यऽओषधीब्भ्यःपवतेद्यावापृथिवीब्भ्यांम्पवतेसुभूताय
पवतेविश्वेब्भ्यस्त्वादेवेब्भ्यंऽएषतेयोनिर्विश्वेब्भ्यस्त्वादेवे
ब्भ्यः ॥ २१ ॥ [ ३-८ ] उपयामगृहीतोसीन्द्रायत्वाबृहद्व
तेवयस्वतऽउक्थाव्ययङ्गृह्णामि ॥ यत्तऽइन्द्रबृहद्वयस्तस्मै
त्वाविष्णवेत्वैषतेयोनिरुक्थेब्भ्यस्त्वादेवेब्भ्यस्त्वादेवाव्यँ

॥५४॥

ऽसुञ्जस्यायुंषेगृह्णामिमित्रावरुणाब्भ्यान्त्वा ॥ २२ ॥ मित्रा
वरुणाब्भ्यान्त्वा । देवाब्य्यँऽसुञ्जस्यायुंषेगृह्णामीन्द्रायत्त्वादेवा
ब्य्यँऽसुञ्जस्यायुंषेगृह्णामीन्द्राग्निब्भ्यान्त्वादेवाब्य्यँऽसुञ्जस्यायु
षेगृह्णामीन्द्रावरुणाब्भ्यान्त्वादेवाब्य्यँऽसुञ्जस्यायुंषेगृह्णामी
न्द्राबृहस्प्पतिब्भ्यान्त्वादेवाब्य्यँऽसुञ्जस्यायुंषेगृह्णामीन्द्रावि
ष्णुब्भ्यान्त्वादेवाब्य्यँऽसुञ्जस्यायुंषेगृह्णामि ॥ २३ ॥ [२-९]
मूर्द्धानन्दिवः ॥ मूर्द्धानन्दिवोऽअरतिम्पृथिव्यावैश्वानरमृतऽ

आजातमग्निम् ॥ कविꣳसम्म्राजमतिथिञ्जनानामासन्नापा ॥७॥
त्रंञ्जनयन्तदेवाः ॥ २४ ॥ उपयामगृहीतोसि । ध्रुवोसिध्रुव
क्षितिर्द्ध्रुवाणान्ध्रुवतमोच्युतानामच्युतक्षित्तमऽएषतेयोनिर्व्वै
श्वानरायत्त्वा॥ ध्रुवन्ध्रुवेणमनंसावाचासोममवनयामि॥अथा
नऽइन्द्रऽइद्विशोसपत्नाःसमंनसस्करत् ॥२५॥[२-१०]यस्त्तै
द्रप्सस्कन्दतियस्त्तैऽअꣳशुर्ग्रावच्युतोधिषणयोरुपस्त्थात् ॥ ॥५५॥
अध्वर्य्योर्व्वापरिवायःपवित्रात्तन्तैजुहोमिमनसावषट्कृतꣳस्वा

हा॑देवानांमुत्क्रमंणमसि ॥ २६ ॥ [ १-११ ] प्राणायमे । वर्च्चो

दावर्च्चसेपवस्वव्यानायमेवर्च्चोदावर्च्चसेपवस्वोदानायमेवर्च्चोदा

वर्च्चसेपवस्ववाचेमेवर्च्चोदावर्च्चसेपवस्वक्रतुदक्षाभ्यामेवर्च्चो

दावर्च्चसेपवस्वश्रोत्रायमेवर्च्चोदावर्च्चसेपवस्वचक्षुर्भ्यामेव

र्च्चोदसौवर्च्चसेपवेथमात्मनेमे ॥ २७ ॥ आत्मनेमे । वर्च्चोदा

वर्च्चसेपवस्वौजसेमेवर्च्चोदावर्च्चसेपवस्वायुषेमेवर्च्चोदावर्च्चसेपव

स्वविश्वाभ्योमेप्रजाभ्योवर्च्चोदसौवर्च्चसेपवेथाम् ॥ २८ ॥

शु. य. संहि. ॥५६॥ कोऽसि । कतमोऽसि कस्यासि को नामासि ॥ यस्य ते नामामन्म पू. प्र.
हि यन्त्वा सोमेनातीतृपाम ॥ भूर्भुवः स्वः सुप्रजाः प्रजाभिः ॥७॥
स्याᳫं सुवीरो वीरैः सुपोषः पोषैः ॥ २९ ॥ [३-१२] उपया
मगृहीतोसि मधवे त्वोपयामगृहीतोसि माधवाय त्वोपयामगृ
हीतोसि शुक्राय त्वोपयामगृहीतोसि शुचये त्वोपयामगृहीतो
सि नभसे त्वोपयामगृहीतोसि नभस्याय त्वोपयामगृहीतोसीषे ॥५६॥
त्वोपयामगृहीतोस्यूर्जे त्वोपयामगृहीतोसि सहसे त्वोपयामगृ

हीतोसिसहस्यायत्त्वोपयामगृहीतोसितपसेत्त्वोपयामगृहीतो
सितपस्यायत्त्वोपयामगृहीतोस्यꣳहसस्पतयेत्त्वा ॥ ३० ॥
[ १-१३ ] इन्द्राग्नीऽआगंतम् ॥ इन्द्राग्नीऽआगंतꣳसुतङ्गी
र्भिर्नभोवरेण्ण्यम् ॥ अस्यपातन्धियेषिता ॥ उपयामगृहीतो
सीन्द्राग्निभ्यान्त्वैषतेयोनिरिन्द्राग्निभ्यान्त्वा ॥ ३१ ॥
[ १-१४ ] आघं ॥ आघायेऽअग्निमिन्धतेस्तृणन्तिबर्हिरानु

१ आघाये । अत्र अथोदारिथशोचपनयसादयर्जुवृषशत्रुसलक्ष्माधाघारास्पृभवत यकारे (शु. य. प्रा. ३ अ. ११३ सू.) यकारे परे एते दीर्घा भवन्ति । तेन घ इत्यस्याकारस्य दीर्घः । एवम् अघायतः इत्यत्रापि दीर्घः ।

षक् ॥ येषामिन्द्रोसुवासखा ॥ उपयामगृहीतोस्यग्नीन्द्रा
ब्भ्यान्त्वैषतेयोनिरग्नीन्द्राब्भ्यान्त्वा ॥ ३२ ॥ [ १-१५ ]
ओमांसश्चर्षणीधृतः[1] ॥ ओमांसश्चर्षणीधृतोव्विश्श्वेदेवासऽआ
गत ॥ दाश्श्वाᳫंसोदाशुषᳫं सुतम् ॥ उपयामगृहीतोसिव्विश्श्वे
ब्भ्यस्त्त्वादेवेब्भ्यंऽएषतेयोनिर्व्विश्श्वेब्भ्यस्त्त्वादेवेब्भ्यंः ॥३३॥
[ १-१६ ] व्विश्श्वेदेवासः ॥ व्विश्श्वेदेवासऽआगतशृणुतामंऽइमᳫं[2]



१ अत्र पिबासोमम्। (शु. य. प्रा. ३ अ. १२९ सू.) इत्यनेन चर्षणिशब्दस्येकारस्य दीर्घे चर्षणीधृतः। २ श्रृणुत मऽइमम्। अत्र श्रृणुतत्विषि-धजिभवतपिबेतस्सातिष्ठरक्षा मकारे (शु. य. प्रा. ३ अ. ११७ सू.) इत्यनेन मकारे परे एते दीर्घा भवन्ति। इति तकारस्य दीर्घे श्रृणुतामऽइमम्।

हवम् ॥ एदम्बर्हिर्न्निषीदत ॥ उपयामगृहीतोसिव्विश्वेब्भ्य
स्त्त्वादेवेब्भ्यंऽएषतेयोनिर्व्विश्वेब्भ्यस्त्त्वादेवेब्भ्यः ॥ ३४ ॥
[१-१७] इन्द्रमरुत्त्वꣳ ॥ इन्द्रमरुत्त्वऽइहपाहिसोमँऽयथा
शार्य्यातेऽअपिबꣳसुतस्य ॥ तवप्प्रणीतीतवशूरशर्म्मन्नाविवा
सन्तिकवयःसुयज्ञाः ॥ उपयामगृहीतोसीन्द्रायत्त्वामरुत्त्व
तऽएषतेयोनिरिन्द्रायत्त्वामरुत्त्वते ॥ ३५ ॥ [१-१८] मरु
त्त्वन्तंव्वृषभं । व्वावृधानमकंवारिन्दिव्यꣳशासमिन्द्रम् ॥

१ बर्हिर्निषीदत अत्र निःसीदत इति पदम् । अत्र नेः सीदतेः (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन नेः परस्य सीदतेत्यत्रस्थसकारस्य षकारः ।

शु. य. संहि. ॥५८॥

पू. अ. ॥७॥

[1]व्विश्वासाहमवंसेनूतंनायोग्ग्रᳪंसंहोदामिहतᳪंहुवेम ॥ उप
यामगृहीतोसीन्द्रायत्त्वामरुत्त्वंतऽएषतेयोनिरिन्द्रायत्त्वामरु
त्त्वंते ॥ [2][१-१९] उपयामगृहीतोसिमरुतान्त्त्वौजसे ॥३६॥
[१-२०] सजोषाऽइन्द्र ॥ सजोषाऽइन्द्रसगणोमरुद्भिᳪं
सोमम्पिबवृत्रहाशूरविद्वान् ॥ [3]जहिशत्रूँ १ ॥ रपमृधोनुद
स्वाथाभयङ्कृणुहिविश्वतोनᳪं ॥ उपयामगृहीतोसीन्द्रायत्त्वा ॥५८॥

१ व्विश्वासाहम्। अत्र विश्वशब्दाकारस्य विश्वसहभुवपुषवसुषु (शु. य. प्रा. ३ अ. १०१ सू.) इत्यनेन सहपरे दीर्घाकारः। २ (इति शतपथे)। ३ शत्रूँ १ ॥ रपमृधः। अत्र स्वर औपशविः (शु. य. प्रा. ३ अ. १३२ सू.) इत्यनेन नकारस्य स्वरे परे अनुस्वारे उपधायामनुनासिक्ये च रूपम्।

मरुत्त्वतऽएषतेयोनिरिन्द्रायत्त्वामरुत्त्वते ॥ ३७ ॥ [ १-२१ ]
मरुत्त्वाँ[१] २ ॥ ऽइन्द्र । वृषभोरणायपिबासोममनुष्ष्वधम्म
दाय ॥ आसिञ्चस्वजठरेमद्ध्वऽऊर्म्मिन्त्वꣳराजासिप्प्रतिपत्त्सु
तानाम् ॥ उपयामगृहीतोसीन्द्रायत्त्वामरुत्त्वतऽएषतेयोनि
रिन्द्रायत्त्वामरुत्त्वते ॥ ३८ ॥ [ १-२२ ] महाँ २ ॥ ऽइन्द्रः ॥
महाँ २ ॥ ऽइन्द्रोनृवदाचर्षणिप्प्राऽउतद्विबर्हाऽअमिनःसहो

१ मरुत्वान् इन्द्रः। अत्राकारोपधो यकारम् (शु. य. प्रा. ३ अ. १४३ सू.) इत्यनेन स्वरे परे नकारस्य यकारे कृते उपधायामनुनासिक्ये च यवयोः पदान्तयोः स्वरमध्ये लोपः (शु. य. प्रा. ४ अ. १२५ सू.) इत्यनेन यकारलोपे न परकाल० (शु. य. प्रा. ३ अ. ४ सू.) इत्यनेन सन्धेर्निषेधः। तथैव महाँ २ इन्द्रः।

भिः ॥ अस्म्मद्ध्र्यग्ग्वावृधेव्वीर्र्य्यायोरुश्शपृथुश्शसुकृतःकर्त्तृभिर्भि
र्ब्भूत् ॥ उपयामगृहीतोसिमहेन्द्रायत्त्वैषतेयोनिर्म्महेन्द्राय
त्त्वा ॥३९॥ [१-२३] महाँ २॥ ऽइन्द्रः॥ महाँ २॥ ऽइन्द्रो
यऽओजसापर्ज्जन्न्योवृष्टिमाँ २॥ ऽइव॥ स्तोमैर्व्वत्त्सस्यवावृधे ॥
उपयामगृहीतोसिमहेन्द्रायत्त्वैषतेयोनिर्म्महेन्द्रायत्त्वा ॥४०
[१-२४] उदुत्त्यम् ॥ उदुत्त्यञ्जातवेदसन्देवंवहन्तिकेतवः ॥ ॥५९॥

१ कर्तृभिः । अत्र परंतु रेफहकाराभ्याम् (शु. य. प्रा. ४ अ. १०१ सू.) इत्यस्यापवादभूतेन ऊष्मान्त. (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन तकारस्य द्वित्वे प्राप्ते ऋवर्णे च (शु. य. प्रा. ४ अ. १११ सू.) इत्यनेन ऋवर्णे परे व्यञ्जनस्य द्विर्भावनिषेधान्न द्वित्वम् । एतादृशेष्वन्येष्वपि बोध्यम् ।

हृशोव्विश्वांयसूर्य्यं स्वाहा ॥४१॥ चित्रन्देवानाम् ॥ चित्रन्देवा
नामुदंगादनीकञ्चक्षुर्म्मित्रस्यव्वरुणस्याग्नेः ॥ आप्प्राद्यावा
पृथिवीऽअन्तरिक्षहृसूर्य्यंऽआत्त्माजगतस्तस्थुषश्च स्वाहा
॥ ४२ ॥ अग्नेनयं । सुपथारायेऽअस्म्मान्विश्वानिदेवव्वयुना
निव्विद्वान् ॥ युयोद्ध्यस्म्मज्जुहुराणमेनोभूयिंष्ठान्तेनमऽउ
क्तिंव्विधेमस्वाहा ॥ ४३ ॥ अयन्नः ॥ अयन्नोऽअग्निर्व्वरि
वस्कृणोत्त्वयम्मृधः पुरऽएतुप्प्रभिन्दन् ॥ अयंव्वाजाञ्जयतुव्वा

॥ ६० ॥ जंसातावयꣳशत्रूँञ्जयतुजर्हृषाणꣳस्वाहा ॥ ४४ ॥ रूपेणवꣳ ॥
रूपेणवोरूपमभ्यागान्तुथोवोविश्ववेदाविभजतु ॥ ऋतस्य
पथाप्प्रेतंचन्द्रदक्षिणाविस्वꣳपश्श्यव्यन्तरिक्षँय्यतस्वसदस्यैꣳ
॥ ४५ ॥ ब्राह्मणमद्य । विदेयम्पितृमन्तम्पैतृमत्त्यमृषिमा
र्षेयꣳसुधातुदक्षिणम् ॥ अस्म्मद्राताद्देवत्राग्गच्छतप्प्रदातार
माविशत ॥ ४६ ॥ अग्ग्नयेत्त्वा ॥ अग्ग्नयेत्त्वामह्यंव्वरुणोददातु ॥ ६० ॥

1 विस्वः । अत्र वेर्युदयः (शु. य. प्रा. ३ अ. ६७ सू.) इत्यनेन वेः उपसर्गात्परस्य सकारस्य यकारोदये षकारो भवति। अतो नात्र सकारात्परस्य वकारोदयस्य वेरुपसर्गस्य सकारस्य षकारः।

सोमृतत्त्वमंशीयायुर्दात्र ऽएधिमयोमह्यम्प्रतिग्ग्रहीत्रे रुद्रायं
त्वामह्यँव्वरुणोददातुसोमृतत्त्वमंशीयप्प्राणोदात्र ऽएधिव्वयो
मह्यम्प्रतिग्ग्रहीत्रेबृहस्प्पतयेत्त्वामह्यंव्वरुणोददातुसोमृतत्त्व
मंशीयत्त्वग्ग्दात्र ऽएधिमयोमह्यम्प्रतिग्ग्रहीत्रेयमायंत्त्वामह्यं
व्वरुणोददातुसोमृतत्त्वमंशीयहयोदात्र ऽएधिव्वयोमह्यम्प्रति
ग्ग्रहीत्रे ॥ ४७ ॥ कोदात् ॥ कोदात्कस्म्मा ऽअदात्कामोदा
त्कामायादात् ॥ कामोदाताकामं प्प्रतिग्ग्रहीताकामैतत्ते

॥ ४८ ॥ [ ८-२५ ] इतिश्रीवाजसनेयसंहितायांसप्तमोऽध्यायः
॥ ७ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाकसूत्रम् ॥ उपयामगृ-
हीतोस्यादित्येभ्यः पंच, वाममद्यद्वे, सुशर्मास्येका, बृहस्प-
तिसुतस्यद्वे, हरिरसिचतस्रः, समिन्द्रेऽष्टौ, माहिः पंच,
ऽएजतुदशमास्यः पंचा, तिष्ठैका, सुक्ष्वाह्येके, न्द्रमिदेका,
यस्मान्नद्वे, ऽग्नेपवस्वो, त्तिष्ठन्न, द्दश्रमु, दुत्यमेकैका, जिघ्र
द्वे, विनइन्द्र, वाचस्पतिं, विश्वकर्मन्नेकैका, ग्रयेत्वाचतस्र,

इहरतिस्तिस्रः, परमेष्ठीदश, त्रयोविꣳशतिस्त्रिषष्टिः ॥ [अ. ८
मं. ६३ अनु. २३] हरिः ॐ ॥ उपयामगृहीतोसि ॥ उपया
मगृहीतोस्यादित्येभ्यस्त्वा ॥ विष्णऽउरुगायैषतेसोमस्तꣳ
रक्षस्वमात्वादभन् ॥ १ ॥ कदाचन । स्तरीरसिनेन्द्रसश्चसि
दाशुषे ॥ उपोपेन्नुमघवन्भूयऽइन्नुतेदानन्देवस्यपृच्यतऽआ
दित्येभ्यस्त्वा ॥ २ ॥ कदाचन । प्रयुच्छस्युभेनिपासिज
न्मनी ॥ तुरीयादित्यसवनन्तऽइन्द्रियमातस्थावमृतन्दि

ब्भ्यादित्त्येब्भ्यस्त्त्वा ॥ ३ ॥ यज्ञोदेवानाम् ॥ यज्ञोदेवाना
म्प्रत्त्यैतिसुम्म्नमादित्त्यासोभवतामृडयन्तः[1] ॥ आवोर्व्वाची
सुमतिर्व्ववृत्त्यादंहोश्चिद्यावरिवोवित्तरासदादित्त्येब्भ्यस्त्त्वा
॥ ४ ॥ व्विवस्वन्नादित्त्य ॥ व्विवस्वन्नादित्त्यैषतेसोमपीथस्त्त
स्म्मिन्मत्त्स्व ॥ श्रदस्म्मैनरोव्वचसेदधातनयदाशीर्दादम्पती
व्वाममश्नुतः ॥ पुमान्पुत्रोजायतेव्विन्दतेव्वस्वधाव्विश्वाहारप
एधतेगृहे ॥ ५ ॥ [५-१] व्वाममद्य । सवितर्व्वाममुश्वोदिवे



१ भवत मृडयन्तः । अत्र श्रृणुत्विविषिध्रजिभवतपिबेतस्मतिष्ठरक्षा मकारे (शु. य. प्रा. ३ अ. ११७ सू.) इत्यनेन मकारे दीर्घं भवता मृडयन्तः ।

दिवेव्वामम्स्म्मभ्यंसावीः ॥ व्वामस्यहिक्षयस्यदेवभूरैररयाधि
याव्वामभाजःस्याम ॥ ६ ॥ उपयामगृहीतोसि । सावित्रो
सिचनोधाश्चनोधाऽअसिचनोमायिधेहि ॥ जिन्वयज्ञञ्जिन्व
यज्ञपतिम्भगायदेवायत्त्वासवित्रे ॥ ७ ॥ [२-२] शतम्
॥ ३०० ॥ उपयामगृहीतोसि । सुशर्म्मासिसुप्प्रतिष्ठानोबृहदु
क्षायनमः ॥ विश्वेभ्यस्त्वादेवेभ्यःऽएपतेयोनिर्विश्वेभ्य
स्त्वादेवेभ्यः ॥ ८ ॥ [१-३] उपयामगृहीतोसि ॥ उप

यामगृहीतोसिबृहस्पतिंसुतस्यदेवसोमतऽइन्दोरिन्द्रियावतꣳ[1] पू. अ.
।६३॥ पत्नीवतोग्ग्रहाँ २ ॥ ऽऋध्यासम् ॥ अहम्परस्तादहमवस्ता ॥८॥
द्यदन्तरिक्षन्तदुमेपिताभूत् ॥ अहꣳसूर्य्यमुभयतोददर्शाह
न्देवानाम्परमङ्गुहायत् ॥ ९ ॥ अग्ना ३॥ ऽइपत्नीवन् ॥
अग्ना ३ ॥ ऽइपत्नीवन्त्सजूर्द्देवेनत्त्वष्ट्रासोमम्पिबस्वाहा ॥
प्रजापतिर्वृषासिरेतोधारेतोमयिधेहिप्प्रजापतेस्त्तेवृष्णोरेतो ॥६३॥

---

१ बृहस्पतिसुतस्य । अत्र भाविभ्यः सः षं समानपदे (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन सस्य षत्वे प्राप्ते अनुसन्तनोतु बृहस्पति० (शु. य. प्रा. ३ अ. ८२ सू.) इत्यनेन समानपदे सस्य प्रकृतिभावविधानान्न षत्वम् । तत ऊष्मान्तस्थाभ्यश्च स्पर्शाः (शु. य. प्रा. ४ अ. १०२ सू.) इति पकारस्य द्वित्वम् ।

धसौरैतोधामेशीय ॥ १० ॥ [२-४] उपयामगृहीतोसि ॥
उपयामगृहीतोसिहरिरसिहारियोजनोहरिभ्यान्त्वा ॥ हय्यौ
र्द्धानास्त्थसहसोमाऽइन्द्राय ॥ ११ ॥ यस्त्ते । ऽअश्वसनि
र्भक्षोयोगोसनिस्त्तस्यतऽइष्टयजुषस्त्तुतस्त्तोमस्यशस्त्तोक्थ
स्योपहूतस्योपहूतोभक्षयामि ॥ १२ ॥ देवकृतस्यैनसः ॥
देवकृतस्यैनसोवयजनमसिमनुष्यकृतस्यैनसोवयजनमसिपि
तृकृतस्यैनसोवयजनमस्यात्मकृतस्यैनसोवयजनमस्येनसऽए

१ गोसनिस्त. । भाविभ्यः सः षं समानपदे (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन षत्वप्राप्तौ अनुसन्त० (३ अ. ८२ सू.) इत्यनेन निषिध्यते।

२०९

नसोवयजंनमसि ॥ यच्चाहमेनोविद्वाँश्चकारयच्चाविद्वाँस्तस्य
सर्वस्यैनंसोवयजंनमासि॥१३॥ संवर्चसा ॥ संवर्चसापयंसासन्त
नूभिरगंन्महिमनंसासᳬंशिवेनं ॥ त्वष्टांसुदत्रोविदंधातुरायो
नुमार्ष्टुतन्वोयद्विलिष्टम् ॥१४॥ [४-५] सेमिंन्द्र। णोमनंसाने
षिगोभिःसᳬंसूरिभिर्म्मघवन्तसᳬंस्वस्त्या ॥ सम्ब्रह्मणादेव
कृतँय्यदास्तिसन्देवानांᳬंसुमतौयज्ञियांनाᳬंस्वाहा ॥ १५ ॥ ॥ ६४ ॥

---

१ समिन्द्रणो। अत्र इन्द्र नः इति पदद्वयेन भाविभ्य० (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन समानपदत्वाभावाण्णत्वाप्राप्तौ निपण्णायरथवाहण। मिन्द्रऽएणस्परिणीयते समिन्द्रण० (शु. य. प्रा. ३ अ. ८३ सू.) इत्यनेन णत्वं निपात्यते।

संव्वर्चैसा ॥ संव्वर्चैसापयंसासन्तनूभिरगंन्महिमनंसासᳬशि
वेन। त्वष्टांसुदत्त्रोव्विदंधातुरायोनुंमार्ष्टुतन्वोयद्विलिष्टम् ॥ १६॥
न्ता धातारातिः। संवितेदञ्जुंषन्ताम्प्रजापंतिर्न्निधिपादेवोऽअग्निः ॥
त्वष्टाव्विष्णुंः प्रजयांसᳬरराणायजंमानायद्रविंणन्दधात
स्वाहां ॥ १७॥ सुगावंः ॥ सुगावोदेवाःसदंनाऽअकर्म्मयऽ
आंजग्मेदᳬसवंनञ्जुषाणाः ॥ भरंमाणाव्वहंमानाहवीᳬष्यु
स्म्मेधंत्तव्वसवोव्वसूंनिस्वाहां ॥ १८॥ यॉं २॥ ऽआवंहᳬ ॥

सौं २॥ ऽआवहऽउशतोदेवदेवाँस्त्तान्प्रेरयस्वेऽअग्नेसधस्त्थे॥

 जक्षिवाᳫंसः पपिवाᳫंस श्चविश्वेसुङ्घर्म्मᳫंस्वरातिष्ठतानु 

स्वाहा॥ १९॥ वयᳫंहि। त्वाम्प्रयतियज्ञेऽअस्मिन्नग्नेहोतार

मवृणीमहीह॥ ऋधगयाऽऋधगुताशमिष्ठाःप्रजानन्यज्ञमु

पयाहिविद्वान्त्स्वाहा॥२०॥ देवागातुविदः॥ देवागातुविदोगा

तुंवित्त्वागातुमित॥ मनसस्पतऽइमन्देवयज्ञᳫंस्वाहावातेधाः 

॥ २१॥ यज्ञंयज्ञम्॥ यज्ञंयज्ञङ्गच्छयज्ञपतिङ्गच्छस्वाँयोनिं

ङ्गच्छस्वाहा ॥ एषतेयज्ञोयज्ञपतेसहसूक्तवाकꣳसर्व्ववीरस्तञ्जु
षस्वस्वाहा ॥ २२ ॥ [८-६] माहिंःमाहिर्भुर्म्मापृदाकुः ॥
उरुꣳहिराजाव्वरुणश्चकारसूर्य्यायपन्थामन्वेतवाऽउ ॥ अप
देपादाप्प्रतिधातवेकरुतापवक्ताहृदयाव्विधश्चित् ॥ नमोव्वरुणा
याभिष्ठितोव्वरुणस्यपाशः ॥ २३ ॥ अग्नेरनीकम् ॥ अग्ने
रनीकमपऽआविवेशापान्नपात्प्रतिरक्षन्नसुर्य्यम् ॥ दमेदमेस

१ हृदयाविधश्चित् । अत्र अश्वरश्मिमतिसुमतिश्वसुतचारयद्वणिस्तेदिमेन्द्रियधारयचित्रभङ्गुरवयुनाश्वस्यहृदय० (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन वकारे परे हृदयाकारस्य दीर्घाकारो विधीयते । अतो हृदयशब्दाकारस्य दीर्घाकारः ।

सिधँऽस्यक्ष्यग्ग्नेप्प्रातितोजिह्वाघृतमुच्चरण्ण्यत्स्वाहा ॥ २४ ॥ समु
द्रेते ॥ समुद्रेतेहृदयमप्प्स्वन्तश्शसन्त्वाविशन्त्वोषधीरुतापः ॥
यज्ञस्यत्वायज्ञपतेसूक्तोक्तौनमोवाकेविधेमयत्स्वाहा ॥ २५ ॥
देवीरापः ॥ देवीरापऽएषवोगर्ब्भस्तꣳसुप्प्रीतꣳसुभृतम्बिभृत ॥
देवसोमैषतेलोकस्तस्मिञ्छञ्चवक्ष्वपरिचवक्ष्व ॥ २६ ॥ अव
भृथनिचुम्पुण । निचेरुरसिनिचुम्पुणः ॥ अवदेवैर्द्देवकृतमे
नोयासिषमवमर्त्त्यैर्म्मर्त्त्यकृतम्पुरुराव्ण्णोदेवरिषस्पाहिदेवा

॥६६॥

नांꣳसमिदंसि ॥ २७ ॥ [५-७] एजंतुदशंमास्यः ॥ एज
तुदशमास्योगर्ब्भोजरायुणासह ॥ यथायंव्वायुरेजंतियथासमु
द्रऽएजंति ॥ एवायन्दशमास्योऽअस्रंज्जरायुणासह ॥ २८ ॥
यस्यैते । यज्ञियोगर्ब्भोयस्यैयोनिर्हिरण्ययी ॥ अङ्गान्यहु
तायस्यतम्मात्रासमंजीगमꣳस्वाहा ॥ २९ ॥ पुरुदस्मोवि
षुरूपः ॥ पुरुदस्मोविषुरूपऽइन्दुरन्तर्म्महिमानंमानञ्जधी
रः ॥ एकपदीन्द्विपदीन्त्रिपदीञ्चतुष्पदीमष्टापदीम्भुवनानु

प्रथन्ताᳬस्वाहा ॥ ३० ॥ मरुतोयस्य ॥ मरुतोयस्यहिक्षये

पा[1]थादिवोविमहसः ॥ ससुगोपातमोजनः ॥ ३१ ॥ मही

द्यौः । पृथिवीचनऽइमँय्यज्ञम्मिमिक्षताम् ॥ पिपृतान्नोभरी

मभिः ॥ ३२ ॥ [५-८] आ[2]तिष्ठ । वृत्रहन्रथँय्युक्तातेब्र

ह्मणाहरी ॥ अर्वाचीनᳬसुतेमनोग्ग्रावाकृणोतुवग्नुना ॥

उपयामगृहीतोसीन्द्रायत्वाषोडशिनऽएषतेयोनिरिन्द्रायत्वा ॥ ६७ ॥

१ अत्र पिबा सोमम् (शु. य. प्रा. अ. १३० सू.) इत्यनेन पाथ इत्यस्य ह्रस्वाकारस्य दीर्घः । २ आतिष्ठ वृत्रहन् । अत्र तिष्ठाद्युदात्तम् । (शु. य. प्रा. ३ अ. १०४ सू.) तिष्ठेत्येतत्पदं दीर्घमापद्यते यद्याद्युदात्तं भवति । इत्यनेन विधीयमानो दीर्घाकार आतिष्ठपदस्य आद्युदात्तत्वाभावेन न दीर्घः ।

षोडशिनें ॥ ३३ ॥ [१-९] युक्ष्वाहि । केशिनाहरीवृषणा
कक्ष्यप्रा ॥ अथानऽइन्द्रसोमपागिरामुपश्रुतिञ्चर ॥ उप
यामगृहीतोसीन्द्रायत्त्वाषोडशिनंऽएषतेयोनिरिन्द्रायत्त्वाषो
डशिनें ॥ ३४ ॥ [१-१०] इन्द्रमित् ॥ इन्द्रमिद्धरीवहतोप्प्रति
धृष्टशवसम् ॥ ऋषीणाञ्चस्तुतीरुपयज्ञञ्चमानुषाणाम् ॥ उप
यामगृहीतोसीन्द्रायत्त्वाषोडशिनंऽएषतेयोनिरिन्द्रायत्त्वाषो
डशिनें ॥ ३५ ॥ [१-११] यस्म्मान्न । जातःपरोऽअन्न्योऽअ

१ अत्र पिबा सोमम् (शु. य. प्रा. ३ अ. १३० सू.) इत्यनेन अकारस्य दीर्घे युक्ष्वाहि इति ।

स्त्तियऽआविवेशभुवनानिविश्वा ॥ प्रजापतिःप्रजयासꣳ
रराणस्त्रीणिज्ज्योतीꣳषिसचतेसषोडशी ॥ ३६ ॥ इन्द्रश्च ।
सम्म्राड्वरुणश्चराजातौतेभक्षञ्चक्रतुरग्ग्रेऽएतम् ॥ तयोरहमनुभ
क्षम्भक्षयामिव्वाग्ग्देवीजुषाणासोमस्यतृप्प्यतुसहप्प्राणेनस्वा
हा ॥ ३७ ॥ [२-१२] अग्ग्नेपवस्व ॥ अग्ग्नेपवस्वस्वपाऽअस्म्मे
व्वर्च्चः सुवीर्य्यम् ॥ दधद्रयिम्मयिपोषम् ॥ उपयामगृहीतोस्य
ग्ग्नयेत्त्वाव्वर्च्चसऽएषतेयोनिरग्ग्नयेत्त्वाव्वर्च्चसे ॥ अग्ग्नेव्वर्च्चस्विन्व

र्च्चौस्थाँस्त्त्वन्देवेष्ष्वासिव्वर्च्चौस्वानहम्मंनुष्ष्येषुभूयासम् ॥ ३८ ॥
[ १-१३ ] उत्तिष्ठन्नोजंसा ॥ उत्तिष्ठन्नोजसासहपीत्त्वीशिप्प्रेऽ
अवेपयः ॥ सोमंमिन्द्रचमूसुतम् ॥ उपयामगृहीतोसीन्द्राय
त्त्वौजंसऽएषतेयोनिरिन्द्रांयत्त्वौजसे ॥ इन्द्रौजिष्ठौजिष्ठस्त्त्व
न्देवेष्ष्वस्योजिष्ठोहम्मंनुष्ष्येषुभूयासम् ॥ ३९ ॥ [ १-१४ ]
अहंश्श्रमस्य। केतवोव्विरश्श्मयोजनाँ२ ॥ ऽअनु ॥ भ्राजन्तोऽ
अग्ग्नयोयथा ॥ उपयामगृहीतोसिसूर्य्यायत्त्वाब्भ्राजायैषते

योनिᳬसूर्य्यायत्त्वाभ्राजाय ॥ सूर्य्यभ्राजिष्ठुभ्राजिष्ठस्त्व
न्देवेष्ष्वसिभ्राजिष्ठोहम्मनुष्येषुभूयासम् ॥ ४० ॥ [१-१५]
उदुत्त्यम् ॥ उदुत्त्यञ्जातवेदसन्देवंव्वहन्तिकेतवः ॥ दृशेव्वि
श्श्वायसूर्य्यम् ॥ उपयामगृहीतोसिसूर्य्यायत्त्वाभ्राजायैषते
योनिᳬसूर्य्यायत्त्वाभ्राजाय ॥ ४१ ॥ [१-१६] आजिग्घ्र ॥
आजिग्घ्रकलशम्मह्यात्त्वाव्विशन्त्विन्दवᳬ ॥ पुनरूर्ज्जानिवर्त्त
स्वसानःसहस्रन्धुक्ष्वोरुधारापयस्वतीपुनर्म्माव्विशताद्द्रयिः

॥ ४२ ॥ इडेरन्ते ॥ इडेरन्तेहव्येकाम्म्येचन्द्रेज्ज्योतेदितिसरं
स्वतिमहिविश्श्रुति॥ एतातेऽअघ्न्येनामानिदेवेब्भ्योमासुकृतं
म्ब्रूतात् ॥ ४३ ॥ [ २-१७ ] विनः ॥ विनऽइन्द्रमृधोजहि
नीचायच्छपृतन्यतः ॥ योऽअस्म्माँ२ ॥ ऽअभिदासत्त्यधं
रङ्गमयातमः ॥ उपयामगृहीतोसीन्द्रायत्त्वाविमृधऽएषते
योनिरिन्द्रायत्त्वाविमृधे ॥ ४४ ॥ [ १-१८ ] वाचस्प्पतिं ।

१ अस्य नामानि । अत्र नामानिपदस्थस्य निशब्दो बहुलम् (शु. य. प्रा. ३ अ. १८ सू.) इति सूत्रेण पदान्तीयस्य निशब्दस्य लोपे प्राप्तेऽपि सूत्रे बहुलम् ग्रहणात्क्वचिन्न भवति । तेन नात्र लोपः । २ अत्र पिबा सोमम् ( शु. य. प्रा. ३ अ. १३० सू.) इत्यनेन दीर्घाकारे जाते गमयातमः ।

व्विश्वकर्म्माणमूतयेमनोजुवंव्वाजेऽअद्याहुवेम ॥ सनोव्विश्वा 
॥७०॥ निहवनानिजोषाद्विश्वशम्भूरवसेसाधुकर्म्मा ॥ उपयामगृही ॥८॥
तोसीन्द्रायत्वाव्विश्वकर्म्मणऽएषतेयोनिरिन्द्रायत्त्वाव्विश्वक
र्म्मणे ॥ ४५ ॥ [ १-१९ ] व्विश्वकर्म्मन्हविषा ॥ व्विश्वकर्म्म
न्हविषावर्द्धनेनत्त्रातारमिन्द्रमकृणोरवद्ध्यम् ॥ तस्म्मैव्विशः
समनमन्तपूर्व्वीरयमुग्ग्रोव्विहव्योयथासत् ॥ उपयामगृहीतो ॥७०॥

---

१ अद्य हुवेम । अत्र अद्य तं हकारचकारभवतवृणीमहेदेवेषु (शु. य. प्रा. ३ अ. ११५ सू.) इत्यनेन अद्येत्येतत्पदं हस्वहकारतकारचकारभवत-वृणीमहेदेवेत्येषु परेषु दीर्घमापद्यते । इति हकारे परे अद्यशब्दाकारो दीर्घो जातः । तेन अद्याहुवेम इति ।

सीन्द्रायत्त्वाव्विश्वकर्म्मणऽएषतेयोनिरिन्द्रायत्त्वाव्विश्वकं
र्म्मणे ॥ ४६ ॥ [ १-२० ] उपयामगृहीतोसि ॥ उपयाम
गृहीतोस्यग्नयेत्त्वागायत्रच्छंन्दसङ्गृह्णामीन्द्रायत्त्वात्रिष्टुप्प्छं
न्दसङ्गृह्णामिव्विश्वेब्भ्यस्त्वादेवेब्भ्योजगंच्छन्दसङ्गृह्णाम्म्यनु
ष्टुप्तेभिगरः ॥४७॥ व्वेशीनान्त्वा ॥ व्वेशीनान्त्वापत्क्मन्नाधूं
नोमिकुकूननानान्त्वापत्क्मन्नाधूंनोमिभन्दनानान्त्वापत्क्म
न्नाधूंनोमिमदिन्तंमानान्त्वापत्क्मन्नाधूंनोमिमधुन्तमाना

न्त्वापत्मन्नाधूनोमिशुक्रन्त्वांशुक्रऽआधूनोम्म्यह्नोरूपेसूर्य्यँ
स्यरश्मिषु ॥ ४८ ॥ ककुभꣳरूपं । वृषभस्यरोचतेबृह
च्छुक्रःशुक्रस्यपुरोगाःसोमꣳसोमस्यपुरोगाः ॥ यत्तेसोमादा
भ्यन्नामजागृवितस्मैत्त्वागृह्णामितस्मैतेसोमसोमायस्वा
हा ॥४९॥ उशिक्त्वम् ॥ उशिक्त्वन्देवसोमाग्नेःप्प्रियम्पाथो
पीहिवशीत्त्वन्देवसोमेन्द्रस्यप्प्रियम्पाथोपीह्यस्म्मत्त्सखात्त्व ॥७१॥
न्देवसोमाविश्श्वेषान्देवानाम्प्प्रियम्पाथोपीहि ॥५०॥ [४-२१]

इहरतिः ॥ इहरतिरिहरमद्ध्वमिहधृतिरिहस्वधृतिःस्वाहा ॥
उपसृजन्धरुणम्मात्रेधरुणोमातरन्धयन् ॥ रायस्प्पोषमस्म्मा
सुदीधरत्त्स्वाहा ॥ ५१ ॥ सत्रस्यऽऋद्धिः ॥ सत्रस्यऽऋद्धिर
स्यगन्म्मज्योतिरमृताऽअभूम ॥ दिवम्पृथिव्याऽअद्ध्यारुहामा
विदामदेवान्त्स्वर्ज्योतिः ॥ ५२ ॥ युवन्तम् ॥ युवन्तमि
न्द्रापर्वतापुरोयुधायोनःपृतन्यादपतन्तमिद्धन्तंवज्रेणतन्त
मिद्धतम् ॥ दूरेचत्तायच्छन्त्सद्गहनँयदिनक्षत् ॥ अस्म्मा

कुद्दशात्रूँक्न्पारिंशूरविश्वतोदुम्मार्दंषीष्टविश्वतं÷ ॥ भूम्भुर्वुःस्व÷
सुप्प्रजाःप्रजाभिं÷स्यामसुवीरांव्वीरैःसुपोषाःपोषैः ॥ ५३ ॥
[ ३-२२ ] पुरमेष्ठ्युभिधींतः[1] । प्प्रजापंतिर्व्वाचिव्याहृतायाम
न्धोऽअच्छैतःसवितासुन्यांव्विश्वकंम्मांदीक्षायांम्पूषासोंमक्र
यंण्णयामिन्द्रश्च ॥ ५४ ॥ इन्द्रश्च । मरुतश्चक्रयायोपोत्त्थितो
सुरःपण्ण्यमांनोमित्रःक्रीतोव्विष्ण्णुं÷शिपिविष्टऽऊरावासन्नो 

---

१ परमेष्ठ्यभिधीतः। अत्र परमेस्थ्यभिधीतः इत्यत्र भाविभ्यः सः षं समानपदे ( शु य. प्रा. ३ अ. ५६ सू. ) इत्यनेन सकारस्य षत्वे षात्तथौ-मूर्धन्यम् ( शु. य प्रा. ३ अ. ८१ सू ) इत्यनेन षकारात्परौ तथौ मूर्धन्यत्वमापद्येते। तकारस्य टकारो थकारस्य ठकारो भवतीति ज्ञेयम्। एवं थकारस्य ठकारे कृते ऊष्मान्ताभ्यश्च स्पर्शाः ( शु. य. प्रा. ३ अ. १०२ सू. ) इत्यनेन ठकारस्य द्वित्वम्।

व्विष्ण्णुन्न्नैरन्धिषꣳप्प्रोह्यमाणꣳसोमः ॥ ५५ ॥ प्रोह्यमाणꣳ
सोमः ॥ प्रोह्यमाणꣳसोमऽआगतोव्वरुणऽआसन्द्यामासन्नो
ग्निराग्नीध्रऽइन्द्रोहविर्द्धानेथर्व्वोपावह्ह्रियमाणोव्विश्वेदेवाः
॥ ५६ ॥ व्विश्वेदेवाः ॥ व्विश्वेदेवाऽअꣳशुषुन्न्युप्तोव्विष्णुरा
प्प्रीतपाऽआप्प्याय्य[1]मानोयमः सूयमानोव्विष्णुः सम्भ्रियमा
णोव्वायुः पूयमानꣳशुक्रः पूतः शुक्रः क्षीरश्रीर्म्मन्थीसक्तुश्रीर्व्वि

---

१ आप्प्याय्यमानः। अत्र आप्यायमानो यमो० (शु. य. प्रा. ४ अ. १५१ सू.) इत्यनेन द्विः यकारा संयोगा भवन्ति तेन द्वियकारे कृते पुनस्तृतीये क्रमजे यकारे प्राप्ते तस्य निषेधः।

सं. १२

श्वैदेवाः ॥ ५७ ॥ विश्वेदेवाः ॥ विश्वेदेवाश्चमसेषून्नीतोसुर्हो
मायोद्यतोरुद्रोहूयमानोवातोभ्यावृत्तोनृचक्षाः प्रतिख्यातो
भक्षोभक्ष्यमाणः पितरोनाराशंसाः सन्नः सिन्धुः ॥ ५८ ॥
सन्नः सिन्धुः ॥ सन्नः सिन्धुरवभृथायोद्यतः समुद्रोभ्यवह्रि
यमाणः सलिलः प्रप्लुतोययोरोजसास्कभितारजांसिवीर्ये
भिर्वीरतमाशविष्ठा ॥ यापत्येतेऽअप्रतीतासहोभिर्विष्णूऽ ॥७३॥
अगन्वरुणापूर्वहूतौ ॥ ५९ ॥ देवान्दिवम् ॥ देवान्दिवम

गन्त्यज्ञस्त्ततोमाद्द्राविंणमष्टुमनुष्ष्यानुन्तारिंक्षमगन्त्यज्ञस्त्ततो
माद्द्राविंणमष्टुपितॄन्प्पृंथिवीमंगन्त्यज्ञस्त्ततोमाद्द्राविंणमष्टुयङ्क्ञ्च
लोकमगंन्त्यज्ञस्त्ततोमेभुद्रमंभूत् ॥ ६० ॥ चतुंस्त्रिꣳशत्त
न्त्तंवꣳ ॥ चतुंस्त्रिꣳशत्तन्तंवोयेव्वितत्निरेयऽइमंय्यज्ञꣳस्व
धयादुदंन्ते ॥ तेषांञ्च्छिन्नꣳसम्म्वेतद्दंधामिस्वाहांघर्म्मोऽ
अप्प्यैतुदेवान् ॥ ६१ ॥ यज्ञस्यदोहंः ॥ यज्ञस्यदोहोव्वितं
तःपुरुत्त्रासोऽअंष्टधादिवंमुन्वातंतान ॥ सयंज्ञधुक्क्ष्वमहिंमे

ष्प्रजायांᳪंरायस्प्पोषंविश्श्वमायुंरश्शीयस्वाहां ॥ ६२ ॥ आप
वस्व ॥ आपंवस्वाहिरंण्ण्यवदश्श्वंवत्त्सोमव्वीरवंत् ॥ वाजङ्गोमं
न्तमाभंरस्वाहां ॥ ६३ ॥ [ १०-२३ ] ॥ इतिश्रीवाजसनेय
संहितायामष्टमोऽध्यायः ॥ ८ ॥ श्रीवेदपुरुषाय नमः ॥ अनु
वाकसूत्रम् ॥ देवसवितश्श्वतस्त्र, इंद्रस्यवज्रः पंच, देवस्याहं
दशा, पयेस्वाहातिस्त्रो, वाजस्येममष्टा, वग्निरेकाक्षरेणचतुष्कौ,



---

१ हिरण्यवदश्ववत् । अत्र अश्वशब्दस्य वत्परे अश्वरश्मि० (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन अश्वशब्दाकारस्य दीर्घाकारे प्राप्ते नाश्ववद्धिरण्यात् (शु. य. प्रा. ३ अ. ९९ सू.) इत्यनेन हिरण्यशब्दात्परस्याश्वशब्दाकारो न दीर्घ इति निषेधाभावात्राश्वशब्दाकारो दीर्घः ।

पतेचतुष्कौ, सविता:त्वाद्वे, अष्टौचत्वारिꣳशत् [ अ. ९ मं. ४०
अनु. ८ ] हरिः ॐ ॥ देवंसवितꣳ ॥ देवंसवितꣳप्प्रसुवयज्ञम्प्रसु
वयुज्ञपंतिम्भगाय ॥ दिव्योगन्धर्व्वꣳकेतपूꣳकेतन्नꣳपुनातुव्वाच
स्प्पतिर्व्वाजंन्नꣳस्वदतुस्वाहा ॥ १ ॥ ध्रुवसदन्त्वा । नृषदम्मनꣳ
सदंमुपयामगृहीतोसीन्द्रायत्त्वाजुष्टंगृह्णाम्म्येपतेयोनिरिन्द्रा
यत्त्वाजुष्टंतमम् ॥ अप्सुपदन्त्वाघृतसदंव्योमसदंमुपयाम
गृहीतोसीन्द्रायत्त्वाजुष्टङ्गृह्णाम्म्येपतेयोनिरिन्द्रायत्त्वाजुष्टंत
२३१

मम् ॥ पृथिविसदन्त्वान्तरिक्षसदन्दिविसदन्देवसदन्नाकसदं
मुपयामगृहीतोसीन्द्रायत्त्वाजुष्टङ्गृह्णाम्म्येषतेयोनिरिन्द्राय
त्वाजुष्टतमम् ॥ २ ॥ [2] अपाꣳरसम् ॥ अपाꣳरसमुद्वयसꣳ
सूर्य्येसन्तꣳसमाहितम् ॥ अपाꣳरसस्ययोरसस्तंवोगृह्णाम्म्यु
त्तममुपयामगृहीतोसीन्द्रायत्त्वाजुष्टङ्गृह्णाम्म्येषतेयोनिरिन्द्रां

---

१ पृथिविसदन्त्वा । अत्र भाविभ्यः सः षं समानपदे (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन समानपदे षत्वप्राप्तौ पृथिविदिव्युपरिचर्पणिशकुनियासिभ्यः (शु. य. प्रा. ३ अ. ८३ सू.) इत्यनेन पृथिविपरस्य सस्य षत्वनिषेधः । एवं दिविसदन्देवसदम् इत्यादिषु बोध्यम् । २ अपाꣳरसम् अत्र । दीर्घाद्दर्द्धमात्रा पूर्वाचाध्यर्द्धा (शु. य. प्रा. ४ अ. १४९ सू.) इत्यनेन दीर्घात्स्वरात्परोऽनुस्वारोऽर्धमात्राकालो भवति तेन अपामित्यस्याऽऽकारात्परस्य मकारस्यानुस्वारस्यार्द्धमात्राप्रदर्शको ह्रस्वो गुंकारोऽत्र ज्ञेयः । एवं अपाꣳरसस्य । रजाꣳसि, प्रजायाꣳरायस्पोषम् ।

यत्त्वाजुष्टन्तमम् ॥ ३ ॥ ग्रहांऽऊर्ज्जाहुतयः ॥ ग्रहांऽऊर्ज्जाहुत
योव्यन्तोविप्रायमतिम् ॥ तेषांविशिप्रियाणांव्वोहमिषमूर्ज्ज
समंग्ग्रभमुपयामगृहीतोसीन्द्रायत्त्वाजुष्टङ्गृह्णाम्म्येषतेयोनि
रिन्द्रायत्त्वाजुष्टन्तमम् ॥ सम्पृचौस्त्थःसम्मांभद्रेणंपृङ्क्तंविपृचौ
स्त्थोविमांपाप्मनांपृङ्क्तम् ॥ ४ ॥ [ ४-१ ] इन्द्रस्यव्वज्रः ॥
इन्द्रस्यव्वज्रोसिव्वाजसास्त्वयायंव्वाजᳬसेत् ॥ व्वाजस्यनुप्र
सवेमातरम्महीमदितिन्नामव्वचंसाकरामहे ॥ यस्यामिदंव्विश्व

र्भुवंनमाविवेशुतस्यांन्नोदुेवःसंवितुाधर्म्मंसाविषत् ॥ ५ ॥
अुप्स्वुन्तः॥ अुप्स्वुन्तरमृतंमुप्सुभेषुजमुपामुतप्रशंस्तिुष्व
श्वुाभवंतव्वुाजिनंः ॥ देवींरापुोयोवंऽऊुर्म्मिःप्रतूंर्त्तिःककुन्मां
न्वाजुसास्तेनुायंव्वाजंᳬसेत् ॥ ६ ॥ व्वातोंवा ॥ व्वातोंवुामनों
वागन्धुर्व्वाःसुप्तविंᳬशतिः ॥ तेऽअग्ग्रेश्वंमयुञ्जुँस्तेऽअंस्मि
ञ्जुवमादंधुः ॥ ७ ॥ व्वातंरᳬंहाभव । व्वाजिन्युुज्यमानुऽइन्द्रं ॥ ८६ ॥
स्यैवुदक्षिणःश्रियैधिं ॥ युञ्जन्तुंत्त्वामुरुतोंव्विुश्ववेदसुऽआतेुत्त्व

ष्ट्वांपुत्त्रसुजवन्दंधातु॥८॥ जुवोय॒ः॥ जुवोयस्त्तेंव्वाजिन्निहिंतो
गुहायश्श्श्येनेपरींत्तोऽअचंरच्चव्वातें॥ तेनंनोव्वाजिन्बलंव्वान्बलेंनव्वाजुजिच्चभवसमंनेचपारयिष्ण्णुः॥ व्वाजिंनोव्वाजजितुव्वाजंᳬसरिष्ष्यन्तोबृहस्प्पतेंर्भागमवंजिग्घ्रत॥९॥ [५-२]
देवस्याहम्॥ देवस्याहᳬसंवितुश्सवेसत्त्यसंवसोबृहस्प्पतेंरुत्तमन्नाकंᳬरुहेयम्॥ देवस्याहᳬसंवितुश्सवेसत्यसंवसऽइन्द्रंस्योत्तुमन्नाकंᳬरुहेयम्॥ देवस्याहᳬसंवितुश्सुवेसत्त्यप्प्रंसवसो

बृहस्पतेरुत्तमन्नाकंमरुहम् ॥ देवस्याहꣳसवितुःसवेसत्यप्र
सवसऽइन्द्रस्योत्तमन्नाकंमरुहम् ॥ १० ॥ बृहस्पतेव्वाजम् ॥
बृहस्पतेव्वाजञ्जयबृहस्पतयेव्वाचंव्वदतबृहस्पतिंव्वाजञ्जाप
यत ॥ इन्द्रव्वाजञ्जयेन्द्रायव्वाचंव्वदतेन्द्रंव्वाजञ्जापयत ॥११॥
एषावः ॥ एषावꣳसासत्यासंव्वागभूद्ययाबृहस्पतिंव्वाजम
जीजपताजीजपतबृहस्पतिंव्वाजंव्वनस्पतयोव्विमुञ्चध्वम् ॥
एषावꣳसासत्यासंव्वागभूद्ययेन्द्रंव्वाजमजीजपताजीजपतेन्द्रं

व्वाजंव्वनस्प्पतयोव्विमुंञ्चयद्ध्वम् ॥१२॥ देवस्याहम् ॥ देवस्याहꣳ सवितुश्सवेसत्त्यप्प्रसवसोव्बृहस्प्पतेर्व्वाजजितोव्वाजञ्जेपम् ॥ व्वाजिनोव्वाजजितोद्ध्वनस्कभ्भ्नुवन्तोयोजनामिमानाꣳकाष्ठां ङ्गच्छत ॥ १३ ॥[1] एषस्यश् ॥ एषस्यव्वाजीक्षिपणिन्तुरण्ण्यति ग्ग्रीवायाम्बद्धोऽअपिकक्षऽआसनि ॥ क्क्रतुन्दधिक्क्राऽअनुसꣳसनिंष्ष्यदत्त्पथामङ्काꣳस्यन्वापनीफणत्त्स्वाहा ॥ १४ ॥

---

१ एषः स्यः वाजी । अत्र स्य एव च ( शु. य. प्रा. ३ अ. १७ सू. ) इति सूत्रेण स्यपरे व्यञ्जने एष इत्यस्य विसर्गस्य लोपः । तथैव स्य इत्यस्य वाजीघटिते वकारे व्यञ्जने परे विसर्जनीयस्य लोपः । तेन एषस्यवाजी । अत्र लोपागमविकारप्रकृतिभावानां चतुर्णां सन्धीनां मध्येऽयं लोपनामा सन्धिर्विज्ञेयः ।

उतस्म ॥ उतस्मास्यद्द्रवतस्तुरण्यतः पर्णन्नवेरनुवातिप्र
गर्द्धिनः ॥ श्येनस्येवध्रजतोऽअङ्कसम्परिदधिक्राव्णः
सहोर्ज्जातरित्रतः स्वाहा ॥ १५ ॥ शन्नः ॥ शन्नोभवन्तुवा
जिनोहवेषुदेवतातामितद्द्रवः स्वर्काः ॥ जम्भयन्तोहिंवृकं
रक्षाᳬसिसनेम्यस्मद्युयवन्नमीवाः ॥ १६ ॥ तेनः ॥ तेनोऽ
अर्वन्तोहवनश्श्रुतोहवंविश्वेशृण्वन्तुवाजिनोमितद्द्रवः ॥ सह
स्रसामेधसातासनिष्यवोमहोयेधनᳬसमिथेषुजभ्रिरे ॥ १७ ॥

व्वाजेवाजेवत्त । व्वाजिनोनोधनेषुव्विप्प्राऽअमृताऽऋतज्ञाः ॥
अस्यमद्ध्वःपिबतमादयंद्ध्वन्तृप्प्तायातपथिभिर्द्देवयानैः ॥ १८ ॥
आमा ॥ आमाव्वाजस्यप्प्रसवोजगम्म्यादेमेद्यावापृथिवीव्विश्श्व
रूपे ॥ आमागन्तांम्पितरामातराचामासोमोऽअमृतत्त्वेनग
म्म्यात् ॥ व्वाजिनोव्वाजजितोव्वाजꣳससृवाꣳसोबृहस्प्पतेर्
र्भागमवजिग्घ्रतनिमृजानाः ॥ १९ ॥ [ १०-३ ] आप
येस्वाहा । स्वापयेस्वाहापिजायस्वाहाक्क्रतवेस्वाहाव्वसवेस्वाहा
सं. १४

हर्प्पतयेस्वाहामुग्धायस्वाहामुग्धायवैनꣳशिनायस्वाहावि
नꣳशिनऽआन्त्यायनायस्वाहान्त्यायभौवनायस्वाहाभुवनस्य
पतयेस्वाहाधिपतयेस्वाहा ॥ २० ॥ आयुर्यज्ञेन । कल्प्प
ताम्प्राणोयज्ञेनकल्प्पताञ्चक्षुर्यज्ञेनकल्प्पताꣳश्रोत्रँयज्ञेन
कल्प्पताम्पृष्ठँयज्ञेनकल्प्पताँयज्ञोयज्ञेनकल्प्पताम् ॥ प्रजा
पतेꣳप्रजाऽअभूमस्वर्देवाऽअगन्मामृताऽअभूम ॥ २१ ॥



१ अहर्प्पतये । अत्र समानपदे च (शु. य. प्रा. ३ अ. ३० सू.) इत्यनेन सकारे प्राप्ते, अहःपतौ रेफम् (शु. य. प्रा. ३ अ. ३९ सू.) इत्यनेन पतिशब्दे परे अहरित्यस्य विसर्जनीयस्य रेफः । तत ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन पकारस्य द्वित्वम् ।

अस्म्मेवं॑ ॥ अस्म्मेवौऽअस्त्विन्द्द्रियमस्म्मेनृम्म्णमुतक्क्रतुर

स्म्मेव्वर्च्चांᳮसिसन्तुवः ॥ नमोमात्रेपृथिव्व्यैनमोमात्रेपृथि

व्व्याऽइयन्तेराडियन्तासियमनोद्ध्रुवोसिधरुणः ॥ कृष्ष्यैत्त्वा

क्षेमायत्त्वारय्यैत्त्वापोषायत्त्वा ॥ २२ ॥ [ ३-४ ] व्वाज

स्येमम् ॥ व्वाजस्येमम्प्रसवश्सुषुवेअग्ग्रेसोमᳬराजानमोषधीष्व

प्प्सु ॥ ताऽअस्म्मब्भ्यम्मधुमतीर्भवन्तुव्वयᳬराष्ट्रेजागृयाम

पुरोहिताᳬस्वाहा ॥ २३ ॥ व्वाजस्येमाम् ॥ व्वाजस्येमाम्प्रसवश्शि

श्रियेदिवमिमाचविश्वाभुवनानिसम्राट् ॥ अदित्सन्तन्दा
पयतिप्रजानन्त्सनोरयिᳬसर्व्ववीरन्नियच्छतुस्वाहा ॥ २४ ॥
वाजस्यनु । प्प्रसवऽआबभूवेमाचविश्वाभुवनानिसर्व्वतः ॥
सनेमिराजापरियातिविद्वान्प्रजाम्पुष्टिंव्वर्द्धयमानोऽअस्मेस्वा
हा ॥ २५ ॥ सोमᳫराजानम् । सोमᳫराजानमवसेग्निम
न्वारभामहे ॥ आदित्यान्विष्णुᳫसूर्य्यम्ब्रह्माणञ्चबृहस्प
तिᳬस्वाहा ॥ २६ ॥ अर्य्यमणम्बृहस्पतिम् ॥ अर्य्यमण

॥८०॥

म्बृहस्प्पातिमिन्द्रन्दानायचोदय ॥ व्वाचंव्विष्णुᳫंसरस्वतीᳫं

सवितारंव्वाजिनᳫंस्वाहा ॥ २७ ॥ अग्ग्नेऽअच्छ ॥ अग्ग्नेऽ

अच्छाव्वदेहनःप्प्रतिनःसुमनाभव ॥ प्रनोयच्छसहस्राजित्त्वᳫं

हिधनदाऽअसिस्वाहा ॥ २८ ॥ प्रनः ॥ प्रनोयच्छत्त्वर्य्यमा[1]

प्प्रपूषाप्प्रबृहस्प्पतिः ॥ प्रवाग्ग्देवीददातुनःस्वाहा ॥२९॥ देव

स्यत्त्वा । सवितुःप्प्रसवेश्विनोर्ब्बाहुब्भ्यांम्पूष्णोहस्ताब्भ्याम् ॥

---

१ प्रनो यच्छत्वर्यमा । अत्र ऋषरेभ्यो नकारो णकारᳫं समानपदे (शु. य. प्रा. ३ अ. ८४ सू.) इत्यनेन ऋकारषकाररेफेभ्य उत्तरो नकारो णकारमापद्यते समानपदे । अनेन समानपदे णत्वविधानादत्र प्र नो इति पदयोः समानपदत्वाभावान्न णत्वम् ।

शु. य. संहि. ॥८१॥ सरंस्वत्त्यैव्वाचोयन्तुर्य्यन्त्रियैंदधामिबृहस्प्पतेंष्ट्वासाम्म्राज्ज्येना पू. अ.
भिषिंञ्चाम्म्यसौ ॥ ३० ॥ [ ८-५ ] अग्निरेकाक्षरेण । प्प्राणमुद् ॥ ९ ॥
जयत्तमुज्जेंषमश्विनौद्द्व्यक्षरेणद्द्विपदोमनुष्ष्यानुदंजयतान्ता
नुज्जेंषंविष्ष्णुस्त्र्यक्षरेणत्त्रीँल्लोकानुदंजयत्तानुज्जैषꣳसोमश्चतुर
क्षरेणचतुंष्प्पदꣳपशूनुदंजयत्तानुज्जेंषम्पूषापञ्चाक्षरेण ॥ ३१ ॥
पूषापञ्चांक्षरेण ॥ पूषापञ्चाक्षरेणपञ्चदिशऽउदंजयत्ताऽउज्जें ॥८१॥

---

१ अभिषिञ्चामि । अत्र अभेश्च ( शु. य. प्रा. ३ अ. ६५ सू. ) इत्यनेन अभेः परस्य सिञ्चामीतिपदस्थस्य सकारस्य षत्वे रूपम् ।

षड्ःसविताषडक्षरेणषडृतूनुदंजयत्तानुज्जेषम्मरुतंःसप्ताक्षरे
णसप्तग्ग्राम्म्यान्पशूनुदंजयँस्तानुज्जेषम्बृहस्पतिरष्टाक्षरेण
गायत्रीमुदंजयत्तामुज्जेषम्मित्रोनवाक्षरेण ॥ ३२ ॥ मित्रो
नवाक्षरेण । त्रिवृतंस्तोममुदंजयत्तमुज्जेषंवरुणोदशाक्षरेण
विराजमुदंजयत्तामुज्जेषमिन्द्रऽएकादशाक्षरेणत्रिष्टुभमुदंज
यत्तामुज्जेषंविश्वेदेवाद्वादशाक्षरेणजगतीमुदंजयँस्तामुज्जेषंव
संवत्त्रयोदशाक्षरेण ॥ ३३ ॥ वसंवत्त्रयोदशाक्षरेण । त्रयोद

शꣳस्तोममुदंजयँस्तमुज्जेषꣳरुद्राश्चतुर्दशाक्षरेणचतुर्दशꣳ
स्तोममुदंजयँस्तमुज्जेषमादित्याःपञ्चदशाक्षरेणपञ्चदशꣳस्तो
ममुदंजयँस्तमुज्जेषमदितिꣳषोडशाक्षरेणषोडशꣳस्तोममुद
जयत्तमुज्जेषम्प्रजापतिꣳसप्तदशाक्षरेणसप्तदशꣳस्तोममुद
जयत्तमुज्जेषम् ॥ ३४ ॥ [४-६] एषते । निर्ऋतेभागस्त
ञ्जुषस्वस्वाहाग्निनेत्रेभ्योदेवेभ्यःपुरःसद्भ्यःस्वाहायमनेत्रे ॥८२॥

१ अदितिꣳषोडशा । अत्र प्रत्ययसवर्णम्मुदि शाकटायनः (शु. य. प्रा. ३ अ. ९ सू.) इति विसर्गस्य परसवर्णे प्राप्ते अविकारं शाकल्यः शषसेषु (शु. य.प्रा. ३ अ. १० सू.) इत्यनेन परसवर्णनिषेधाद्विसर्ग एव । लोपागमविकारप्रकृतिभावानां चतुर्णां सन्धीनां मध्ये प्रकृतिभावाख्योऽयं सन्धिः ।

भ्योदेवेभ्योदक्षिणासद्भ्यःस्वाहाविश्वदेवनेत्रेभ्योदेवेभ्यः
पश्चात्सद्भ्यःस्वाहामित्रावरुणनेत्रेभ्योवामरुन्नेत्रेभ्योवादेवे
भ्यऽउत्तरासद्भ्यःस्वाहासोमनेत्रेभ्योदेवेभ्यऽउपरिसद्भ्योदुवं
स्वद्भ्यःस्वाहा॥३५॥ येदेवाः॥ येदेवाऽअग्निनेत्राःपुरःसदस्ते
भ्यःस्वाहायेदेवायमनेत्रादक्षिणासदस्तेभ्यःस्वाहायेदेवा
विश्वदेवनेत्राःपश्चात्सदस्तेभ्यःस्वाहायेदेवामित्रावरुणने
त्रावामरुन्नेत्रावोत्तरासदस्तेभ्यःस्वाहायेदेवाःसोमनेत्राऽ

उपरिसदोदुवस्स्वन्तस्त्तेभ्यꣳस्वाहा ॥ ३६ ॥ अग्नेसहस्व ॥
॥८३॥ अग्नेसहस्वपृतनाऽअभिमातीरपास्य ॥ दुष्टरस्तरन्नरातीर्व्वर्च्चो ॥ ९ ॥
धायज्ञवाहसि ॥ ३७ ॥ देवस्यत्त्वा । सवितुःप्प्रसवेऽश्विनो
र्ब्बाहुभ्याम्पूष्णोहस्ताभ्याम् ॥ उपाꣳशोर्व्वीर्य्येणजुहोमि
हतꣳरक्षꣳस्वाहारक्षसान्त्वाव्वधायाव्वधिष्म्मरक्षोव्वधिष्म्मामु
मसौहतः ॥ ३८ ॥ [४-७] सवितात्त्वा । सवानाꣳसुवता ॥८३॥

१ उपरिसदः । अत्र भाविभ्यः सः षं समानपदे (शु. य. प्रा. ३ अ. ७६ सू.) इत्यनेन षत्वप्राप्तौ पृथिविदिव्युपरिचर्षणिशकुनियामिभ्यः (शु. य. प्रा. ३ अ. ८४ सू.) इत्यनेन उपरिशब्दात्परस्य सदः इत्यस्य सस्य प्रकृतिभावे जाते न षत्वम् ।

मग्निर्गृहपतीनाꣳसोमोव्वनस्पतीनाम् ॥ बृहस्पतिर्व्वाचऽ
इन्द्रोज्ज्यैष्ठ्यायरुद्रश्पशुभ्योमित्रश्सत्योव्वरुणोधर्म्मपतीना
म् ॥ ३९ ॥ इमन्देवाः ॥ इमन्देवाऽअसपत्नꣳसुवध्वम्महते
क्षत्रायमहतेज्ज्यैष्ठ्यायमहतेजानराज्ज्यायेन्द्रस्येन्द्रियाय ॥
इमममुष्ष्यपुत्रममुष्ष्यैपुत्रमस्यैव्विशऽएषवोमीराजासोमो
स्म्माकम्ब्राह्मणानाꣳराजा ॥ ४० ॥ [ २-८ ] ॥ इतिश्रीवाज
सनेयसंहितायांनवमोऽध्यायः ॥ ९ ॥ श्रीवेदपुरुषायनमः ॥

अनुवाकसूत्रम् ॥ अपोदेवाश्चतस्त्रः, सोमस्यत्विषिः पञ्चा,
वेष्टादन्दशूकाः सप्त, सोमस्यत्वाचतस्त्र, ऽइन्द्रस्यवज्रः पञ्च,
स्योनासिचतस्त्रः, सवित्राप्रसवित्रैका, श्विभ्यांपच्यस्वचतस्त्रो,
ष्टौचतुस्त्रिꣳशत् [अ.१०मं.३४अनु.८] हरिःॐ॥ अपोदेवा॒॥
अपोदेवामधुमतीरगृभ्णन्नूर्ज्जस्वतीराजस्वश्चितानाः ॥ याभि
र्म्मित्रावरुणावभ्यषिञ्चन्याभिरिन्द्रमनयन्नत्त्यरातीः ॥ १ ॥ ॥८४॥

---

१ अभ्यषिञ्चन् । अभि असिञ्चन् । इति द्वे पदे अत्र अभेश्च (शु. ३ अ. ६५ सू.) अभेरुपसर्गात्परस्य सिञ्चतेः सकारः षकारमापद्यते संहितायाम् । इति इत्यनेनासिञ्चन्पदघटिताकारस्य व्यवधानेन षत्वाप्राप्तौ अव्यवहितोऽपि (शु. य. प्रा. ३ अ. ६६ सू.) इत्यनेन व्यवधानेऽपि षकारे रूपम् ।

वृष्ण्ण॑ऽऊर्म्मिः ॥ वृष्ण्ण॑ऽऊर्म्मिर॑सिराष्ट्रदाराष्ट्रम्मेदेहिस्वाहा
वृष्ण्ण॑ऽऊर्म्मिर॑सिराष्ट्रदाराष्ट्रममुष्म्मैदेहिवृषसेनो॑सिराष्ट्रदारा
ष्ट्रम्मेदेहिस्वाहा॑वृषसेनो॑सिराष्ट्रदाराष्ट्रममुष्म्मैदेह्यर्त्थेत॑स्त्थ
॥ २ ॥ अर्त्थेत॑स्त्थ । राष्ट्रदाराष्ट्रम्मेदत्तस्वाहार्त्थेत॑स्त्थराष्ट्र
दाराष्ट्रममुष्म्मैदत्तौज॑स्वतीस्त्थराष्ट्रदाराष्ट्रम्मेदत्तस्वाहौज॑स्व
तीस्त्थराष्ट्रदाराष्ट्रममुष्म्मैदत्तापः॑परिवाहिणीस्त्थराष्ट्रदाराष्ट्र
म्मेदत्तस्वाहापः॑परिवाहिणीस्त्थराष्ट्रदाराष्ट्रममुष्म्मैदत्तापा

यं. १५

म्पतिरसिराष्ट्रदाराष्ट्रम्मेदेहिस्वाहापाम्पतिरसिराष्ट्रदाराष्ट्रममु
ष्मैदेह्यपाङ्गर्भोसिराष्ट्रदाराष्ट्रम्मेदेहिस्वाहापाङ्गर्भोसिराष्ट्र
दाराष्ट्रममुष्मैदेहिसूर्य्यत्वचसस्थ ॥ ३ ॥ सूर्य्यत्व
चसस्थ । राष्ट्रदाराष्ट्रम्मेदत्तस्वाहासूर्य्यत्वचसस्थराष्ट्रदा
राष्ट्रममुष्मैदत्तसूर्य्यवर्चसस्थराष्ट्रदाराष्ट्रम्मेदत्तस्वाहासूर्य्य
वर्चसस्थराष्ट्रदाराष्ट्रममुष्मैदत्तमान्दास्थराष्ट्रदाराष्ट्रम्मेदत्त ॥८५॥
स्वाहामान्दास्थराष्ट्रदाराष्ट्रममुष्मैदत्तव्रजक्षितस्थराष्ट्रदा

राष्ट्रम्मेदत्तस्वाहाव्व्रजक्षितस्त्थराष्ट्रदाराष्ट्रममुष्मैदत्तव्वाशा
स्त्थराष्ट्रदाराष्ट्रम्मेदत्तस्वाहाव्वाशास्त्थराष्ट्रदाराष्ट्रममुष्मैदत्त
शविष्ठास्त्थराष्ट्रदाराष्ट्रम्मेदत्तस्वाहाशविष्ठास्त्थराष्ट्रदाराष्ट्रम
मुष्मैदत्तशक्वरीस्त्थराष्ट्रदाराष्ट्रम्मेदत्तस्वाहाशक्वरीस्त्थराष्ट्र
दाराष्ट्रममुष्मैदत्तजनभृतस्त्थराष्ट्रदाराष्ट्रम्मेदत्तस्वाहाजनभृ
तस्त्थराष्ट्रदाराष्ट्रममुष्मैदत्तव्विश्वभृतस्त्थराष्ट्रदाराष्ट्रम्मेदत्त
स्वाहाव्विश्वभृतस्त्थराष्ट्रदाराष्ट्रममुष्मैदत्तापःस्वराजस्त्थरा

ष्ट्रुदाराष्ट्रममुष्म्मैदत्त ॥ मधुमतीर्म्मधुमतीभिः पृच्च्यन्ताम्महि
क्षत्रङ्क्षत्रियायवन्वानाऽअनाधृष्टाः सीदतसहौजसोमहिक्षत्रङ्क्ष
त्रियायदधतीः ॥ ४ ॥ [ ४-१ ] शतम् ॥ ४०० ॥ सोमस्यत्त्वि
षिः ॥ सोमस्यत्त्विषिरसितवेवमेत्त्विषिर्भूयात् ॥ अग्नयेस्वा
हासोमायस्वाहासवित्रेस्वाहासरस्वत्यैस्वाहापूष्णेस्वाहाबृह
स्पतयेस्वाहेन्द्रायस्वाहाघोषायस्वाहाश्लोकायस्वाहाऽंशाय
स्वाहाभगायस्वाहार्य्यम्णेस्वाहा ॥ ५ ॥ पवित्रेस्त्थः ॥ पवि ॥८६॥

त्रैस्त्थोव्वैष्णुव्यौसावितुर्व्वः प्प्रसवऽउत्त्पुनाम्म्यच्छिद्द्रेणपवि
त्रैणसूर्य्यस्य्यरश्मिभिः ॥ अनिभृष्टमसिव्वाचोबन्धुंस्तपो
जाःसोमस्य्यदात्रमसिस्वाहाराजस्वः ॥ ६ ॥ सधमादोद्युम्निनी
नीः ॥ सधमादोद्युम्निनीरापऽएताऽअनाधृष्टाऽअपस्योव्वसा
नाः ॥ परस्त्यासुचक्क्रेव्वरुणःसधस्त्थमपाᳩशिशुम्मातृतमा
स्वन्तः ॥ ७ ॥ क्षत्त्रस्योल्वम् ॥ क्षत्त्रस्योल्वमसिक्षत्त्रस्यजरा
य्य्वसिक्षत्त्रस्ययोनिरसिक्षत्त्रस्यनाभिरसीन्द्रस्यव्वात्त्रघ्नमसिमि

शु. य. संहि. ॥८७॥

त्रस्यासिव्वरुणस्यासित्त्वयायंव्वृत्रंव्वधेत् ॥ दृबासिरुजासिक्षु पू. अ.

मासि ॥ पातैनम्प्राञ्चम्पातैनम्प्रत्त्यञ्चम्पातैनन्तिर्य्यञ्चन्दि ॥१०॥

ग्भ्यःस्पात ॥ ८ ॥ आविर्म्मर्य्याꣳ ॥ आविर्म्मर्य्याऽआ

वित्तोऽअग्निर्गृहपतिराविंत्तऽइन्द्रोवृद्धश्रवाऽआवित्तौमित्रा

वरुणौधृतव्रतावावित्तꣳपूषाव्विश्ववेदाऽआवित्तेद्यावापृथिवीव्वि

श्वशम्भुवावावित्तादितिरुरुशर्म्मा ॥ ९ ॥ [ ५-२ ] अवेष्टा ॥८७॥

दन्दशूकाꣳ ॥ अवेष्टादन्दशूकाꣳप्प्राचीमारोहगायत्रीत्त्वाव

तुरथन्तरꣳसामंत्रिवृत्त्स्तोमोव्वसन्तऽऋतुर्ब्ब्रह्मद्रविणन्दक्षिणा
मारोह ॥१०॥ दक्षिणामारोह । त्रिष्टुप्प्त्वावतुबृहत्त्सामंपञ्चद
शस्त्तोमोग्ग्रीष्म्मऽऋतुःक्षत्रन्द्रविणम्प्रतीचीमारोह ॥ ११ ॥
प्रतीचीमारोह । जगतीत्त्वावतुव्वैरूपꣳसामंसप्तदशस्त्तोमो
व्वर्षाऽऋतुर्व्विड्द्रविणमुदीचीमारोह ॥ १२ ॥ उदीचीमारोह ।
नुष्टुप्प्त्वावतुव्वैराजꣳसामैकविꣳशस्त्तोमःशरदृतुःफलन्द्रवि
णमूर्ध्वामारोह ॥ १३ ॥ ऊर्ध्वामारोह । पङ्क्तिस्त्त्वावतुशाक्कर

रैवृतेसामंनीत्रिणवत्रयस्त्रिꣳशौस्त्तोमौहेमन्तशिशिरावृतूवर्चो
द्रविणम्प्रत्त्यंस्त्तन्नमुचेꣳशिरंः ॥ १४ ॥ सोमंस्यत्त्विषिंः ॥
सोमंस्यत्त्विषिरसितवेवमेत्त्विषिंर्भूयात् ॥ मृत्त्योःपाह्योजोसिसहोस्यमृतंमसि ॥ १५ ॥ हिरंण्ण्यरूपाऽउषसंः ॥
हिरंण्ण्यरूपाऽउषसौविरोकऽउभाविन्द्राऽउदिथꣳसूर्य्यश्च ॥
आरोहतंवरुणमित्त्रगर्त्तन्ततश्चक्षाथामदितिन्दितिञ्चमित्त्रोसि ॥८८॥
वरुणोसि ॥ १६ ॥ [ ७-३ ] सोमंस्यत्त्वा । द्युम्नेना

भिषिञ्चाम्म्यग्नेर्भ्राजसासूर्य्यस्यवर्च्चसेन्द्रस्येन्द्रियेण ॥ क्षत्रा
णांक्षत्रपतिरेध्यतिदिद्यून्पाहि ॥ १७ ॥ इमन्देवाः ॥ इम
न्देवाऽअसपत्नᳫँसुवद्ध्वम्महतेक्षत्रायमहतेज्ज्यैष्ठ्यायमहते
जानराज्यायेन्द्रस्येन्द्रियाय ॥ इमममुष्ष्यपुत्रममुष्ष्यैपुत्र
मस्यैविशऽएषवोमीराजासोमोस्म्माकम्ब्राह्मणानाᳯँराजा
॥ १८ ॥ प्रपर्व्वतस्य । वृषभस्यपृष्ठान्नावश्चरन्तिस्वसिचऽइया
नाः ॥ ताऽआववृत्रन्नधरागुदक्ताऽअहिम्बुध्न्यमनुरीयमा

शु. य. संहि. णाहं ॥ विष्णोर्विक्रमणमसि विष्णोर्विक्रान्तमसि विष्णोः पू. अ.
क्रान्तमसि ॥ १९ ॥ प्रजापते न । त्वदेतान्यन्यो विश्वा रूपा ॥ १० ॥
॥८९॥ णि परिता बभूव ॥ यत्कामास्ते जुहुमस्तन्नोऽअस्त्वयममु
ष्य पितासावस्य पिता वयंस्याम पतयो रयीणांस्वाहा ॥ रुद्र
यत्ते क्रिवि परन्नाम तस्मिन्हुतमस्यमेष्टमसि स्वाहा ॥ २० ॥
[४-४] इन्द्रस्य वज्रः ॥ इन्द्रस्य वज्रोऽसि मित्रावरुणयोस्त्वा ॥८९॥
प्रशास्त्रोः प्रशिषा युनज्मि ॥ अव्यथायै त्वा स्वधायै त्वारिष्टोऽ

अर्ज्जुनोमरुतांम्प्रसवेनंजयापाममनंसासमिन्द्रियेणं ॥ २१ ॥

मातें ॥ मातंऽइन्द्रतेव्वयन्तुराषाडयुंक्तासोऽअब्रह्मताविं

दंसाम ॥ तिष्ठा[1]रथमधियंव्वज्ज्रहस्तारश्मीन्देवयमसेस्व

श्वांन् ॥ २२ ॥ अग्नयेंगृहपंतये ॥ अग्नयेंगृहपंतयेस्वाहासोमांय

व्वनस्पतंयेस्वाहांमरुतामोजंसेस्वाहेन्द्रंस्येन्द्रियायस्वाहां ॥

पृथिंविमातम्मामांहिꣳसीर्म्मोंऽअहन्त्वाम् ॥ २३ ॥ हꣳसःशु

चिषत् ॥ हꣳसःशुचिषद्वसुरन्तरिक्षसद्धोतावेदिषदतिथिर्दुरोण

१ तिष्ठारथेन । अत्र तिष्ठाद्युदात्तम् (शु. य. प्रा. ३ अ. १०४ सू.) इत्यनेन तिष्ठेत्येतत्पदं आद्युदात्तं तस्याकारस्य दीर्घो भवति । अतो दीर्घाकारः ।

सत् ॥ नृषद्वंरसदृतसद्व्योमसदब्जा गोजाऽऋतजाऽअद्रिजाऽ
ऋतम्बृहत् ॥ २४ ॥ इयंदसि ॥ इयंदस्यायुरस्यायुर्म्मयिधेहि
युङ्ङसिवर्च्चोऽसिवर्च्चोमयिधेह्यूर्ग्गस्यूर्ज्जम्मयिधेहि ॥ इन्द्रस्यवां
वीर्य्यकृतोबाहूऽअभ्युपावहरामि ॥ २५ ॥ [५-५] स्योनासि ।
सुषदासिक्षत्रस्ययोनिरसि ॥ स्योनामासीदसुषदामासीदक्षत्र
स्ययोनिमासीद ॥ २६ ॥ निषसाद[1] । धृतव्रतोवरुणः पस्त्यास्वा ॥ ॥ १० ॥
साम्म्राज्यायसुक्रतुः ॥ २७ ॥ अभिभूरसि ॥ अभिभूरस्येता

[1] निषसाद । अत्र नि ससाद इति पदम् ससाद च (शु. य. प्रा. ३ अ. ६० सू.) इत्यनेन नेः परस्य ससादशब्दस्य सकारस्य षकारे निषसादेति रूपम् ।

स्त्तेपञ्चदिशः कल्पन्ताम्ब्रह्मँस्त्वम्ब्रह्मासिसविताऽसिसत्त्य
प्प्रंसवोव्वरुणोसिसत्त्यौजाऽइन्द्रोसिव्विशौजारुद्रोसिसुशेवः ॥
बहुंकारश्रेयँस्करभूयँस्करेन्द्रँस्यव्वज्ज्रोसितेनंमेरध्य ॥ २८ ॥
अग्निःपृथुः ॥ अग्निःपृथुर्द्धर्म्मणस्प्पतिर्ज्जुषाणोऽअग्निःपृ
थुर्द्धर्म्मणस्प्पतिराज्ज्यस्यव्वेतुस्वाहास्वाहाकृताःसूर्य्यंस्यरश्मिम
भिर्य्यतद्ध्वँसजातानाम्मध्यमेष्ठ्याय ॥ २९ ॥ [ ४-६ ] सवि
त्राप्प्रंसवित्रा । सरस्वत्त्यावाचात्त्वष्ट्रारूपैःपूष्णापशुभिरिन्द्रे

१ श्रेयस्करभूयस्कर इत्यत्र समानपदे च ( शु. य प्रा. ३ अ. ३० सू. ) इत्यनेन ककारपकारपरयोः यथायोगं समानपदे सकारः पकारश्च विधीयते ।

णास्म्मेबृहुस्प्पतिंनाब्ब्रह्मंणाव्वरुंणेनौजंसाग्ग्निनातेजंसासोमें
नराज्ञाव्विष्ण्णुंनादशुम्म्यादेवतंयाप्प्रसूतःप्प्रसंप्पामि ॥ ३० ॥
[१-७] अुश्विब्भ्यांम्पच्च्यस्व ॥ अुश्विब्भ्यांम्पच्च्यस्वसरंस्व
त्त्यैपच्च्यस्वेन्द्रांयसुत्राम्ण्णेंपच्च्यस्व ॥ व्वायुश्पूतश्पवित्रेंणप्प्र
त्त्यङ्क्सोमोऽअतिस्रुतः ॥ इन्द्रंस्यसुज्ज्यःसखा ॥ ३१ ॥ कुवि
दुङ्ग । यवंमन्तोयवंञ्चिद्यथादान्त्यंनुपूर्व्वंव्वियूयं ॥ इहेहैषाङ्कृणु



१ प्रत्यङ्क्सोमः । अत्र प्रत्यङ् सोम इति पदम् । ङ्णौ क्ताभ्यां सकारे ( शु. य. प्रा. ३ अ. १५ सू. ) ङकारनकारौ यथासंख्यं ककारतकाराभ्यां सकारे परे व्यवधीयेते । तेनात्र ङकारात्परस्य ककारे रूपम् । लोपागमविकारप्रकृतिभावानां चतुर्णां सन्धीनां मध्येऽयमागमाख्यः सन्धिः ।

हि भोजनानियेबर्हिषोनमंऽउक्तिरुग्यजन्ति ॥ उपयामगृहीतो
स्यश्विभ्यान्त्वासरस्वत्यैत्त्वेन्द्रायत्त्वासुत्राम्म्णे ॥ ३२ ॥ युवꣳ
सुराममम् ॥ युवꣳसुराममाश्विनानमुचावासुरेसचा ॥ विपिपा
नाशुंभस्पतीऽइन्द्रङ्कर्म्मस्वावतम् ॥ ३३ ॥ पुत्रमिवपितरौ ॥
पुत्रमिवपितरावश्विनोभेन्द्रावथुःकाव्यैर्दꣳसनाभिः ॥ यत्सु
रामंव्यपिबःशचीभिःसरस्वतीत्त्वामघवन्नभिष्णक् ॥ ३४ ॥
[४-८] इतिश्रीवाजसनेयसंहितायांदशमोऽध्यायः ॥ १० ॥

श्रीवेदपुरुषायनमः। अनुवाकसूत्रम्। युञ्जानएकादश, प्रतूर्त्तं
वाजिन्षोडश, देवस्यत्वादश, पोदेवीर्द्वादश, पोह्येकादश,
दितिश्चापञ्च, कृतिमग्निमष्टादश, सप्तत्यशीतिः॥ [अ. ११
मं. ८३ अनु० ७]॥ हरिः ॐ॥ युञ्जानः प्रथमम्॥ युञ्जानः
प्रथमम्मनंस्तत्त्वायसविताधियं॥ अग्नेर्ज्ज्योतिर्निचाय्य
पृथिव्याऽअद्ध्याभरत्॥१॥ युक्तेनमनसा। वयन्देवस्यसवितुः ॥१२॥
सवे॥ स्वर्ग्यायशक्त्या॥२॥ युक्त्वायसविता। देवान्त्स्वं

र्य्यतोधियादिवम् ॥ बृहज्ज्योतिःकरिष्यतःसविताप्प्रसुवाति
तान् ॥ ३ ॥ युञ्जतेमनः ॥ युञ्जतेमनऽउतयुञ्जतेधियोविप्प्रा
विप्प्रस्यबृहतोविपश्चितः ॥ विहोत्रांदधेवयुनाविदेकऽइन्मही
देवस्यसवितुःपरिष्टुतिः ॥ ४ ॥ युजेवाम् ॥ युजेवाम्ब्रह्मपूर्व्यं
न्नमोभिर्विश्लोकऽएतुपथ्येवसूरेः ॥ शृण्वन्तुविश्वेऽअमृत
स्यपुत्राऽआयेधामानिदिव्यानितस्थुः ॥ ५ ॥ यस्यप्प्रयाणम् ॥
यस्यप्प्रयाणमन्न्वन्न्यऽइद्ययुर्देवादेवस्यमहिमानमोजसा ॥

सःपार्त्थिवानिविमुमेसऽएतशोरजाꣳसिदेवःसवितामहित्व
ना ॥ ६ ॥ देवंसवितः ॥ देवसवितःप्प्रसुवयज्ञम्प्रसुवयज्ञपति
म्भगाय ॥ दिव्योगन्धर्व्वःकेतपूःकेतन्नःपुनातुव्वाचस्प्पतिर्व्वा
चन्नःस्वदतु ॥ ७ ॥ इमन्नः ॥ इमन्नोदेवसवितर्य्यज्ञम्प्रणय[1]
देवाव्यꣳसखिविदꣳसत्राजितन्धनजितꣳस्वर्जितम् ॥ ऋचा
स्तोमꣳसमर्द्धयगायत्रेणरथन्तरम्बृहद्गायत्रवर्त्तनिस्वाहा ॥ ८ ॥ ॥ ९३ ॥

१ प्रणय। अत्र प्र नय इति पदम् । अत्र समानपदाभावेन ऋषरेभ्यः इत्यस्याप्राप्तौ प्रनेतिनुदातिहिनोमीनाम् (शु. य. प्रा. ३ अ. ८९ सू.) इत्यनेन प्रपूर्वाणां नेति नुदाति हिनोमि इत्येषां नकारस्य णकारो विधीयते तेनात्र प्रणय इत्यत्र णत्वम् । सूत्रे हिनोमीतिविकरणनिर्देशाद्यत्र विकरणाभावस्तत्र न णत्वम् ।

देवस्यंत्त्वा । सवितुश्प्प्रंसवेऽश्श्विनोर्ब्बाहुब्भ्याम्पूष्ण्णोहस्त्ताब्भ्या
म् ॥ आददेगायत्रेणच्छन्दसाङ्गिरस्वत्पृथिव्याश्सधस्त्थादग्नि
म्पुरीष्ष्यमाङ्गिरस्वदाभरत्रैष्टुभेनच्छन्दसाङ्गिरस्वत् ॥ ९ ॥
अब्भ्रिरसि ॥ अब्भ्रिरसिनार्य्यसित्त्वयाव्वयमग्निꣳशकेमख
नितुꣳसधस्त्थऽआ ॥ जागतेनच्छन्दसाङ्गिरस्वत् ॥ १० ॥
हस्त्तऽआधाय । सविताबिब्भ्रदब्भ्रिꣳहिरण्ययीम् ॥ अग्ने

इत्यनेन समानपदे स्वरयवहकपैश्च (शु. य. प्रा. ३ अ. ८६ सू.)
१ त्रैष्टुभेन। अत्र ऋषरेभ्यो नकारो णकारꣳ समानपदे (शु. य. प्रा. ३ अ. ८५ सू.) इत्यनेन शकारलकारसकार (मध्यमवर्गं)
इत्यनेन व्यवधानेऽपि विहितस्य प्राप्तस्य णत्वस्य शिलिसिवर्गमध्यमव्यवहितोऽपि (शु. य. प्रा. ३ अ. ९६ सू.)
चवर्गटवर्गतवर्गव्यवधानेषु ऋषरेभ्यः परस्य नकारस्य प्रकृतिभावादत्र णत्वं निषिध्यते।

ज्योतिर्ब्बिचाऽस्यंपृथिव्याऽअद्ध्याभंरदानुष्टुभेनच्छन्दंसाङ्गिर
स्वत् ॥ ११ ॥ [ ११-१ ] प्रंतूर्त्तंव्वाजिन् ॥ प्रतूर्त्तंव्वाजिन्नाद्द्रंवव्वारि
ष्ठामनुंसंव्वतंम् ॥ दिवितेजन्मंपरममन्तरिंक्षेतवनाभिं॑पृथि
व्यामाधियोनिरित् ॥ १२ ॥ युञ्जाथाऽंरासंभम् ॥ युञ्जाथाऽं
रासंभँय्युवमस्मिन्न्यामेंव्वृषण्वसू ॥ अग्निम्भरंन्तमस्मयुम्
॥ १३ ॥ योगेंयोगेतवस्तंरम् ॥ योगेंयोगेतवस्तंरंव्वाजेंवाजे ॥ ९४ ॥
हवामहे ॥ सखांयऽइन्द्रंमूतयें ॥ १४ ॥ प्रतूर्व्वन्नेहिं ॥ प्रतूर्व्व

न्नेह्व्यंवक्काम्मुन्नशंसत्त्तीरुद्रस्युगाणंपत्त्यम्मयोभूरेहि॥ उर्व्वन्तरीक्षं
व्वीहिस्वुस्त्तिगंव्व्यूतिरभंयानिकृण्णवत्पूष्ण्णासुयुजासुह ॥१५॥
पृथिव्व्याःसुधस्त्थात्॥ पृथिव्व्याःसुधस्त्थांदुग्निम्पुंरीष्ष्यमाङ्गि
रस्वदाभंराग्निम्पुंरीष्ष्यमाङ्गिरस्वदच्छेमोग्निम्पुंरीष्ष्यमाङ्गिर
स्वद्भंरिष्ष्यामः ॥ १६ ॥ अन्वुग्निः ॥ अन्वुग्निरुषसामग्ग्रं
मक्ख्यदन्वहांनिप्प्रथमोजातवेदाः ॥ अनुसूर्य्यस्यपुरुत्राचं
रश्मीननुद्यावांपृथिव्वीऽआततन्थ ॥१७॥ आगत्त्यंव्वाजी ॥

आगत्त्यंव्वाज्ज्यद्ध्वानꣳसर्व्वाम्मृधोव्विधूनुते ॥ अग्निꣳसधस्त्थे
महतिचक्षुंषानिचिंकीषते ॥ १८ ॥ आक्रम्म्यंव्वाजिन् ॥ आक्र
म्म्यंव्वाजिन्पृथिवीमग्निमिच्छरुचात्त्वम् ॥ भूम्म्यांव्वृत्त्वाय
नोब्ब्रूहियतꣳखनेमतंव्वयम् ॥ १९ ॥ द्यौस्त्ते । पृष्ठम्पृथिवी
सधस्त्थमात्त्मान्तरिक्षꣳसमुद्द्रोयोनिः ॥ व्विक्ख्यायचक्षु
षात्त्वमभितिष्ठपृतन्न्यतः ॥ २० ॥ उत्त्क्राम । महतेसौभगाया ॥९५॥
स्म्मादास्त्थानाद्द्रविणोदाव्वाजिन् ॥ व्वयꣳस्यामसुमतौपृथि

ध्याऽअग्निङ्घनंन्तऽउपस्त्थैऽअस्याः॥२१॥उदंक्रमीत्॥उदंक्र
मीद्द्रविणोदाब्वाज्यर्व्वाकुःसुलोकꣳसुकृतम्पृथिव्याम्॥ ततः
खनेमसुप्रतीकमग्निꣳस्वोरुहांणाऽअधिनाकमुत्तमम्॥२२॥
आत्त्वां।जिघर्म्मिमनंसाघृतेनंप्रतिक्षियन्तम्भुवंनानिव्विश्वां॥
पृथुन्तिरश्चावयंसाबृहन्तंव्यचिंष्ठमन्नैरभसन्दृशांनम्॥२३॥
आविश्वतः।प्रत्त्यञ्चंञ्जिघर्म्म्यर्रक्षसामनंसातज्जुंषेत॥मर्य्यी
श्रीस्पृहयद्वंर्णोऽअग्निर्न्नाभिमृशेंतन्न्वाजम्भुंराणः॥२४॥

परिवाजंपतिꣳ ॥ परिवाजंपतिꣳकविरग्ग्निर्हव्यान्न्यक्क्रमीत् ॥[1]
दधद्द्रत्नांनिदाशुषे ॥ २५ ॥ परिंत्त्वा । ग्ग्नेपुरंव्वयंव्विप्प्रꣳसह
स्यधीमहि ॥ धृषद्वर्णन्दिवेदिवेहन्तारम्भ[2]ङ्गुरावताम् ॥ २६ ॥
त्वमंग्ग्ने ॥ त्वमंग्ग्नेद्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वम
श्म्मनस्प्परि ॥ त्वंव्वनेब्भ्यस्त्वमोषधीब्भ्यस्त्वन्नृणा[3]न्नृपतेजा ॥ ९६ ॥

---

१ परिवाजपतिः कविः । अत्र कविष्करत्कृधिषु ( शु. य. प्रा. ३ अ. ३२ सू. ) इत्यनेन कविपरे पतिशब्दस्य विसर्गस्य षकारे प्राप्ते वाजपति-वांसऽएदिधिषुरन्तःपर्शव्येनान्तःपार्श्व्यमिति च ( शु. य. प्रा. ३ अ. ३८ सू. ) इत्यनेन सकारषकारयोर्निषेधाद्विसर्जनीय एव । २ भङ्गुरावताम् । अत्र अश्वरश्मिमतिसुमति ( शु. य. प्रा. ३ अ. ९८ सू. ) इत्यनेन वकारे परे भङ्गुरशब्दस्य ह्रस्वाकारस्य दीर्घाकारः । ३ नृणाम् । अत्र ऋषरेभ्यो नकारो णकारं समानपदे ( शु. य. प्रा. ३ अ. ८५ सू. ) इत्यनेन समानपदे ऋकारात्परस्य नकारस्य णत्वम् ।

यसेशुचिं॑ ॥ २७ ॥ [ १६-२ ] देवस्यंत्त्वा । सवितुः प्रंस
वेश्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्त्ताब्भ्याम् ॥ पृथिव्याःसधस्त्थां
दग्निम्पुरीष्यमङ्गिरस्वत्त्वंनामि ॥ ज्योतिष्म्मन्तन्त्वाग्ने
सुप्रतीकमजस्रेणभानुनादीद्यंतम् ॥ शिवम्प्रजाब्भ्योहिंꣳ
सन्तम्पृथिव्याःसधस्त्थांदग्निम्पुरीष्यमङ्गिरस्वत्त्वंनामꣳ
॥ २८ ॥ अपाम्पृष्ठम् ॥ अपाम्पृष्ठमंसियोनिरग्नेःसंमुद्रम
भितꣳपिन्न्वंमानम् ॥ वर्द्धमानोमहाँ२॥ऽआचपुष्कंरेदिवो

य. १७

मात्रंयाव्वरिम्म्णाप्प्रथस्व ॥ २९ ॥ शर्म्मंच ॥ शर्म्मंचस्त्थो
व्वर्म्मंचस्त्थोच्छिद्द्रेबहुलेऽउभे ॥ व्यचस्वतीसंव्वसाथाम्भृतम
ग्निम्पुरीष्यम् ॥ ३० ॥ संव्वसाथाम् ॥ संव्वसाथाꣳस्वर्व्विदा
समीचीऽउरसात्त्मना ॥ अग्निमन्तर्ब्भरिष्यन्तीज्ज्योति
ष्मन्तमजस्रमित् ॥ ३१ ॥ पुरीष्योसि । व्विश्वभराऽअथ
र्व्वात्त्वाप्प्रथमोनिरमन्थदग्ने ॥ त्वामग्नेपुष्क्करादद्ध्यथर्व्वानिर ॥९७॥
मन्थत ॥ मूर्द्ध्नोव्विश्वस्यव्वाघतः ॥ ३२ ॥ तमुत्त्वा । दद्ध्य

ङ्ऋषिं÷पुत्रऽईंधेऽअथर्व्वणः ॥ वृत्रहणम्पुरन्दुरम् ॥ ३३ ॥
तमुंत्त्वा । पात्थ्योवृषासमीधेदस्युहन्तंमम् ॥ धनञ्जयᳬरणेरणे ॥ ३४ ॥ सीदंहोतः ॥ सीदंहोतुःस्वऽउंलोकेचिंकित्त्वान्त्सादयांयुज्ञᳬसुंकृतस्ययोनौं ॥ देवावींर्देवान्हुविषांयजास्यग्नेबृहद्यजंमानेव्वयोंधाः ॥ ३५ ॥ निहोतां । होतृषदंनेव्विदांनस्त्वेषोदींदिवाँ२॥ऽअंसदत्त्सुदक्षं÷ ॥ अदंब्धव्व्रतप्रमतिर्व्वसिंष्ठःसहस्त्रम्भुरःशुचिंजिह्वोऽअग्निः ॥ ३६ ॥ सᳬसीं

१ सादय यज्ञम्। इति पदम्। अत्र अथोदारियशोचपनय सादयज्ञं० (य. शु. प्रा. ३ अ. ११३ सू.) इत्यनेन यकारे परे दीर्घविधानात्। सादयायज्ञम्।

दस्व । महाँ २॥ऽअसिशोचस्वदेववीतमः॥ व्विधूममग्नेऽअरुष
स्मियेध्यसृजप्प्रशस्तदर्शतम्॥ ३७॥[ १०-३ ]अपोदेवीः॥
अपोदेवीरुपसृजमधुमतीरयक्ष्मायप्प्रजाभ्यः ॥ तासामा
स्थानादुज्जिहतामोषधयःसुपिप्पलाः॥ ३८ ॥ सन्ते । व्वायु
र्मातरिश्वादधातूत्तानायाहृदयँय्यद्विकस्तम्॥ योदेवानाञ्चर
सिप्प्राणथेनकस्मैदेवव्वषडस्तुतुभ्यम्॥ ३९ ॥ सुजातोज्ज्यो ॥९८॥
तिषा । सहशर्म्मव्वरूथमासदत्स्वः॥ व्वासोऽअग्नेव्विश्व

रूपद्ध संव्ययस्वविभावसो ॥४०॥ उद्दुतिष्ठ । स्वध्वरावा[1]नोदेव्या
धिया ॥ दृशेचभासाबृहतासुशुक्वनिराग्नेयाहिसुशस्तिभिः
॥ ४१ ॥ ऊर्ध्वऽऊषुणः ॥ ऊर्ध्व[2]ऽऊषुणऽऊतयेति[3]ष्ठादेवो
नसविता ॥ ऊर्ध्वोवाजस्यसनितायदञ्जिभिर्वाघद्भिर्विह्वयामहे
॥ ४२ ॥ सजातः ॥ सजातोगर्भोऽअसिरोदस्योरग्नेचारुर्वि
भृतऽओषधीषु ॥ चित्रःशिशुःपरितमांᳬस्यक्तूप्रमातृभ्योऽ

---

१ अवानोधिया । अत्र अवोपसर्गस्य ह्रस्वाकारस्य नोपरे धात्वयोजाव० (य. शु. प्रा. ३ अ. १०८ सू.) इत्यनेन दीर्घाकारः । २ ऊर्द्धऽऊषुणः ऊर्द्ध ऊ सुनः इत्यत्र ऊश्चापृक्तात् (शु. य. प्रा. ३ अ. ६२ सू.) इत्यनेन अपृक्तसंज्ञादूकारात्परः सकारः षत्वमापद्यते तेन सस्य षकारः । ३ तिष्ठादेवः । अत्र तिष्ठाद्युदात्तम् (शु. य प्रा. ३ अ. १०४ सू.) इत्यनेन यदि तिष्ठेत्येतत्पदं आद्युदात्तं भवेत्तदा दीर्घत्वं प्राप्नोति । अत्र तिष्ठेत्येतस्याद्युदात्तत्वाद्दीर्घः ।

अधिकनिक्रदद्दाꣳ ॥ ४३ ॥ स्थिरोभव । वीड्वङ्गऽआशुर्भव
वाज्यर्व्वन् ॥ पृथुर्भवसुषदस्त्वमग्नेः[1]पुरीषवाहणः ॥ ४४ ॥
शिवोभव । प्रजाभ्योमानुषीभ्यस्त्वमङ्गिरः ॥ माद्यावा
पृथिवीऽअभिशोचीर्म्मान्तरिक्षम्मावनस्प्पतीन् ॥ ४५ ॥ प्रैतु ।
वाजीकनिक्रदन्नानदद्रासभःपत्त्वा ॥ भरन्नग्निम्पुरीष्यम्मा
पाद्यायुषःपुरा ॥ वृषाग्निंवृषणम्भरन्नपाङ्गर्भꣳसमुद्रियम् ॥ ॥११॥

१ पुरीषवाहणः । अत्र ऋषरेभ्यो नकारो णकारं समानपदे ( शु. य. प्रा. ३ अ. ८५ सू. ) इत्यप्राप्तौ स्वरयवहकपैश्च ( शु. य. प्रा. ३ अ. ८५ सू. ) इत्यनेन ऋषरेभ्यो स्वरयवहकवर्गपवर्गव्यवधानेऽपि णत्वविधानादत्र वाहनशब्दस्य नस्य णत्वम् ।

अग्न॒ऽआया॑हिवी॒तये॑ ॥ ४६ ॥ ऋ॒तꣳस॒त्त्यम् ॥ ऋ॒तꣳस॒

त्त्यमृ॒तꣳस॒त्त्यम॒ग्निम्पु॑री॒ष्य॒मङ्गि॒र॒स्वद्भ॑रामः ॥ ओष॑धय॒ः

प्प्रति॑मोदद्ध्वम॒ग्निमे॒तꣳशि॒वमा॒यन्त॑म॒भ्यत्र॑यु॒ष्माः ॥ व्यस्य॒

न्विश्वा॒ऽअनि॑रा॒ऽअमी॑वानि॒षीद॑न्नो॒ऽअप॑दु॒र्म्म॒तिञ्ज॑हि ॥४७॥

ओष॑धयः॒प्प्रति॑ । गृभ्णी॒त॒पु॒ष्प॑वतीः॒सुपि॒प्प॒लाः ॥ अ॒यंवो॒

गर्भ॑ऽऋ॒त्त्विय॑ꣳप्प्र॒त्नꣳस॒धस्त्थ॒मास॑दत् ॥४८॥ विपाज॑सा ।

पृ॒थुना॒शोशु॑चानो॒बाध॑स्वद्वि॒षोर॒क्षसो॒ऽअमी॑वाः ॥ सु॒शर्म्म॑णो

बृहतश्शर्म्मणिस्यामग्नेरहꣳसुहवस्यप्प्रणीतौ ॥४९॥ [१२-४]
आपोहि । ष्ठामयोभुवस्तानऽऊर्ज्जेदधातन ॥ महेरणायच
क्षसे ॥ ५० ॥ योवः । शिवतमोरसस्तस्यभाजयतेहनः ॥
उशतीरिवमातरः ॥ ५१ ॥ तस्म्माऽअरम् ॥ तस्म्माऽअरङ्ग
मामवोयस्यक्षयायजिन्न्वथ ॥ आपोजनयथाचनः ॥ ५२ ॥
मित्रश्सꣳसृज्ज्य । पृथिवीम्भूमिञ्चज्ज्योतिषासह ॥ सुजातञ्जात ॥ १०० ॥

१ हिष्ठामयः । अत्र हि स्थामयो भुवः । अत्र हेर्मिथोदयः (शु. य. प्रा. ३ अ. ५८ सू.) इत्यनेन हिशब्दात्परः सकारोदयो थकारोदयो वा सकारस्य षकारो विधीयते । तथा सति ततः ष्टुत्वे थकारस्य ठकारे ऊष्मान्तस्थाभ्यश्च स्पर्शः ( शु. य. प्रा. ४ अ. १०२ सू. ) इत्यनेन ठकारस्य द्वित्वम् ।

वेदसमयुक्ष्मायंत्त्वासढसृंजामिप्प्रजाब्भ्यं॥ ५३ ॥ रुद्राश्सहृ
सृज्ज्यं । पृथिवीम्बृहज्ज्योतिंढसमीधिरे । तेषाम्भानुरजंस्त्रऽइ
च्छुक्रोदेवेषुरोचते ॥५४॥ सढसृष्टांव्वसुंभिढं ॥ सढसृष्टांव्वसुभी
रुद्रैर्द्धीरैंढकर्म्मण्ण्याम्मृदंम् ॥ हस्त्ताब्भ्याम्मृद्धीङ्कृत्त्वासिंनी
वालीकृंणोतुताम् ॥ ५५ ॥ सिनीवालीसुंकपर्द्दा । सुंकुरीरा
स्वौपशा ॥ सातुब्भ्यंमदितेमह्योखान्दंधातुहस्त्तंयोढं ॥ ५६ ॥
उखाङ्कृंणोतु ॥ उखाङ्कृणोतुशक्त्यांबाहुब्भ्यामदिंतिर्द्धिया ॥

मातापुत्रँय्यथोपस्त्थेसाग्निम्बिभर्त्तुगर्ब्भऽआ ॥ मखस्यशि
रोसि॥५७॥ व्वसंवस्त्त्वा। कृण्ण्वन्तुगायत्रेणच्छन्दसाङ्गिरस्वद्ध्रु
वासिपृथिव्यसिधारयामयिप्प्रजाᳩंरायस्प्पोषङ्गौपत्त्यᳩंसुवी
र्य्यᳩंसजातान्न्यजमानायरुद्द्रास्त्त्वाकृण्ण्वन्तुत्त्रैष्टुभेनच्छन्दसा
ङ्गिरस्वद्ध्रुवास्यन्तरिक्षमसिधारयामयिप्प्रजाᳩंरायस्प्पोषङ्गौ
पत्त्यᳩंसुवीर्य्यᳩंसजातान्न्यजमानायादित्त्यास्त्त्वाकृण्ण्वन्तु ॥१०१॥
जागतेनच्छन्दसाङ्गिरस्वद्ध्रुवासिद्यौरसिधारयामयिप्प्रजाᳩं

रायस्पोषंङ्गौपत्त्यꣳसुवीर्य्यꣳसजातान्यजमानायव्विश्वेत्त्वा देवाव्वैश्वानराःकृण्ण्वन्त्वानुष्टुभेनच्छन्दसाङ्गिरस्वद्ध्रुवासिदि शोसिधारयामयिप्प्रजाꣳरायस्प्पोषंङ्गौपत्त्यꣳसुवीर्य्यꣳस जातान्यजमानाय ॥ ५८ ॥ अदित्त्यैरास्न्ना ॥ अदित्त्यैरा स्न्नास्यदितिष्ट्टेबिलङ्गृभ्णातु ॥ कृत्त्वायसामहीमुखाम्मृन्मयीं योनिंमग्ग्नये॥ पुत्रेब्भ्यꣳप्प्रायच्छददितिꣳश्श्रपयानिति ॥५९॥ व्वसवस्त्त्वा । धूपयन्तुगायत्रेणच्छन्दसाङ्गिरस्वद्रुद्रास्त्त्वाधूप

यन्तुत्रैष्टुभेनुच्छन्दसाङ्गिरस्वदादित्यास्त्वाधूपयन्तुजागतेनु
च्छन्दसाङ्गिरस्वद्विश्वेत्त्वादेवावैश्वानराधूपयन्त्वानुष्टुभेनुच्छ
न्दसाङ्गिरस्वदिन्द्रस्त्वाधूपयतुव्वरुणस्त्वाधूपयतुव्विष्णुस्त्वा
धूपयतु ॥ ६० ॥ [ ११-५ ] अदितिष्ट्वा[1] । देवीव्विश्वदेव्यावतीपृ
थिव्याः सधस्थेऽअङ्गिरस्वत्त्खनत्त्ववटदेवानान्त्वापत्नीर्देवी
र्व्विश्वदेव्यावतीः पृथिव्याः सधस्थेऽअङ्गिरस्वद्दधतूखेधिषणा

1 अदितिष्ट्वादेवी । इति पदम् अत्र संधिरंशुरदितिः ( शु. य. प्रा. ३ अ. ७६ सू. ) इत्यनेन सन्धिः अंशुः अदितिः एतेषां विसर्जनीयसकारस्य षत्वं समानपदे विधीयते । तेनात्र अदितेर्विसर्जनीयस्य षत्वे ष्टुत्वे ऊष्मान्तस्थाभ्यश्च स्पर्शः ( शु. य. प्रा. ४ अ. १०२ सू. ) इति टकारस्य द्वित्वम् ।

स्त्वादेवीर्व्विश्वदेव्यावतीः पृथिव्याः सधस्थेऽअङ्गिरस्वदभी

न्धतामुखेवरूत्रीष्ट्वादेवीर्व्विश्वदेव्यावतीः पृथिव्याः सधस्थेऽ

अङ्गिरस्वच्छ्रपयन्तूखेग्नास्त्वादेवीर्व्विश्वदेव्यावतीः पृथिव्याः

सधस्थेऽअङ्गिरस्वत्पचन्तूखेजनयस्त्वाच्छिन्नपत्रादेवीर्व्वि

श्वदेव्यावतीः पृथिव्याः सधस्थेऽअङ्गिरस्वत्पचन्तूखे ॥ ६१ ॥

मित्रस्यचर्षणीधृतः ॥ मित्रस्यचर्षणीधृतोवोदेवस्यसानसि ॥

---

१ वरूत्रीः त्वा इति पदम् । अत्र मातृभिरर्चिभिःपायुभिर्वरूत्रीः (शु. य. प्रा. ३ अ. ७९ सू.) इत्यनेन एकाक्षरे त्वापरे वरूत्रीः इत्यस्य विसर्जनीय-

सं. १८ सस्य षत्वं षात्तथौमूर्धन्यम् (शु. य. प्रा. ३ अ. ८० सू.) इति मूर्धन्यत्वे ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इति द्वित्वे वरूत्रीष्ट्वा ।

शु. य. संहि.

द्युम्नञ्चित्रश्श्रवस्तमम् ॥ ६२ ॥ देवस्त्वा । सवितोद्वपतुसुपा पू. अ.
णिश्स्वङ्गुरिश्सुबाहुरुतशक्त्या ॥ अव्यथमानापृथिव्यामाशा ॥ ११ ॥
॥१०२॥ दिशऽआपृण ॥ ६३ ॥ उत्थायबृहती । भवोदुतिष्ठध्रुवात्त्वम् ॥
मित्रैतान्तऽउखाम्परिददाम्म्यभित्त्याऽएषामाभेदि ॥ ६४ ॥
व्वसवस्त्वा ॥ व्वसवस्त्वाच्छृन्दन्तुगायत्त्रेणच्छन्दसाङ्गिरस्वद्रु
द्रास्त्वाच्छृन्दन्तुत्रैष्टुभेनच्छन्दसाङ्गिरस्वदादित्यास्त्वाच्छृ ॥१०३॥
न्दन्तुजागतेनच्छन्दसाङ्गिरस्वद्विश्वेत्त्वादेवावैश्वानराऽआच्छृ

न्दुन्त्वानुष्टुभेन च्छन्दसाङ्गिरस्वत् ॥ ६५ ॥ [ ५-६ ] आकूति
मग्निम् ॥ आकूतिमग्निम्प्रयुजᳬंस्वाहामनोमेधामग्निम्प्रयु
जᳬंस्वाहाञ्चित्तंव्विज्ञातमग्निम्प्रयुजᳬंस्वाहाव्वाचोव्विधृतिम
ग्निम्प्रयुजᳬंस्वाहाम्प्रजापतयेमनवेस्वाहाग्नयेव्वैश्वानरायस्वा
हा ॥ ६६ ॥ व्विश्वोदेवस्य । नेतुर्म्मर्त्तोव्वुरीतसख्यम् ॥ व्वि
श्वोरायऽइषुद्ध्यातिद्युम्नंव्वृणीतपुष्यसेस्वाहा ॥ ६७ ॥ मासु ।
भित्त्थामासुरिषोम्बधृष्णुव्वीरयस्वसु ॥ अग्निश्चेदङ्करिष्य

थः ॥ ६८ ॥ दृ॒ᳩ॒हस्वदेवि । पृथिवि॒स्वुस्त्तय॑ऽआसुरीमा॒या
स्वु॒धया॑कृतासि॑ ॥ जुष्टन्दे॒वेब्भ्य॑ऽइदम॑स्त्तु ह॒व्यमरि॑ष्टा॒त्त्वमुदि॑
हि य॒ज्ञेऽअ॒स्म्मिन् ॥ ६९ ॥ द्रुन्नᳩ॑सर्प्पिरा॑सुतिः । प्र॒त्नोहो॒
ता॒व्वरे॑ण्ण्यः ॥ सह॑सस्प्पु॒त्रोऽअद्भुतः ॥ ७० ॥ शतम् ॥ ५०० ॥
पर॑स्या॒ऽअधि॑ । सं॒व्वतो॑वरा॒ँ२॥ऽअ॒ब्भ्यातर ॥ यत्रा॒हमस्म्मि॒
ताँ२॥ऽअ॑व ॥ ७१ ॥ प॒रम॒स्याः पराव॒तः ॥ प॒रम॒स्याः



प॒राव॒तो॑रो॒हि॑दं॑श्श्वऽइ॒हागहि ॥ पु॒रीष्य॒ः पु॑रु॒प्प्रियो॒ग्ग्नेत्त्वन्त॑

१ सहसः पुत्रः इत्यत्र रायः सहसः पोषपुत्रयोः (शु.य.प्रा. ३ अ. २५ सू.) इत्यनेन रायसहसशब्दयोः सकारस्य पोषपुत्रपरयोःपरयोःक्रमेण सत्वम् । सहसस्पुत्रः ।

रामृधः ॥ ७२ ॥ यदंग्ग्ने ॥ यदंग्ग्नेकानिकानिंचिदातेदारू
णिदुद्ध्मसिं ॥ सर्व्वन्तदस्त्तुतेघृतन्तज्जुंषस्वयविष्ठय ॥ ७३ ॥
यदत्तिं ॥ यदत्त्युंपजिह्विकायद्वम्म्रोऽअंतिसर्प्पंति ॥ सर्व्वन्त
दंस्त्तुतेघृतन्तज्जुंषस्वयविष्ठय ॥ ७४ ॥ अहंरहरप्प्रंयावम् ॥
अहंरहरप्प्रंयावम्भरन्तोश्वायेवतिष्ठंतेघासमंस्म्मै ॥ रायस्प्पोषे
णसामिषामदन्तोग्ग्नेमातेप्प्रातिंवेशारिषाम ॥ ७५ ॥ नाभापृ
थिव्याः । संमिधानेऽअग्ग्नौरायस्प्पोषांयबृहतेहंवामहे ॥ इर

स्मदम्बृहदुक्थँऽयजंत्रञ्जेतारमुग्निम्पृतंनासुसासहिम् ॥७६॥
या३सेनाः ॥ या३सेनाऽअभीत्त्वरीराव्याधिनीरुगणाऽउत ॥
येस्तेनायेचतस्करास्ताँस्तेऽअग्नेपिदधाम्म्यास्ये ॥ ७७ ॥
दꣳष्ट्राभ्याम्मलिम्म्लून् ॥ दꣳष्ट्राभ्याम्मलिम्म्लूञ्जम्भ्यै
स्तंस्कराँ२।ऽउत ॥ हनुभ्याꣳस्तेनान्भगवस्ताँस्त्वङ्खादु
सुखादितान् ॥ ७८ ॥ येजनेषु । मलिम्म्लवस्तेनासस्तस्कं 

---

१ तस्कराँऽउत । तत् करांऽउत इति पदे । अत्र तद्वृहतौ करपत्योस्तलोपश्च ( शु. य. प्रा. ३ अ. ५२ सू. ) इत्यनेन तच्छब्दस्य करपत्यपरे सकारे पूर्वस्य तद्वदितितकारस्य लोपे च कृते ऊष्मान्तस्थाभ्यश्च स्पर्शः ( शु. य. प्रा. ४ अ. १०२ सू. ) इत्यनेन ककारस्य द्वित्वम् ।

राव्वनैं ॥ येकक्षैष्ष्वघायवस्त्ताँस्त्तैंदधामिजम्भंयोꣳ ॥ ७९ ॥
योऽअस्म्मब्भ्यंस् ॥ योऽअस्म्मब्भ्यंमरातीयाद्यश्श्चनोद्द्वेषत्ते
जनं÷ ॥ निन्दाद्योऽअस्म्मान्धिप्प्सांच्चसर्व्वन्तम्मंस्म्मसाकुरु
॥ ८० ॥ सꣳशितम्मे ॥ सꣳशितम्मेब्रह्मसꣳशितंव्वीर्य्यम्ब
लंम् ॥ सꣳशितक्षत्त्रञ्जिष्ण्णुयस्याहमास्म्मिपुरोहितꣳ ॥ ८१ ॥
उदेंषाम् ॥ उदेंषाम्बाहूऽअतिरमुद्द्वर्च्चोऽअथोबलंम् ॥ क्षिणोमि
ब्रह्मणामित्त्रानुन्नयामिस्वाँ२॥ऽअहम् ॥ ८२॥ अन्नंपतेन्नस्य।

नोदेह्यनमीवस्यंशुष्मिमणं÷ ॥ प्रप्प्रंदातारंन्तारिषऽऊर्ज्जंन्नोधे
हिद्विपदेचतुष्प्पदे ॥ ८३ ॥ [१८-७] ॥ इतिश्रीवाजसनेय
संहितायाम् एकादशोऽध्यायः ॥ ११ ॥ श्रीवेदपुरुषाय नमः ॥
अनुवाकसूत्रम् ॥ दृशानःसप्तदश, दिवस्परिद्वादश, समिधा
ग्निंपंचदशा, पेतसप्तदशा, सुन्वन्तमयजमानंत्रयोदश, याऽ
ओषधीः सप्तविंᳬशति, मांमापोडश, सप्तसप्तदशᳬशतम् ॥
[अ. १२ मं. ११७ अनु. ७] हरिः ॐ ॥ दृशानोरुक्मश्र ॥

ईशानोरुक्मऽउर्व्यांव्यंद्यौर्हुम्मर्षमायुःश्रियेरुचानः ॥ अग्नि
रमृतोऽअभवद्वयोभिर्य्यदेनन्द्यौरजनयत्सुरेताः ॥ १ ॥ नक्तो
षासासमनसा ॥ नक्तोषासासमनसाविरूपेधापयेतेशिशु
मेकꣳसमीची ॥ द्यावाक्षामारुक्मोऽअन्तर्विभातिदेवाऽअग्नि
न्धारयन्द्रविणोदाः ॥ २ ॥ विश्वारूपाणि ॥ विश्वारूपाणि
प्रतिमुञ्चतेकविःप्रासावीद्भद्रंद्विपदेचतुष्पदे ॥ विनाकम

१ इशानः । अत्र ऋवरेभ्यः (शु. य. प्रा. ३ अ. ८५ सू.) इत्यनेन समानपदे स्वरयवहकपैश्च (शु. य. प्रा. ३ अ. ८६ सू.) इत्यनेन एतैरेव व्यवधानेऽपि । णत्वविधानात्र णत्वप्राप्तिः । तथापि तिलिसिवर्गमध्यमव्यवहितोऽपि (शु. य. प्रा. ३ अ. ९५ सू.) इत्यनेन णत्वनिषेधः शिष्यबुद्धिव्युत्पादनार्थो ज्ञेयः ।

कख्यत्त्सवितावरेण्ण्योनुप्प्रयाणमुषसोव्विराजति ॥ ३ ॥ सुपर्ण्णो
सि। गरुत्माँस्त्रिवृत्तेशिरोगायत्रञ्चक्षुर्बृहद्रथन्तरेपक्षौ ॥ स्तोमऽ
आत्माच्छन्दाᳫंस्यङ्गानियजूᳫंषिनाम ॥ सामतेतनूर्व्वामदे
व्व्यँय्यज्ञायज्ञियम्पुच्छन्धिष्ण्ण्याः शफाः ॥ सुपर्ण्णोसिगरु
त्मान्दिवङ्गच्छस्वः पत ॥ ४ ॥ व्विष्ण्णोः क्क्रमः ॥ व्विष्ण्णोः
क्क्रमोसिसपत्त्नहागायत्रञ्छन्दऽआरोहपृथिवीमनुविक्क्रमस्व
व्विष्ण्णोः क्क्रमोस्यभिमातिहात्रैष्टुभञ्छन्दऽआरोहान्तरिक्षम

नुविक्क्रमस्वुविष्णोॅक्क्रमोस्यरातीयतोहुन्ताजागंतुञ्छन्दुऽआ
रोंहुदिवमनुविक्क्रमस्वुविष्णोॅक्क्रमोसिशत्रूयतोहुन्तानुष्टुभु
ञ्छन्दुऽआरोंहुदिशोनुविक्क्रमस्व ॥ ५॥ अक्क्रन्ददुग्निः ॥ अक्क्र
न्ददुग्निस्त्तनयंन्निवुद्यौॅक्षामारेरिंहद्वीरुधंःसमुञ्जन् ॥ सुद्यो
जज्ञानोव्विहीमिद्धोऽअक्ख्यदारोदंसीभानुनांभात्त्यन्तः ॥६॥
अग्नेॅभ्यावर्त्तिन् ॥ अग्नेॅभ्यावर्त्तिन्नुभिमानिवंर्त्तस्वायुंषाव्वर्च्चं
साप्प्रुजयाधनेंन ॥ सुन्न्यामेधयांरुय्यापोषेंण ॥ ७॥ अग्नेऽ

अङ्गिरः । शतन्तेसन्त्वावृतः सहस्रन्तऽउपावृतः ॥ अधा
पोषस्यपोषेणपुनर्न्नोनष्टमाकृधिपुनर्न्नोरयिमाकृधि ॥ ८ ॥ पुन
रूर्ज्जा । निवर्त्तस्वपुनरग्नऽइषायुषा ॥ पुनर्न्नःपाह्यꣳहसः ॥९॥
सहरय्या । निवर्त्तस्वाग्नेपिन्वस्वधारया ॥ विश्वप्स्न्याविश्वत
स्परि ॥ १० ॥ आत्त्वा । हार्षमन्तरभूर्ध्रुवस्तिष्ठाविचाचलिः ॥
विशस्त्वासर्व्वावाञ्छन्तुमात्त्वद्राष्ट्रमधिभ्रशत् ॥ ११ ॥
उदुत्तमम् ॥ उदुत्तमंव्वरुणपाशमस्म्मदवाधमंव्विमद्ध्यमꣳ

॥१०८॥

[1]अथाय ॥ अथांव्वयमादित्त्यव्व्रतेतवानागसोऽअदितयेस्याम
॥ १२ ॥ अग्ग्रेबृहन् ॥ अग्ग्रेबृहन्नुषसामूर्द्धोऽअस्त्थान्निर्ज्ज
गन्वान्तमसोज्ज्योतिषागात् ॥ अग्निर्ब्भानुनारुशतास्वङ्गऽ
आजातोव्विश्श्वासद्मान्यप्प्राः ॥ १३ ॥ हꣳसश्शुचिषत् ॥ हꣳ
सश्शुचिषद्वसुरन्तरिक्षसद्धोताव्वेदिषदतिथिर्दुरोणसत् ॥ नृष
द्वरसदृतसद्व्योमसदब्जागोजाऽऋतजाऽअद्रिजाऽऋतम्बृहत्

१ अथय इति पदम् । अथोदारियशोधपनवसावृपर्डूहपसतुसकक्मायारात्यूतअयत यकारे ( शु. य. प्रा. ३ अ. ११३ सू. ) इत्यनेन एतेषां यकारे परे दीर्घः । तेन अथाय इति पदम् ।

कं. १९

॥ १४ ॥ सीदुत्त्वम् ॥ सीदुत्त्वम्मातुरस्याऽउपस्त्थेव्विश्श्वान्न्य
ग्ग्नेव्वयुनानिव्विद्वान् ॥ मैनान्तपसामार्च्चिषाभिशोचीरन्तरं
स्याᳪशुक्रज्ज्योतिर्व्विभाहि ॥ १५ ॥ अन्तरग्ग्ने । रुचात्त्वमु
खायाᳬसदनेस्वे ॥ तस्यास्त्वᳩहरसातपञ्जातवेदᳬशिवोभव
॥ १६ ॥ शिवोभूत्त्वा । मह्यमग्ग्नेऽअथोसीदशिवस्त्त्वम् ॥
शिवाᳬकृत्त्वादिशᳬसर्व्वाᳬस्वँय्योनिमिहासदᳬ॥ १७ ॥ [ १७-१ ] ॥ १०९ ।
दिवस्प्परि । प्प्रथमञ्जज्ज्ञेऽअग्ग्निरस्म्माद्द्वितीयम्परिजातवेदाᳬ ॥

तृतीयमप्प्सु[1]नृमणाऽअजस्रमिन्धानऽएनञ्जरतेस्वाधीः ॥ १८ ॥
विद्द्माते ॥ विद्द्मातेऽअग्नेत्त्रेधात्त्रयाणिविद्द्मातेधामाविभृ
तापुरुत्रा ॥ विद्द्मातेनामंपरमङ्गुहायद्विद्द्मातमुत्त्सँय्यतंऽ
आजगन्थ ॥ १९ ॥ समुद्रेत्त्वा । नृमणाऽअप्प्स्वन्तर्नृचक्षाऽ
ईधेदिवोऽअग्नऽऊधंन् ॥ तृतीयेत्त्वारजंसितस्त्थिवाꣳसमपा
मुपस्त्थेमहिषाऽअंवर्द्धन् ॥ २० ॥ अक्क्रन्ददग्निः ॥ अक्क्रन्द

१ नृमणा । अत्र ऋषरेभ्यो नकारो णकारं समानपदे (शु. य. प्रा. ३ अ. ८५ सू.) इत्यनेन णत्वाप्राप्तौ स्वरयवहकपैश्च (शु. य. प्रा. ३ अ. ८६ सू.) एतैर्व्यवधानेऽपि ऋषरेभ्यो णत्वविधानात्पवर्गस्य व्यवधानेऽपि णत्वे नृमणा इति रूपम् ।

दुग्निस्तनयंन्निवुद्यौःक्षामारेरिंहद्वीरुधःसमुञ्जन् ॥ सुद्योज
ज्ञानोविहीमिद्धोऽअक्ख्युदारोदसीभानुनाभात्युन्तः ॥२१॥
श्रीणामुंदुारः ॥ श्रीणामुंदुारोधुरुणोरयीणाम्मुंनीषाणुाम्प्रा
र्प्पंणुःसोमंगोपाः ॥ व्वसुःसूनुःसहसोऽअुप्सुराजुाव्विभुात्य
ग्ग्रंऽउुषसांमिधुानः ॥ २२ ॥ व्विश्श्वस्यकेुतुः ॥ व्विश्श्वस्यकेुतु
र्भुवंनस्युगर्भुऽआरोदंसीऽअपृणुाज्जायंमानः ॥ व्वीडुञ्चिदुाद्रि ॥ ११० ॥
मभिनत्परायुञ्जनुायदुग्निमयंजन्तुपञ्च ॥ २३ ॥ उुशिक्पा

वक॑ः ॥ उशिक्पावकोऽअरतिः॑सुमेधामर्त्त्येष्वग्निरमृतोनि

धायि ॥ इयर्त्तिधूममरुषम्भरिभ्रदुच्छुक्रेणशोचिषाद्यामिन

क्षन् ॥ २४ ॥ दृशानोरुक्मः ॥ दृशानोरुक्मऽउर्व्याव्यद्यौदु

र्मर्षमायुःश्रियेरुचानः ॥ अग्निरमृतोऽअभवद्वयोभिर्य

देनन्द्यौरजनयत्सुरेताः ॥ २५ ॥ यस्ते ॥ यस्तेऽअद्यकृण

वद्भद्रशोचेपूपन्देवघृतवन्तमग्ने ॥ प्रतन्नयप्रतरंवस्योऽअच्छा

भिसुम्नन्देवभक्तंयविष्ठ ॥ २६ ॥ आतम् ॥ आतम्भजसौ

श्श्रवसेष्ष्वंग्ग्नऽउक्थऽउक्थऽआभंजशस्यमाने ॥ प्प्रियःसूर्य्ये
प्प्रियोऽअग्ग्नाभंवात्त्युज्जातेनंभिनदुज्जानिंत्त्वैः ॥ २७ ॥
त्वामंग्ग्ने ॥ त्वामंग्ग्नेयजंमानाऽअनुद्यून्विश्श्वावसुंदाधिरेव्वा
र्य्याणि ॥ त्वयांसहद्द्रविंणमिच्छमांनाव्व्रजङ्गोमंन्तमुशिजोव्वि
वंव्व्रुः ॥ २८ ॥ अस्त्ताव्यग्ग्निः ॥ अस्त्ताव्यग्ग्निन्नंराꣳसुशे
वोंव्वैश्श्वानरऽऋषिंभिःसोमंगोपाः ॥ अद्द्वेषेद्यावांपृथिवीहुवेम
देवाधत्त्तरयिमस्म्मेसुवीरंम् ॥ २९ ॥ [१२-२] समिधाग्ग्निम् ॥

समिधाग्निन्दुवस्यतघृतैर्ब्बोधयतातिथिम्॥ आस्मिन्हव्याजु

होतन ॥ ३० ॥ उदुत्त्वा ॥ उदुत्त्वाविश्वेदेवाऽअग्नेभरन्तु

चित्तिभिः॥ सनोभवशिवस्त्वꣳसुप्प्रतीकोविभावसुः ॥३१॥

प्रेत् ॥ प्रेदग्नेज्ज्योतिष्म्मान्याहिशिवेभिरर्च्चिभिष्ट्वम् ॥ बृहद्भि

र्भानुभिर्भासन्माहिꣳसीस्तन्वाप्प्रजाः ॥ ३२ ॥ अक्रन्द

---

१ आर्चिभिस्त्वम् इति पदम्। अत्र मातृभिरर्चिभिः पायुभिर्वरूत्रीः (शु. य. प्रा. ३ अ. ७९ सू.) इत्यनेन मातृभिः आर्चिभिः पायुभिः वरूत्रीः एतेषां पदानां एकाक्षरे प्रत्यये विसर्जनीयसकारस्य षः। तेन सस्य षत्वे, षात्तथौ मूर्धन्यम् (शु. य. प्रा. ३ अ. ८० सू.) इत्यनेन त्वमित्यस्य तस्य मूर्धन्ये टकारे ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इति टस्य द्वित्वे आर्चिभिष्ट्ट्वम्।

२०५

दुग्निः ॥ अक्क्रन्ददग्निस्त्तनयंन्निवद्यौःक्षामारेरिहद्वीरुधः
समञ्जन् ॥ सद्द्योजज्ज्ञानोव्विहीमिद्धोऽअक्ख्यदारोदसीभानु
नाभात्त्यन्तः ॥ ३३ ॥ प्प्रायम् ॥ प्प्रायमग्निर्भरतस्य
शृण्वेव्वियत्त्सूर्य्योनरोचतेबृहद्भाः ॥ अभियःपूरुम्पृतनासुत
स्त्थौदीदायदैव्व्योऽअतिथिꣳशिवोनः ॥ ३४ ॥ आपोदेवीः ॥
आपोदेवीःप्प्रतिगृभ्णीतभस्स्मैतत्त्स्योनेकृणुद्ध्वꣳसुरभाऽउ
लोके ॥ तस्मैनमन्ताञ्जनयꣳसुपत्क्नीम्मातेवपुत्रम्बिभृता

प्स्वेनत् ॥ ३५ ॥ अप्स्वग्ने ॥ अप्स्वग्नेसधिष्ट्व[1]सौषधी[2]
रनुरुध्यसे ॥ गर्भेसञ्जायसेपुनः ॥ ३६ ॥ गर्भोऽअसि ॥
गर्भोऽअस्योषधीनाङ्गर्भोवनस्पतीनाम् ॥ गर्भोविश्वस्य
भूतस्याग्नेगर्भोऽअपामसि ॥ ३७ ॥ प्रसद्यभस्मना ॥
प्रसद्यभस्मनायोनिमपश्चपृथिवीमग्ने ॥ सꣳसृज्यमातृभिष्ट्व[3]

---

१ सधिष्ट्व । अत्र सधिस्त्व इति पदद्वयम् । अत्र विसर्गस्य परसवर्णे, सधिरंश्चुरविंतिः ( शु. य. प्रा. ३ अ. ७१ सू. ) इत्यनेन षत्वे ऊष्मान्तस्थास्थश्च स्पर्शं इत्यनेन टस्य द्वित्वम् । २ सः ओषधीः इति पदद्वयम् । अत्र सऽओषधीभयोः ( शु. य. प्रा. ३ अ. १५ सू. ) इत्यनेन ओषधीपरे सः पदस्य विसर्जनीयस्य लोपे, सन्ध्यक्षरे ऐकारौकारौ ( शु. य. प्रा. ४ अ. ५७ सू. ) इत्यनेन वृद्धौ सौषधी इति पदम् । ३ मातृभिस्त्वम् इति पदम् । मातृभिर-

ज्योतिष्म्मान्पुनरासदः ॥ ३८ ॥ पुनरासद्य ॥ पुनरासद्य
सदनमपश्चपृथिवीमग्ने ॥ शेषेमातुर्य्यथोपस्त्थेन्तरस्या
शिवतमः ॥ ३९ ॥ पुनरूर्ज्जा । निवर्त्तस्वपुनरग्नऽइषायुषा ॥
पुनर्न्नःपाह्यहहसः ॥ ४० ॥ सहरय्या । निवर्त्तस्वाग्नेपिन्न्वस्व
धारया ॥ विश्वप्स्न्यांविश्वतस्प्परि ॥ ४१ ॥ बोधामे ।
ऽअस्यवचसोयविष्ठमःहिष्ठस्यप्प्रभृतस्यस्वधावः ॥ पीयति



र्चिभिः पायुभिर्वरूत्रीः (शु. य. प्रा. ४ अ. ७९ सू.) इत्यनेन मातृभिः आर्चिभिः पायुभिः वरूत्रीः एतेषां पदानां विसर्जनीयस्य सकारस्य षकार एकाक्षरे प्रत्यये परे इति षत्वे च षात्तथौ मूर्धन्यम् (शु. य. प्रा. ३ अ. ८० सू.) इत्यनेन तस्य मूर्धन्ये टकारे ऊष्मान्त० इत्यनेन टस्य द्वित्वम् ।

त्वोऽअनुत्त्वोगृणातिव्वृन्दारुष्ट्टेतन्त्वंव्वन्देऽअग्ने ॥ ४२ ॥ स
बोधि । सूरिर्म्मघवाव्वसुपतेव्वसुदावन् ॥ युयोद्ध्यस्म्मद्द्वेषाᳬ
सिव्विश्श्वकर्म्मणेस्वाहा ॥ ४३ ॥ पुनस्त्वा । दित्यारुद्द्रावसवᳬ
समिन्धताम्पुनर्ब्ब्रह्माणोव्वसुनीथयज्ज्ञैः ॥ घृतेनत्त्वन्तन्वंव्वर्द्धय
स्वसत्त्याःसन्तुयजमानस्यकामाः ॥ ४४ ॥ [ १५-३ ] अपेत ॥
अपेतव्वीतव्विचसर्प्पतातोयेत्रस्त्थपुराणायेचनूतनाः ॥ अदा

१ वृन्दारुष्ट्टे अत्र वृन्दारुः ते इति पदद्वयम् । वृन्दारुर्माकिः ( शु. य. प्रा. ३ अ. ७४ सू. ) इत्यनेन वृन्दारोः विसर्गस्य परसवर्णे, पात्तथौ मूर्धन्यम् इत्यनेन च ते तस्य मूर्धन्ये टकारे कृते कथ्यान्तस्याभ्यश्च स्पर्शः ( शु. य. प्रा. ४ अ. १०२ सू. ) इति टकारस्य द्वित्वम् ।

द्युमोवसानेम्पृथिव्याऽअक्कंन्निमाम्पितरौलोकमस्म्मै ॥ ४५ ॥
सँज्ञानमसि । कामधरणम्मयितेकामधरणम्भूयात् ॥ अग्ग्ने
र्भस्म्मास्यग्ग्नेः पुरीषमसिचितस्त्थपरिचितऽऊर्द्ध्वचितः श्रय
द्ध्वम् ॥ ४६ ॥ अयᳬसः ॥ अयᳬसोऽअग्निर्य्यस्मिन्त्सो
ममिन्द्रः सुतन्दधेजठरेवावशानः ॥ सहस्रियंव्वाजमत्त्य
न्नसप्तिᳬससवान्त्सन्त्स्तूयसेजातवेदः ॥ ४७ ॥ अग्ग्नेयत् ॥
अग्ग्नेयत्तेदिविव्वर्च्चः पृथिव्याँय्यदोषधीष्ष्वप्स्वायजत्र ॥

येनान्तरिक्षमुर्व्वातृतन्थंत्त्वेषꣳसभानुरंर्ण्णवोनृचक्क्षांꣳ[1] ॥४८॥
अग्ग्नौंदिवः ॥ अग्ग्नौंदिवोऽअर्ण्णमच्छांजिगास्यच्छांदेवाँ२॥
ऽऊंचिषेधिषण्ण्याये ॥ यारौंचनेपरस्त्तात्त्सूर्य्यंस्ययाश्चावस्त्तां
दुपतिष्ठंन्तऽआपंः ॥ ४९ ॥ पुरीष्ष्यासोऽअग्ग्नयंः । प्प्रांव[2]
णेभिंःसजोषंसꣳ ॥ जुषन्ताँय्यज्ञमद्द्रुहोंनमीवाऽइषोंमहीः
॥ ५० ॥ इडांमग्ग्ने । पुरुदꣳसꣳसनिङ्गोःशंश्श्वत्तमꣳहवंमा

---

१ यत्र यकारवकाररहितदीर्घस्वरितस्वरात्परो विसर्गस्तत्र कनिष्ठिकाक्षेपः सर्वत्र कार्यः । २ प्रावणेभिः । अत्र प्रवणश्रृङ्गयासेषु (शु. य. प्रा. ३ अ. १०५ सू.) इत्यनेन वन श्रृङ्ग यास इत्येतेषु परेषु प्र इत्येतत्पदस्य ह्रस्वाकारस्य दीर्घाकारो विधीयते । अत्र प्रशब्दाद्वनशब्दः परः । तेन प्रशब्दाकारो दीर्घः ।

सं. २०

नायसाध ॥ स्याग्नं॑ःसूनुस्तनयोविजावाग्नेसातेसुमतिर्भूत्त्व
स्मे ॥ ५१ ॥ अयन्ते ॥ अयन्तेयोनिर्ऋत्त्वियोयतोजातोऽ
अरोचथाः ॥ तञ्जानन्नग्नऽआरोहाथानोवर्द्धयारयिम् ॥५२॥
चिदसि ॥ चिदसितयादेवतयाङ्गिरस्वद्ध्रुवासीदपरिचिदसित
यादेवतयाङ्गिरस्वद्ध्रुवासीद ॥ ५३ ॥ लोकम्पृण । च्छिद्रम्पृ
णाथोसीदद्ध्रुवात्त्वम् ॥ इन्द्राग्नीत्त्वाबृहस्पतिरस्मिन्न्योनां
वसीषदन् ॥ ५४ ॥ ताऽअस्य ॥ ताऽअस्यसूददोहसःसोमं

श्रीणन्तिपृश्न्वंयः ॥ जन्मन्देवानांविशस्त्रिष्वारोचनेदिवः
॥ ५५ ॥ इन्द्रंविश्वाः ॥ इन्द्रंविश्वाऽअवीवृधन्त्समुद्रव्यच
साङ्गिरः ॥ रथीतम[1] रथीनांवाजानाꣳसत्पतिम्पतिम् ॥ ५६ ॥
सामितम् ॥ सामितहसङ्कल्पेथाꣳसम्प्रियौरोचिष्णूसुमनस्य
मानौ ॥ इषमूर्जमभिसंवसानौ ॥ ५७ ॥ संवा[2]म् ॥ संवा

१ रथितमम्। इति पदम् । रथि तकारनकारयोः (शु. य. प्रा. ३ अ. ११२ सू.) इत्यनेन तकारे नकारे च परे रथि इत्येतत्पदं दीर्घं भवति। तेन रथीतमम्। २ उपसर्गात्परो यस्तु स वकारो लघुर्मतः। वो वां वा वै मंत्रपाठे लघवो गुरवः पदे। इति वामित्यस्यात्र लघुत्वम् ।

म्मनाᳯंसिसंव्व्रुतासमुंचित्तान्याकरं¹म् ॥ अग्नेंपुरीष्याधिपा
भंवत्त्वन्नऽइषमूर्ज्जँय्यजंमानायधेहि ॥ ५८ ॥ अग्नेत्त्वम् ॥
अग्नेत्त्वम्पुरीष्ष्योरयिमान्पुंष्टिमाँ२॥ऽअंसि ॥ शिवाःकृत्त्वा
दिशःसर्व्वाःस्वँय्योनिंमिहासंदः ॥ ५९ ॥ भवंतन्नः ॥ भवं
तन्नःसमंनसौसचेंतसावरेपसौं ॥ मायज्ञᳯंहिंᳯसिष्टम्मायज्ञ
पंतिञ्जातवेदसौशिवौभंवतमद्यनंः ॥६०॥ मातेवंपुत्रम् ॥ माते ॥ ११६ ॥

१ अत्र मकारोच्चारे दक्षिणहस्तेन मुष्ट्याकृतिः कार्या । यत्र यत्रावसानगतो मकारस्तत्र मुष्ट्याकृतिः "मुष्ट्याकृतिर्मकारे स्यात्" इति या. शिक्षायाम् ।

वंपुत्रम्पृथिवीपुरीष्यमग्निꣳस्वेयोनावभारुखा ॥ ताँविश्वैर्दे
वैर्ऋतुभिःसंविदानःप्रजापतिर्विश्वकर्म्माविमुञ्चतु ॥ ६१ ॥
[ १७-४ ] असुन्वन्तमयजमानम् ॥ असुन्वन्तमयजमान
मिच्छस्तेनस्येत्त्यामन्विहितस्करस्य ॥ अन्यमस्मदिच्छ
सातऽइत्त्यानमोदेविनिर्ऋतेतुभ्यमस्तु ॥ ६२ ॥ नमःसुते ॥
नमःसुतेनिर्ऋतेतिग्मतेजोयस्मयंविचृताबन्धमेतम् ॥ यमे

१ वकारस्त्रिविधः प्रोक्तो गुरुर्लघुर्लघूतरः। आदौ गुरुर्लघुर्मध्ये पदान्ते च लघूतरः। यत्र पदादौ वकारस्तत्रोच्चारणं गुरुभूतम्। यत्र पदादेर्मध्ये यदा च पदस्यान्ते वकारस्तदा तु क्रमेण लघु लघूतरं मध्यमवृत्त्योच्चारणम्। अत्र वकारः पदस्य मध्ये वर्तते तेन न गुरुभूतत्वचारणश्चेति इति।

शु. य. संहि. नत्त्वँऽस्म्म्यासंव्विदानोत्तमेनाकेऽअधिरोहयैनम् ॥ ६३ ॥ पू. अ.
॥ १२ ॥
॥११७॥ यस्यास्त्ते। घोरऽआसञ्जुहोम्म्येषाम्बन्धानामवसर्ज्जनाय ॥ या
न्त्वाजनोभूमिरितिंप्प्रमन्दंतेनिर्ऋतिन्त्वाहम्परिवेदव्विश्श्वतः
॥ ६४ ॥ यन्ते। देवीनिर्ऋतिराबबन्धपाशङ्ग्रीवास्वविचृत्त्यम् ॥
तन्तेव्विष्ष्याम्म्यायुषोनमद्ध्यादथैतम्पितुमद्धिप्प्रसूतꣳ ॥ नमो
भूत्त्यैयेदञ्चकार ॥ ६५ ॥ निवेशनꣳसङ्गमनꣳ ॥ निवेशनꣳ ॥ ११७ ॥

---

१ विष्ष्यामि अत्र विस्यामि इति पदम्। अत्र वेर्युदयः (शु. य. प्रा. ३ अ. ६७ सू.) इत्यनेन वेः उपसर्गात्परस्य यकारोदयस्य सकारस्य षकारे कृते स्वरात्संयोगादिर्द्विरुच्यते (शु. य. प्रा. ४ अ. १०० सू.) इत्यनेन षकारस्य द्वित्वे रूपम्।

सुङ्गमंनोब्वसूनांव्विश्वारूपाभिचंष्टेशचीभिः ॥ देवऽइवसविता
सत्त्यधर्म्मेन्द्रोनतंस्त्थौसमरेपंथीनाम् ॥ ६६ ॥ सीरांयुञ्जन्ति ।
कवयोयुगाव्वितंन्वतेपृथक् ॥ धीरांदेवेषुसुम्न्नया ॥ ६७ ॥
युनक्तसीरां ॥ युनक्तसीराव्वियुगातंनुद्ध्वङ्कृतेयोनौव्वपतेहवी
जंम् ॥ गिराचंश्श्रुष्टिश्सभंराऽअसंन्नोनेदीयऽइत्त्सृण्य्यः पक्कमे
यात् ॥ ६८ ॥ शुनःसु । फालाव्विकृंपन्तुभूमिंःशुनङ्कीना
शांऽअभियंन्तुव्वाहैः ॥ शुनांसीराहविषातोशंमानासुपिप्पला

ऽओषधीꣳकर्त्तनास्म्मे ॥ ६९ ॥ घृतेनसीतां ॥ घृतेनसीतामधु
नासमंज्ज्यतांविश्श्वैर्द्देवैरनुमतामरुद्भिः ॥ ऊर्ज्जस्वतीपयसापि
न्वमानास्म्मान्त्सीतेपयसाऽभ्याववृत्स्व ॥ ७० ॥ लाङ्गल
म्पवीरवत् ॥ लाङ्गलम्पवीरवत्सुशेवꣳसोमपित्सरु ॥ तदुद्वप
तिगामविम्प्रफर्व्यञ्चपीवरीम्प्रस्थावद्रथवाहणम् ॥ ७१ ॥
कामङ्कामदुघे । धुक्ष्वमित्रायवरुणायच ॥ इन्द्रायाश्श्विभ्यां
म्पूष्णेप्रजाऽभ्यऽओषधीऽभ्यꣳ ॥ ७२ ॥ विमुच्यध्वम् ॥

॥ ११८ ॥

व्विमुञ्च्यद्ध्मगव्यादेवयानाऽअगन्मतमसस्[1]पारमस्य ॥ ज्यो
तिरापाम ॥ ७३ ॥ सजूरब्दः ॥ सजूरब्दोऽअयवोभिꣳसजू
रुषाऽअरुणीभिꣳ ॥ सजोषसावश्विनादꣳसोभिꣳसजूःसूरऽ
एतशेनसजूर्व्वैश्वानरऽइडयाघृतेनस्वाहा ॥ ७४ ॥ [ १३-५ ]
याऽओषधीः ॥ याऽओषधीःपूर्व्वाजातादेवेभ्यस्त्रियुगम्पुरा ॥
मनैनुबभ्रूणामहꣳशतन्धामानिसप्तच ॥ ७५ ॥ शतंवः ॥

१ तमसस्पारम् । अत्र तमसोऽपरस्मात् (शु. य. प्रा. ३ अ. २६ सू.) इत्यनेन विसर्जनीयः सकारमापद्यतेऽपरस्माच्छन्दे परे । इति तमस इत्यस्य विसर्गस्य सकारे कृते तमसस्पारम् । अन्यथा तमसः पारम् इति स्यात् । अपरस्मात्किम् । आदित्यवर्णन्तमसः परस्तात् ( संहिता अ. ३१ मं. १८ )

शतंव्वो[1]ऽअम्बधामानिसहस्रमुतवोरुहः ॥ अधाशतक्क्रत्वोयू
यमिमम्मेऽअगदङ्कृत ॥ ७६ ॥ ओषधीःप्प्रति । मोदद्ध्वम्पु
ष्प्पवतीःप्प्रसूवरीः ॥ अश्वाऽइवसजित्त्वरीर्व्वीरुधःपारयि
ष्ण्णवः ॥ ७७ ॥ ओषधीरिति । मातरस्त्तद्वोदेवीरुपब्रुवे ॥
सनेयमश्वङ्गांव्वासऽआत्त्मानन्तवपूरुष ॥ ७८ ॥ अश्वत्थे
वः ॥ अश्वत्थेवोनिषदनम्पर्ण्णेवोव्वसतिष्कृता[2] ॥ गोभाजऽइ

---

१ त्वदर्थवाचिनौ वो वां वा वै यदि निपातजौ। आदेशाश्चं विकल्पार्था ईषत्स्पृष्टास्तु ते स्मृताः। अर्थादेते लघव उच्चारणीयाः (या. शि.) २ वसतिः कृता इति पदम्। आविनिरिडइडायावसतिर्वैरिवः (शु. य. प्रा. ३ अ. २३ सू.) इत्यनेन ककारपकारयोः परयोरेतेषां सस्य षत्वम्। तेन वसतिष्कृता।

त्किलासथयत्तसनवंथपूरुषम् ॥ ७९ ॥ यत्रौषंधीः । सम
ग्ग्मंतराजानःसमिंताविव ॥ विप्र्रःसऽउच्च्यतेभिषग्ग्रक्षोहा
मीवचातनः ॥ ८० ॥ [1]अश्श्वावतीᳫंसोमावतीम् ॥ अश्श्वाव
तीᳫंसोमावतीमूर्जयन्तीमुदोजसम् ॥ आविंत्सिसर्व्वाऽओष
धीरस्म्माऽअरिष्ट्टतातये ॥ ८१ ॥ उच्छुष्म्माः ॥ उच्छुष्म्माऽ
ओषधीनाङ्गावोगोष्ठ्ठादिवेरते ॥ धनᳫंसनिष्ष्यन्तीनामात्क्मा

---

१ अश्ववतीम् । इति पदम् । अत्र अश्वरश्मिसुमति॰ (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन वकारे परे अश्वशब्दस्य ह्रस्वाकारस्य दीर्घाकारः । तेन अश्वावतीम् । एवं सोमावतीं रश्मीवतीम् ।

नुन्तवंपूरुष ॥ ८२ ॥ इष्कृतिर्न्नाम । वोमातार्थोसुयुःस्थनि
ष्कृतीः ॥ सीराऽपंतत्रिणीस्थनुयदामयतिनिष्कृथ ॥ ८३ ॥
अतिविश्वाः । परिष्ठास्तेनऽइंवव्रजमंक्रमुः ॥ ओषधीःप्रा
चुच्यवुर्यत्किञ्चंतन्वोरपः ॥ ८४ ॥ यदिमाः ॥ यदिमावा
जयन्नहमोषधीर्हस्तंऽआदुधे ॥ आत्कमायक्ष्मस्यनश्यतिपु
राजीवगृभोयथा ॥ ८५ ॥ यस्यौषधीः । प्प्रसप्पर्थाङ्गमङ्ग
म्परुःष्पपरुः ॥ ततोयक्ष्मंविबाधद्धऽउग्रोमध्यमुशीरिव ॥८६॥

साकँꣳसयक्ष्म ॥ साकँꣳसयक्ष्मप्प्रपततचाषेणकिकिदीविना ॥ सा

कंव्वातंस्यध्ध्राज्ज्यांसाकन्नंश्श्यनिहाकया ॥ ८७ ॥ अन्न्यावः ॥

अन्न्यावोऽअन्न्यामवत्त्वन्न्यान्न्यस्याऽउपावत ॥ ताःसर्व्वाःसं

विदानाऽइदम्मेप्रावताव्वचः ॥ ८८ ॥ याःफलिनीः ॥ याः

फलिनीर्य्याऽअफलाऽअपुष्प्पायाश्चपुष्प्पिणीः ॥ बृहस्प्पति

प्प्रसूतास्त्तानोमुञ्चन्त्वꣳहसः ॥ ८९ ॥ मुञ्चन्तुमा । शप

१ इदम्मेप्रावताव्वचः । अत्र अश्वरश्मिमतिसुमतिश्वसुतचारयघृणिसेदिमेन्द्रियधारयचित्रभङ्गुरवयुनाश्वस्यहृदयघुष्यत्तोभ्यवताध्यर्चशक्तिपुरुशचि वकारे (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन वचः इत्यस्य वकारे परे अवत इत्यस्य ह्रस्वाकारस्य दीर्घाकारः ।

त्स्यादथौ वरुण्यादुत ॥ अथौ यमस्य पड्वीशात्सर्व्वस्माद्देवकि
ल्बिषात् ॥ ९० ॥ अवपतन्तीरवदन् ॥ अवपतन्तीरवदन्दि
वऽओषधयस्परि ॥ यञ्जीवमश्नवामहै न स रिष्याति पूरुषः[1]
॥ ९१ ॥ याऽओषधीः ॥ याऽओषधीः सोमराज्ञीर्बह्वीः शत
विचक्षणाः ॥ तासामसि त्वमुत्तमारङ्कामाय शꣳ हृदे ॥ ९२ ॥
याऽओषधीः ॥ याऽओषधीः सोमराज्ञीर्विष्ठिताः पृथिवीमनु ॥ ॥ १२१

---

१ पूरुषः । अत्र पुरुषोऽवसाने (शु. य. प्रा. ३ अ. १२० सू.) पुरुष इति दीर्घो निपात्यते अवसाने चेत् । अत्र पू इत्यस्य निपातनाद्दीर्घः । अनवसाने पुरुषऽएवेदम् । अत्र ह्रस्व एव ।

बृहुस्पतिंप्प्रसूताऽअुस्यैसन्दंत्तव्वीर्य्यम् ॥ ९३ ॥ याश्च्व ॥
याश्च्वेदमुंपशृण्ण्वन्तियाश्च्वंदूरम्परांगताः ॥ सर्व्वाः सुङ्गत्त्यंव्वी
रुधोस्यैसन्दंत्तव्वीर्य्यम् ॥ ९४ ॥ मावः ॥ मावोंरिषत्त्खनि
तायस्म्मैचाहङ्खनांमिवः ॥ द्विपाच्चतुंष्प्पादुस्म्माकुंसर्व्वम
स्त्वनातुरम् ॥ ९५ ॥ ओषंधयुःसम् ॥ ओषंधयुःसमंवद
न्तसोमेंनसुहराज्ञां ॥ यस्म्मैकृणोतिंब्राह्मणस्त्तः राजन्पार
यामसि ॥ ९६ ॥ नाशयित्रीबलासंस्य ॥ नाशयित्रीबलास

 

स्यार्श्ँस॑ऽउप॒चिता॑मसि ॥ अथो॑श॒तस्य॑यक्ष्मा॑णाम्पाक॒ारोर॑सि
नाश॑नी ॥ ९७ ॥ त्वाङ्ग॑न्धर्व्वाः ॥ त्वाङ्ग॑न्ध॒र्व्वाऽअ॑खनँ॒स्त्वा
मिन्द्र॒स्त्वाम्बृह॒स्प्पतिः॑ ॥ त्वामो॑षधे॒सोमो॒राजा॒विद्वान्य
क्ष्मा॑दमु॒च्यत ॥ ९८ ॥ सह॑स्वमे ॥ सह॑स्वमे॒ऽअरा॑ती॒ꣳसह॑स्व
पृतनाय॒तः ॥ सह॑स्व॒सर्व्वै॑पा॒प्मान॒ꣳसह॑माना॒स्योषधे ॥ ९९ ॥
दी॒र्ग्घायु॑स्ते ॥ दी॒र्ग्घायु॑स्त॒ऽओ॑षधे॒खनि॒ता॑यस्म्मै॑च॒त्त्वा॒खना॑
म्यहम् ॥ अथो॒त्त्वन्दी॒र्ग्घायु॑र्भू॒त्त्वाश॒तव॑ल्शा॒विरो॑हतात् ॥१२२॥

१ अत्र लकारशकारयोर्योगे हरितारख्या स्वरभक्तिर्बोध्या ।

॥ १०० ॥ त्वमुत्तमा । स्योषधे तव वृक्षाऽउपस्तयः ॥ उप
स्त्तिरस्त्तु सोस्म्माकँ य्योऽअस्म्माँ २॥ऽअभिदासति ॥ १०१ ॥
[ २७-६ ] मामा ॥ मामांहिꣳसीज्जनिता यः पृथिव्या योवा
दिवꣳसत्त्यधर्म्मा व्यानट् ॥ यश्चापश्चन्द्राः प्प्रथमोजजानक
स्म्मै देवाय हविषा व्विधेम ॥ १०२ ॥ अब्भ्यावर्त्तस्व । पृथि
वियज्ञेन पयसा सह ॥ व्वपान्तेऽअग्निरिषितोऽअरोहत् ॥ १०३॥
अग्नेयत् ॥ अग्नेयत्ते शुक्रँय्यच्चन्द्रँय्यत्त्पूतँय्यच्चयज्ञियम् ॥

तद्देवेभ्योभरामसि ॥ १०४ ॥ इषमूर्ज्जम् ॥ इषमूर्ज्जमहमि
तऽआदमृतस्ययोनिम्महिषस्यधाराम् ॥ आमागोषुविशत्त्वा
तनूप्रजहामिसेदिमानिरामममीवाम् ॥ १०५ ॥ अग्नेतव ॥
अग्नेतवश्रवोवयोमहिभ्राजन्तेऽअर्च्चयोविभावसो ॥ बृह
द्भानोशवसावाजमुक्थ्यन्दधासिदाशुषेकवे ॥ १०६ ॥
पावकवर्च्चाःशुक्रवर्च्चाः ॥ पावकवर्च्चाःशुक्रवर्च्चाऽअनूनवर्च्चाऽ ॥ १२१ ॥
उदियर्षिभानुना ॥ पुत्रोमातराविचरन्नुपावसिपृणक्षिरोदसीऽ

उभे ॥ १०७ ॥ ऊर्ज्जोनपात् ॥ ऊर्ज्जोनपाज्जातवेदꣳसुश
स्तिभिर्म्मन्दस्वधीतिभिर्हितः ॥ त्वेऽइषꣳसन्दधुर्भूरिवर्प्प
सश्चित्रोतयोव्वामजाताः ॥ १०८ ॥ इरज्ज्यन्नग्ने । प्प्रथय
स्वजन्तुभिरस्मेरायोऽअमर्त्त्य ॥ सदर्शतस्यव्वपुषोव्विराज
सिपृणक्षिसानसिङ्क्रतुम् ॥ १०९ ॥ इष्क्कर्त्तारमध्वरस्य ॥
इष्क्कर्त्तारमध्वरस्यप्प्रचेतसङ्क्षयन्तꣳराधसोमहः ॥ रातिंव्वामस्य

---

१ निश्चयेन कर्तारम् निष्कर्तारमिति प्राप्ते निशब्दो बहुलम् (शु. य. प्रा. ३ अ. १८ सू.) इत्यनेन क्वचिन्नकारमात्रस्य लोपे इष्कर्तारम् ।

शु. य. संहि. ॥१२४॥

पू. अ. ॥ १२ ॥

सुभगांम्महीमिषन्दधांसिसानसिꣳरयिम् ॥ ११० ॥ [1]ऋतावां
नम्महिषं। विश्वदर्शतमग्निꣳसुम्नायंदधिरेपुरोजनाः॥ श्रुत्क
र्ण्णꣳसप्प्रथस्त्तमन्त्वागिरादैव्यम्मानुषायुगा ॥ १११ ॥ आ
प्प्यायस्व॥ आप्प्यायस्वसमेतुतेविश्वतः सोमवृष्ण्ण्यम् ॥ [2]भवा
वाजस्यसङ्गथे ॥ ११२ ॥ सन्ते ॥ सन्तेपयांꣳसिसमुयन्तु
वाजाः संवृष्ण्ण्यान्न्यभिमातिषाहः ॥ आप्प्यायमानोऽअमृ ॥ १२४ ॥

---

१ ऋतावानम् । अत्र अश्वरश्मि० (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन वकारे परे ऋतशब्दस्य ह्रस्वाकारस्य दीर्घाकारः । २ भवन्वाजस्य इति पदम् । अत्र वाजस्य परे भव इत्यस्य ह्रस्वाकारस्य स चावरूथ्यवाजस्य पायुषु च (शु. य. प्रा. ३ अ. ११० सू.) इत्यनेन दीर्घे भवाव्वाजस्य । तथैव भवापायुर्व्विशोऽअस्याऽअदब्धः ।

तांयसोमदिविश्श्रवांꣳस्युत्तमानिधिष्व ॥ ११३ ॥ आप्प्यांय
स्व । मदिन्तमुसोमुव्विश्श्वेभिरꣳशुभिः ॥ [1]भवांनꣳसप्प्रथंस्त्त
मꣳसखांवृधे ॥ ११४ ॥ आतें । वृत्तसोमनोयमत्त्परमाच्चि
त्तसधस्त्थांत् ॥ अग्ग्नेत्त्वाङ्कांमयागिरा ॥ ११५ ॥ तुब्भ्यु
न्ताꣳ ॥ तुब्भ्युन्ताऽअङ्गिरस्त्तमुव्विश्श्वांःसुक्षितयꣳपृथंक् ॥
अग्ग्नेकामांययेमिरे ॥ ११६ ॥ अुग्निश्प्प्रियेषु ॥ अुग्निश्

---

१ भवनः इति पदम् । भव इत्येतस्य ह्रस्वाकारस्य नः परे भव च (शु. य. प्रा. ३ अ. १०९ सू.) इत्यनेन दीर्घाकारे कृते भवानः इति पदम् ।

प्प्रियेषुधामंसुकामौभुतस्युभव्यंस्य ॥ सुम्म्राडेकोुव्विरांजति
॥ ११७ ॥ [ १६-७ ] इतिश्रीवाजसनेयसंहितायांद्वादशोऽ
ध्यायः ॥ १२ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाकसूत्रम् ॥
मयिगृह्णामिपंचदश, ध्रुवास्येकादश, मधुव्वाताऽएकादश,
सम्यक्स्रवंतिनवे, मंमापड, पांत्वैका, ऽयंपुरःपंच, सप्ताष्टापंचा
शत् [ अनु. ७ मं. ५८ अ. १३ ] ॥ हरिःॐ ॥ मयिं
गृह्णामि ॥ मयिंगृह्णाम्म्यग्ग्रेऽअग्निꣳरायस्प्पोषांयसुप्प्रजा

स्त्वायंसुवीर्य्यीय ॥ मामुंदेवतांहंसचन्ताम् ॥ १ ॥ अपाम्पृ
ष्ठम् ॥ अपाम्पृष्ठमंसियोनिंरग्नेश्संमुद्रमभितहंपिन्वंमानम् ॥
वर्द्धमानोमहाँर॥ऽआचपुष्क्करेदिवोमात्रंयावरिम्म्णाप्प्रंथस्व
॥ २ ॥ ब्रह्मंयज्ञानम् ॥ ब्रह्मंयज्ञानम्प्रंथमम्पुरस्त्ताद्विसी
मतश्सुरुचोंवेनऽआंवहं ॥ सबुध्न्याऽउपमाऽअंस्यविष्ठाश्सत
श्चयोनिमसंतश्चविवं÷ ॥ ३ ॥ हिरण्ण्यगर्भंश्सम ॥ हिरण्ण्य
गर्भंश्समंवर्त्तताग्ग्रेभूतस्यंजातश्पतिरेकंऽआसीत् ॥ सदांधार

पृथिवीन्द्यामुतेमाङ्कस्म्मैदेवायहविषाविधेम ॥ ४ ॥ द्रप्प्स
श्चस्कन्द । पृथिवीमनुद्यामिमञ्चयोनिमनुयश्चपूर्व्वः ॥ समा
नँय्योनिमनुसञ्चरन्तन्द्रप्प्सञ्जुहोम्म्यनुसप्प्तहोत्राः ॥ ५ ॥
नमोस्स्तु । सर्प्पेब्भ्योयेकेचपृथिवीमनु ॥ येऽअन्तरिक्षेयेदि
वितेब्भ्यः सर्प्पेब्भ्योनमः ॥ ६ ॥ याऽइषवः ॥ याऽइषवो
यातुधानानाँय्येवाव्वनस्प्पतीँ१॥रनु ॥ येवावटेषुशेरतेतेब्भ्यः
सर्प्पेब्भ्योनमः ॥ ७ ॥ येवा ॥ येवामीरोचनेदिवोयेवा

सूर्य्यस्यरश्मिम्मषुं ॥ येषामुप्प्सुसदँस्कृतन्तेब्भ्यं ÷ सुर्प्पेब्भ्योन

मं ÷ ॥ ८ ॥ कृणुष्ष्वपाजं ÷ ॥ कृणुष्ष्वपाजꣳप्प्रसितिन्नपृत्थ्वीँ

ष्याहिराजेवामंवाँ२॥ऽइभेन ॥ तृष्ष्वीमनुप्प्रसितिन्द्रूणानो

स्त्तासिविद्ध्यरक्षसस्तपिंष्ठैꣳ ॥ ९ ॥ तवंब्भ्रमासं ÷ ॥ तवंब्भ्र

मासंऽआशुयापंतन्त्यनुस्प्पृशधृषताशोशुंचानꣳ ॥ तपूꣳष्ष्य

---

१ सदस्कृतम्.। अत्र सदोद्यौर्नमस्कृतस्पिता पथेषु (शु. य. प्रा. ३ अ. ३४ सू.) इत्यनेन यथासंख्यं सदः द्यौः नमः एतेषां विसर्जनीयसंबन्धिनः सस्य क्रमेण कृतं पिता पथः एतेषु पदेषु परेषु षकारः। एवं षकारे कृते ऊष्मान्तस्थाम्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन ककारस्य द्वित्वे प्राप्ते न सर्वं (शु. य. प्रा. ४ अ. ११२ सू.) इत्यनेन ककारस्य द्वित्वनिषेधः।

सं. २२

ग्ग्नेजुह्वापतङ्गानसन्दितोव्विसृजव्विष्ष्वगुल्काः ॥ १० ॥ प्रति
स्प्पशः ॥ प्रतिस्प्पशोव्विसृजतूर्ण्णितमोभवापायुर्व्विशोऽअ
स्याऽअद्ब्धः ॥ योनोदूरेऽअघशꣳसोयोऽअन्त्यग्ग्नेमाकिष्ट्टे[1]
व्यथिरादधर्षीत् ॥ ११ ॥ उदग्ग्ने । तिष्ठप्प्रत्यातनुष्ष्वन्न्य
मित्राँ२॥ऽओषतात्तिग्ग्महेते ॥ योनोऽअरातिꣳसमिधानच
क्क्रेनीचातन्धक्ष्यतसन्नशुष्क्कम् ॥ १२ ॥ ऊर्द्ध्वोभव ॥ ऊर्द्ध्वोभव ॥ १२७
प्प्रतिविद्ध्याद्ध्यस्म्मदाविष्क्कृणुष्ष्वदैव्यान्न्यग्ग्ने ॥ अवस्त्थिरा

---

१ माकिष्ट्टे। अत्र वृन्दारुर्माकिः (शु. य. प्रा. ३ अ. ७४ सू.) इत्यनेन विसर्गस्य सस्य षत्वे द्वित्वे रूपम्।

तंनुहियातुजूनांञ्जामिमजांमिम्प्रमृंणीहिशत्रूंन् ॥ अग्नेष्ठ्वा

तेजंसासादयामि ॥ १३ ॥ अग्निर्म्मूर्द्धा । दिवश्ककुत्पतिः

पृथिव्याऽअयम् ॥ अपाꣳरेतांꣳसिजिन्वति ॥ इन्द्रस्यत्वौजं

सासादयामि ॥ १४ ॥ भुवोयज्ञस्य ॥ भुवोयज्ञस्यरजंसश्चने

तायत्रांनियुद्भिःसचंसेशिवाभिः ॥ दिविमूर्द्धानंन्दधिषेस्वर्षा

ञ्जिह्वामंग्नेचकृषेहव्यवाहंम् ॥ १५ ॥ [ १५-१ ] ध्रुवासिं ।

धरुणास्तृंताविश्वकंर्म्मणा ॥ मात्वांसमुद्रऽउद्वंधीन्मासुंप

य. हि. २८॥

ण्णोव्व्यथमानापृथिवीन्दृꣳह ॥ १६ ॥ प्रजापतिष्ट्वा[1] । साद १. अ.

यत्त्वपाम्पृष्ठेसमुद्रस्येमन् ॥ व्व्यचस्वतीम्प्रथस्वतीम्प्रथस्वपृथि ॥ १३ ॥

व्व्यसि ॥ १७ ॥ भूरसि ॥ भूरसिभूमिरस्यदितिरसिविश्वधाया

विश्वस्यभुवनस्यधर्त्री ॥ पृथिवीँय्यच्छपृथिवीन्दृꣳहपृथिवी

म्माहिꣳसीः ॥ १८ ॥ विश्वस्मैप्प्राणाय ॥ विश्वस्मैप्प्रा

णायापानायव्व्यानायोदानायप्प्रतिष्ठायैचरित्राय ॥ अग्निष्ट्वा ॥ १२८ ॥

---

१ प्रजापतिष्ट्वा । सकारपरे च (शु. य. प्रा. ३ अ. ७८ सू.) इत्यनेन सकारः परो यस्मादेकाक्षरात्तस्यैकाक्षरे प्रत्यये विसर्जनीयसकारस्य षत्वम् । अत्र प्रजापतिशब्दे पाधातोः पतिशब्दस्य सस्य षकारे ष्टुत्वे द्वित्वे रूपम् ।

भिपांतुमह्यास्वस्त्याच्छर्दिषाशन्तंमेनतयांदेवतंयाङ्गिरस्वद्ध्रु
वासीद ॥ १९ ॥ काण्डांत्काण्डात्प्ररोहंन्ती ॥ काण्डां
त्काण्डात्प्ररोहंन्तीपरुंषःपंरुषस्पारि[1] ॥ एवानोदूर्वेप्प्रतंनुस
हस्रेणशतेनंच ॥ २० ॥ याशतेनं । प्प्रतनोपिंसहस्त्रेणाविरो
हंसि ॥ तस्यांस्तेदेवीष्टकेविधेमंहविषांवयम् ॥ २१ ॥ यास्ते ॥
यास्तेंऽअग्नेसूर्य्येरुचोदिवंमातन्वन्तिरश्मिभिः ॥ ताभिं

1 परुषः परुषस्परि । अत्र समानपदे च (शु. य. प्रा. ३ अ. ३० सू.) इत्यनेन सकारे प्राप्ते न परुषः परुषि (शु. य. प्रा. ३ अ. ३१ सू.) इत्यनेन परुषि परे पूर्वपरुषशब्दघटितविसर्जनीयस्य सकारो निषिध्यते । अतो न सकारः किन्तु विसर्ग एव ।

ब्भौंऽअद्यसव्वाभीरुचेजनायनस्कृधि ॥ २२ ॥ यावं॑÷ ॥ या पू. अ
॥१२९॥ वोंदेवा॒ᳬसूर्य्यैरुचोगोष्ष्वश्श्वेषुयारुचं÷ ॥ इन्द्राग्ग्नीताभि॒ᳬस ॥ १३
व्वाभि॒रुचंन्नोधत्तबृहस्प्पते ॥ २३ ॥ व्विराड्ज्योतिं÷ ॥ व्वि
राड्ज्योतिरधारयत्स्वराड्ज्योतिरधारयत् ॥ प्रजापतिष्ट्वासा
दयतुपृष्ठेपृथिव्याज्ज्योतिष्मतीम् ॥ व्विश्श्वंस्मैप्प्राणायापाना
यंव्यानायव्विश्श्वज्ज्योतिर्य्यच्छ ॥ [1]अग्ग्निष्टेधिपतिस्त्तयादेवतं ॥ १२९

---

१ अग्निष्टे। अग्निस्ते इति पदम्। अत्र वायुरग्निरग्नेरेकाक्षरे (शु. य. प्रा. ३ अ. ७७ सू.) इत्यनेन एकाक्षरे ते पदे परे अग्निशब्दघटितस्य सस्य षत्वे ष्टुत्वे ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन टस्य द्वित्वम्।

याङ्गिरस्वद्ध्रुवासीद ॥ २४ ॥ मधुंश्च ॥ मधुंश्चमाधंवश्च्वार्सं

न्तिकावृतूऽअग्नेरंन्तःश्लेषोसिकल्प्पेंतान्द्यावांपृथिवीकल्प्पं

न्तामापऽओषंधयःकल्प्पंन्तामग्नयः पृथङ्मम्ज्यैष्ठ्यायस

व्व्रंताः ॥ येऽअग्नयःसमंनसोन्तराद्यावांपृथिवीऽइमे ॥ व्वासं

न्तिकावृतूऽअंभिकल्प्पंमानाऽइन्द्रंमिवदेवाऽअंभिसंव्विंशन्तु

तयांदेवतंयाङ्गिरस्वद्ध्रुवेसींदतम् ॥ २५ ॥ अषाढासि ॥ अषां

१ अभिसंविशन्तु । अत्र भाविभ्यः सः यं समानपदे (शु. य. प्रा. ३ अ. ५६ सू.) अनेन प्राप्तस्य षकारस्य अनुसन्तनोतुवृहस्पतिसुतस्यसुसमिन्द्राय-सुसन्दृशमभिसत्वाऽभिसंविशन्तु० (शु. य. प्रा. ३ अ. ८२ सू.) इत्यनेन प्रकृतिभावे षत्वाभावः ।

 ढासिसहंमानासहस्वारांतीःसहंस्वपृतनायतः ॥ सहस्रंवीर्य्या 
।१३०।। सिसामांजिन्व ॥ २६ ॥ [ ११-२ ] मधुवाताः ॥ मधुवाताऽऋ ॥ १३ ॥
तायतेमधुंक्षरन्तिसिन्धंवः ॥ माध्वीर्न्नःसन्त्वोषधीः ॥ २७ ॥
मधुनक्तम् ॥ मधुनक्तमुतोषसोमधुंमत्पार्त्थिवꣳरजंः ॥ म
धुद्यौरंस्तुनःपिता ॥ २८ ॥ मधुंमान्नः ॥ मधुंमान्नोवनस्प्पति
र्म्मधुंमाँ२॥ऽअस्तुसूर्य्यः ॥ माध्वीर्ग्गावोंभवन्तुनः ॥ २९ ॥ ॥ १३० ॥
अपाङ्गम्भंन् ॥ अपाङ्गम्भन्त्सीदमात्त्वासूर्य्योभितांप्सीन्मा

ग्निर्वैश्वानरः ॥ अच्छिन्नपत्राः प्रजाऽअनुवीक्षस्वानुत्त्वादि
व्यावृष्टिः सचताम् ॥ ३० ॥ त्रीन्त्समुद्रान् ॥ त्रीन्त्समुद्रा
न्त्समसृपत्स्वर्गानपाम्पतिर्वृषभऽइष्टकानाम् ॥ पुरीषंवसानः
सुकृतस्यलोकेतत्रगच्छयत्रपूर्वेपरेताः ॥ ३१ ॥ महीद्यौः ।
पृथिवीचनऽइमँय्यज्ञम्मिमिक्षताम् ॥ पिपृतान्नोभरीमभिः
॥ ३२ ॥ विष्णोःकर्माणि । पश्यतयतोव्रतानिपस्पशे ॥
इन्द्रस्ययुज्यःसखा ॥ ३३ ॥ ध्रुवासि । धरुणेतोजज्ञेप्रथम

॥१२१॥
पू. अ
॥ १२

मेभ्योयोनिभ्योऽअधिजातवेदाꣳ ॥ सगायत्र्यात्रिष्टुभानुष्टु
भाचदेवेभ्योहव्यंवहतुप्प्रजानन् ॥ ३४ ॥ इषेराये । रमस्व
स्वसहसेद्युम्नऽऊर्जेऽअपत्याय ॥ सम्म्राडसिस्वराडसिसार
स्वतौत्त्वोत्त्सौप्प्रावताम् ॥३५॥ अग्ग्नेयुक्क्ष्व ॥ अग्ग्नेयुक्क्ष्वाहि
येतवाश्श्वासोदेवसाधवः ॥ अरंवहन्तिमन्न्यवे ॥ ३६ ॥
युक्क्ष्वाहि । देवहूतमाँ२॥ऽअश्श्वाँ२॥ऽअग्ग्नेरथीरिव ॥ निहोता ॥ १३१
पूर्व्यःसदꣳ ॥ ३७ ॥ [११-३] सम्म्यक्स्स्रवन्ति । सरितो

नधेनांऽअन्तर्हृदामनंसापूयमांनाः ॥ घृतस्यधारांऽअभिचांक
शीमिहिरण्ण्ययोंव्वेतसोमध्येंऽअग्नेः ॥ ३८ ॥ ऋचेत्त्वां ।
रुचेत्त्वांभासेत्त्वाज्ज्योतिंषेत्त्वा ॥ अभूदिदंव्विश्श्वंस्यभुवंनस्य
व्वाजिंनमग्नेर्व्वैश्श्वानरस्यंच ॥ ३९ ॥ अग्निर्ज्ज्योतिंषा ॥
अग्निर्ज्ज्योतिंषाज्ज्योतिंष्म्मान्रुक्क्मोव्वर्च्चंसाव्वर्च्चंस्वान् ॥ सहस्र
दाऽअंसिसहस्रांयत्त्वा ॥ ४० ॥ आदित्त्यङ्गर्ब्भंम् ॥ आदित्त्य

---

१ यत्र रकारपरस्य हकारपरस्य च स्पर्शवर्गस्य द्वित्वं तत्र ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन ज्ञेयम्। अस्य परं तु रेफहकाराभ्याम् इत्यनेन विधीयमानस्य द्वित्वस्यापवादभूतत्वात्। यथा संवर्चसा। गर्भम्। पार्थिवम्। चक्षुर्मित्रस्य। अग्निर्ज्योतिषा।

ङ्गर्भम्पयसा समङ्क्सहस्रंस्य प्रतिमां विश्वरूपम् ॥ परिवृङ्धि हरसा माभि मंꣳस्थाः शतायुषङ्कृणुहि चीयमानः ॥४१॥ वातस्य जूतिं । वरुणस्य नाभिमश्वञ्जज्ञानꣳ सरिरस्य मध्ये ॥ शिशुन्नदीनाꣳ हरिमद्रिबुध्नमग्ने मा हिꣳसीः परमे व्योमन् ॥४२॥ अजस्रमिन्दुम् ॥ अजस्रमिन्दुमरुषम्भुरण्युमग्निमीडे

१ मंस्थाः । अत्र संयोगाद्यश्च यो भवेत् । ( या. शि. ) यत्र संयोगाद्योऽनुस्वारो मात्रिको द्विमात्रिको वा वर्णो भवेत्तत्र ऋवर्णव्यञ्जनादिगं संयोगाद्यं वर्जयित्वा ह्रस्व एव बोध्यः । संयोगात्पूर्वः संयोगपूर्वः इति समासः । अत्र नानुस्वारः ( शु. य. प्रा. ४ अ. १०९ सू. ) लिङ्गम् । २ वर्णे तु मात्रिके पूर्वे ह्यनुस्वारो द्विमात्रिकः । ( या. शि. ) मात्रिकेऽ ( ह्रस्ववर्णे पूर्वे ) नुस्वारे सो द्विमात्रिको लेख्यो बोध्य उच्चारणीयश्च । अत्र अनुस्वारो ह्रस्वपूर्वोऽध्यर्धमात्रा पूर्वा चार्धमात्रेति ( शु. य. प्रा. ४ अ. १४८ सू. ) प्रमाणम् । ३ द्विमात्रिके मात्रिकः स्यादिति ( या. शि. ) । यत्रानुस्वारात्पूर्ववर्णो द्विमात्रिकस्तत्र मात्रिकोऽ ( ह्रस्वः ꣳइत्याकारकः ) नुस्वारो विधेयो ह्रस्वोच्चारणीयश्च । अत्र दीर्घादर्द्धमात्रा पूर्वा चाध्यर्धा ( शु. य. प्रा. ४ अ. १४९ सू. ) लिङ्गम् ।

पूर्व्वाचित्तिन्नमोभिः ॥ सपर्व्वभिर्ऋतुशःकल्प्पमानोगाम्माहिꣳ
सीरादितिंव्विराजम् ॥ ४३ ॥ व्वरूत्रीन्त्वष्टुं÷ ॥ व्वरूत्रीन्त्व
ष्टुर्व्वरुणस्यनाभिमविञ्जज्ञानाꣳरजसःपरस्म्मात् ॥ महीꣳ
साहस्रीमसुरस्यमायामग्नेमाहिꣳसीःपरमेव्योमन् ॥ ४४ ॥
योऽअग्निः ॥ योऽअग्निरग्नेरध्यजायतशोकात्पृथिव्याऽउत
वादिवस्प्परि ॥ येनप्प्रजाव्विश्वकर्म्माजजानतमग्नेहेडःपरि
तेवृणक्तु ॥ ४५ ॥ चित्रन्देवानाम् ॥ चित्रन्देवानामुदगाद



३४७

नीकञ्चक्षुर्म्मित्रस्य्वरुणस्याग्ग्नेः ॥ आप्प्राद्यावापृथिवीऽअन्त
रिक्षᳪसूर्य्यंऽआत्मा जगतस्तस्थुषश्च ॥ ४६ ॥ [ ९-४ ]
इमम्मा । हिᳪसीर्द्विपादम्पशुᳪसहस्राक्षो मेधाय चीयमानः ॥
मयुम्पशुम्मेधमग्ग्ने जुषस्व तेन चिन्वानस्तन्वो निषीद ॥ मयु
न्ते शुगृच्छतु यन्द्विष्मस्तन्ते शुगृच्छतु ॥ ४७ ॥ इमम्मा ।
हिᳪसीरेकशफम्पशुङ्कनिक्रदं वाजिनं वाजिनेषु ॥ गौरमार ॥ १३३ ।

१ यत्र स्वरात्परस्य संयोगस्याद्यक्षरस्य द्वित्वं दृश्यते तत्र स्वरात्संयोगादिर्द्विरुच्यते सर्वत्र (शु. य. प्रा. ३ अ. ९६ सू.) इत्यनेन ज्ञेयम् । चिन्वानः । संव्व्यश्यमानः । जनित्रम् । वरुणस्याग्ग्नेः । परश्च स संयोगः सजातीयवर्ग्यतालव्यदन्त्यमूर्धन्योष्ठ्यवर्णानां न चेत् तत्र तु द्वित्वाभाव एव यथा इमम्मा । गौरन्ते ।

ण्यमनुंतेदिशामितेनंचिन्वानस्तन्वोनिषीद ॥ गौरन्तेशुगृ
च्छतुयन्द्विष्मस्तन्तेशुगृंच्छतु ॥ ४८ ॥ इमꣳसाहस्रम् ॥
इमꣳसाहस्रꣳशतधारमुत्सँव्यच्यमानꣳसरिरस्यमद्ध्ये ॥
घृतन्दुहानामदितिञ्जनायाग्नेमाहिꣳसीःपरमेव्योमन् ॥ गव
यमारण्यमनुंतेदिशामितेनंचिन्वानस्तन्वोनिपीद ॥ गवय "निषीद"
न्तेशुगृंच्छतुयन्द्विष्मस्तन्तेशुगृंच्छतु ॥ ४९ ॥ इममूर्णा
युं। वरुणस्यनाभिन्त्वचम्पशूनान्द्विपदाञ्चतुष्पदाम् ॥ त्वष्टुः

प्प्रजानाम्प्रथमञ्जनित्रमग्ग्नेमाहिँ᳘सीःपरमेव्व्योमन् ॥ उष्ट्र
मारण्ण्यमनुतेदिशामितेनचिन्न्वानस्तन्न्वोनिषीद ॥ उष्ट्रन्ते
शुगृच्छतुयन्द्विष्मस्तन्तेशुगृच्छतु ॥ ५० ॥ अजोहि ॥ अजो
ह्यग्ग्नेरजनिष्टशोकात्सोऽअपश्श्यज्जनितारमग्ग्रे ॥ तेनदेवादेव
तामग्ग्रमायँस्तेनरोहमायन्नुपमेद्ध्यासः ॥ शरभमारण्ण्यमनुते
दिशामितेनचिन्न्वानस्तन्न्वोनिषीद ॥ शरभन्तेशुगृच्छतुय
न्द्विष्मस्तन्तेशुगृच्छतु ॥ ५१ ॥ त्वँय्यविष्ठ । दाशुषोनॄँः

पाहिशृणुधीगिरंः ॥ रक्षातोकमुतत्मना ॥५२॥ [ ६-५ ]
अपान्त्वा ॥ अपान्त्वेमन्त्सादयाम्म्यपान्त्वोद्मन्त्सादयाम्म्य
पान्त्वाभस्म्मन्त्सादयाम्म्यपान्त्वाज्योतिषिसादयाम्म्यपा
न्त्वायनेसादयाम्म्यर्णवेत्त्वासदनेसादयामिसमुद्रेत्त्वासदने
सादयामिसरिरेत्त्वासदनेसादयाम्म्यपान्त्वाक्षयेसादयाम्म्य
पान्त्वासाधिषिसादयाम्म्यपान्त्वासदनेसादयाम्म्यपान्त्वासध
स्त्थेसादयाम्म्यपान्त्वायोनौसादयाम्म्यपान्त्वापुरीषेसादया

१ एमनि इति पदम्। निशब्दो बहुलम् (शु. य. प्रा. ३ अ. १८ सू.) इत्यनेन क्वचिन्निकारघटितेकारस्यापि लोपः। एवं लोपे एमन् भवति।

॥१३५॥ म्म्यपान्त्वापाथंसिसादयामिगायत्रेणंत्त्वाच्छन्दंसासादयामि
त्रैष्टुंभेनत्त्वाच्छन्दंसासादयामिजागंतेनत्त्वाच्छन्दंसासादया
म्म्यानुंष्टुंभेनत्त्वाच्छन्दंसासादयामिपाङ्क्तेनत्त्वाच्छन्दंसासाद
यामि ॥ ५३ ॥ [ १-६ ] अयम्पुरः ॥ अयम्पुरोभुवस्त्तस्यं
प्प्राणोभौवायनोव्वंसन्तःप्प्रांणायनोगांयत्रीव्वांसन्तीगांयत्र्यै
गांयत्रङ्गांयत्रादुंपाॐशुरुंपाॐशोस्त्रिवृत्त्रिवृतोंरथन्तरंव्वासिंष्ठऽ ॥१३५॥
ऋषिंःप्प्रजापंतिगृहीतयात्त्वयांप्प्राणङ्गृंह्णामिप्प्रजाब्भ्यंः

॥ ५४ ॥ अयन्दक्षिणा । विश्वकर्म्मातस्यमनोवैश्वकर्म्मणङ्ग्री
ष्मोमानसस्त्रिष्टुब्ग्रैष्मीत्रिष्टुभः स्वारꣳस्वारादन्तर्य्यामोन्त
र्य्यामात्पञ्चदशः पञ्चदशाद्बृहद्भरद्वाजऽऋषिः प्रजापतिगृही
तयात्त्वयामनोगृह्णामिप्रजाभ्यः ॥ ५५ ॥ अयम्पश्चात् ॥
अयम्पश्चाद्विश्वव्यचास्तस्यचक्षुर्वैश्वव्यचसंवर्षाश्चाक्षु
ष्योजगतीवार्षीजगत्याऽऋक्सममृक्समाच्छुक्रः शुक्रात्सप्त
दशः सप्तदशाद्वैरूपञ्जमदग्निर्ऋषिः प्रजापतिगृहीतयात्त्वया

चक्षुर्गृह्णामिप्प्रजाब्भ्यः ॥ ५६ ॥ इदमुत्तरात् ॥ इदमुत्त
रात्त्स्वस्तस्यश्श्रोत्रꣳसौवꣳशरच्छ्रौत्र्यनुष्टुप्प्शारद्यनुष्टुभंऽऐ
डमैडान्मन्थीमन्थिनंऽएकविꣳशऽएकविꣳशाद्वैराजंविश्श्वा[1]मि
त्त्रऽऋषिः प्प्रजापतिगृहीतयात्त्वयाश्श्रोत्रङ्गृह्णामिप्प्रजाब्भ्यः
॥ ५७ ॥ इयमुपरिमतिस्तस्यैवाङ्[2]मात्त्याहेमन्तोवाच्यःप
ङ्क्तिर्हैमन्तीपङ्क्त्यैनिधनंवन्निधनंवतऽआग्ग्रयणऽआग्ग्रयणात्त्रि ॥ १३६ ॥

१ विश्वामित्रः। अत्र नरहामित्रेषु च (शु. य. प्रा. ३ अ. १०३ सू.) इत्यनेन मित्रशब्दपरे विश्वशब्दस्य दीर्घाकारः। २ वाक्मात्या इति पदम्। पञ्चमेऽपञ्चमम्। (शु. य. प्रा. ४ अ. १२१ सू.) पञ्चमे स्पर्शे प्रत्यये परेऽपञ्चमः पञ्चमम् पद्यते। इत्यनेन ककारस्य पञ्चमे स्वरे पञ्चमः। वाङ्मात्या।

णवत्रयस्त्रिꣳशौत्रिणवत्रयस्त्रिꣳशाभ्याꣳशाक्करैवतेव्विश्वक
र्म्मऽऋषिः प्रजापतिगृहीतयात्त्वयाव्वाचङ्गृह्णामिप्रजाभ्यो
लोकन्ताऽइन्द्रम् ॥ ५८ ॥ [५-७] इतिश्रीवाजसनेयसंहि
तायांत्रयोदशोऽध्यायः ॥ १३ ॥ श्रीवेदपुरुषायनमः ॥
अनुवाकसूत्रम् ॥ ध्रुवाक्षितिर्षट्, सजूर्ऋतुभिर्द्विका, मूर्द्धाव्वयो
द्विका, इन्द्राग्नीऽअव्यथमानाꣳषडा, युमेंषडा, शुस्त्रिवृदेका,

१ अध्यायः १२-लोकंपृण. १ । नाऽअस्य. २ । इंद्रंविश्वाः. ३ ॥ इति प्रतीकानि ॥
५४ ५५ ५६

ग्नेर्भागोसिचतुष्कै, कयाचतुष्का, ष्टावेकात्रिꣳशत् [ अ. १४

मं. ३१ अनु. ८ ] ॥ हरिः ॐ ॥ ध्रुवक्षितिर्ध्रुवयोनिꣳ ॥

ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवासिध्रुवँय्योनिमासीदसाधुया ॥ उक्ख्यं

स्यकेतुम्प्रथमञ्जुषाणाश्विनाध्वर्यूसादयतामिहत्त्वां ॥ १ ॥

कुलायिनीघृतवती ॥ कुलायिनीघृतवतीपुरन्धिꣳस्योनेसीदस

दनेपृथिव्याः ॥ अभित्त्वारुद्रावसवोगृणन्त्विमाब्रह्मपीपि ॥१३७॥

१ ध्रुवयोनिः ॥ अत्र समानपदे ऋषरेभ्यः स्वरयवहकपेश्च (शु. य. प्रा. ३ अ. ६२ सू.) इत्यनेन णत्वप्राप्तौ इन्द्राग्नी चित्रभानो० (य. शु. प्रा. ३ अ. ९३ सू.) इत्यनेन णत्वनिषेधः।

हिसौभंगायाश्विनोद्धुर्य्यूंसादयतामिहत्त्वा ॥ २ ॥ स्वैर्दक्षैः ॥
स्वैर्दक्षैर्दक्षपितेहसींदद्देवानांᳫंसुम्नेबृंहतेरणाय ॥ पितेवैधि
सूनवऽआसुशेवास्वावेशातन्न्वासंविशस्वाश्विनोद्धुर्य्यूंसादयता
मिहत्त्वा ॥ ३ ॥ पृथिव्याःपुरीषम् ॥ पृथिव्याःपुरीषमस्य
प्प्सोनामतान्त्वाविश्वेऽअभिगृणन्तुदेवाः ॥ स्तोमंपृष्ठाघृतवं
तीहसींदप्रजावंदस्म्मेद्द्रविणायंजस्वाश्विनोद्धुर्य्यूंसादयतामि
हत्त्वा ॥४॥ अदित्यास्त्त्वा । पृष्ठेसांदयाम्म्यन्तरिक्षस्यधत्रीं

विष्टम्भनीन्दिशामधिपत्नीम्भुवनानाम् ॥ ऊर्म्मिर्द्रप्सोऽ
अपामसिव्विश्वकर्म्मातऽऋषिरश्विनाद्ध्वर्य्यूसादयतामिहत्त्वा
॥ ५ ॥ शुक्रश्च ॥ शुक्रश्चशुचिश्चग्रैष्म्मावृतूऽअग्नेरन्तःश्लेषो
सिकल्पेतान्द्यावापृथिवीकल्पन्तामापऽओषधयःकल्पन्ता
मग्नयःपृथङ्ममज्यैष्ठ्यायसव्रताः ॥ येऽअग्नयःसमनसो
न्तराद्यावापृथिवीऽइमे ॥ ग्रैष्म्मावृतूऽअभिकल्पमानाऽइन्द्र ॥१३८॥
मिवदेवाऽअभिसंव्विशन्तुतयादेवतयाङ्गिरस्वद्ध्रुवेसीदतम् ॥६॥

[६-१]सजूर्ऋतुभिः। सजूर्विधाभिःसजूर्देवैःसजूर्देवैर्वयोनाधै
रग्नयेत्त्वावैश्वानरायाश्विनाध्वर्यूसादयतामिहत्वासजूर्ऋतु
भिःसजूर्विधाभिःसजूर्वसुभिःसजूर्देवैर्वयोनाधैरग्नयेत्त्वावै
श्वानरायाश्विनाध्वर्यूसादयतामिहत्वासजूर्ऋतुभिःसजूर्वि
धाभिःसजूरुद्रैःसजूर्देवैर्वयोनाधैरग्नयेत्त्वावैश्वानरायाश्वि
नाध्वर्यूसादयतामिहत्वासजूर्ऋतुभिःसजूर्विधाभिःसजूरा
दित्यैःसजूर्देवैर्वयोनाधैरग्नयेत्त्वावैश्वानरायाश्विनाध्वर्यूसा

२४

॥१३९॥ दयतामिहत्वांसजूर्ऋतुभिं÷सजूर्विधाभिं÷सजूर्विश्वैर्देवैःस
जूर्देवैर्वयोनाधैरग्नयेंत्वावैश्वानरायाश्विनांध्वर्य्यूसांदयतामि ॥ १४ ॥
हत्वां ॥ ७॥ प्राणम्मे । पाह्यपानम्मेपाहिव्यानम्मेपाहिचक्षु
र्म्मंऽउर्व्याविभांहिश्रोत्रम्मेश्लोकय॥अपःपिन्वौषंधीर्जिन्व
द्विपादंवचतुंष्पात्पाहिदिवोवृष्टिमेरंय ॥ ८ ॥ [ २-२ ] मूर्द्धा
वयं÷ । प्रजापंतिश्छन्दं÷क्षत्रंवयोमयंन्दंछन्दोंविष्टम्भो ॥ १३९ ॥
वयोधिंपतिश्छन्दोंविश्वकंर्म्मावयं÷परमेष्ठीच्छन्दोंबस्तो

व्वयोँ व्विवलञ्छन्दो व्वृष्णिर्व्वयोँ व्विशालञ्छन्दः पुरुषो व्वयस्त
न्द्रञ्छन्दो व्याग्घ्रो व्वयोऽनाधृष्टञ्छन्दः सिंहो व्वयश्छदिश्छ
न्दः पष्ठवाड्वयो बृहतीच्छन्दऽउक्षा व्वयः ककुप्छन्दऽऋषभो
व्वयः सतोबृहतीच्छन्दोऽनड्वान्व्वयः ॥९॥ अनड्वान्व्वयः । पङ्क्ति
श्छन्दो धेनुर्व्वयो जगतीच्छन्दस्त्र्यविर्व्वयस्त्रिष्टुप्छन्दो दित्य
वाड्वयो व्विराट्छन्दः पञ्चाविर्व्वयो गायत्रीच्छन्दस्त्रिवत्सो व्वयऽउ
ष्णिक्छन्दस्तुर्य्यवाड्वयोऽनुष्टुप्छन्दो लोकन्ताऽइन्द्रम् ॥१०॥

१ अध्यायः १२ लोकंपृण. १ ताऽअस्य. २ । इन्द्रं विश्वाः. ३ ॥ इति प्रतीकानि ॥
५४ ५५ ५६

शु. य. संहि. [ २-३ ] इन्द्राग्नीऽअव्व्यंथमानाम् ॥ इन्द्राग्नीऽअव्व्यं १. म.
थमानामिष्टकान्दृꣳहतँऽयुवम् ॥ पृष्ठेनद्यावांपृथिवीऽअन्त ॥ १४ ॥
॥१४०॥ रिंक्षञ्चविबाधसे ॥ ११ ॥ व्विश्वकर्म्मात्त्वा । सादयत्त्वन्त
रिंक्षस्यपृष्ठेव्व्यचंस्वतीम्प्रथंस्वतीमन्तरिंक्षँऽयच्छान्तरिंक्ष
न्दृꣳहान्तरिंक्षम्माहिꣳसीः ॥ व्विश्वंस्मैप्प्राणायापानायं
व्व्यानायोदानायंप्प्रतिष्ठायैचरित्त्राय ॥ व्वायुष्ट्वाभिपांतुमह्यास्व ॥ १४० ॥
स्त्त्याच्छर्दिषाशन्तंमेनतयांदेवतंयाङ्गिरस्वद्ध्रुवासीद ॥ १२ ॥

शतम् ॥ ७०० ॥ राज्ञ्यसि ॥ राज्ञ्यसिप्प्राचीदिग्विराडसि
दक्षिणादिक्सम्म्राडसिप्प्रतीचीदिक्स्वराडस्युदीचीदिगधिप
त्न्यसिबृहतीदिक् ॥ १३ ॥ व्विश्वकर्म्मात्त्वा । सादयत्त्व
न्तरिक्षस्यपृष्ठेज्ज्योतिष्म्मतीम् ॥ व्विश्वंस्म्मैप्प्राणायापानाय
व्यानायव्विश्वञ्ज्योतिर्य्यच्छ ॥ व्वायुष्टेधिपतिस्त्तयादेवतया
ङ्गिरस्वद्ध्रुवासीद ॥ १४ ॥ नभश्च । नभस्यश्चव्वार्षिकावृतू

१ वायुष्टे। अत्र वायुस्ते इति पदम्। "वायुरग्निरग्नेरेकाक्षरे" (शु. य. प्रा. ३ अ. ७७ सू.) इत्यनेन एकाक्षरे पदे परे वायुः अग्निः अग्नेः एतेषां विसर्गस्य षत्वं भवति। ततः ह्रस्वे ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन द्वित्वे रूपम्।

शु. य. संहि. ॥१४२॥ अग्नेरन्तःश्लेषोसिकल्पैतान्द्यावापृथिवीकल्पन्तामापऽओ पू. अ.
षधयःकल्पन्तामग्नयःपृथङ्ममज्यैष्ठ्यायसव्रताः ॥ येऽ ॥ १४ ॥
अग्नयःसमनसोन्तराद्यावापृथिवीऽइमे ॥ वार्षिकावृतूऽअ
भिकल्पमानाऽइन्द्रमिवदेवाऽअभिसंविशन्तुतयादेवतयाङ्गि
रस्वद्ध्रुवेसीदतम् ॥ १५ ॥ इषश्च ॥ इषश्चोर्जश्चशारदा
वृतूऽअग्नेरन्तःश्लेषोसिकल्पैतान्द्यावापृथिवीकल्पन्तामा ॥१४१॥
पऽओषधयःकल्पन्तामग्नयःपृथङ्ममज्यैष्ठ्यायसव्रताः ॥

येऽअग्नयः समनसोन्तरा द्यावापृथिवीऽइमे ॥ शारदावृतूऽ
अभिकल्पमानाऽइन्द्रमिव देवाऽअभिसंविशन्तु तया देवतया
ङ्गिरस्वद्ध्रुवे सीदतम् ॥ १६ ॥ [ ६-३ ] आयुर्म्मे । पाहि प्रा
णम्मे पाह्यपानम्मे पाहि व्यानम्मे पाहि चक्षुर्म्मे पाहि श्रोत्रम्मे
पाहि वाचम्मे पिन्व मनो मे जिन्वात्मानम्मे पाहि ज्योतिर्म्मे य
च्छ ॥ १७॥ मा च्छन्दः । प्रमा च्छन्दः प्रतिमा च्छन्दोऽअस्री
वयः[1] च्छन्दः पङ्क्तिश्छन्दऽउष्णिक्छन्दो बृहती च्छन्दोनुष्टु

१ अत्र "अस्रीवयश्छन्दः" इत्यत्र "चछयोः शम्" इत्यनेन यकारोत्तरवर्तिनो विसर्जनीयस्य शकारः ।

प्पच्छन्दोविराड्छन्दोगायत्रीच्छन्दस्त्रिष्टुप्पच्छन्दोजगतीच्छन्दः
॥ १८ ॥ पृथिवीच्छन्दः ॥ पृथिवीच्छन्दोन्तरिक्षञ्छन्दो
द्यौश्छन्दः समाश्छन्दोनक्षत्राणिच्छन्दोवाक्छन्दोमन
श्छन्दः कृषिश्छन्दोहिरण्यञ्छन्दोगौश्छन्दोजाच्छन्दो
श्वश्छन्दः ॥ १९ ॥ अग्निर्द्देवता ॥ अग्निर्द्देवतावातोदेव
तासूर्य्योदेवताचन्द्रमादेवतावसवोदेवतारुद्रादेवतादित्यादेव
तामरुतोदेवताविश्वेदेवादेवताबृहस्पतिर्द्देवतेन्द्रोदेवतावरुणो

देवता ॥ २० ॥ मूर्द्धासि ॥ मूर्द्धासिराड्ध्रुवासिधरुणाधर्त्र्यसि
धरणी ॥ आयुषेत्त्वावर्च्चसेत्त्वाकृष्यैत्त्वाक्षेमायत्त्वा ॥ २१ ॥
यन्त्रीराट् ॥ यन्त्रीराड्यन्त्र्यसियमनीध्रुवासिधरित्री ॥ इषेत्त्वो
र्ज्जेत्त्वारय्यैत्त्वापोषायत्त्वालोकन्ताऽइन्द्रम् ॥ २२ ॥ [ ६-५ ]
आशुस्त्रिवृत् ॥ आशुस्त्रिवृद्भान्तः पञ्चदशोव्योमासप्तदशोधरु
णंऽएकविꣳशः प्रतूर्त्तिरष्टादशस्तपोनवदशोऽभीवर्त्तः सविꣳशो

१ अध्याय १२–लोकंपृण. ५४ १–ताऽअस्य. ५५ २। इंद्रंविश्वाः. ३ ५६ ॥ इति प्रतीकानि ॥ २ अभीवर्त्तः। अत्र "अश्वरश्मिमनिसुमतिश्वसुतचारयघृणिसेदिमेन्द्रियधारयचित्रभङ्गुरवयुनाश्वस्यहृदयघुप्यत्तोध्यव्रताभ्यर्चशक्तिपुरुशचि वकारे" (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन वकारे परे अभि इत्यस्य ह्रस्वेकारस्य दीर्घेकारः।

वर्च्चोद्वाविꣳशःसम्भरणस्त्रयोविꣳशोयोनिश्चतुर्विꣳशोगर्भाः
पञ्चविꣳशऽओजस्त्रिणवःक्रतुरेकत्रिꣳशःप्रतिष्ठात्रयस्त्रिꣳशो
ब्रध्नस्य[1]विष्टपञ्चतुस्त्रिꣳशोनाकःषट्त्रिꣳशोविवर्त्तोष्टाचत्वारिꣳ
शोधर्त्रञ्चतुष्टोमः ॥ २३ ॥ [ १-६ ] अग्नेर्भागः ॥ अग्नेर्भा
गोसिदीक्षायाऽआधिपत्यम्ब्रह्मस्पृतन्त्रिवृत्स्तोमऽइन्द्रस्यभा



---

१ ब्रध्नस्य । अत्र स्वरात्संयोगादिर्द्विरुच्यते सर्वत्र (शु. य. प्रा. ४ अ. १०० सू.) इत्यनेन द्वित्वम् । न त्वत्र धकारोत्तरवर्तिनो नकारस्य स्ववर्गीयत्वेन स्ववर्गीये चानुत्तमे (शु. य. प्रा. ४ अ. ११५ सू.) इत्यनेन निषेधः । तस्यानुत्तमे एव स्ववर्गीये वर्णपरे निषेधात् । अत्र तु अनुनासिकाश्चोत्तमाः (य. शु. प्रा. १ अ. ८६ सू.) इत्यनेन वर्गोत्तमा ङञणनमाः ( वर्गोत्तमसंज्ञकाः ) अनुनासिका भवन्ति । इति धकारत्तरोवर्तिनो नकारस्य वर्गोत्तमत्वात्तदतिरिक्तेषु वर्णपरेषु स्ववर्गीयेष्वेव द्वित्वनिषेधो बोध्यः । एवं तत्तत्स्थलेषु ज्ञेयम् ।

गोसिविष्णोराधिपत्त्यङ्क्षत्रꣳस्पृतम्पञ्चदशस्त्तोमोनूचक्षं
साम्भागोसिधातुराधिपत्त्यञ्जनित्रꣳस्पृतꣳसप्तदशस्त्तोमो
मित्रस्यभागोसिवरुणस्याधिपत्त्यन्दिवोवृष्टिर्व्वातस्पृतऽएक
विꣳशस्त्तोमोव्वसूनाम्भागः ॥ २४ ॥ व्वसूनाम्भागः ॥ व्वसू
नाम्भागोसिरुद्राणामाधिपत्त्यञ्चतुष्पात्स्पृतञ्चतुर्व्विꣳशस्त्तो
मऽआदित्त्यानाम्भागोसिमरुतामाधिपत्त्यङ्गर्भास्पृताः पञ्च
विꣳशस्त्तोमोदित्त्यै भागोसिपूष्णऽआधिपत्त्यमोजस्पृतन्त्रि

णवस्त्तोमौदेवस्यंसवितुर्भागोसिबृहस्प्पतेराधिंपत्त्यꣳसमी
चीर्द्दिशंस्पृताश्च्चतुष्ट्टोमस्त्तोमोयवानाम्भागः ॥ २५ ॥ यवा
नाम्भागः ॥ यवानाम्भागोस्ययवानामाधिंपत्त्यम्प्रजास्पृता
श्च्चतुश्च्चत्त्वारिꣳशस्त्तोमंऽऋभूणाम्भागोसिविश्श्वेषान्देवानामा
धिंपत्त्यम्भूतꣳस्पृतस्त्त्रयस्त्रिꣳशस्त्तोमःसहश्च ॥ २६ ॥ सह
श्च । सहस्यश्चहैमन्तिकावृतूऽअग्नेरन्तःश्लेषोसिकल्प्पेतान्द्या
वापृथिवीकल्प्पन्तामापऽओषधयःकल्प्पन्तामग्नयःपृथङ्म

मृज्यैपृथ्व्यायसव्व्रताः॥ येऽअग्नयःसमनसोन्तराद्यावापृथिवीऽ
इमे ॥ हैमन्तिकावृतूऽअभिकल्प्पमानाऽइन्द्रमिवदेवाऽअभि
संविशन्तुतयादेवतयाङ्गिरस्वद्ध्रुवेसीदतम् ॥२७॥ [४-७] एकं
यास्तुवत । प्प्रजाऽअधीयन्तप्प्रजापतिरधिपतिरासीत्तिसृ[1]भिर
स्तुवतब्ब्रह्मासृज्ज्यतब्ब्रह्मणस्प्पतिरधिपतिरासीत्पञ्चभिरस्तु
वतभूतान्न्यसृज्ज्यन्तभूतानाम्पतिरधिपतिरासीत्सप्तभिरस्तु

१ तिसृभिः । अत्र "भाविभ्यः सः षं समानपदे" (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन षत्वप्राप्तौ "ऋकाररेफारुदयश्च" (शु. य. प्रा. ३ अ. ८३ सू.) इत्यनेन यत्र ऋकारोदयः, रेफोदयः, अरुदयश्च सकारस्तत्र प्रकृत्या स्यात्तेनात्र सस्य ऋकारोदयत्वान्न षत्वम् ।

वतसप्तऽऋषयो॑सृज्यन्तधाताधिपतिरासीन्नवभिरस्तुवत
॥२८॥ नवभिरस्तुवत। पितरो॑सृज्यन्तादितिरधिपत्न्यासीदे
कादशभिरस्तुवतऽऋतवो॑सृज्यन्तार्त्तवाऽअधिपतयऽआसँस्त्र
योदशभिरस्तुवतमासाऽअसृज्यन्तसंवत्त्सरोधिपतिरासीत्त्प
ञ्चदशभिरस्तुवतक्क्षत्रमसृज्यतेन्द्रोधिपतिरासीत्त्सप्तदशभि
रस्तुवतग्ग्राम्म्याःपशवो॑सृज्यन्तबृहस्प्पतिरधिपतिरासीन्नव ॥ १४५ ।
दशभिरस्तुवत॥२९॥नवदशभिरस्तुवत।शूद्रार्य्यावसृज्येता

महोरात्रेऽअधिपत्नीऽआस्तामेकविꣳशत्यास्तुवतैकशफाः
पशवोसृज्यन्तव्वरुणोधिपतिरासीत्त्रयोविꣳशत्यास्तुवतक्षु
द्राःपशवोसृज्यन्तपूषाधिपतिरासीत्पञ्चविꣳशत्यास्तुवतार
ण्याःपशवोसृज्यन्तव्वायुरधिपतिरासीत्सप्तविꣳशत्यास्तुव
तद्यावापृथिवीव्यैतांव्वसवोरुद्राऽआदित्याऽअनुव्यायँस्तऽए
वाधिपतयऽआसन्नवविꣳशत्यास्तुवत॥३०॥ नवविꣳशत्या
स्तुवत ॥ नवविꣳशत्यास्तुवतव्वनस्पतयोसृज्यन्तसोमोधि

पतिरासीदेकंत्रिꣳशतास्त्तुवतप्प्रजाऽअंसृज्ज्यन्तसर्वाश्चायवा
श्चाधिपतयऽआसँस्त्रयंस्त्रिꣳशतास्त्तुवतभूतान्न्यंशाम्म्यन्प्प्रजा
पंतिꣳपरमेष्ठ्यधिपतिरासील्लोकन्ताऽइन्द्रम् ॥ ३१ ॥ [ ४-८ ]
इतिश्रीवाजसनेयसंहितायांचतुर्दशोऽध्यायः ॥ १४ ॥ श्रीवेद
पुरुषायनमः ॥ अनुवाकसूत्रम् ॥ अग्नेजातान्पञ्च, रश्मिना
सत्यायचतस्रो, राज्ञ्यसिपञ्चा, यंपुरःपञ्चा, ग्निर्मूर्द्धैकोनत्रिꣳश,

१ अध्यायः १२-लोकंपृण. १-ताऽअंस्य. २ । इंद्रविश्वाः. ३ इति प्रतीकानि ॥
॥ मंत्रः ॥ ५४ ५५ ५६





॥ १४६ ॥

द्येनऽऋषयोष्टौ, तपश्चनव, सप्त पञ्चषष्टिः ॥ [ अ. १५ मं. ६५ अनु. ७ ] ॥ हरिः ॐ ॥ अग्नेंजातान् ॥ अग्नेंजातान्प्रणुदा नःसपत्नान्प्रत्त्यजातान्नुदजातवेदः ॥ अधिनोब्रूहिसुमनाऽअ हेडँस्तवस्यामशर्म्मंस्त्रिवरूथऽउद्भौ ॥१॥ सहंसाजातान् ॥ सहंसाजातान्प्रणुदानःसपत्नान्प्रत्त्यजाताञ्जातवेदोनुदस्व॥ अधिनोब्रूहिसुमनस्यमानोवयँ स्यामप्रणुंदानःसपत्नान् ॥ २ ॥

१ प्रणुदानः । अत्र प्रनुदान इति पदम् । अत्र समानपदत्वाभावेन "ऋपरेभ्यः" इत्यनेन णत्वाप्राप्तौ "प्रनेनिनुदातिहिनोमीनाम्" ( शु. य. प्रा. ३ अ. ८९ सू. ) इत्यनेन प्रशब्दात्परे स्थितानामेतेषां नकारस्य णत्वविधानादत्र णत्वम् । तथा चात्र प्रनुद नः दकारोत्तरवर्तिनः ह्रस्वाकारस्य नकारे परे "धारयोव०" (शु. य. प्रा. ३ अ. १०८ सू.) इत्यनेन दीर्घाकारः ।

षोडशीस्तोमः ॥ षोडशीस्तोमऽओजोद्रविणञ्चतुश्चत्त्वारिᳩ
शस्तोमोवर्च्चोद्रविणम् ॥ अग्नेःपुरीषमस्यप्सोनामतान्त्वा
विश्वेऽअभिगृणन्तुदेवाः ॥ स्तोमपृष्ठाघृतवतीहसीदप्रजावं
दस्म्मेद्रविणायंजस्व ॥ ३ ॥ एवश्छन्दः ॥ एवश्छन्दो
वरिवश्छन्दःशम्भूश्छन्दःपरिभूश्छन्दऽआच्छच्छन्दो
मनश्छन्दोव्यचश्छन्दःसिन्धुश्छन्दःसमुद्रश्छन्दःस
रिरञ्छन्दःककुप्छन्दस्त्रिककुप्छन्दःकाव्यञ्छन्दोऽअङ्कुप

ञ्छन्दोऽक्षरपङ्क्तिश्छन्दः पदपङ्क्तिश्छन्दो विष्टारपङ्क्तिश्छन्दः क्षुरो भ्रजश्छन्दऽआच्छच्छन्दः प्रच्छच्छन्दः ॥ ४ ॥

आच्छच्छन्दः प्रच्छच्छन्दः । सँयच्छन्दो वियच्छन्दो बृहच्छन्दो रथन्तरञ्छन्दो निकायश्छन्दो विवधश्छन्दो गिरश्छन्दो भ्रजश्छन्दः सँस्तुप्छन्दोऽनुष्टुप्छन्दऽएवश्छन्दो वरिवश्छन्दो वयश्छन्दो वयस्कृच्छन्दो विष्पर्धाश्छन्दो विशालञ्छन्दश्छदिश्छन्दो दूरोहणञ्छन्दस्तन्द्रञ्छ

न्दोऽअङ्काङ्कञ्छन्दः ॥ ५ ॥ [ ५-१ ] रश्मिम्मना सत्त्या
यं । सत्त्यञ्जिन्न्वप्प्रेतिना धर्म्मणा धर्म्मञ्जिन्न्वान्न्वित्त्या दिवा दि
वञ्जिन्न्व सन्धिनान्तरिक्क्षेणान्तरिक्क्षञ्जिन्न्वप्प्रतिधिना पृथि
व्व्या पृथिवीञ्जिन्न्व विष्टम्भेन वृष्ट्या वृष्टिञ्जिन्न्वप्प्रवयाह्नाहर्जि
न्न्वानुया रात्र्या रात्रीञ्जिन्न्वोशिजा व्वसुब्भ्यो व्वसूञ्जिन्न्वप्प्रकेते
नादित्त्येब्भ्यऽआदित्त्याञ्जिन्न्व तन्तुना रायः ॥ ६ ॥ तन्तु
ना रायः ॥ तन्तुना रायस्प्पोषेण रायस्प्पोषञ्जिन्न्व सꣳसर्प्पेण श्रु

तायं श्रुताञ्जिꣳत्वैडेनौषधीभिरोषधीञ्जिꣳत्वोत्तमेनं तनूभिस्त्तनू
ञ्जिꣳत्वव्वयोधसाधीतेनाधीतञ्जिꣳत्वाभिजितातेजंसातेजोंजिꣳव
॥ ७ ॥ प्रतिपदंसि । प्प्रतिपदैंत्त्वानुपदंस्यनुपदैंत्त्वासम्पदं
सिसम्पदैंत्त्वातेजोंसितेजंसेत्त्वात्त्रिवृदंसि ॥ ८ ॥ त्रिवृदं
सि । त्रिवृतैंत्त्वाप्प्रवृदंसिप्प्रवृतैंत्त्वाव्विवृदंसिव्विवृतैंत्त्वासंवृदंसि
संवृतैंत्त्वाक्क्रमोंस्याक्क्रमायंत्त्वासङ्क्रमोंसिसङ्क्रमायंत्त्वोत्क्रमोंस्यु
त्क्रमायंत्त्वोत्क्रान्तिरस्युत्क्रान्त्यैंत्त्वाधिपतिनोर्ज्जोर्ज्जिꣳत्व

॥ ९ ॥ [४-२] राज्ञ्यसि ॥ राज्ञ्यसि प्राची दिग्वसवस्ते
देवा ऽअधिपतयो ऽग्निर्हेतीनां प्रतिधर्त्ता त्रिवृत्त्वा स्तोमः पृथि
व्या ᳪ श्रयत्वाज्यमुक्थमव्यथायै स्तभ्नातु रथन्तर ᳪ साम
प्रतिष्ठित्या ऽअन्तरिक्ष ऽऋषयस्त्वा प्रथमजा देवेषु दिवो मा
त्रया वरिम्णा प्रथन्तु विधर्त्ता चायमधिपतिश्च ते त्वा सर्वे संवि
दाना नाकस्य पृष्ठे स्वर्गे लोके यजमानञ्च सादयन्तु ॥ १० ॥ विरा ॥१४९॥
डसि ॥ विराडसि दक्षिणा दिग्रुद्रास्ते देवा ऽअधिपतय ऽइन्द्रो

हेतीनाम्प्रतिधर्त्तापञ्चदशस्त्वास्तोमः पृथिव्याꣳ श्रयतुप्प्रऽ
उगमुक्थमव्यथायैस्तभ्नातुबृहत्सामप्प्रतिष्ठित्याऽअन्तरि
क्षऽऋषयस्त्वाप्प्रथमजादेवेषुदिवोमात्रयावरिम्णाप्प्रथन्तु
विधर्त्ताचायमधिपतिश्चतेत्वासर्वेसंविदानानाकस्यपृष्ठेस्वर्गे
लोकेयजमानञ्चसादयन्तु ॥ ११ ॥ सम्म्राडसि । प्प्रतीची
दिगादित्यास्तेदेवाऽअधिपतयोवरुणोहेतीनाम्प्रतिधर्त्तासप्त
दशस्त्वास्तोमः पृथिव्याꣳ श्रयतुमरुत्वतीयमुक्थमव्य

थायैस्तभ्नातुवैरूपᳪंसामप्प्रतिष्ठित्त्याऽअन्तरिक्षऽऋषय
स्त्वाप्प्रथमजादेवेषुदिवोमात्त्रयावरिम्णाप्प्रथन्तुविधर्त्ताचा
यमधिपतिश्चतेत्त्वासर्वेसंविदानानाकस्यपृष्ठेस्वर्गेलोकेयजमा
नञ्चसादयन्तु ॥१२॥ स्वराडसि ॥ स्वराडस्युदीचीदिङ्मरुतस्ते
देवाऽअधिपतयᳪंसोमोहेतीनाम्प्रतिधर्त्तैकविᳪंशस्त्त्वास्तो
मः पृथिव्याᳪंश्रयतुनिष्केवल्यमुक्थमव्यथायैस्तभ्नातुवैरा
जᳪंसामप्प्रतिष्ठित्त्याऽअन्तरिक्षऽऋषयस्त्वाप्प्रथमजादेवे

षुंदिवोमात्रंयाव्वरिम्म्णाप्प्रंथन्तुव्विधर्त्ताचायमधिंपतिश्चतेत्त्वा
सर्व्वेसंविदानानाकंस्यपृष्ठेस्वर्गेलोकेयजंमानञ्चसादयन्तु ।१३।
अधिंपत्न्यसि। बृहतीदिग्विश्श्वेतेदेवाऽअधिंपतयोबृहस्प्पतिर्हे
तीनाम्प्पंतिधर्त्तात्त्रिंणवत्त्रयस्त्रिंᳪशौत्त्वास्त्तोमौपृथिव्व्याᳪंश्रंय
तांव्वैश्श्वदेवाग्निमारुतेऽउक्कथेऽअव्व्यंथायैस्त्तब्भ्नीताᳪंशाक्करैरे
वतेसामंनीप्प्रतिंष्ठित्त्याऽअन्तरिंक्षऽऋषंयस्त्त्वाप्प्रथमजादेवे
षुंदिवोमात्रंयाव्वरिम्म्णाप्प्रंथन्तुव्विधर्त्ताचायमधिंपतिश्चतेत्त्वा

सं. २६

सर्व्वैसंविदानानाकस्यपृष्ठेस्वर्ग्गैलोकेयजमानन्ञ्चसादयन्तु ।१४।

[ ५-३ ] अयम्पुरः ॥ अयम्पुरोहरिकेशःसूर्य्यरश्मिस्तस्य

रथगृत्सश्चरथौजाश्चसेनानीग्ग्रामण्ण्यौ ॥ पुञ्जिकस्थलाचक्र

तुस्थलाचाप्सरसौदङ्क्ष्णवःपशवोहेतिःपौरुषेयोवधःप्रहेति

स्तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्च

नोद्वेष्टितमेषाञ्जम्भेदद्ध्मः ॥१५॥ अयन्दक्षिणा। विश्वकर्म्मा

तस्यरथस्वनश्चरथेचित्रश्चसेनानीग्ग्रामण्ण्यौ ॥ मेनकाचसहज

न्याचाप्प्सरसौयातुधानाहेतीरक्षाᳬंसिप्प्रहेतिस्तेब्भ्योन
मोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्म्मोयश्श्चनोद्वेष्टितमे
षाञ्जम्भेदद्ध्मः ॥ १६ ॥ अयम्पश्चात् ॥ अयम्पश्चाद्विश्वव्यं
चास्तस्यरथप्प्रोतश्चासमरथश्चसेनानीग्ग्रामण्यौ ॥ प्रम्म्लो
चन्तीचानुम्म्लोचन्तीचाप्प्सरसौव्याग्घ्राहेतिश्सर्प्पाश्प्रहेति
स्तेब्भ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्म्मोयश्च
नोद्वेष्टितमेषाञ्जम्भेदद्ध्मः ॥ १७ ॥ अयमुत्तरात् ॥ अयमु

त्त्रात्त्सँय्यद्द्वसुस्त्तस्युताक्र्क्ष्य॑श्चारिष्टनेमिश्च सेनानीग्ग्राम
ण्ण्यौ ॥ व्विश्वाचीचघृताचीचाप्प्सरसावापोहेतिर्व्वातः प्प्रहेति
स्त्तेब्भ्योनमोऽअस्त्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्ष्मोयश्च
नोद्वेष्टितमेषाञ्जम्भेदद्ध्मः ॥१८॥ अयमुपरि ॥ अयमुपर्य्य॑र्व्वा
ग्ग्वसुस्त्तस्यसेनजिच्चसुषेणश्चसेनानीग्ग्रामण्ण्यौ ॥ उर्व्वशीचपू
र्व्वचित्तिश्चाप्प्सरसाववस्फूर्ज्जन्हेतिर्व्विद्युत्त्प्रहेतिस्त्तेब्भ्योनमोऽ
अस्त्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्ष्मोयश्चनोद्वेष्टितमेषा

ज्ञम्भैदद्ध्महं ॥ १९ ॥ [५-४] अग्निर्म्मूर्द्धा । दिवश्ककु
त्त्पतिं÷पृथिव्याऽअयम् ॥ अपाᳬरेताᳬसिजिन्वति ॥ २० ॥
अयमग्निः । संहस्त्रिणोव्वाजस्यशतिनस्प्पतिं÷ ॥ मूर्द्धाकवी
रयीणाम् ॥ २१ ॥ त्वामग्ने ॥ त्वामंग्नेपुष्कंरादद्ध्यथर्व्वानिर
मन्थत ॥ मूर्द्धोव्विश्वंस्यव्वाघतं÷ ॥ २२ ॥ भुवोयज्ञस्य ॥ भुवोय
ज्ञस्यरजंसश्चनेतायत्रानियुद्भिहंसचंसेशिवाभिं÷ ॥ दिविमूर्द्धा
नंन्दधिषेस्वर्षाञ्जिह्वामंग्नेचकृषेहव्यवाहम् ॥ २३ ॥ अबोध्य

ग्निः । समिधाजनानाम्प्रतिधेनुमिवायतीमुषासम् ॥ यह्वाऽ
इवप्प्रवयामुज्जिहानाः प्प्रभानवः सिस्रतेनाकमच्छ ॥ २४ ॥
अवोचामकवये ॥ अवोचामकवयेमेध्यायवचोवन्दारुवृषभा
यवृष्णे ॥ गविष्ठिरोनमसास्तोममग्नौदिवीवरुक्ममुरुव्यञ्चं
मश्रेत् ॥ २५ ॥ अयमिह । प्प्रथमोधायिधातृभिर्होतायजि
ष्ठोऽअद्ध्वरेष्वीड्यः ॥ यमप्नवानोभृगवोविरुरुचुर्वनेषुचित्रं



---

१ धेनुमिवायतीमुषासम् । अत्र ईम्शब्दात्परस्य उषशब्दस्य कारस्य "उषमहोभिर्नक्तेमी०" ( शु. य. प्रा. ३ अ. ११८ सू. ) इत्यनेन दीर्घः ।

व्विभ्वंव्विशेविंशे ॥ २६ ॥ जनंस्यगोपाः ॥ जनंस्यगोपाऽअ

जनिष्टजागृविरग्निःसुदक्षः सुवितायनव्यंसे ॥ घृतप्प्रतीको

बृहता[1]दिविस्पृशाद्युमद्विभांतिभरतेभ्यःशुचिः ॥ २७ ॥

त्वामंग्ने ॥ त्वामंग्नेऽअङ्गिरसोगुहाहितमन्वविन्दञ्छिश्रि

याणंव्वनेवने ॥ [2]संजायसेमथ्यमानःसहोमहत्त्वामाहुःसहंस

---

१ दिविस्पृशाः। अत्र "भात्रिभ्यः सः षः समानपदे" इत्यनेन प्राप्तस्य षत्वस्य अनुसंतनोतुबृहस्पतिसुतस्यसुसमिद्धायसुसन्दशमभिसत्त्वाऽभिसंविशन्तुसुसस्याऽअतिस्थूलम्मुसलेपरक्रीसंसाजानृकनुस्थलाञ्जिसक्थो दिविस्पृशा०" (शु. य. प्रा. ३ अ. ८२ सू.) इत्यनेन प्रकृतिभावे षत्वनिषेधः। २ सः जायसे। अत्र "व्यञ्जने च" (शु. य. प्रा. ३ अ. १६ सू.) इत्यनेन जायसे परे स इत्यस्य विसर्जनीयस्य लोपे सजायसे इति पदम्।

स्प्पुत्रमङ्गिरः ॥ २८ ॥ सखायःसम् ॥ सखायःसंवःसम्म्य
ञ्चमिषꣳस्तोमञ्चाग्नये ॥ वर्षिष्ठायक्षितीनामूर्ज्जोनप्त्रेसहस्व
ते ॥ २९ ॥ सꣳसमित् ॥ सꣳसमिद्युवसेवृषन्नग्नेविश्वान्यर्य्य
ऽआ ॥ इडस्प्पदेसमिध्यसेसनोवसून्याभर ॥ ३० ॥ त्वाग्निं
त्रश्श्रवस्तम ॥ त्वाग्निंत्रश्श्रवस्तमहवन्तेविक्षुजन्तवः ॥
शोचिष्केशम्पुरुप्प्रियाग्नेहव्यायवोढवे ॥ ३१ ॥ एनावः ॥ ॥ १५४ ॥

१ इडः पदे इति पदम् । अत्र "आविनिरिडइडाया वसनिर्द्दरिः" (शु. य. प्रा. ३ अ. २३ सू.) इत्यनेन विसर्जनीयस्य ककारपकारपरयोः सकारः-षकारश्च यथायोगं विधीयते । इडस्प्पदे इति रूपम् ।

एनावोऽअग्निन्नमसोर्जोनपातमाहुवे ॥ प्रियञ्चेतिष्ठमरतिᳪं
स्वंद्ध्वरंविश्वस्यदूतममृतम् ॥ ३२ ॥ विश्वस्यदूतम् ॥ विश्वस्य
दूतममृतंविश्वस्यदूतममृतम् ॥ सयोजतेऽअरुषाविश्वभोजसा
सदुद्द्रवत्स्वाहुतᳪं ॥ ३३ ॥ सदुद्द्रवत् ॥ सदुद्द्रवत्स्वाहुतᳪंसदुद्द्र
वत्स्वाहुतᳪं ॥ सुब्रह्मायज्ञःसुशमीव्वसूनान्देवᳪंराधोजनाना
म ॥ ३४ ॥ अग्नेव्वाजस्य ॥ अग्नेव्वाजस्यगोमतऽईशानᳪंसहसो
यहो ॥ अस्म्मेधेहिजातवेदोमहिश्श्रवः ॥ ३५ ॥ सऽइधानः ॥

शु. य.
संहि.
॥१५५॥

पू. अ.
॥ १५ ॥

सऽइंधानोव्वंसुंष्क्कविरग्ग्निरीडेन्न्योंगिरा ॥ रेवदुस्म्मब्भ्यंम्पुर्व्वणी
कदीदिहि ॥ ३ ६॥ क्षपोरांजन् ॥ क्षपोरांजन्नुतत्क्मनाग्ग्नेव्वस्त्तो
स्तोषसं ॥ सतिंग्ग्मजम्भरक्क्षसोंदहुप्प्रति ॥ ३ ७॥ भद्द्रोनं ॥
भद्द्रोनोंऽअग्ग्निराहुंतोभद्द्रारातिश्शुंभगभद्द्रोऽअंद्ध्वरश्श ॥ भद्द्राऽ
उतप्प्रशंस्त्तयंः ॥ ३ ८ ॥ भद्द्राऽउत । प्प्रशंस्त्तयोभद्द्रम्मनंः
कृणुष्ष्वव्वृत्रतूर्य्यें ॥ येनांसमत्त्सुसासहंः ॥ ३ ९ ॥ येनांसम ॥१५५॥

---

१ वसुष्कविः इति। "कविष्करत्कृधिषु" (शु. य. प्रा. ३ अ. ३२ सू.) इत्यनेन कविः करत् कृधिः एतेषु परेषु विसर्जनीयस्य सकारः षकारश्च भवति। तेनात्र कविः परे पूर्वविसर्जनीयस्य षकारे कृते "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन ककारस्य द्वित्वम्।

त्सु । सासहोवंस्स्थिरातंनुहिभूरिशर्द्धंताम् ॥ व्वनेमातेऽअभि
ष्टिभिः ॥ ४० ॥ अग्निन्तम् ॥ अग्निन्तम्मन्न्येयोव्वसुरस्त्तँ
उयँउयन्न्तिधेनवं÷ ॥ अस्त्तमर्व्वन्तऽआशवोस्त्तन्नित्त्यासोव्वा
जिनऽइषंᳫंस्तोतृब्भ्यऽआभर ॥ ४१ ॥ सोऽअग्निः[1] ॥ सोऽ
अग्निर्य्योव्वसुंर्गृणेसँय्यमायन्न्तिधेनवं÷ ॥ समर्व्वन्तोरघु
द्रुवंᳫंसᳫंसुजातासं÷सूरयऽइषंᳫंस्तोतृब्भ्यऽआभर ॥ ४२ ॥
उभेसुं[2]श्चन्द्र । सर्प्पिषोदर्व्वीश्श्रीणीषऽआसनि ॥ उतोनऽउत्त्पु

1 सोऽअग्निः । अत्र "व्यञ्जने" च (शु. य. प्रा. ३ अ. १७ सू.) इति सूत्रे व्यञ्जने परे एव विसर्गस्य लोपविधानान्न लोपस्ततो विसर्गस्य रुत्वे

पूर्व्वाऽउक्क्थेषुंशवसस्पतऽइषꣳस्तोतृब्भ्यऽआभंर ॥ ४३ ॥

॥१५६॥ अग्नेतम् ॥ अग्नेतमद्याश्श्वन्नस्त्तोमैᳲक्क्रतुन्नभद्द्रꣳहृदिस्पृ ॥ १५ ॥

शम् ॥ ऋद्ध्यामांतऽओहैᳲ ॥ ४४ ॥ अधाहि ॥ अधा

ह्यग्नेक्क्रतोर्ब्भद्द्रस्यदक्क्षंस्यसाधोः ॥ रथीरृतस्यबृहतो

बभूथ ॥ ४५ ॥ एभिर्न्नः ॥ एभिर्न्नोऽअर्क्कैर्ब्भवानोऽअर्व्वा

ङ्स्वर्ण्णज्ज्योतिः ॥ अग्नेव्विश्श्वेभिᳲसुमनाऽअनीकैᳲ ॥ ४६ ॥ ॥१५६॥

ओत्वे सोऽअग्निः इति पदम्। २ सुश्चन्द्रः। अत्र "चन्द्रेसु शकारेण" (शु. य. प्रा. ३ अ. ५४ सू.) इत्यनेन चन्द्रशब्दे परे सुशब्दः शकारेण व्यवधीयते। तत "ऊष्मान्तस्थाभ्यश्च" स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन चकारस्य द्वित्वम्।

अग्निꣳहोतारम् ॥ अग्निꣳहोतारम्मन्येदास्वन्तंवसुꣳसूनुꣳ
सहसोजातवेदसंविप्रन्नजातवेदसम् ॥ यऽऊर्ध्वयास्वध्वरोदेवो
देवाच्यांकृपा ॥ घृतस्यविभ्राष्टिमनुवष्टिशोचिषाजुह्वानस्य
सर्प्पिषः ॥ ४७ ॥ अग्नेत्त्वम् ॥ अग्नेत्त्वन्नोऽअन्तमऽउत
त्राताशिवोभवावरूथ्यः ॥ वसुरग्निर्वसुश्रवाऽअच्छानक्षि
द्युमत्तमꣳरयिन्दाः ॥ तन्त्वाशोचिष्ठदीदिवꣳसुम्नायनूनमी
सं. २७ महेसखिभ्यः ॥ ४८ ॥ [ २९-५ ] येनऽऋषयः ॥ येनऽऋषय

स्त्तपंसासुत्रमायन्निन्धांनाऽअग्निᳬस्वंराभरंन्तः ॥ तस्मिन्न
हन्निर्दंधेनाकेंऽअग्निंर्य्यमाहुर्म्मनंवस्त्तीर्ण्णबर्हिषम् ॥ ४९ ॥
तम्पत्नींभिः ॥ तम्पत्नींभिरनुंगच्छेमदेवाःपुत्रैर्भ्रातृंभिरुत
वाहिरंण्ण्यैः ॥ नाकंङ्गृब्भ्णानाःसुंकृतस्यंलोकेतृतीयेंपृष्ठेऽअधि
रोचनेदिवः ॥ ५० ॥ आवाचः ॥ आवाचोमद्ध्यमरुहद्भुर
ण्युरयमग्निःसत्त्पंतिश्चेकिंतानः ॥ पृष्ठेपृंथिव्यानिहिंतोदवि
द्युतदस्पदङ्कृणुताँस्पृधृतन्यवंः ॥ ५१ ॥ अयमग्निः ॥

 घ

॥ १५७ ॥

अयमग्निर्व्वीरतमोव्वयोधाःसंहस्रियोंद्योततामप्प्रयुच्छन् ॥ व्वि
भ्राजमानःसरिरस्यमद्ध्यऽउपप्प्रयाहिदिव्यानिधाम ॥ ५२ ॥
सम्प्रच्च्यवद्ध्वमुप । सप्प्रयाताग्नेपथोदेवयानान्कृणुद्ध्वम् ॥ पुनः
कृण्वानापितरायुवानान्वातांꣳसीत्त्वयितन्तुमेतम् ॥ ५३ ॥
उद्बुद्ध्यस्व ॥ उद्बुद्ध्यस्वाग्नेप्प्रतिजागृहित्त्वमिष्टापूर्त्तेसꣳसृजेथा
मयञ्च ॥ अस्मिन्त्सधस्त्थेऽअद्ध्युत्तरस्मिन्विश्वेदेवायजमा
नश्चसीदत ॥ ५४ ॥ येनव्वहसि । सहस्रꣳयेनाग्नेसर्व्ववेद

सम् ॥ तेनेमँऽयज्ञन्नोनयस्वर्द्देवेषुगन्तवे ॥ ५५ ॥ अयन्ते ॥
अयन्तेयोनिर्ऋत्वियोयतोजातोऽअरोचथाः ॥ तञ्जानन्न
ग्नऽआरोहाथानोवर्द्धयारयिम् ॥ ५६ ॥ [८-६] तपश्च ॥
तपश्चतपस्यश्चशैशिरावृतूऽअग्नेरन्तःश्लेषोसिकल्पेतान्द्या
वापृथिवीकल्पन्तामापऽओषधयःकल्पन्तामग्नयःपृथङ्मम
ज्यैष्ठ्यायसव्रताः ॥ येऽअग्नयःसमनसोन्तराद्यावापृथिवीऽ ॥ १५८ ॥
इमे ॥ शैशिरावृतूऽअभिकल्पमानाऽइन्द्रमिवदेवाऽअभिसं

विंशन्तुतयांदेवतंयाङ्गिरस्वद्ध्रुवेसीदतम् ॥ ५७ ॥ परमेष्ठी
त्त्वां । सादयतुदिवंस्पृष्ठे[1]ज्ज्योतिष्म्मतीम् ॥ विश्श्वंस्म्मैप्प्राणा
यांपानायंव्यानायविश्श्वञ्ज्योतिर्य्यच्छ ॥ सूर्य्यस्त्तेधिपतिस्त्त
यांदेवतंयाङ्गिरस्वद्ध्रुवासीद ॥ ५८ ॥ लोकम्पृण । छिद्रम्पृ
णाथोसीदद्ध्रुवात्त्वम् ॥ इन्द्राग्नीत्त्वाबृहस्पतिरस्मिन्योनां
वसीषदन् ॥ ५९ ॥ ताऽअस्य ॥ ताऽअस्यसूदंदोहसꣳसोमंꣳ

---

१ दिवष्पृष्ठे । इत्यत्र "दिवोऽककुत्पृथिव्योः" (शु. य. प्रा. ३ अ. २४ सू.) इत्यनेन दिवः सम्बन्धिनः विसर्गस्य षकारत्वम् ।

श्रीणन्तिपृश्न्यंयः ॥ जन्मंन्देवानांव्विशंस्त्रिष्वारोचनेदिवः
॥ ६० ॥ इन्द्रंव्विश्वाः ॥ इन्द्रंव्विश्वाऽअवीवृधन्त्समुद्रव्यंच
सङ्गिरः ॥ रथीतमꣳरथीनांव्वाजानाꣳसत्पतिम्पतिम् ॥ ६१ ॥
प्रोथदश्वः ॥ प्रोथदश्वोनयवसेविष्यन्यदामहःसंव्वरणाद्व्य
स्थात् ॥ आदस्यव्वातोऽअनुवातिशोचिरधस्मतेव्व्रजनङ्कृष्ण
मस्ति ॥ ६२ ॥ आयोष्ट्वा ॥ आयोष्ट्वासदनेसादयाम्म्यवत
श्छायायाꣳसमुद्रस्यहृदये ॥ रश्मीवतीम्भास्वतीमायाद्या

॥१५९॥

म्भास्यापृथिवीमोर्वन्तरिक्षम् ॥ ६३॥ परमेष्ठीत्त्वा । सादय
तुदिवस्पृष्ठेव्यचस्वतीम्प्रथस्वतीन्दिवँय्यच्छदिवन्दृꣳहदिव
म्माहिꣳसीः ॥ विश्वस्मैप्प्राणायापानायव्यानायोदानाय
प्प्रतिष्ठायैचरित्राय ॥ सूर्यस्त्वाभिपातुमह्यास्वस्त्याच्छर्दि
षाशन्तमेनतयादेवतयाङ्गिरस्वद्ध्रुवेसीदतम् ॥ ६४ ॥ सहस्र
स्यप्प्रमासि । सहस्रस्यप्प्रतिमासिसहस्रस्योन्मासिसाहस्रोसि
सहस्रायत्त्वा ॥ ६५ ॥ [९-७] इतिश्रीवाजसनेयसंहितायां

पञ्चदशोऽध्यायः ॥ १५ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाक-
सूत्रम् ॥ नमस्तेषोडश, हिरण्यबाहव, ऽउष्णीषिणे, तक्षभ्यो,
ज्येष्ठायपञ्चकाः, स्रुत्यायचतस्रः, शंभवायैका, पार्य्यायपञ्च,
द्रापेऽअंधसोविꣳशति, र्नवषट्षाष्टिः [अ. १६ मं. ६६ अनु.
९ ] ॥ हरिः ॐ ॥ नमस्त्ते ॥ नमस्त्ते[1]रुद्रमन्यवऽउतोतऽइषवेन
मः ॥ बाहुभ्यामुततेनमः ॥ १ ॥ यातें । रुद्रशिवातनूरघो



१ नमस्ते । इत्यत्र "तथयोः सम्" (शु. य. प्रा. ३ अ. ८ सू.) इत्यनेन मकारोत्तरवर्तिनो विसर्जनीयस्य तकारे परे सकारे कृते नमस्ते इति सिद्ध्यति ।

रापोपकाशिनी ॥ तयानस्तन्वाशन्तमयागिरिशन्ताभिचाक
शीहि ॥ २ ॥ यामिषुंम् ॥ यामिषुङ्गिरिशन्तहस्तौबिभर्ष्यस्तवे ॥
शिवाङ्गिरित्रताङ्कुरुमाहिꣳसीः पुरुषञ्जगत् ॥ ३ ॥ शिवेनव्व
चसा । त्वागिरिशाच्छावदामसि ॥ यथानः सर्व्वमिज्जगदय
क्ष्मꣳ सुमनाऽअसत् ॥ ४ ॥ अद्ध्यवोचत् ॥ अद्ध्यवोचदधिव
क्ताप्प्रथमोदैव्योभिषक् ॥ अहीँश्चसर्व्वाञ्जम्भयन्त्सर्व्वाश्चयातु

---

१ अहीन् च । इत्यत्र "चच्छयोः शम्" (शु. य. प्रा. ३ अ. १३५ सू.) इत्यनेन नकारस्य चछयोः परयोः शकारं विधीयते उपधायामनुनासिकमपि । तथा अहीँश्च इति कृते "ऊष्मान्तस्थाभ्यश्च स्पर्शाः" (शु. य. प्रा. ४ अ. १०२ सू.) इत्यने चकारस्य द्वित्वम् ।

धान्न्योधुराचीꣳपरासुव ॥ ५ ॥ असौयश्श ॥ असौयस्त्ताम्म्रोऽ
अरुणऽउतबब्भ्रुश्शुमङ्गलः ॥ येचैनꣳरुद्द्राऽअभितोदिक्क्षु
श्श्रिताश्सहस्स्रशोवैषाꣳहेडऽईमहे ॥ ६ ॥ असौयश्श ॥ असौयो
वसर्प्पतिनीलग्ग्रीवोव्विलोहितः ॥ उतैनङ्गोपाऽअदृश्श्रन्नदृश्श्र
न्नुदहार्य्युःसदृष्ट्टोमृडयातिनः ॥ ७ ॥ नमोस्त्तु ॥ नमोस्त्तु
नीलग्ग्रीवायसहस्स्राक्क्षायमीढुषे ॥ अथोयेऽअस्स्यसत्त्वानोहन्ते ॥१६१॥

१ दिक्षुश्श्रिताः । अत्र दिक्षु इति पदम् । "करेफाभ्याञ्च" (शु. य. प्रा. ३ अ. ५८ सू.) इत्यनेन करेफाभ्यां सरस्य षकारस्य षत्वं विधीयते । तेनात्र सकारस्य षत्वे कषसंयोगे क्षः इति क्षत्वे रूपम् । "स्वरात्संयोगादिर्द्विरुच्यते सर्वत्र" (शु. य. प्रा. ४ अ. १०० सू.) इत्यनेन शकारस्य द्वित्वम् ।

भ्योंकरन्नमः ॥ ८ ॥ प्रमुंञ्च ॥ प्रमुंञ्चधन्व्वंनस्त्वमुभयो
रात्क्र्योंर्ज्ज्याम् ॥ याश्चंतेहस्तइषवःपराताभगवोव्वप ॥ ९ ॥
व्विज्ज्यन्धनुःकपर्द्दिनोव्विशंल्योबाणवाँ२॥ऽउत ॥ अनेश
न्नस्ययाऽइषवऽआभुरस्यनिषङ्गधिः ॥ १० ॥ यातें । हेति
र्म्मीढुष्टमहस्तेंबभूवंतेधनुः ॥ तयास्म्मान्विश्वतस्त्वमंय
क्ष्मयापरिभुज ॥ ११ ॥ परिते ॥ परितेधन्व्वंनोहेतिरस्म्मा
न्वृंणक्तुविश्वतंः ॥ अथोयऽइषुधिस्तवारेऽअस्म्मन्निधेंहि
४०५

तम् ॥ १२ ॥ अवतत्त्यधनुं÷ ॥ अवतत्त्यधनुष्ट्व६ सहंस्राक्क्षश
तेषुधे ॥ निशीर्य्यंशल्ल्यानाम्मुखांशिवोनं÷सुमनांभव ॥ १३ ॥
नमंस्त्ते ॥ नमंस्त्तऽआयुंधायानांततायधृष्णवें ॥ उभा
ब्भ्यांमुततेनमोंबाहुब्भ्यान्तवधन्न्वंने ॥ १४ ॥ मानं÷ ॥
मानोंमहान्तंमुतमानोंऽअब्भंकम्मानऽउक्क्षंन्तमुतमानंऽउ
क्क्षितम् ॥ मानोंव्वधीं६पितरम्मोतमातरम्मानं÷प्प्रियास्त्तन्न्वो
रुद्द्ररीरिष६ ॥ १५ ॥ मानंस्त्तोके । तनंयेमानऽआयुंषिमानो

गोषुमानोऽअश्वेषुरीरिषः ॥ मानोवीरान्नुद्र भामिनोवधीर्हं
विष्मन्तःसदमित्त्वांहवामहे ॥ १६ ॥ [१६-१] शतम्
॥ ८०० ॥ नमोहिरण्यबाहवे ॥ सेनान्येदिशाञ्चपतयेनमो
नमोवृक्षेभ्योहरिकेशेभ्यःपशूनाम्पतयेनमोनमः शष्पिञ्जराय
त्विषीमतेपथीनाम्पतयेनमोनमोहरिकेशायोपवीतिनेपु
ष्टानाम्पतयेनमोनमोबभ्लुशाय ॥ १७ ॥ नमोबभ्लु
शाय । व्याधिनेन्नानाम्पतयेनमोनमोभवस्यहेत्यैजगताम्पतये

सं. २८

१ त्विषिमते । अत्र शृणुतत्विषिभ्राजिभवतपिबेतस्मतिडरक्षा मकारे (शु. य. प्रा. ३ अ. ११७ सू.) इत्यनेन मकारे परे एते दीर्घा भवन्ति ।

येनमोनमोरुद्रायाततायिनेक्षेत्राणाम्पतयेनमोनमः सूतायाहन्त्यैवनानाम्पतयेनमोनमोरोहिताय ॥ १८ ॥ नमोरोहिताय । स्त्थपतयेवृक्षाणाम्पतयेनमोनमोभुवन्तयेवारिवस्कृतायौषधीनाम्पतयेनमोनमोमन्त्रिणेवाणिजायकक्षाणाम्पतयेनमोनमऽउच्चैर्घोषायाक्रन्दयतेपत्तीनाम्पतयेनमोनमः कृत्स्नायतया ॥ १९ ॥ नमः कृत्स्नायतया । धावतेसत्त्वनाम्पतयेनमोनमः सहमानायनिव्व्याधिनऽआव्व्याधिनीनाम्प

॥ १६३ ।

तंयेनमोनमोंनिषङ्गिणेककुभायंस्त्तेनानाम्पतंयेनमोनमोंनि
चेरवैपरिचरायारंण्ण्यानाम्पतंयेनमोनमोव्वञ्च्वते ॥ २० ॥ नमो
व्वञ्च्वते । परिवञ्च्वतेस्त्तायूनाम्पतंयेनमोनमोंनिषङ्गिणऽइषुधि
मतेतस्क्कराणाम्पतंयेनमोनमं÷सृकायिब्भ्योजिघांछंसद्भ्यो
मुष्ण्णताम्पतंयेनमोनमोंसिमद्भ्योनक्क्तञ्चरद्भ्योव्विकृन्ता
नाम्पतंयेनमं÷ ॥ २१ ॥ [ ५-२ ] नमंऽउष्ण्णीषि
णे । गिरिचरायंकुलुञ्चानाम्पतंयेनमोनमंऽइषुमद्भ्योधन्वा

यिभ्यश्चवोनमोनमऽआतन्वानेभ्यःप्रतिदधानेभ्यश्चवो 
 नमोनमऽआयच्छद्भ्योस्यद्भ्यश्चवोनमोनमोविसृजद् 
भ्यः ॥ २२ ॥ नमोविसृजद्भ्यो । विध्यद्भ्यश्चवो
नमोनमःस्वपद्भ्योजाग्रद्भ्यश्चवोनमोनमःशयानेभ्य
ऽआसीनेभ्यश्चवोनमोनमस्तिष्ठद्भ्योधावद्भ्यश्चवोनमो
नमःसभाभ्यः ॥ २३ ॥ नमःसभाभ्यः । सभापति ॥१६
भ्यश्चवोनमोनमोश्वेभ्योश्वपतिभ्यश्चवोनमोनमऽआव्या

धिनीभ्यो विविध्यन्तीभ्यश्च वो नमो नम ऽउगणाभ्यस्तृꣳह
तीभ्यश्च वो नमो नमो गणेभ्यः ॥ २४ ॥ नमो गणेभ्यो ।
गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो न
मो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरू
पेभ्यश्च वो नमो नमः सेनाभ्यः ॥ २५ ॥ नमः सेनाभ्यः ।
सेनानिभ्यश्च वो नमो नमो रथिभ्यो ऽअरथेभ्यश्च वो नमो न
मः क्षत्तृभ्यः सङ्ग्रहीतृभ्यश्च वो नमो नमो महद्भ्यो ऽअर्भके

भ्यंश्चवोनमः ॥ २६ ॥ [ ५-३ ] नमस्तक्षभ्यो ।
रथकारेभ्यश्चवोनमोनमःकुलालेभ्यःकर्मारेभ्यश्चवोनमो
नमोनिषादेभ्यःपुञ्जिष्ठेभ्यश्चवोनमोनमःश्वनिभ्योमृगयु
भ्यंश्चवोनमोनमःश्वभ्यः ॥ २७ ॥ नमःश्वभ्यः ।
श्वपतिभ्यश्चवोनमोनमोभवायचरुद्रायचनमःशर्वायचपशु
पतयेचनमोनीलग्रीवायचशितिकण्ठायचनमःकपर्दिने
॥ २८ ॥ नमःकपर्दिने । चव्युप्तकेशायचनमःसहस्रा

क्षायंचश्तधंन्वनेचनमोगिरिशयायंचशिपिविष्टायंचनमो

मीढुष्टमायचेषुमतेचनमोह्रस्वायं ॥ २९ ॥ नमोह्रस्वायं।

चवामनायंचनमोबृहतेचवर्षीयसेचनमोवृद्धायंचसवृधेचन

मोग्र्यायचप्प्रथमायंचनमंऽआशवें ॥ ३० ॥ नमंऽआ

शवें । चाजिरायंचनमःशीग्घ्यायचशीभ्यायचनमऽऊ

र्म्यायचावस्वन्यायचनमोनादेयायंचद्वीप्यायच ॥ ३१ ॥

[५-४] नमोज्येष्ठायं। चकनिष्ठायंचनमंःपूर्वजायंचापर

जायंचुनमोंमद्ध्यमायंचापगल्भायंचुनमोंजघन्न्यायचबु
द्ध्न्यायचुनमुःसोब्भ्यांय ॥ ३२ ॥ नमुःसोब्भ्याय । चप्प्रति
सर्य्यायचुनमोयाम्म्यांयचुक्षेम्म्यांयचुनमुःश्लोक्यांयचा
वसान्न्यायचुनमंऽउर्व्वुर्य्यायचुखल्यांयचुनमोवन्न्यांय ॥ ३३ ॥
नमोवन्न्यांय । चुकक्ष्यांयचुनमंःश्रवायंचप्प्रातिश्श्रवायंचुन
मंऽआशुषेणायचाशुरंथायचुनमुःशूरायचावभेदिनेचुनमोंबि ॥१६६॥
ल्म्मिने ॥ ३४ ॥ नमोंबिल्म्मिने । चकवचिनेचुनमोंवर्म्मि

णेचवरूथिनेचनमः श्रुतायचश्रुतसेनायचनमोदुन्दुभ्या
यचाहनन्यायचनमोधृष्णवे ॥ ३५॥ नमोधृष्णवे । चप्र
मृशायचनमोनिषङ्गिणेचेषुधिमतेचनमस्तीक्ष्णेषवेचायुधिने
चनमः स्वायुधायचसुधन्वनेच ॥ ३६ ॥ [ ५-५ ] नमःस्रुत्यां
य । चपथ्यायचनमःकाट्यायचनीप्यायचनमःकुल्यायच
सरस्यायचनमोनादेयायचवैशन्तायचनमःकूप्याय ॥३७॥
नमःकूप्याय । चावट्यायचनमोवीध्र्यायचातप्यायचन

मोमेग्घ्याय च विद्युत्याय च नमो वर्ष्याय चावर्ष्याय च नमो

वात्याय ॥ ३८ ॥ नमो वात्याय । च रेष्म्याय च नमो वास्तु

व्याय च वास्तुपाय च नमः सोमाय च रुद्राय च नमस्ताम्राय

चारुणाय च नमः शङ्गवे ॥ ३९ ॥ नमः शङ्गवे । च पशुपत

ये च नम उग्राय च भीमाय च नमोऽग्रेवधाय च दूरेवधाय च न

मो हन्त्रे च हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय

॥ ४० ॥ [ ४-६ ] नमः शम्भवाय । च मयोभवाय च नमः श

ङ्कुरायंचमयस्कुरायंचनमं÷शिवायंचशिवतरायच ॥ ४१ ॥
[१-७] नमःपार्यांय । चावार्यांयचनमं÷प्रतरंणायचोत्तरं
णायचनमस्तीर्थ्यांयचकूल्यांयचयम÷शष्प्यांयचफेन्यांय
चयमं÷सिकत्यांय ॥ ४२ ॥ नमं÷सिकत्यांय । चप्रवाह्यांय
चनमं÷किꣳशिलायंचक्षयणायंचनमं÷कपर्दिनेचपुलस्तये
चनमंऽइरिण्यायचप्रपथ्यायचनमोव्रज्यांय ॥ ४३ ॥ नमो
व्रज्यांय । चगोष्ठ्यांयचनमस्तल्प्यांयचगेह्यांयचनमोहृद

शु. य. संहि. य्याय च निवेष्प्याय च नमः काट्याय च गह्वरेष्ठाय च नमः शु पू. अ.
॥१६८॥ ष्क्याय ॥ ४४ ॥ नमः शुष्क्याय च हरित्याय च नमः ॥ १६ ॥
पांसव्याय च रजस्याय च नमो लोप्याय चोलप्याय च नम
ऊर्व्याय च सूर्व्याय च नमः पर्णाय ॥ ४५ ॥ नमः पर्णाय ।
च पर्णशदाय च नम उद्गुरमाणाय चाभिघ्नते च नम आखिदते
च प्रखिदते च नम इषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमो नमो व ॥१६८॥
किरिकेभ्यो देवानां हृदयेभ्यो नमो विचिन्वत्केभ्यो नमो

विक्षिणत्केभ्योनमऽआनिर्हतेभ्यः ॥ ४६ ॥ [५-८]
द्रापेऽअन्धसः ॥ द्रापेऽअन्धसस्पतेदरिद्रनीललोहित ॥
आसाम्प्रजानामेषाम्पशूनाम्माभेर्म्मारोङ्मोचनः किञ्चनाम
मत् ॥ ४७ ॥ इमारुद्राय । तवसेकपर्दिनेक्षयद्वीरा
यप्रभरामहेमतीः ॥ यथाशमसद्द्विपदेचतुष्पदेविश्वम्पुष्ट
ङ्ग्रामेऽअस्मिन्ननातुरम् ॥ ४८ ॥ यातें । रुद्रशिवा
र. २९ तनूः शिवाविश्वाहाभेषजी ॥ शिवारुतस्यभेषजीतयानोमृड

जीवसे ॥ ४९ ॥ परिनः ॥ परिनोरुद्रस्यहेतिर्वृणक्तुपरित्वेष
स्यदुर्म्मतिरघायोः ॥ अवस्थिरामघवद्भ्यस्तनुष्वमीढ्वस्तो
कायतनयायमृड ॥ ५० ॥ मीढुष्टमशिवतम । शिवोनः सुम
नाभव ॥ परमेवृक्षऽआयुधन्निधायकृत्तिंवसानऽआचरपिनाक
म्बिभ्रदागहि ॥ ५१ ॥ विकिरिद्रविलोहित ॥ विकिरिद्रवि
लोहितनमस्तेऽअस्तुभगवः ॥ यास्तेसहस्रꣳहेतयोन्यमस्म ॥१६९॥
न्निवपन्तुताः ॥ ५२ ॥ सहस्राणिसहस्रशः ॥ सहस्राणिसह

स्त्रशोबाह्वोस्त्तवंहेतयः ॥ तासामीशानोभगवःपराचीनामु
खांकृधि ॥ ५३ ॥ असंङ्ख्यातासहस्त्राणि ॥ असंङ्ख्यातासह
स्त्राणियेरुद्राऽअधिभूम्म्याम्॥ तेषांॅसहस्त्रयोजनेवधन्वानि
तन्मसि ॥ ५४ ॥ अस्म्मिन्महति । अस्म्मिन्महत्त्यर्णवे
न्तरिक्षेभवाऽअधि ॥ तेषांॅसहस्त्रयोजनेवधन्वानितन्मसि
॥ ५५ ॥ नीलंग्रीवाःशितिकण्ठाः ॥ नीलंग्रीवाःशितिकण्ठा
दिवंॅरुद्राऽउपश्रिताः ॥ तेषांॅसहस्त्रयोजनेवधन्वानित

शु. य. संहि. ॥१७०॥

पू. अ. ॥ १६ ॥

न्मसि ॥ ५६ ॥ नीलग्ग्रीवाः शितिकण्ठाः । शर्वाऽअधः
क्षमाचराः ॥ तेषाᳬंसहस्रयोजनेवधन्वानितन्मसि ॥ ५७ ॥
येवृक्षेषु । शष्पिञ्जरानीलग्ग्रीवाविलोहिताः ॥ तेषाᳬंसहस्र
योजनेवधन्वानितन्मसि ॥ ५८ ॥ येभूतानाम् ॥ येभूताना
मधिपतयोविशिखासः कपर्दिनः ॥ तेषाᳬंसहस्रयोजनेवध
न्वानितन्मसि॥५९॥येपथाम्॥येपथाम्पथिरक्षयऽऐलबृदाऽ
आयुर्युधः ॥ तेषाᳬंसहस्रयोजनेवधन्वानितन्मसि ॥ ६० ॥

॥१७०॥

येतीर्त्थानि । प्प्रचरन्तिसृकाहस्त्तानिषङ्गिणः ॥ तेषाᳫंसह
स्स्रयोजनेवधन्न्वानितन्न्मसि ॥ ६१ ॥ येन्नेषु । व्विविद्ध्यन्तिपा
त्रेषुपिबतोजनान् ॥ तेषाᳫंसहस्स्रयोजनेवधन्न्वानितन्न्मसि
॥ ६२ ॥ यऽएतावन्तᳪ ॥ यऽएतावन्तश्च्चभूयाᳫंसश्च्चदिशो
रुद्द्राव्वितस्त्थिरे ॥ तेषाᳫंसहस्स्रयोजनेवधन्न्वानितन्न्मसि ॥ ६३ ॥
नमोस्त्तु । रुद्द्रेब्भ्योयेदिवियेषांव्वर्षमिषवᳪ ॥ तेब्भ्योदशप्प्रा
चीर्द्दशदक्क्षिणादशप्प्रतीचीर्द्दशोदीचीर्द्दशोर्द्ध्वाः ॥ तेब्भ्योन

मोऽअस्तुतेनोवन्तुतेनोम्मृडयन्तुतेयन्द्विष्मोयश्चनोद्वेष्टितमे

षाञ्जम्भेदद्ध्मः ॥६४॥ नमोस्तु । रुद्रेभ्योयेन्तरिक्क्षेयेषां

व्वातऽइषवः ॥ तेभ्योदशप्प्राचीर्द्दशदक्क्षिणादशप्प्रतीचीर्द्दशो

दीचीर्द्दशोर्द्ध्वाः ॥ तेभ्योनमोऽअस्तुतेनोवन्तुतेनोम्मृडयन्तुते

यन्द्विष्मोयश्चनोद्वेष्टितमेषाञ्जम्भेदद्ध्मः ॥६५॥ नमोस्तु ।

रुद्रेभ्योयेपृथिव्याँय्येषामन्नमिषवः ॥ तेभ्योदशप्प्राचीर्द्दश

दक्क्षिणादशप्प्रतीचीर्द्दशोदीचीर्द्दशोर्द्ध्वाः॥तेभ्योनमोऽअस्तु

तेनोऽवन्तुतेनोऽमृडयन्तुतेयन्द्विष्म्मोयश्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ॥ ६६ ॥ [ २०-९ ] इतिश्रीवाजसनेयसंहितायांषोडशोऽध्यायः ॥ १६ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाकसूत्रम् ॥

अश्मन्नूर्जंदश, नमस्तेपञ्चा, श्रिस्तिग्मेनननव, चक्षुषःपिताष्टा, वाशुःशिशानःसप्तदशो, देनंक्रमध्वमाग्निनापञ्चदशकौ, शुक्रज्योतिश्चसप्त, मꣳस्तनंत्रयोदश, नवैकोनशतं [ मं. ९९ अ. १७ अनु. ९ ] ॥ हरिःॐ ॥ अश्मन्नूर्जम् ॥ अश्मन्नू

ऊर्ज्जम्पर्व्वतेशिश्रियाणामद्भ्यऽओषधीभ्योवनस्पतिभ्योऽ
अधिसम्भृतम्पयः ॥ तान्नऽइषमूर्ज्जन्धत्तमरुतꣳसꣳरराणाऽ
अश्मँस्तेक्षुन्मयितऽऊर्ग्यन्द्विष्मस्तन्तेशुगृच्छतु ॥ १ ॥
इमामे । ऽअग्नऽइष्टकाधेनवः सन्त्वेकाचदशचदशचशतञ्च
शतञ्चसहस्रञ्चसहस्रञ्चायुतञ्चायुतञ्चनियुतञ्चनियुतञ्चप्रयुत
ञ्चार्बुदञ्चन्यर्बुदञ्चसमुद्रश्चमध्यञ्चान्तश्चपरार्द्धश्चैतामेऽअग्नऽ
इष्टकाधेनवःसन्त्वमुत्रामुष्मिँल्लोके ॥२॥ ऋतवस्त्थ । ऽऋता

वृधेऽऋतुष्ठास्त्थंऽऋतावृधं॑ ॥ घृतश्चुतौमधुश्चुतौविराजोनाम

कामदुघाऽअक्षीयमाणा॥३॥ समुद्रस्यंत्त्वा॥समुद्रस्यत्त्वाव

कयाग्नेपरिंव्ययामसि ॥ पावकोऽअस्मभ्यंशिवोभव ॥४॥

हिमस्यंत्त्वा । जरायुणाग्नेपरिव्ययामसि॥ पावकोऽअस्म

भ्यंशिवोभव ॥५॥ उपज्ज्मन् ॥ उपज्ज्मन्नुपवेतसेवतरनदी

ष्वा ॥ अग्नेपित्तमपामसिमण्डूकिताभिरागहिसेमन्नोयज्ञ

म्पावकवर्ण्णशिवङ्कृधि॥६॥ अपामिदम्॥ अपामिदन्न्ययन

समुद्रस्यनिवेशनम् ॥ अन्यॉंस्तेऽअस्मत्तपन्तुहेतयः पाव

कोऽअस्मभ्यᳯंशिवोभव ॥ ७ ॥ अग्नेपावक । रोचिषां

मन्द्रयांदेवजिह्वयां ॥ आदेवान्वक्षियक्षिच ॥ ८ ॥ सनः

पावकदीदिवोग्नेदेवाँ २ ॥ इहावह ॥ उपयज्ञᳯंहविश्चनः

॥ ९ ॥ पावकयायः ॥ पावकयायश्चितयन्त्याकृपाक्षामन्नु

रुचऽउपसोनभानुनां ॥ तूर्वन्नयामन्नेतशस्यनूरणऽआयोघृणे

नततृपाणोऽअजरः ॥ १० ॥ [ १०-१ ] नमस्ते ॥ नमं

स्त्तेहरंसेशोचिषेनमंस्त्तेऽअस्त्त्वर्च्चिषें ॥ अन्न्याँस्त्तेंऽअस्म्मत्तं

पन्तुहेतयंः पावकोऽअस्म्मभ्यंᳬशिवोभंव ॥ ११ ॥ नृषदे

वेट् ॥ नृपदेवेडंप्सुपदेवेडुर्हिपदेवेडुंनसदेवेट्स्वर्विदेवेट् ॥ १२ ॥

येदेवाः ॥ येदेवादेवानाँय्यज्ञियांयज्ञियांनाᳬसंव्वत्सरीणमु

पंभागमासंते ॥ अहुतादोहविपोयज्ञेऽअस्म्मिन्त्स्वयम्पिबन्तु

मधुंनोघृतस्यं ॥ १३ ॥ येदेवाः ॥ येदेवादेवेष्वधिंदेवत्त्व

मायन्न्येब्रह्मणंᳬपुरऽएतारोंऽअस्य ॥ येभ्योनऽऋतेपवंतेधाम

किञ्चनन्तोदिवोनपृथिव्याऽअधिस्नुषु ॥ १४ ॥ प्राणदाऽअ
पानदाः ॥ प्राणदाऽअपानदाव्यानदावर्चोदावरिवोदाः ॥
अन्न्याँस्तेऽअस्म्मत्तपन्तुहेतयः पावकोऽअस्म्मब्भ्यंᳫं शिवो
भव ॥ १५ ॥ [५-२] अग्निस्तिग्ग्मेन । शोचिषायासद्वि
श्श्वन्न्यत्त्रिणम् ॥ अग्निर्नोवनतेरयिम् ॥ १६ ॥ सऽइमा ।
विश्श्वाभुवनानिजुह्वदृषिर्होतान्न्यसीदत्पितानः ॥ सऽआशि ॥१७४।

१ अग्निस्तिग्मेन । अत्र विसर्गस्य सत्वे कृते "वायुरग्निरग्नेरेकाक्षरे" (शु. य. प्रा. ३ अ. १७ सू.) इत्यनेन अग्निशब्दात्परस्य सस्य षत्वं न । अग्नेः परस्य तिग्मशब्दस्य एकाक्षराभावात् ।

षाद्द्रविणमिच्छमानः प्रथमच्छदवराँ२॥ऽआविवेश ॥ १७ ॥
किꣳस्वित् ॥ किꣳस्विदासीदधिष्ठानमारम्भणङ्कतमत्स्वि
त्कथासीत् ॥ यतोभूमिञ्जनयन्विश्वकर्म्माविद्यामौर्णोन्म
हिनाविश्वचक्षाः ॥ १८ ॥ विश्वतश्चक्षुरुत । विश्वतोमुखो
विश्वतोबाहुरुतविश्वतस्पात् ॥ सम्बाहुभ्यान्धमतिसम्पतं
त्रैर्द्यावाभूमीजनयन्देवऽएकः ॥ १९ ॥ किꣳस्वित् ॥ किꣳ
यं. २० स्विद्वनङ्कऽउसवृक्षऽआसयतोद्यावापृथिवीनिष्टतक्षुः ॥ मनी

षिणोमनंसापृच्छतेदुतद्यदुध्यातिंष्ठुद्भुवंनानिधारयंन् ॥ २० ॥
यातें ॥ यातेधामांनिपरमाणियावमायामंद्ध्यमाव्विंश्श्वकर्म्मन्नु
तेमा ॥ शिक्क्षासखिंब्भ्योहुविषिंस्वधावःस्वयँय्यंजस्वतन्वंवृ
धानः ॥ २१ ॥ व्विंश्श्वंकर्म्मन्हुविषा । व्वावृधानःस्वयँय्यंजस्व
पृथिवीमुतद्याम् ॥ मुह्यंन्त्वन्न्येऽअभितंःसपत्नाऽइहास्म्मा
कंम्मघवांसूरिरंस्तु ॥ २२ ॥ व्वाचस्पतिंम् ॥ व्वाचस्पतिंव्वि
श्श्वकंर्म्माणमूतयेंमनोजुवंव्वाजेंऽअद्याहुवेम ॥ सनोव्विश्श्वांनि

हवंनानिजोषाह्विश्वशंम्भूरवंसेसाधुकंर्म्मा ॥ २३ ॥ विश्वंक
र्म्मन्हविषां ॥ विश्वंकर्म्मन्हविषावर्द्धनेनत्रातारमिन्द्रंमकृणो
रवद्ध्यम् ॥ तस्मैविशःसमंनमन्तपूर्व्वीरयमुग्ग्रोविहव्योय
थासंत् ॥ २४ ॥ [ ९-३ ] चक्क्षुंषःपिता । मनंसाहिधीरोघृ
तमेनेऽअजनन्नम्नंमाने ॥ यदेदन्ताऽअदंहहन्तपूर्व्वऽआदि
द्यावांपृथिवीऽअंप्प्रथेताम् ॥ २५ ॥ विश्वकंर्म्माविमंनाः ॥ वि
श्वकंर्म्माविमंनाऽआद्विहांयाधाताविंधातापरमोतसन्दृक् ॥

तेषांमिष्टानिसमिषामंदन्तियत्रां[1]सप्तऽऋषीन्परऽएकमाहुः
॥ २६ ॥ योनं÷। पिताजंनितायोविधाताधामांनिवेदभुवंना
निविश्वां ॥ योदेवानांन्नामधाऽएकंऽएवतᳪंसंम्प्रश्नम्भुवंना
यन्त्यन्न्या ॥ २७ ॥ तऽआयजन्तद्रविणᳪंसमस्म्माऽऋषयᳪंपू
र्वैंजरितारोनभूना ॥ असूर्त्तेंसूर्त्तैंरजांसिनिषत्तेयेभूतानिंसमकृ
ण्वन्निमानिं ॥ २८ ॥ परोदिवा। परऽएनापृथिव्यापरोदेवेभि



---

१ यत्रासप्तऽऋषीन्। अत्र सप्तऋषीन् परे यत्रशब्दस्य ह्रस्वाकारस्य "नरस्सप्तऋषीन्०" (शु. य. प्रा. ३ अ. १२२ सू.) इत्यनेन दीर्घः।

रसुरै[1]र्य्यदस्ति ॥ कꣳस्विद्गर्ब्भम्प्रथमन्दद्ध्रऽआपोयत्त्रदेवाः
समपश्श्यन्तपूर्व्वे ॥ २९ ॥ तमित् ॥ तमिद्गर्ब्भम्प्रथमन्दद्ध्र
ऽआपोयत्त्रदेवाःसमगच्छन्तविश्श्वे ॥ अजस्यनाभावद्ध्येकम
र्प्पितँय्यस्मिन्विश्श्वानिभुवनानितस्त्थुः ॥ ३० ॥ नतम् ॥
नतंविदाथयऽइमाजजानान्न्यद्युष्म्माकमन्तरम्बभूव ॥ नी
हारेणप्प्रावृताजल्प्याचासुतृपऽउक्थशासश्चरन्ति ॥ ३१ ॥

१ अत्र परं तु रेफहकाराभ्याम् (शु. य. प्रा. ४ अ. १०१ सू.) इत्यनेन रकारात्परस्य यकारस्य द्वित्वम् ।

विश्वकर्म्माहि ॥ विश्वकर्म्माह्यजनिष्टदेवऽआदिद्गन्धर्वोऽ
अभवद्द्वितीयः ॥ तृतीयःपिताजनितौषधीनामपाङ्गर्भम्
व्यदधात्पुरुत्रा ॥ ३२ ॥ [८-४] आशुश्शिशानः ॥
आ[१]शुश्शिशानोवृषभोनभीमोघनाघनश्क्षोभणश्चर्षणीनाम् ॥
सङ्क्रन्दनोनिमिषऽएकवीरश्शतꣳसेनाऽअजयत्साकमिन्द्रः
॥ ३३ ॥ सङ्क्रन्दनेनानिमिषेण । जिष्णुनायुत्कारेण ॥१७७॥

१ "आशुःशिशानः" इत्यत्र "प्रत्ययसवर्णं मुदि शाकटायनः" (शु. य. प्रा. ३ अ. ९ सू.) इत्यनेन मुत्संज्ञकेषु शषसान्यतरवर्णपरेषु विसर्जनीयस्य परसवर्णे शकारे प्राप्ते "अविकारं शाकल्यः शषसेषु" (शु. य. प्रा. ३ अ. १० सू.) इत्यनेन परसवर्णो निषिध्यते। एतादृशेष्वन्यस्थलेष्वेवमेव निषेधो ज्ञेयः।

दुश्च्यवनेनंधृष्णुनां ॥ तदिन्द्रैणजयततत्त्संहद्ध्वँय्युधोनरऽ
इषुंहस्त्तेनवृष्णणां ॥ ३४ ॥ सऽइषुंहस्त्तैः ॥ सऽइषुंह
स्त्तैःसानिंषाङ्गिभिंर्व्वशीसʊंस्त्रष्ट्वासयुधऽइन्द्रोगणेनं ॥ सुद्धसृष्ट
जित्त्सोमुपावाहुशर्द्धुग्ग्रधंन्वाप्प्रतिंहिताभिरस्त्तां ॥ ३५ ॥ वृहं
स्प्पतेपरिं । दीयारथैनरक्षोहामित्राँ २॥ऽअपबाधंमानः ॥
प्रभुञ्जन्त्सेनाःप्प्रमृणोयुधाजयंन्नस्म्माकंमेद्ध्यवितारथांनाम्
॥ ३६ ॥ बलविज्ञायस्त्थविंरः ॥ बलविज्ञायस्त्थविंरःप्प्रवींरः

सहस्वान्वाजीसहमानऽउग्रः ॥ अभिवीरो[1]ऽअभिसत्त्वा[2]सहो

जाजैत्रमिन्द्ररथमातिष्ठगोवित् ॥ ३७ ॥ गोत्रभिदङ्गोविदम् ॥

गोत्रभिदङ्गोविदंवज्ज्रबाहुञ्जयन्तमज्मम्प्रमृणन्तमोजसा ॥

इमꣳसंजाताऽअनुवीरयद्ध्वमिन्द्रꣳसखायोऽअनुसꣳरभद्ध्वम्

॥ ३८ ॥ अभिगोत्राणि ॥ अभिगोत्राणिसहसागाहमानोद



१ अभिवीरः । अत्र "अश्वरश्मि°" (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन वकारे परे अभि इत्यस्य ह्रस्वेकारस्य दीर्घेकारे प्राप्ते "अभिविर्व्येवंवीर°" (शु. य. प्रा. ३ अ. १०० सू.) इत्यनेन वीरपरे अभेर्दीर्घनिषेध.। २ अभिसत्त्वा । अत्र "भाविभ्यः सः षं समानपदे" (शु. य. प्रा. ३ अ. ५८ सू.) इत्यनेन सस्य षत्वे प्राप्ते "अनुसन्तनोतुबृहस्पतिसुतस्य सुसमिद्धायसुसन्दशमभिसत्त्वा" (शु. य. प्रा. ३ अ. ८२ सू.) इत्यनेन प्रकृतिभावे षत्वाभावः ।

योव्वीरश्शतमंन्युरिन्द्रं÷ ॥ दुश्च्यवनश्पृंतनाषाडेयुद्ध्योस्म्मा
कुड्ढसेनांऽअवतुप्प्रयुत्त्सु ॥ ३९ ॥ इन्द्रंऽआसाम् ॥ इन्द्रंऽ
आसान्नेताबृहस्प्पतिर्द्दक्क्षिणायज्ञश्पुरऽएंतुसोमं÷ ॥ देवसेना
नांमभिभञ्जतीनाञ्जयंन्तीनाम्मरुतोंयन्त्वग्ग्रेम् ॥ ४० ॥
इन्द्रंस्यव्वृष्ण्णं÷ ॥ इन्द्रंस्यव्वृष्ण्णोव्वरुणस्यराज्ञंऽआदित्त्यानां
म्मरुताᳪंशर्द्धंऽउग्ग्रम् ॥ महामंनसाम्भुवनच्च्यवानाङ्घोषोंदे
वानाञ्जयंतामुदस्त्थात् ॥ ४१ ॥ उद्धर्षय । मघवन्नायुंधा

न्युत्त्सत्त्वंनाम्मामकानाम्मनांᳬसि॥ उद्वृत्रहन्न्वाजिनांव्वाजि
नान्युद्रथांनाञ्जयंताँऽयन्तुघोषाᳬ ॥ ४२ ॥ अस्म्माकमि
न्द्रः ॥ अस्म्माकमिन्द्रᳬसमृतेषुद्ध्वजेष्वस्म्माकँय्याऽइषवस्
त्ताजंयन्तु ॥ अस्म्माकंव्वीराऽउत्तरेभवन्त्वस्म्माँ२॥ऽउदेवाऽ
अवताहवेषु ॥ ४३ ॥ अमीषांच्चित्तम् ॥ अमीषांच्चित्तम्प्प्रति
लोभयन्तीगृहाणाङ्गान्न्यप्प्वेपरेहि ॥ अभिप्प्रेहिनिर्दहहृत्त्सु
शोकैरन्धेनामित्राऽस्त्तमसासचन्ताम् ॥ ४४ ॥ अवसृष्टापरा ।

पत॑शरव्ये॒ब्रह्म॑संशिते ॥ गच्छा॒मित्रा॒न्प्रप॑द्य॒स्व॒मामीषाङ्क

ञ्चनोच्छिषः ॥ ४५ ॥ प्रेतं ॥ प्रेता॒जय॑ता॒नर॒ऽइन्द्रो॑वः॒शर्म्म

यच्छतु ॥ उ॒ग्रावः॑ सन्तुबा॒हवो॑नाधृ॒ष्यायथास॑थ ॥ ४६ ॥

अ॒सौया। सेना॑म्मरुतः॒परे॑षाम॒भ्यैति॑न॒ऽओज॑सा॒स्पर्द्ध॑माना ॥

ताङ्गू॑हत॒तम॒सापव्रतेन॒यथा॒मीऽअ॒न्योऽअ॒न्यन्नजा॒नन् ॥४७॥

यत्र॑बा॒णाः। स॒म्पत॑न्तिकु॒मारा॒विशि॒खाऽइ॑व॥ तन्न॒ऽइन्द्रो॒बृह

१ प्रेताजयतानरः। अत्र जयतशब्दस्य ह्रस्वाकारस्य "धारयामयोजात्र" (शु. य. प्रा. ३ अ. १०८ सू.) इत्यनेन नकारे परे दीर्घाकारः।

स्प्पतिरदितिः᳘शर्म्मयच्छतुवि[1]श्वाहाशर्म्मयच्छतु ॥४८॥ मर्म्मा
णिते ॥ मर्म्माणितेवर्म्मणाच्छादयामिसोमस्त्वाराजामृतेनानु
वस्ताम् ॥ उरोर्वरीयोवरुणस्तेकृणोतुजयन्तन्त्वानुदेवामदन्तु
॥ ४९ ॥ [ १७-५ ] उदेनम् ॥ उदेनमुत्तरान्नयाग्नेघृतेनाहुत ॥
रायस्पोषेणसꣳसृजप्रजयाचबहुङ्कृधि ॥५०॥ शतम् ॥९००॥
इन्द्रेमम् ॥ इन्द्रेमम्प्रतरान्नयसजातानामसद्वशी ॥ समेनंव
र्चसासृजदेवानाम्भागदाऽअसत् ॥ ५१ ॥ यस्यंकुर्म्मः ॥

१ विश्वाहा । अत्र नरहामित्रेषु च ( शु. य. प्रा. ३ अ. १०२ सू. ) इत्यनेन हा परे विश्वशब्दस्य ह्रस्वाकारस्य दीर्घाकारः ।

यस्यंकुम्भोगृहेहविस्त्तमंग्ग्नेवर्द्धयात्त्वम् ॥ तस्म्मैदेवाऽअधिब्र
वन्नयञ्चब्रह्मंणस्पतिंः ॥ ५२ ॥ उदुंत्त्वा ॥ उदुंत्त्वाव्विश्श्वे
देवाऽअग्नेभरंन्तुचित्तिभिंः ॥ सनोंभवशिवस्त्वꣳसुप्प्रतीको
विभावंसुः ॥ ५३ ॥ पञ्चदिशंः ॥ पञ्चदिशोदैवींर्य्यज्ञमंव
न्तुदेवीरपामंतिन्दुर्म्मंतिम्बाधंमानाः ॥ रायस्प्पोषेयज्ञपंतिमा
भजंन्तीरायस्प्पोषेऽअधियज्ञोऽअंस्त्थात् ॥ ५४ ॥ समिंद्धेऽअ
ग्नौ॥समिंद्धेऽअग्नावधिमामहानऽउक्थपंत्रऽईड्योगृभीतः॥

सं. ३१
४४३

तप्स्तङ्कर्म्मम्परिगृह्यायजन्तोर्ज्जायद्यज्ञमयजन्तदेवाः ॥ ५५ ॥
दैव्यायधर्त्रे । जोष्टेदेवश्श्रीश्श्रीमनाश्शतपयाः ॥ परिगृह्यदे
वायज्ञमायन्देवादेवेभ्योऽअध्वर्य्यन्तोऽअस्थुः ॥ ५६ ॥
वीतᳬहविः । शमितᳬशमितायजध्यैतुरीयोयज्ञोयत्रहव्यमे
ति ॥ ततोवाकाऽआशिषोनोजुषन्ताम् ॥ ५७ ॥ सूर्य्यर
श्मिर्हरिकेशः । पुरस्तात्सविताज्योतिरुदयाँ२॥ऽअजस्रम् ॥ ॥ १८१ ।
तस्यपूषाप्रसवेयातिविद्वान्सम्पश्यन्विश्वाभुवनानिगोपाः

॥ ५८ ॥ व्विमानंऽएषः ॥ व्विमानंऽएषदिवोमद्ध्यंऽआस्तऽ
आपप्प्रिवान्रोदसीऽअन्तरिक्षम् ॥ सव्विश्वाचीरभिचष्टेघृताची
रन्तरापूर्व्वमपरञ्चकेतुम् ॥ ५९ ॥ उक्षासमुद्रः ॥ उक्षासमु
द्रोऽअरुणःसुपर्णःपूर्व्वस्ययोनिम्पितुराविवेश ॥ मद्ध्येदिवोनि
हितम्पृश्निरश्माविचक्रमे[1]रजसस्पात्यन्तौ ॥ ६० ॥ इन्द्रं
व्विश्वाः ॥ इन्द्रंव्विश्वाऽअवीवृधन्त्समुद्रव्यचसङ्गिरः ॥ रथी

१ रजसस्पात्यन्तौ इति पदं "अध्वनो रजसो रिषः स्पृशस्पातौ" (शु. य. प्रा. ३ अ. २८ सू.) इत्यनेन रजसपरस्य विसर्जनीयस्य पाति पदे परे सकारे रूपम्।

तंम॑ह॒श्रीनांव्वाजांना॒ᳬसत्त्पंतिम्पतिम् ॥ ६१ ॥ दे॒वहू॒र्य्युज्ञ॒श ॥
दे॒वहू॒र्य्युज्ञऽआचंव्वक्षत्सु॒म्न॒हू॒र्य्युज्ञऽआचंव्वक्षत॒॥ यक्षंद॒
ग्निर्द्देवोदे॒वाँ २॥ऽआचंव्वक्षत् ॥ ६२॥ व्वाजंस्यमा । प्प्रसवऽ
उंद्ग्राभेणोदंग्ग्रभीत् ॥ अधांसुपत्क्ना॒निन्द्रोंमेनिग्ग्रा॒भेणाधंराँ
२॥ऽअकः ॥ ६३ ॥ उ॒द्ग्राभञ्च॑ । निग्ग्रा॒भञ्च॒ब्रह्मंदे॒वाऽअंवी
वृधन् ॥ अधांसपत्क्नांनिन्द्रा॒ग्ग्नीमेंव्विषू॒चीना॒न्व्यस्यताम्॥६४॥
[१५-६] क्रमंद्ध्वम॒ग्ग्निनां ॥ क्रमंद्ध्वम॒ग्ग्निना॒नाक॒मुक्ख्यह॒

हस्त्तैषुबिब्भ्रंतः ॥ दिवस्पृष्ठᳩस्वर्ग्गत्त्वामिश्श्रादेवेभिराद्धम्
॥ ६५ ॥ प्राचीमनु । प्प्रदिशम्प्प्रेहिविद्वानग्ग्नेरग्ग्नेपुरोऽअग्ग्नि
र्ब्भवेह ॥ विश्श्वाऽआशादीद्यानोविभाह्यूर्ज्जन्नोधेहिद्विपदेच
तुष्प्पदे ॥ ६६ ॥ पृथिव्याऽअहम् ॥ पृथिव्याऽअहमुदन्तरि
क्क्षमारुहमन्तरिक्क्षाद्दिवमारुहम् ॥ दिवोनाकस्यपृष्ठात्स्व
र्ज्ज्योतिरगामहम् ॥ ६७ ॥ स्वर्यन्तः ॥ स्वर्यन्तोनापेक्क्षन्तऽ
आद्याᳩरोहन्तिरोदसी ॥ यज्ञँय्येविश्वतोधारᳩसुविद्वाᳩसो

व्वितेनिरे ॥ ६८ ॥ अग्नेप्प्र ॥ अग्नेप्प्रेहिंप्प्रथमोदेवयताञ्चक्षु
र्द्देवानांमुतमर्त्त्यानाम् ॥ इयंक्क्षमाणाभृगुंभिꣳसजोषाꣳस्स्वर्य्य
न्तुयजंमानाꣳस्वस्त्ति ॥ ६९ ॥ नक्क्तोषासा ॥ नक्क्तोषासास
मंनसाव्विरूपेधापयेतेशिशुमेकꣳसमीची ॥ द्यावाक्क्षामारु
क्क्मोऽअन्तर्व्विभातिदेवाऽअग्निन्धारयन्द्रविणोदाः ॥ ७० ॥
अग्नेसहस्राक्क्ष । शतमूर्द्धञ्छतन्तेप्प्राणाःसहस्रंव्व्यानाः ॥
त्वꣳसाहस्रस्यंरायऽईशिषेतस्मैतेव्विधेमव्वाजायस्वाहा ॥ ७१ ॥

॥१८३॥

सुपर्णोऽसि । गुरुत्मान्पृष्ठेपृथिव्याः सीद ॥ भासान्तरिक्ष
मापृणज्ज्योतिषादिवमुत्तभानतेजसादिशउद्दृꣳह ॥७२॥
आजुह्वानꣳसुप्रतीकं । पुरस्तादग्ने स्वँय्योनिमासीदसाधु
या ॥ अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्विश्वेदेवायजमान
श्चसीदत ॥ ७३ ॥ ताꣳसवितुः ॥ ताꣳसवितुर्व्वरेण्यस्यचि
त्रामाहंवृणेसुमतिंविश्वजन्याम् ॥ यामस्यकण्वोऽअदुहत्प्र
पीनाꣳसहस्रधाराम्पयसामहीङ्गाम् ॥ ७४ ॥ विधेमते ।
४५१

परमेजन्मंन्नग्ग्नेव्विधेमस्त्तोमैरवैरेसधस्त्थे ॥ यस्म्माद्योनेरुदा
रिथायजेतम्प्रत्त्वेहवीꣳषिजुहुरेसमिद्धे ॥ ७५ ॥ प्रेद्धोऽ
अग्ग्ने ॥ प्रेद्धोऽअग्ग्नेदीदिहिपुरोनोजस्त्रयासूर्म्म्यायविष्ठ ॥
त्वाꣳशश्श्वन्तऽउपयन्तिव्वाजाः ॥ ७६ ॥ अग्ग्नेतम् ॥
अग्ग्नेतमद्याश्श्वन्नस्त्तोमैःक्क्रतुन्नभद्द्रꣳहृदिस्पृशम् ॥ ऋद्ध्यामा
तऽओहैः ॥ ७७ ॥ चित्तिञ्जुहोमि ॥ चित्तिञ्जुहोमिमनसा ॥१८४॥

१ रिथ यजेतम् । इति पदे । अत्र "अथोदारिथ." (शु. य. प्रा. ३ अ. ११३ सू.) इत्यनेन रिथशब्दस्य यकारे परे दीर्घविधानात् रिथायजेतम् ।

घृतेनयथादेवाऽइहागमन्न्वीतिहोत्राऽऋतावृधः ॥ पत्त्येविश्श्व
स्यभूमनोजुहोमिविश्श्वकर्म्मणेविश्श्वाहादाब्भ्यꣳहविः ॥७८॥
सप्ततै । ऽअग्नेसमिधःसप्तजिह्वाःसप्तऽऋषयꣳसप्तधाम
प्प्रियाणि ॥ सप्तहोत्राꣳसप्तधात्त्वायजन्तिसप्तयोनीरापृण
स्वघृतेनस्वाहा ॥ ७९ ॥ [१५-७] शुक्रज्ज्योतिश्च । चित्र
ज्ज्योतिश्चसत्त्यज्ज्योतिश्चज्ज्योतिष्म्माँश्च ॥ शुक्रश्चऽऋतपा
श्चात्त्यꣳहाः ॥ ८० ॥ ईदृङ्ङ् ॥ ईदृङ्ङान्यादृङ्ङ्सदृङ्ङ्

प्प्रंतिसदृङ्ङ्[1] ॥ मितश्चंसम्मितश्चंसभंराः ॥८१॥ ऋतश्चंसत्त्य
श्चंध्रुवश्चंधरुणंश्च ॥ धर्त्ताचंविधर्त्ताचंविधारयः ॥ ८२ ॥
ऋतजिच्चं। सत्त्यजिच्चंसेनजिच्चंसुषेणश्च ॥ अन्तिमित्रश्चंदूरेऽअ
मित्रश्चंगणः ॥८३॥ ईदृक्षासऽएतादृक्षासः ॥ ईदृक्षासऽए
तादृक्षासऽऊषुणः सदृक्षासः प्प्रंतिसदृक्षासऽएतन ॥ मिता
संश्चंसम्मितासोनोऽअद्यसभंरसोमरुतोयज्ञेऽअस्मिन् ॥८४॥



१ प्रतिसदृङ्च अत्र "भाविभ्यः सः षं समानपदे" (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन षकारे प्राप्ते "अनुसन्तनोतु" (शु. य. प्रा. ३ अ. ८२ सू.) इत्यनेन निषिद्ध्यते। २ प्रतिसदृक्षासः। अत्र "भाविभ्यः सः षं समानपदे" (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन मूर्धन्यषत्वापत्तौ "अनुसन्तनोतु" (शु. य. प्रा. ३ अ. ८२ सू.) इत्यनेन निषेधे न षत्वम्।

स्वतवाँश्च । प्प्रघासीचसान्तपनश्चगृहमेधीच ॥ क्रीडीचशा
कीचोज्जेषी ॥ ८५ ॥ इन्द्रन्दैवीः ॥ इन्द्रन्दैवीर्व्विशोमरुतो
नुवर्त्मानोभवन्यथेन्द्रन्दैवीर्व्विशोमरुतोनुवर्त्मानोभवन् ॥
एवमिमँय्यजमानन्दैवीश्चव्विशोमानुषीश्चानुवर्त्मानोभव
न्तु ॥ ८६ ॥ [७-८] इमꣳस्तनम् ॥ इमꣳस्तनमूर्ज्जस्व
न्तन्धयापाम्प्रपीनमग्नेसरिरस्यमध्ये ॥ उत्सञ्जुषस्वमधुमन्त
मर्व्वन्त्समुद्रियꣳसदनमाविशस्व ॥ ८७ ॥ घृतम्मिमिक्षे ।

घृतमस्ययोनिर्घृतेश्रितोघृतम्वस्यधाम ॥ अनुष्वधमावहमा
दयस्वस्वाहाकृतंवृषभवक्षिहव्यम् ॥ ८८ ॥ समुद्राद्दूर्म्मिः ॥
समुद्राद्दूर्म्मिर्म्मधुमाँ२॥ऽउदारदुपाꣳशुनासममृतत्त्वमानट् ॥
घृतस्यनामगुह्यँय्यदस्तिजिह्वादेवानाममृतस्यनाभिः ॥८९॥
वयन्नाम ॥ वयन्नामप्प्रब्रवामाघृतस्यास्मिन्यज्ञेधारयामान
मोभिः ॥ उपब्रह्माशृणवच्छस्यमानञ्चतुःशृङ्गोवमीद्गौरऽ ॥१८६॥

---

१ धारयामानमोभिः। अत्र धारयाम नमोभिः इति पदे। अत्र "धारयाम योजाव" ( शु. य. प्रा. ३ अ. १०८ सू. ) इत्यनेन धारयाम इत्यादिपदेभ्यः परे नकारे सति पूर्वह्रस्वाकारस्य दीर्घो भवति। तेन धारयामानमोभिः।

एतत् ॥ ९० ॥ चत्त्वारिशृङ्गा ॥ चत्त्वारिशृङ्गास्त्रयोऽअस्य
[2]पादाद्द्वेशीर्षेसप्तहस्त्तासोऽअस्य ॥ त्रिधाबद्धोवृषभोरोरवीति
महोदेवोमर्त्त्याँ२॥ऽआविवेश ॥ ९१ ॥ त्रिधाहितम् ॥ त्रिधा
हितम्पणिभिर्ग्गुह्यमानङ्गविदेवासोघृतमन्न्वविन्दन् ॥ इन्द्रऽ
एकह्सूर्य्यऽएकञ्जजानव्वेनादेकंस्वधयानि[3]ष्टतक्षुः ॥९२॥
एताऽअर्षन्ति ॥ एताऽअर्षन्तिहृद्यात्त्समुद्राच्छतव्व्रजारिपुणा

१ चत्वारि श्रृङ्गाणि इति पदे "निशब्दो बहुलम्" (शु. य. प्रा. ३ अ. १८ सू.) इत्यनेन पदान्तीयश्रृङ्गाणिपदस्य निशब्दस्य लोपः। २ अस्य पादानि इत्यत्रापि "निशब्दो बहुलम्" इत्यनेन पादानिपदस्य निशब्दस्य लोपः। ३ निष्टतक्षुः अत्र "ततक्षौ" (शु. य. प्रा. ३ अ. ७१ सू.) इत्यनेन ततक्षूत्तरपदे निरुपसर्गस्य विसर्गस्य षकारे "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन ष्टुत्वेन जातस्य टकारस्य द्वित्वम्।

सं. १२

नावचक्क्षे॥ घृतस्युधाराऽअभिचांकशीमिहिरुण्ण्ययोव्वेतसोम
द्धर्यंऽआसाम् ॥ ९३ ॥ सुम्म्यक्कस्त्रंवन्ति । सुरितोनधेनाऽ
अुन्तर्हृदामनंसापूयमांनाः ॥ एतेऽअंर्षन्त्युर्म्मयोघृतस्यंमृगाऽ
इंवक्क्षिपुणोरीषंमाणाः ॥९४॥ सिन्धोंरिवप्प्राद्धुने । शूघना
सोव्वातंप्प्रमियःपतयन्तियुह्वाः ॥ घृतस्युधाराऽअरुषोनव्वाजी
काष्ठांभिुन्दन्नुर्म्मिभिःपिन्न्वंमानः ॥ ९५ ॥ अुभिप्प्रंवन्त ॥ ॥१८७॥
अुभिप्प्रंवन्तुसमंनेवुयोषाःकल्ल्याण्ण्युःस्मयंमानासोऽअुग्निं

म् ॥ घृतस्यधाराꣳसमिधोनसन्तताजुषाणोहर्य्यतिजातवेदाꣳ
॥ ९६ ॥ कन्न्याऽइवव्वहतुम् ॥ कन्न्याऽइवव्वहतुमेतवाऽउऽअ
ञ्ज्यञ्जानाऽअभिचाकशीमि ॥ यत्रसोमꣳसूयतेयत्रयज्ञोघृत
स्यधाराꣳऽअभितत्त्पवन्ते ॥ ९७ ॥ अब्भ्यर्षत । सुष्टुतिङ्ग
व्व्यमाजिमस्म्मासुभद्द्राद्द्रविणानिधत्त ॥ इमꣳय्यज्ञन्नयतदेवता
नोघृतस्यधारामधुमत्त्पवन्ते ॥ ९८ ॥ धामन्ते ॥ धामन्ते

---

१ अत्र "परं तु रेफहकाराभ्याम्" (शु. य. प्रा.अ.सू.) इत्यनेन यकारस्य द्वित्वम् । यत्र रेफहकारात्परः स्पर्शवर्णस्तत्र तु "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (शु.य.प्रा.४ अ.१०२ सू.) इत्यनेनैव द्वित्वं भवति । तथैव यत्र रेफहकाराभ्यां परः स्पर्शातिरिक्तवर्णस्तत्र तु "परं तु रेफहकाराभ्याम्" इत्यनेन द्वित्वम् ।

विश्श्वम्भुवनमधिश्श्रितमन्तः समुद्द्रेहृद्द्यन्तरायुषि ॥ अपामनीके समिथेयऽआभृतस्तमश्श्यामम धुमन्तन्तऽऊर्म्मिम् ॥९९॥

[ १३-९ ] इतिश्रीवाजसनेयसंहितायांसप्तदशोऽध्यायः ॥१७॥

श्रीवेदपुरुषायनमः ॥ अनुवाकसूत्रम् ॥ व्वाजः, सत्त्य, मूर्द्धचतुष्का, अश्म्मा, ऽग्निस्त्रिका, वंशुः पञ्चौ, काचतस्रो, व्वाजायद्वे, व्वाजस्यन्वष्टा, ऽऋताषाट्त्रयोदशा, ग्निर्युनज्मि सप्त, यदाकूता, द्वात्रिंहत्त्यायदशकौ, त्रयोदशसप्तसप्ततिः ॥

[ अ. १८ मं. ७७ अनु. १३ ] हरिः ॐ ॥ व्वाजश्च्च[1] । मेप्प्रसव
श्च्चमेप्प्रयतिश्चमेप्प्रसितिश्चमेधीतिश्चमेक्क्रतुश्चमेस्वरश्चमेश्श्लो
कश्चमेश्श्रवश्चमेश्श्रुतिश्चमेज्ज्योतिश्चमेस्वश्चमेयज्ञेनकल्प
न्ताम् ॥१॥ प्प्राणश्च । मेपानश्चमेव्यानश्चमेसुश्चमेचित्तञ्चमऽ
आधीतञ्चमेव्वाक्चमेमनश्चमेचक्क्षुश्चमेश्श्रोत्रञ्चमेदक्क्षश्चमे
बलञ्चमेयज्ञेनकल्पन्ताम् ॥ २ ॥ ओजश्च । मेसहश्चमऽ

१ अत्र वाजश्च्च इत्यत्र जकारोत्तरवर्तिनो विसर्जनीयस्य चकारे परे "चछयोः शम्" (शु. य. प्रा. ३ अ. ८ सू.) इत्यनेन शकारे कृते "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन शकारात्परस्य स्पर्शवर्णस्य चकारस्य द्वित्वम् । एवमेतादृशेष्वन्येषु स्थलेषु बोध्यम् ।

आत्त्मा चमे तनूश्चमे शर्म्मं चमे वर्म्मं चमेऽङ्गानि चमेऽस्त्थीनि च
मेपरूᳬंषि चमे शरीराणि चमऽआयुश्चमे जरा चमे यज्ञेनकल्प
न्ताम् ॥ ३ ॥ ज्यैष्ठ्यञ्च । मऽआधिपत्त्यञ्चमे मन्न्युश्चमे भा
मश्चमेमश्चमेम्भश्चमे जेमा चमे महिमा चमे वरिमा चमे प्प्रथि
मा चमे वर्षिमा चमे द्राघिमा चमे वृद्धञ्चमे वृद्धिश्चमे यज्ञेनकल्प
न्ताम् ॥ ४ ॥ [४-१] सत्त्यञ्च । मेश्श्रद्धा चमे जगच्चमे ध
नञ्चमे विश्वञ्चमे महश्चमे क्क्रीडा चमे मोदश्चमे जातञ्चमे जनिष्ष्य

मांणञ्चमेसूक्तञ्चंमेसुकृतञ्चंमेयुज्ञेनंकल्पन्ताम् ॥ ५ ॥ ऋतञ्चं।
मेमृतंञ्चमेयुक्ष्मञ्चमेनांमयच्चमेजीवातुंश्चमेदीर्ग्घायुत्त्वञ्चमेन
मित्रञ्चमेभंयञ्चमेसुखञ्चंमेशयंनञ्चमेसूषाश्चंमेसुदिनंञ्चमेयुज्ञे
नंकल्पन्ताम् ॥ ६ ॥ युन्ताचं। मेधुर्त्ताचंमेक्षेमंश्चमेधृतिं
श्चमेविश्वंञ्चमेमहंश्चमेसंविच्चंमेज्ञात्रंञ्चमेसूश्चंमेप्प्रसूश्चंमेसीरं
ञ्चमेलयंश्चमेयुज्ञेनंकल्पन्ताम् ॥ ७ ॥ शञ्चं। मेमयंश्चमे
प्प्रियञ्चंमेनुकामश्चंमेकामंश्चमेसौमनसश्चंमेभगंश्चमेद्रविण

त्त्वमेभुद्रञ्चंमेश्श्रेयंश्चमेव्वसीयश्चमेयशंश्चमेयुज्ञेनंकल्पन्ताम्
॥ ८ ॥ [४-२] ऊर्क्च ॥ ऊर्क्चमेसूनृताचमेपयंश्चमेरसंश्चमेघृ
तञ्चंमेमधुंचमेसग्धिश्चमेसपीतिश्चमेकृषिश्चंमेवृष्टिश्चमेजैत्रं
ञ्चमऽऔद्भिद्यञ्चमेयुज्ञेनंकल्पन्ताम् ॥ ९ ॥ रयिश्च । मेरा
यंश्चमेपुष्टञ्चंमेपुष्टिश्चमेविभुचंमेप्रभुचंमेपूर्णञ्चंमेपूर्णतरञ्च
मेकुयंवञ्चमेक्षितञ्चमेन्नंञ्चमेक्षुच्चमेयुज्ञेनंकल्पन्ताम्॥ १० ॥ ॥१९०॥
वित्तञ्च । मेवेद्यंञ्चमेभूतञ्चंमेभविष्यच्चंमेसुगञ्चंमेसुपत्थ्यु

ञ्चमऽऋद्धञ्चमेऽऋद्धिश्चमेक्लृप्तञ्चमेक्लृप्तिश्चमेमतिश्चमेसुमति
श्चमेयज्ञेनकल्पन्ताम् ॥ ११ ॥ व्रीहयश्च । मेयवाश्चमेमा
षाश्चमेतिलाश्चमेमुद्गाश्चमेखल्वाश्चमेप्प्रियङ्गवश्चमेणवश्चमे
श्श्यामाकाश्चमे[1]नीवाराश्चमेगोधूमाश्चमेमसूराश्चमेयज्ञेनक
ल्पन्ताम् ॥ १२ ॥ [४-३] अश्म्मांच । मेमृत्तिकाचमे
गिरयश्चमेपर्व्वताश्चमेसिकताश्चमेव्वनस्प्पतयश्चमेहिरण्यञ्चमे

---

१ नीवाराः । अत्र नि वारहारयोरनवग्रहे ( शु. य. प्रा. ३ अ. १०६ सू. ) इत्यनेन अवग्रहवर्जिते वारहारयोरन्यतरे परे पूर्वो नीत्युपसर्गो दीर्घो भवति । तेन नीवाराः ।

 

 

यंश्चमेश्यामञ्चमेलोहञ्चमेसीसंञ्चमेत्रपुंचमेयज्ञेनंकल्पन्ता
म् ॥ १३ ॥ अग्निश्च । मऽआपंश्चमेवीरुधंश्चमऽओषधयश्च
मेकृष्टपच्याश्चमेकृष्टपच्याश्चमेग्राम्म्याश्चमेपशवंऽआरण्या
श्चमेवित्तञ्चमेवित्तिंश्चमेभूतञ्चमेभूतिंश्चमेयज्ञेनंकल्पन्ताम्
॥ १४ ॥ वसुच । मेवसतिंश्चमेकर्म्मंच ॥ मेशक्तिंश्चमेर्थंश्च
मऽएमंश्चमऽइत्याचमेगतिंश्चमेयज्ञेनंकल्पन्ताम् ॥ १५ ॥
[ ३-४ ] अग्निश्च । मऽइन्द्रंश्चमेसोमंश्चमऽइन्द्रंश्चमेसविता

॥१९१॥

चम ऽइन्द्रश्चमेसरस्वतीचम ऽइन्द्रश्चमेपूषाचम ऽइन्द्रश्चमेबृह
स्पतिश्चम ऽइन्द्रश्चमेयज्ञेनकल्पन्ताम् ॥१६॥ मित्रश्च । म ऽ
इन्द्रश्चमेवरुणश्चम ऽइन्द्रश्चमेधाताचम ऽइन्द्रश्चमेत्वष्टाचम
ऽइन्द्रश्चमेमरुतश्चम ऽइन्द्रश्चमेविश्वेचमेदेवाऽइन्द्रश्चमेयज्ञेन
कल्पन्ताम्॥१७॥ पृथिवीच । म ऽइन्द्रश्चमेन्तरिक्षञ्चम ऽइन्द्र
श्चमेद्यौश्चम ऽइन्द्रश्चमेसमाश्चम ऽइन्द्रश्चमेनक्षत्राणिचम ऽ
इन्द्रश्चमेदिशश्चम ऽइन्द्रश्चमेयज्ञेनकल्पन्ताम्॥१८॥[ ३-५ ]

अद्भ्शुश्च। मेरश्मिश्च मेदाभ्यश्च मेधिपतिश्च मऽउपाᳪशुश्च मे
न्तर्यामश्च मऽऐन्द्रवायवश्च मे मैत्रावरुणश्च मऽआश्विनश्च मे
प्प्रतिप्प्रस्थानश्च मे शुक्रश्च मे मन्थी च मे यज्ञेन कल्पन्ताम्॥ १९॥
आग्ग्रयणश्च । मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च मऽऐन्द्राग्ग्न
श्च मे महावैश्वदेवश्च मे मरुत्त्वतीयाश्च मे निष्केवल्यश्च मे सावित्र
श्च मे सारस्वतश्च मे पात्क्नीवतश्च मे हारियोजनश्च मे यज्ञेन कल्प ॥१९२॥
न्ताम् ॥ २० ॥ स्रुचश्च । मे चमसाश्च मे वायव्यानि च मे द्रोण

कलशश्चमे ग्ग्रावाणश्चमेऽधिषवणेचमे पूतभृच्चमेऽआधवनीयश्च मेवेदिश्चमेबर्हिश्चमेवभृथश्चमेस्वगाकारश्चमेयज्ञेनकल्पन्ताम् ॥ २१ ॥ अग्निश्च । मेघर्म्मश्चमेर्कश्चमेसूर्य्यश्चमेप्प्राणश्चमेश्वमेधश्चमेपृथिवीचमेदितिश्चमेदितिश्चमेद्यौश्चमेङ्गुलयः शक्करयोदिशश्चमेयज्ञेनकल्पन्ताम् ॥ २२ ॥ व्रतञ्च । मऽऋतवश्चमेतपश्चमेसंवत्सरश्चमेहोरात्रेऽऊर्वष्ठीवेबृहद्रथन्तरेच्च मेयज्ञेनकल्पन्ताम् ॥२३॥ [ ५-६ ] एकाच । मेतिस्त्रश्चमेति

यं. ३२

स्त्रश्चमेपञ्चचमेपञ्चचमेसप्तचमेसप्तचमेनवचमेनवचमऽए
कादशचमऽएकादशचमेत्रयोदशचमेत्रयोदशचमेपञ्चदशच
मेपञ्चदशचमेसप्तदशचमेसप्तदशचमेनवदशचमेनवदशच
मऽएकविᳪंशतिश्चमऽएकविᳪंशतिश्चमेत्रयोविᳪंशतिश्चमेत्र
योविᳪंशतिश्चमेपञ्चविᳪंशतिश्चमेपञ्चविᳪंशतिश्चमेसप्तविᳪं
शतिश्चमेसप्तविᳪंशतिश्चमेनवविᳪंशतिश्चमेनवविᳪंशतिश्च ॥ १९६ ॥
मऽएकत्रिᳪंशच्चमऽएकत्रिᳪंशच्चमेत्रयस्त्रिᳪंशच्चमेयज्ञेनक

ल्पन्ताम् ॥२४॥ चतंस्रश्च । मेष्टौचंमेष्टौचंमेद्वादंशचमेद्वादंश
चमेषो[1]डंशचमेषोडंशचमेविꣳशतिश्चंमेविꣳशतिश्चंमेचतु
र्विꣳशतिश्चमेचतुर्विꣳशतिश्चमेष्टाविꣳशतिश्चमेष्टाविꣳशति
श्चमेद्वात्रिꣳशच्चमेद्वात्रिꣳशच्चमेषट्त्रिꣳशच्चमेषट्त्रिꣳशच्चमेच
त्वारिꣳशच्चंमेचत्त्वारिꣳशच्चंमेचतुश्चत्त्वारिꣳशच्चमेचतुश्चत्त्वा
रिꣳशच्चमेष्टाचंत्त्वारिꣳशच्चमेयज्ञेनंकल्पन्ताम् ॥ २५ ॥

---

१ षोडशशब्दे षड् दश इति पदद्वयम् । अत्र षड्दशदन्तयोः संख्यावयोऽर्थयोश्च (शु. य. प्रा. ३ अ. ४७ सू.) इत्यनेन षड्शब्दघटितान्त्यवर्णस्य डकारस्य सोपधे ओकारे षो इति कृते ततः परस्य संख्यावाचिनो दशशब्दस्य दकारस्य मूर्द्धन्ये क्रमेण डकारे च कृते षोडश इति ॥

त्र्यविश्च। मेत्र्यवीचमेदित्यवाट्चमेदित्यौहीचमेपञ्चाविश्चमेप
ञ्चावीचमेत्रिवत्सश्चमेत्रिवत्साचमेतुर्य्यवाट्चमेतुर्य्यौहीचमे
यज्ञेनकल्पन्ताम्॥ २६ ॥ पष्ठवाट्॥ पष्ठवाट्चमेपष्ठौहीचमऽ
उक्षाचमेवशाचमऽऋषभश्चमेवेहच्चमेनड्वाँश्चमेधेनुश्चमेयज्ञे
नकल्पन्ताम्॥२७॥ [४-७] वाजायस्वाहा। प्प्रसवायस्वाहा
पिजायस्वाहाक्रतवेस्वाहावसवेस्वाहाहर्प्पतयेस्वाहाह्नेमुग्धा
यस्वाहामुग्धायवैनंशिनायस्वाहाविनंशिनऽआन्त्यायना

यस्वाहान्त्यांयभौवनायस्वाहाभुवंनस्यपतयेस्वाहाधिंपतये
स्वाहांप्प्रजापतयेस्वाहां ॥ इयन्तेराण्णिमत्रायंयन्तासियमंनऽ
ऊर्ज्जेत्त्वावृष्ट्यैत्त्वाप्प्रजानान्त्वाधिंपत्त्याय ॥ २८ ॥ आयुंर्य्य
ज्ञेनं । कल्प्पताम्प्राणोयज्ञेनंकल्प्पताञ्चक्षुर्य्यज्ञेनंकल्प्पताꣳ
श्रोत्त्रँय्यज्ञेनंकल्प्पतांव्वाग्ग्यज्ञेनंकल्प्पताम्मनोंयज्ञेनंकल्प्पता
मात्त्मायज्ञेनंकल्प्पताम्ब्रह्मायज्ञेनंकल्प्पताञ्ज्योतिर्य्यज्ञेनंक
ल्प्पताꣳस्वर्य्यज्ञेनंकल्प्पताम्पृष्ठँय्यज्ञेनंकल्प्पताँय्यज्ञोयज्ञेनं

शु. य. संहि. कल्प्पताम् ॥ स्तोमंश्च्रयजुंश्च्रऽऋक्चसामंचबृहच्चंरथन्तरञ्चं ॥ पू. अ.

॥१९५॥ स्वंर्द्देवाऽअगन्मामृताऽअभूमप्प्रजापतेःप्प्रजाऽअंभूमव्वेट्स्वा ॥ १८ ॥

हां ॥२९॥ [२-८] व्वाजंस्यनु । प्प्रंसवेमातरंम्महीमदिंतिन्नामव्व

चंसाकरामहे ॥ यस्यांमिदंव्विश्श्वम्भुवंनमाविवेशतस्यांन्नोदेवः

संवितांधर्म्मसाविषत् ॥ ३० ॥ व्विश्श्वेऽअद्य । मरुतोव्विश्श्वंऽऊ

तीव्विश्श्वेंभवन्त्वग्नयःसमिंद्धाः ॥ व्विश्श्वेंनोदेवाऽअवसागंमन्तु ॥१९५॥

व्विश्श्वंमस्तुद्द्रविंणंव्वाजोंऽअस्म्मे ॥ ३१ ॥ व्वाजोनः । सप्तप्प्र

दिशश्चतंस्नोवापरावर्तः ॥ व्वाजोनोविश्वैर्द्देवैर्द्धनंसातविहावं
तु ॥ ३२ ॥ व्वाजोनः ॥ व्वाजोनोऽअद्यप्प्रसुवातिदानंव्वाजो
देवाँ२॥ऽऋतुभिः कल्प्पयाति ॥ व्वाजोहिमासर्व्ववीरञ्जजान
विश्वाऽआशाव्वाजंपतिर्ज्जयेयम् ॥ ३३ ॥ व्वाजः पुरस्तात् ॥
व्वाजः पुरस्त्तादुतमद्ध्यतोनोव्वाजोदेवान्हविषांवर्द्धयाति॥ व्वा
जोहिमासर्व्ववीरञ्चकारसर्व्वाऽआशाव्वाजंपतिर्ब्भवेयम् ॥ ३४॥
सम्मा । सृजामिपयसापृथिव्याःसम्मासृजाम्म्यद्भिरोषधी

भिः ॥ सोहंव्वाजꣳसनेयमग्ग्ने ॥ ३५ ॥ पयः पृथिव्याम् ॥
पयः पृथिव्याम्पयऽओषधीषुपयोदिव्युन्तरिक्क्षेपयोधाः ॥
पयस्वतीःप्प्रदिशःसन्तुमह्यम् ॥३६॥ देवस्यंत्त्वा । सवितुः
प्प्रसवेश्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्याम् ॥ सरस्वत्त्यैव्वा
चोयन्तुर्य्यन्त्रेणाग्ग्नेःसाम्म्राज्ज्येनाभिषिञ्चामि ॥३७॥ [८-९]
ऋताषाडृतधामा ॥ ऋताषाडृतधामाग्ग्निर्ग्गन्धर्व्वस्तस्यौषध ॥१९६॥
योप्सरसोमुदोनाम ॥ सनऽइदम्ब्रह्मक्षत्रम्पातुतस्म्मैस्वाहा

व्वाट्टाब्भ्युहंस्वाहा ॥ ३८ ॥ स६हितोव्विश्वसामा ॥ स६हितो
व्विश्वसामासूर्य्योगन्धर्व्वस्तस्यमरीचयोप्सरसऽआयुवोनाम॥
सनंऽइदम्ब्रह्मक्षत्रम्पातुतस्म्मैस्वाहावाट्टाब्भ्युहंस्वाहा ॥ ३९ ॥
सुषुम्म्णःसूर्य्यरश्मिम्मः ॥ सुषुम्म्णःसूर्य्यरश्मिम्मश्चन्द्रमागन्ध
र्व्वस्तस्यनक्षत्राण्ण्यप्सरसोभेकुरयोनाम॥ सनंऽइदम्ब्रह्मक्षत्र
म्पातुतस्म्मैस्वाहाव्वाट्टाब्भ्युहंस्वाहा ॥ ४० ॥ इषिरोव्विश्वव्यं
चाः ॥ इषिरोव्विश्वव्यंचाव्वातोगन्धर्व्वस्तस्यापोऽअप्सरसऽऊ

ज्ज्ञोनामं ॥ सनंऽइदम्ब्रह्मक्षत्रम्पांतुतस्म्मैस्वाहावाट्ताब्भ्यः
॥१९७॥ स्वाहा॑ ॥ ४१ ॥ भुज्युःसुपर्ण्णः ॥ भुज्युःसुपर्ण्णोयज्ञोगं ॥ १८ ॥
न्धर्वस्तस्यदक्षिणाऽअप्सरसंस्तावानामं ॥ सनंऽइदम्ब्रह्मक्ष
त्रम्पांतुतस्म्मैस्वाहावाट्ताब्भ्यःस्वाहा॑ ॥ ४२ ॥ प्रजापंतिर्व्वि
श्वकंर्म्मा ॥ प्रजापंतिर्व्विश्वकंर्म्मामनोगन्धर्वस्तस्यंऽऋक्सा
मान्यंप्सरसऽएष्टयोनामं ॥ सनंऽइदम्ब्रह्मक्षत्रम्पांतुतस्म्मैस्वा ॥१९७॥
हावाट्ताब्भ्यःस्वाहा॑ ॥ ४३ ॥ सनः ॥ सनोभुवनस्यपतेप्र

जापतेयस्यंतऽउपरिगृहायस्यवेह ॥ अस्मैब्रह्मणेस्मैक्षत्राय
महिशर्म्मयच्छस्वाहा ॥ ४४ ॥ समुद्रोसि ॥ समुद्रोसिन
भंस्वानार्द्दांनुश्शम्भूर्म्मयोभूरभिमांव्वाहिस्वाहामारुतोसिम
रुतांङ्गणश्शम्भूर्म्मयोभूरभिमांव्वाहिस्वाहावस्यूरसिदुवस्वाञ्छ
म्भूर्म्मयोभूरभिमांव्वाहिस्वाहा ॥ ४५ ॥ यास्ते ॥ यास्तेऽ
अग्नेसूर्य्येरुचोदिवंमातन्वन्तिरश्मिभिः ॥ ताभिर्न्नोऽअद्य
सर्व्वाभीरुचेजनायनस्कृधि ॥४६॥ यावः ॥ यावोदेवाःसूर्य्ये

रुचोगोष्ष्वश्श्वेषुसारुचंः ॥ इन्द्राग्नीताभिःसर्व्वाभीरुचंन्नोधत्त
बृहस्प्पते ॥४७॥ रुचंन्नः ॥ रुचंन्नोधेहिब्राह्मणेषुरुचꣳराजसुन
स्कृधि ॥ रुचंव्विश्श्येषुशूद्रेषुमयिंधेहिरुचारुचम् ॥४८॥ तत्त्वा ।
यामिब्रह्मणाव्वन्दमानस्तदाशास्तेयजमानोहविर्ब्भिः ॥ अहे
डमानोव्वरुणेहबोद्ध्युरुशꣳसमानऽआयुःप्प्रमोषीः ॥ ४९ ॥
स्वर्ण्ण ॥ स्वर्ण्णघर्म्मःस्वाहास्वर्ण्णार्क्कःस्वाहास्वर्ण्णशुक्रःस्वाहा



१ स्वः नः इति पदे। अत्र समानपदत्वाभावेन "ऋषरेभ्यो नकारो णकारं समानपदे" (शु. य. प्रा. ३ अ. ८५ सू.) इत्यनेन णत्वाप्राप्तौ निषण्णाय रथ० (शु. य. प्रा. ३ अ. ८७ सू.) इत्यनेन णत्वनिपातः।

स्वर्ण्णज्ज्योतिः स्वाहा स्वर्ण्णसूर्य्यः स्वाहा ॥५०॥ [ १३-१० ]
अग्निँ युनज्मि ॥ अग्निँ युनज्मि शवसा घृतेन दिव्यꣳ सु
पर्ण्णँ व्वयसा बृहन्तम् ॥ तेन व्वयङ्गमेम ब्ब्रध्नस्य व्विष्टप ꣳ स्वो रुहा
णाऽअधि नाकमुत्तमम् ॥५१॥ शतम् ॥१०००॥ इमौ ते । पक्षा
वजरौ पतत्रिणौ याभ्या ꣳ रक्षा ꣳ स्यपह ꣳ स्यग्ने ॥ ताभ्यां
म्पतेम सुकृतामु लोकँ य्यत्रऽऋषयो जग्मुः प्रथमजाः पुराणाः
॥५२॥ इन्दुर्दक्षः । श्येनऽऋतावा हिरण्यपक्षः शकुनो भु

सं. ३४

रण्ण्युः ॥ महान्त्सधस्त्थेंद्ध्रुवऽआनिषंत्तोनमंस्त्तेऽअस्त्तुमा
मांहिंᳬसीः ॥ ५३ ॥ दिवोमूर्द्धा । सिंपृथिव्यानाभिरूर्ग्गपा
मोषंधीनाम् ॥ विश्वायुंःशर्म्मंसप्प्रथानमंस्प्पथे ॥ ५४ ॥
विश्वंस्यमूर्द्धन् ॥ विश्वंस्यमूर्द्धन्नधिंतिष्ठसिश्रितःसंमुद्रेतेहृदंय
मप्प्स्वायुंरपोदंत्तोदधिम्भिन्त ॥ दिवस्प्पर्ज्जन्न्यांदन्तरिंक्क्षात्पृ
थिव्यास्त्ततोंनोवृष्ट्यांव ॥ ५५ ॥ इष्टोयज्ञः ॥ इष्टोयज्ञोभृ ॥ १९९

१ नमस्प्पथे अत्र "सदो द्यौर्नमस्कृतस्पिता पथेषु" (शु. य. प्रा. ३ अ. ३४ सू.) इत्यनेन कृतं पिता पथ इत्येतेषु परेषु यथासंख्यं सदः द्यौः नमः एतेषां विसर्गस्य सकारो विधीयते । तेनात्र पथे परे नमःपदघटितविसर्जनीयस्य सकारे "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन पकारस्य द्वित्वम् ।

गुभिरासीहविर्वसुभिः ॥ तस्यंनऽइष्टस्यंप्रीतस्यद्रविणेहागमेः

॥ ५६ ॥ इष्टोऽअग्निः ॥ इष्टोऽअग्निराहुतःपिपर्त्तुनऽइष्टꣳ

हविः ॥ स्वगेदन्देवेभ्योनमः ॥ ५७ ॥ [ ७-११ ] यदा

कूतात् ॥ यदाकूतात्समसुस्रोद्धृदोवामनसोवासम्भृतञ्चक्षुषो

वा ॥ तदनुप्रेतंसुकृतामुलोकंय्यत्रऽऋषयोजग्मुःप्रथमजाः

पुराणाः ॥ ५८ ॥ एतꣳसधस्थ ॥ एतꣳसधस्थपरितेददा

मियमावहाच्छेवधिञ्जातवेदाः ॥ अन्वागन्तायज्ञपतिर्वोऽअ

त्रृतꣳस्म्मंजानीतपरमेव्योमन् ॥ ५९ ॥ एतञ्ज्ञानाथ । परमे
व्योमन्देवाः सधस्त्थाव्विदरूपमस्य ॥ यदागच्छात्त्पथिभि
र्द्देवयानैरिष्टापूर्त्तेकृणवाथाविरस्म्मै ॥ ६० ॥ उद्बुध्यस्व ॥
उद्बुध्यस्वाग्ग्नेप्रतिजागृहित्त्वमिष्टापूर्त्तेसꣳसृजेथामयञ्च ॥ अ
स्म्मिन्त्सधस्त्थेऽअद्ध्युत्तरस्म्मिन्विश्वेदेवायजमानश्चसीदत
॥ ६१ ॥ येनवहसि । सहस्रँय्येनाग्ग्नेसर्व्ववेदसम् ॥ तेनेमँ
य्यज्ञन्नोनयस्वर्द्देवेषुगन्तवे ॥ ६२ ॥ प्रस्तरेणपरिधिना ।

स्रुचाव्वेद्यांचबुर्हिषां ॥ ऋचेमँऽय्यज्ञन्नोंनयस्वर्द्दैवेषुगन्तवे
॥ ६३ ॥ यद्दुत्तम् ॥ यद्दुत्तँऽय्यत्त्परादानँऽय्यत्त्पूर्त्तँऽयाश्चुद
क्षिणाः ॥ तदुग्ग्निर्व्वैँश्वकर्म्मणःस्वर्द्दैवेषुंनोदधत् ॥ ६४ ॥
यत्रुधाराः ॥ यत्रुधाराऽअनंपेतामधोर्ग्घृतस्यंचुयाः ॥ तदु
ग्ग्निर्व्वैँश्वकर्म्मुणःस्वर्द्दैवेषुंनोदधत् ॥ ६५ ॥ अुग्ग्निरंस्म्मि ॥
अुग्ग्निरंस्म्मिुजन्म्मंनाजुातवैदाघृतम्मेुचक्क्षुंरमृतंम्मऽआुसन्॥
अुर्क्कस्त्रिुधातूुरजंसोव्विुमानोजंस्त्रोघुर्म्मोहुविरंस्म्मिुनामं ॥६६॥

ऋचोनामं ॥ ऋचोनामास्म्मियजूꣳषिनामास्म्मिसामानि
नामास्म्मि ॥ येऽअग्नयꣳपाञ्चजन्न्याऽअस्याम्पृथिव्यामधि ॥
तेषामसित्त्वमुत्तमꣳप्रनोजीवातवेसुव ॥ ६७ ॥ [ १०-१२ ]
वार्त्रहत्त्यायशवसे [1]पृतनाषाह्यायच ॥ इन्द्रत्त्वावर्त्तया
मसि ॥ ६८ ॥ सहदानुम्पुरुहूत । क्षियन्तमहस्तमिन्द्रस
म्पिणक्कुणारुम् ॥ [2]अभिवृत्रंवर्द्धमानम्पियारुमपादमिन्द्रतव

१ पृतनाषाह्याय च अत्र "सहेः पृतनायाः" (शु. य. प्रा. ३ अ. ७५ सू.) इत्यनेन पृतनाशब्दात्परस्य सस्य षत्वं निपात्यते। २ अभिवृत्रम्। अत्र "अश्वरश्मि" (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन प्राप्तो अभि इत्यस्य ह्रस्वेकारस्य दीर्घाकारो "अभिविख्येषंवीरविश्ववत्सवृत्रवाजयन्तेषु" (शु. य. प्रा. ३ अ. १०० सू.) इत्यनेन अभेः परेषु एतेषु पदेषु निषिद्ध्यते तेनात्र वकारे परेऽपि दीर्घो न भवति।

सांजघन्थ ॥ ६९ ॥ त्विनंः ॥ त्विनंऽइन्द्रमृधोंजहिनीचायं
च्छपृतन्न्युतः ॥ योऽअस्म्माँ२॥ऽअंभिदासत्त्यधंरङ्गमयात
मंः ॥ ७० ॥ मृगोन । भीमःकुंचरोगिंरिष्ठाःपंरावतऽआ
जंगन्थापरंस्याः ॥ सृकᳬसहुशायंपविमिंन्द्रतिग्गमंत्विशत्रूंन्ता
ढिंत्विमृधोंनुदस्व ॥ ७१ ॥ वैश्वानरोनंः ॥ वैश्वानरोनंऽ
ऊतयऽआप्प्रयांतुपरावतंः ॥ अग्गिन्नंःसुष्टुतीरुपं ॥ ७२ ॥
पृष्टोदिवि । पृष्टोऽअग्गिनःपृंथिव्यामपृष्टोविश्वाऽओपंधीराविं

वेश ॥ वैश्वानरः सहसा पृष्टोऽअग्निः स नो दिवा स रिषस्पातु न[1]
क्तम् ॥ ७३ ॥ अश्याम तम् ॥ अश्याम तङ्काममग्ने तवो
तीऽअश्याम रयिंरयिवः सुवीरम् ॥ अश्याम वाजमभिवा
जयन्तोऽश्याम द्युम्नमजराजरन्ते ॥ ७४ ॥ वयन्ते ॥ वय
न्तेऽअद्य रारिमा हि कामम् उत्तानहस्ता नमसोपसद्य ॥ यजिष्ठेन
मनसा यक्षि देवानस्रेधता मन्मना विप्रोऽअग्ने ॥ ७५ ॥ धा

[1] रिषस्पातु इति पदम् । अत्र "अध्वनो रजसो रिषः स्पृशस्पातौ" (शु. य. प्रा. ३ अ. २८ सू.) इत्यनेन रिषः पदस्य विसर्जनीयस्य पातु पदे परे सत्वे षत्वेच "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन पातुघटितपकारस्य द्वित्वे रूपम् ।

मुच्छदुग्निः ॥ धामुच्छदुग्निरिन्द्रोब्रुह्मादुेवोबृहुस्पतिः ॥
सचेतसोविश्वेदुेवायुज्ञम्प्रावंन्तुनःशुभे ॥ ७६ ॥ त्वँस्यंविष्ठ ।
दाशुषोनॄःपांहिशृणुधीगिरंः॥रक्षांतोकमुतत्मनां ॥ ७७॥
[१०-१३]इतिश्रीवाजसनेयसंहितायामष्टादशोऽध्यायः१८॥
श्रीवेदपुरुषायनमः ॥ अनुवाकसूत्रम् ॥ स्वाह्वीन्त्वैकादश,
देवायज्ञंविंᳯशतिः, सुरावन्तᳯसप्तदशो, वीरतान्त्रयोदश,
च्याजानुर्दश, सोमोराजाष्टौ, सीसेनतन्त्रᳯषोडश, सप्त पञ्च

शु. य. संहि. ॥२०३॥

नवतिः ॥ [अ. १९ मं. ९५ अनु. ७] हरिःॐ ॥ स्वाद्वी | पू. अ. ॥ १९ ॥
न्त्वां । स्वादुनांतीव्रान्तीव्रेणामृतांममृतेन ॥ मधुंमतीम्मधु
मतासृजामिसᳫंसोमेन ॥ सोमोस्यश्विभ्यांम्पच्यस्वसरंस्व
त्यैपच्यस्वेन्द्रांयसुत्राम्णेपच्यस्व ॥ १ ॥ परीतः ॥ परीतो[1]
षिञ्चतासुतᳫंसोमोयऽउंत्तमᳫंहविः ॥ दधन्वायोनर्योऽअ
प्स्वन्तरासुषावसोममाद्रिंभिः ॥ २ ॥ वायोःपूतः । पवित्रें ॥२०३॥

१ परीतः सिञ्चता इति पदे । अत्र "उकारमितः सिञ्चता सोपधः" (शु. य. प्रा. ३ अ. ४६ सू.) इत्यनेन इतःसंबन्धिविसर्गस्य सिञ्चतौ परे सोपध उकारो विधीयते परश्च मूर्धन्यो भवति इति । सोपधे ओकारे सकारस्य मूर्धन्यत्वे च परीतोषिञ्चता इति सिद्धम् ।

णप्प्रत्त्यङ्क्सोमोऽअतिद्रुतꣳ ॥ इन्द्रस्य्युज्ज्यꣳसखा ॥ व्वायोः
पूतः पवित्रेणप्प्राङ्क्सोमोऽअतिद्रुतꣳ ॥ इन्द्रस्य्युज्ज्यꣳसखा
॥ ३ ॥ पुनातिते । परिस्रुतꣳसोमꣳसूर्य्यस्यदुहिता ॥ व्वारेण
शश्वतातना ॥ ४ ॥ ब्रह्म[1]क्षत्रम् ॥ ब्रह्मक्षत्रम्पवतेतेजऽइन्द्रि
यꣳसुरयासोमः सुतऽआसुतोमदाय ॥ शुक्रेणदेवदेवताꣳपि
पृग्ग्धिरसेनान्नँय्यजमानायधेहि ॥ ५ ॥ कुविदङ्ग । यवम

---

१ अत्र "परं तु रेफहकाराभ्याम्" (शु. य. प्रा. ३ अ. १०१ सू.) इत्यनेन हकारात्परस्य मकारस्य द्वित्वे प्राप्तेऽपि "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (शु.य.प्रा. ४ अ. १०२ सू.) इत्यनेन द्वित्वविधानात्तेनैवात्र स्पर्शवर्णपरे मकारे तस्य द्वित्वम् ।

न्तोयवंग्निर्यथादान्त्यंनुपूर्व्वंव्वियूयं ॥ इहेहैषाङ्कृणुहिभोजंना
न्निर्येबर्हिर्षोनमं ऽउक्तिँ्यजंन्ति ॥ उपयामगृंहीतोस्यश्वि
भ्यांन्त्वासरंस्वत्यैत्वेन्द्रांयत्वासुत्राम्मणंऽएषतेयोनिस्तेज
सेत्वावीर्य्यायत्वाबलांयत्वा ॥ ६ ॥ नानाहि । वांन्देवहिं
तः सदंस्कृतम्मासः सृंक्षाथाम्परमेव्योमन् ॥ सुरात्त्वमसिशु
ष्मिमणीसोमंऽएषमामांहिः सीः स्वाँयोनिमाविशन्ती ॥ ७ ॥
उपयामगृंहीतोसि ॥ उपयामगृंहीतोस्याश्विनन्तेजः सारस्व

तंवी॒र्य॑मैन्द्र॒म्बल॑म् ॥ एष॒ ते॒ योनि॒र्म्मोदा॑य॒त्त्वा॒नन्दा॑य॒त्त्वाम
ह॑से॒त्त्वा ॥ ८ ॥ तेजो॑ऽसि ॥ तेजो॑ऽसि॒ तेजो॒ मयि॑ धेहि वी॒र्य॑म
सि॒वी॒र्य॑म्मयि॑ धेहि॒ बल॑मसि॒ बल॒म्मयि॑ धे॒ह्योजो॒ऽस्योजो॒ मयि॑ धे
हि म॒न्युर॑सि म॒न्युम्मयि॑ धेहि॒ सहो॑ऽसि॒ सहो॒ मयि॑ धेहि ॥ ९ ॥
या॒व्या॒घ्रम् ॥ या॒व्या॒घ्रंवि॒षू॑चि॒कोभौ वृक॑ञ्च॒ रक्ष॑ति ॥ श्येन॒
म्पत॒त्रिण॑ꣳ सि॒ꣳहꣳ सेमम्पा॒त्त्वꣳह॑सः ॥ १० ॥ यदा॑पि
पेष॑ । मा॒तर॑म्पु॒त्रः प्रमु॑दि॒तो धय॑न् ॥ एतत्तद॑ग्ने॒ऽअनृ॒णो भ॑वा

सं ३५

१ अत्र "परं तु रेफहकाराभ्याम्" (शु. य. प्रा. अ. सू.) इत्यनेन यकारस्य द्वित्वम् । एवं वीर्य्यमसि ।

म्म्यहंतौपितरौमयां ॥ सम्पृचंस्त्थसम्मांभद्द्रेणंपृङ्क्तविपृचंस्त्थ
विमांपाप्मनांपृङ्क्त ॥ ११ ॥ [ ११-१ ] देवायज्ञम् ॥ देवाय
ज्ञमंतन्न्वतभेषजम्भिषजाश्विनां ॥ व्वाचासरंस्वतीभिषागिन्द्रां
येन्द्रियाणिदधंतः ॥ १२॥ दीक्क्षायैरूपम्॥ दीक्क्षायैरूपꣳश
ष्पांणिप्प्रायणीयंस्यतोक्क्मांनि ॥ क्क्रयस्यंरूपꣳसोमंस्यलाजाः
सोमाꣳशवोमधुं ॥ १३ ॥ आतित्थ्यरूपम्मासंरम् ॥ आति
त्थ्यरूपम्मासंरम्महावीरस्यंनग्ग्नहुः ॥ रूपमुपसदांमेतात्ति

स्त्रोरात्रीᳪसुरासुंता ॥ १४ ॥ सोमंस्यरूपम् ॥ सोमंस्यरूप
क्क्रीतस्यंपरिस्रुत्परिषिच्यते ॥ अश्विभ्यांन्दुग्धम्भेषजमि
न्द्रांयैन्द्रᳪसरंस्वत्त्या ॥ १५ ॥ आसन्दीरूपम् ॥ आसन्दी
रूपᳪरांजासन्द्यैव्वेद्यैकुम्भीसुंराधानी ॥ अन्तंरऽउत्तरवेद्यारू
पङ्कंरोतरोभिपक् ॥ १६ ॥ व्वेद्याव्वेदिः ॥ व्वेद्याव्वेदिᳪसमा
प्प्यतेबर्हिर्षाबर्हिरिन्द्रियम् ॥ यूपेनयूपंऽआप्प्यतेप्प्रणीतोऽ
अग्निरग्निनां ॥ १७ ॥ हविर्द्धानँय्यत् ॥ हविर्द्धानँय्यद्

श्विनाग्नीध्रँऽयत्सरस्वती ॥ इन्द्रायैन्द्रꣳसदस्कृतम्पत्नीशा
लङ्गार्हपत्त्यः ॥ १८ ॥ प्रैषेभिः प्रैषान् ॥ प्रैषेभिः प्रैषा
नाप्नोत्याप्रीभिराप्रीऽर्यज्ञस्य ॥ प्रयाजेभिरनुयाजान्वषट्
कारेभिराहुतीः ॥ १९ ॥ पशुभिः पशून् ॥ पशुभिः पशूना
प्नोतिपुरोडाशैर्हवीꣳष्या ॥ छन्दोभिः सामिधेनीऽर्या
ज्याभिर्वषट्कारान् ॥ २० ॥ धानाः करम्भः । सक्तवः परी

1 पुरः दाशैः इति पदम् । अत्र "पुरोदाशे" (शु. य. प्रा. ३ अ. ४४ सू.) इत्यनेन पुरशब्दघटितविसर्गस्य उकारे दाशशब्दघटितस्य दकारस्य मूर्धन्ये डकारे "उवर्ण ओकारम्" (शु. य. प्रा. ४ अ. ५४ सू.) इत्यनेन कंठ्यादकारादुत्तरे उवर्णे उभयो रकारोकारयोरोकारे पुरोडाशैः इति पदम् ।

वापःपयोदधिं ॥ सोमंस्यरूपᳬहविपंऽआमिक्षाव्वाजिनम्म
धुं ॥ २१ ॥ धानानांᳬंरूपम् ॥ धानानांᳬंरूपङ्कुवलम्परी
वापस्यंगोधूमांᳬ ॥ सक्तूंनाᳬंरूपम्बदंरमुपवाकांᳬकरम्भस्यं
॥ २२ ॥ पयंसोरूपम् ॥ पयंसोरूपँय्यद्यवांदुध्नोरूपङ्कर्कन्धूं
नि ॥ सोमंस्यरूपंव्वाजिनᳬसौम्म्यस्यंरूपमामिक्षां ॥ २३ ॥
आश्रांवय ॥ आश्रांवयेतिंस्तोत्रियांᳬप्रत्याश्रावोऽअनुं
रूपᳬ ॥ यजेतिंधाय्यारूपम्प्रंगाथायेंयजामहाः ॥ २४ ॥

अर्द्धऽऋचैरुक्थानाम् ॥ अर्द्धऽऋचैरुक्थानाꣳरूपम्पदैरा
प्नोतिनिविदः ॥ प्रणवैःशस्त्राणाꣳरूपम्पयसासोमऽआ
प्यते ॥ २५ ॥ अश्विभ्याम्प्रातःसवनम् ॥ अश्विभ्याम्प्रा
तःसवनमिन्द्रेणैन्द्रम्माध्यन्दिनम् ॥ वैश्वदेवꣳसरस्वत्यातृ
तीयमाप्तꣳसवनम् ॥ २६ ॥ वायव्यैर्वायव्यानि ॥ वायव्यैर्वा
यव्यान्याप्नोतिसतेनद्रोणकलशम् ॥ कुम्भीभ्यामम्भृणौ ॥२०८॥
सुतेस्थालीभिस्थालीराप्नोति ॥ २७ ॥ यजुर्भिराप्यन्ते ॥

यजु॑र्भि॒राप्प्य॑न्ते॒ग्ग्रहा॒ग्ग्रहै॒स्त्तोमा॑श्च॒विष्ष्टु॑तीः ॥ छन्दो॑भिरु
क्क्थाश॒स्त्राणि॒साम्म्ना॑वभृ॒थऽआ॑प्प्यते ॥ २८ ॥ इडा॑भिर्भ॒
क्क्षान् ॥ इडा॑भिर्भ॒क्क्षाना॑प्प्नोतिसूक्क्तवा॒केना॒शिष॑ः ॥ शं॒य्यु
ना॑पत्क्नीसँय्या॒जान्त्सं॑मिष्ट्टय॒जुषा॑स॒ꣳस्त्थाम् ॥ २९ ॥ व्व्र॒तेन॑
दी॒क्क्षाम् ॥ व्व्र॒तेन॑दी॒क्क्षामा॑प्प्नोति॒दी॒क्क्षया॑प्प्नोति॒दक्क्षि॑णाम् ॥
दक्क्षि॑णाश्श्र॒द्धामा॑प्प्नोति॒श्श्र॒द्धया॑स॒त्त्यमा॑प्प्यते ॥ ३० ॥ एताव॑

१ पत्क्नी संय्याजान्। अत्र "भाविभ्यः सः षं समानपदे" (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन प्राप्तस्य षस्य "अनुसन्तनोतु०" (शु. य. प्रा. ३ अ. ८२ सू.) इत्यनेन निषेधे न षत्वम्। ततः "अन्तस्थामन्तस्थास्वनुनासिकां परसस्थानाम्। (शु. य. प्रा. ४ अ. १० सू.) इत्यनेन समः मकारस्य अन्तस्थे याजान्पदे अन्तस्थामनुनासिकामापद्यते। इति षस्य यकारे अनुनासिके रूपम्।

द्रूपम् ॥ एतावद्रूपँय्यज्ञस्ययद्देवैर्ब्रह्मणाकृतम् ॥ तदेतत्सर्व्व
माप्नोतियज्ञेसौत्रामणीसुते ॥ ३१ ॥ [ २०-२ ] सुरावन्त
म्बर्हिषदम् ॥ सुरावन्तम्बर्हिषदꣳसुवीरँय्यज्ञꣳहिन्वन्तिम
हिषानमोभिः ॥ दधानाꣳसोमन्दिविदेवतासुमदेमेन्द्रँय्यज
मानाःस्वर्क्काः ॥ ३२ ॥ यस्ते ॥ यस्तेरसꣳसम्भृतऽओषधी
षुसोमस्यशुष्मꣳसुरयासुतस्य ॥ तेनजिन्वयजमानम्मदेनस
रस्वतीमश्विनाविन्द्रमग्निम् ॥ ३३ ॥ यमश्विना ॥ यम

श्विनानमुचेरासुरादधिसरस्वत्त्यसुनोदिन्द्रियाय ॥ इमन्तꣳ
शुक्कम्मधुमन्तमिन्दुꣳसोमꣳराजानमिह भक्षयामि ॥ ३४ ॥
यदत्र । रिप्तꣳरसिनः सुतस्ययदिन्द्रोऽअपिबच्छचीभिः ॥
अहन्तदस्यमनसाशिवेनसोमꣳराजानमिह भक्षयामि ॥ ३५ ॥
पितृभ्यः स्वधायिभ्यः । स्वधानमः पितामहेभ्यः स्वधा
यिभ्यः स्वधानमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधान
मः ॥ अक्षन्पितरोमीमदन्तपितरोतीतृपन्तपितरः पितरः

शुन्धध्वम् ॥ ३६ ॥ पुनन्तुमा । पितरः सोम्म्यासः पुनन्तु
मापितामहाःपुनन्तुप्प्रपितामहाः ॥ पवित्रेणशतायुषा ॥
पुनन्तुमापितामहाःपुनन्तुप्प्रपितामहाः ॥ पवित्रेणशतायु
षाव्विश्वमायुर्व्यश्नवै ॥ ३७ ॥ अग्नऽआयूᳬंषि । पवस्सऽ
आसुवोर्ज्जमिषंञ्चनः ॥ आरेबाधस्वदुच्छुनाम् ॥ ३८ ॥
पुनन्तुमा । देवजनाःपुनन्तुमनसाधियः ॥ पुनन्तुव्विश्वा
भूतानिजातवेदःपुनीहिमा ॥ ३९ ॥ पवित्रेणपुनीहि ।

॥२०९॥

माशुक्केणंदेवदीद्यंत् ॥ अग्नेक्कत्त्वाक्कतुँ१॥ऽरनुं ॥ ४० ॥
यत्तें । पवित्रंमर्च्चिष्ष्यग्नेव्वितंतमन्तरा ॥ ब्रह्मतेनंपुनातुमा
॥ ४१ ॥ पवंमानःसः ॥ पवंमानःसोऽअद्यनंः पवित्रेंण
व्विचंर्पणिः ॥ यःपोतासपुंनातुमा ॥ ४२ ॥ उभाब्भ्यांन्देव ।
सवितःपवित्रेंणसवेनंच ॥ माम्पुंनीहिव्विश्वतंः ॥ ४३ ॥
वैश्वदेवीपुंनती । देव्यागाद्यस्यांमिमाबह्व्यस्तन्वोवीतपृंष्ठाः॥
तयामदंन्तःसधमादेंपुव्वयःस्यांमपतंयोरयीणाम् ॥ ४४ ॥

येसंमानाः । समंनसःपितरोयमराज्ये ॥ तेषाँल्लोकःस्वधा
नमोयज्ञोदेवेषुंकल्पताम् ॥ ४५ ॥ येसंमानाः । समंनसो
जीवाजीवेषुंमामकाः ॥ तेषाꣳश्रीर्मयिकल्पतामस्मिँल्लो
केशतꣳसमाः ॥ ४६ ॥ द्वेसृती ॥ द्वेसृतीऽअंशृणवम्पितॄ
णामहन्देवानांमुतमर्त्यानाम् ॥ ताभ्यामिदंविश्वमेजत्समे
तियदन्तरापितरम्मातरंच ॥ ४७ ॥ इदꣳहविः ॥ इदꣳहु
विःप्रजननम्मेऽअस्तुदशवीरꣳसर्वगणꣳस्वस्तये ॥ आत्मस

सनिं[1]प्रजासनिं[2]पशुसनिंलोकसन्यंभयसनिं ॥ अग्निश्प्रजाम्बं
हुलाम्मेकरोत्त्वन्नम्पयोरेतोऽअस्मासुधत्त ॥४८॥ [ १७-३ ]
उदीरताम् ॥ उदीरतामवंरऽउत्परांसऽउन्मंध्यमाश्पितरंःसो
म्म्यासंः ॥ असुँय्यऽईयुरंवृकाऽऋंतज्ञास्त्तेनोंऽवन्तुपितरोह
वेषु ॥ ४९ ॥ अङ्गिरसोनः । पितरोनवंग्ग्वाऽअथंर्व्वाणोभृगं
वःसोम्म्यासंः ॥ तेषांव्वयꣳसुमतौयज्ञियांनामपिभद्रेसौमन

१-२ प्रजासनि पशुसनि "भाविभ्यः सः षं समानपदे" (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन षकारप्राप्तौ "अनुसन्तनोत्तु०" (शु. य. प्रा. ३ अ. ८२ सू.) इत्यनेन निषिद्ध्यते।

सेस्याम ॥ ५० ॥ येनः ॥ येनꣳपूर्व्वेपितरःसोम्म्यासोनूहि
रेसोमपीथंव्वसिष्ठाꣳ ॥ तेभिर्य्यमꣳसꣳरराणोहवीꣳष्युशन्नु
शद्भिःप्प्रतिकाममत्तु ॥ ५१ ॥ त्वꣳसोम ॥ त्वꣳसोमप्प्र
चिकितोमनीषात्त्वꣳरजिष्ठमनुनेषिपन्थाम् ॥ तवप्प्रणीती
पितरोनऽइन्दोदेवेषुरत्नमभजन्तधीराꣳ ॥ ५२ ॥ त्वयाहि ॥
त्वयाहिनःपितरःसोमपूर्व्वेकर्म्माणिचक्रुःपवमानधीराꣳ ॥ ॥ २११ ॥
व्वन्वन्नवातꣳपरिधीँ १॥रपोर्णुव्वीरेभिरश्वैर्म्मघवाभवानꣳ

॥ ५३ ॥ त्वᳬसोम । पितृभिᳫ संविदानोनुद्यावापृथिवीऽ
आततन्थ ॥ तस्मैतऽइन्दोहविषाविधेमवयᳯस्यामपतयो
रयीणाम् ॥ ५४ ॥ बर्हिषदᳫपितरᳫ ॥ बर्हिषदᳫपितरऽऊत्त्यु
र्वागिमावोहव्याचकृमाजुषद्ध्वम् ॥ तऽआगतावसाशन्तमेना
थानᳫशँय्योररपोदधात ॥ ५५ ॥ आहम् ॥ आहम्पितृन्त्सु
विदत्राँ२॥ऽअवित्त्सिनपातञ्चविक्क्रमणञ्चविष्णोᳫ ॥ बर्हिष
दोयेस्वधयासुतस्यभजन्तपित्त्वस्तऽइहागमिष्ठाᳫ ॥ ५६ ॥

उपहूताःपितरः । सोम्यासोबर्हिष्येषुनिधिषुप्रियेषु ॥
॥२१२॥ तऽआगमन्तुतऽइहश्रुवन्त्वधिब्रुवन्तुतेवन्त्वस्मान् ॥ ५७ ॥
आयन्तु । नःपितरःसोम्यासोग्निष्वात्ताःपथिभिर्देवया
नैः ॥ अस्मिन्यज्ञेस्वधयामदन्तोधिब्रुवन्तुतेवन्त्वस्मान्
॥ ५८ ॥ अग्निष्वात्ताःपितरः ॥ अग्निष्वात्ताःपितरऽ
एहगच्छतसदःसदःसदतसुप्रणीतयः ॥ अत्ताहवीꣳषि ॥२१॥
प्रयतानिबर्हिष्यथारयिꣳसर्ववीरन्दधातन ॥ ५९ ॥ येऽ

अग्निष्वात्ताः ॥ येऽअग्निष्वात्तायेऽअनंग्निष्वात्ताम
द्ध्योंदिवःस्वधयांमादयंन्ते ॥ तेभ्यंःस्वराडसुंनीतिमेतांऽयं
थावशन्तन्वङ्कल्पयाति ॥ ६० ॥ अग्निष्वात्तानृंतुम
तंः ॥ अग्निष्वात्तानृंतुमतोंहवामहेनाराशंसेसोंमपीथं
ऽयऽआशुः ॥ तेनोविप्रांसःसुहवांभवन्तुवयंस्यांमपतंयो
रयीणाम् ॥ ६१ ॥ [१३-४] आव्याजानुं । दक्षिण
तोंनिषद्येमंऽयज्ञमभिगृंणीतविश्वें ॥ माहिंसिष्टपितरःकेनं

चिन्नोयद्दऽआगंः पुरुषताकरांम ॥ ६२ ॥ आसीनासोऽअरु
॥२१२॥ णीनांम् ॥ आसीनासोऽअरुणीनामुपस्थैरयिन्धंत्तदाशुषेम
र्त्याय ॥ पुत्रेब्भ्यंः पितरस्तस्युवस्वुःप्रयंच्छततऽइहोर्ज्जंन्द
धात ॥ ६३ ॥ यमंग्ने । कव्व्यवाहनत्त्वञ्चिन्मन्न्यंसेरयिम् ॥
तन्नोंगीर्ब्भिःश्श्रवाय्यंन्देवत्राप॑नयायुजंम् ॥ ६४ ॥ योऽअ
ग्निः । कव्व्यवाहंनःपितॄन्यक्षंद्दतावृधंः ॥ प्रेदुंहव्यानिंव्वोच ॥२१३॥
तिदेवेब्भ्यंश्चपितृब्भ्युऽआ ॥ ६५ ॥ त्वमंग्ने ॥ त्वमंग्नऽई

१ पनय युजम् इति पदम्। अत्र "श्र्थोदारिथपनय°" (शु. य. प्रा. ३ अ. ११३ सू.) इत्यनेन सूत्रोक्तपदानां यकारे परे दीर्घो विधीयते। तेन पनयायुजम्।

डितः꣡कंव्यवाहनावाड्ढव्यानिसुरभीणिकृत्त्वी ॥ प्रादाꣳपितृ
भ्यः꣡स्वधयातेऽअंक्षन्नद्धित्त्वन्दैवप्प्रयंताहवीꣳषि ॥ ६६ ॥
येचं ॥ येचेहपितरोयेचनेहयाँश्चंविद्मयाँ२॥ऽउंचनप्प्रंवि
द्म ॥ त्वंवैत्थयतितेजांतवेदःस्वधाभिर्यज्ञꣳसुकृंतञ्जुषस्व
॥६७॥ इदम्पितृभ्यः꣡॥ इदम्पितृभ्योनमोऽअस्त्वद्ययेपूर्व्वा
सोयऽउपरासऽईयुः ॥ येपार्त्थिवेरजस्यानिषत्तायेवानूनꣳसुवृ
जनांसुविक्षु ॥६८॥ अधायथां। नःपितरःपरासःप्प्रत्नासोऽ

अग्न ऽऋतमांशुषाणाः ॥ शुचीदंयन्दीधितिमुक्थशासःक्षामा
॥२१४॥ भिन्दन्तोऽअरुणीरपंव्रन् ॥ ६९ ॥ उशन्तंस्त्वा ॥ उशन्तंस्त्वा ॥ १९ ॥
निधीमह्युशन्तःसमिंधीमहि ॥ उशन्नुंशतऽआवंहपि[1]तॄँन्हविषेऽअत्तंवे ॥ ७० ॥ अपाम्फेनेंन ॥ अपाम्फेनेंननमुंचेःशिरंऽ
इन्द्रोदंवर्त्तयः ॥ विश्वायदजंयस्पृधंः ॥ ७१ ॥ [ १०-५ ]
सोमोराजा ॥ सोमोराजामृतंःसुतऽऋजीषेणांजहान्मृत्युम् ॥ ॥२१४॥

1 पितॄँन्हविषे । अत्र पितॄन् पदस्य नस्य "ऋपरेभ्यः" (शु. य. प्रा. ३ अ. ८५ सू.) इत्यनेन समानपदे विधीयमानं णत्वं प्राप्तम् । परञ्च "प्रकृत्या पदान्तीयः" (शु. य. प्रा. ३ अ ५० सू.) इत्यनेन पदान्तीयस्य नकारस्य णत्वं नोपपद्यते । इति निषेधान्न णत्वम् ।

ऋतेनं सत्यमिन्द्रियं विपानंꣳ शुक्रमन्धंसऽइन्द्रंस्येन्द्रियमिद

म्पयोमृतम्मधुं ॥ ७२ ॥ अद्भ्यः क्षीरम् ॥ अद्भ्यः क्षीरंव्यं

पिबत्कुङ्ङाङ्गिरसोधिया ॥ ऋतेनं सत्यमिन्द्रियं विपानंꣳ

शुक्रमन्धंसऽइन्द्रंस्येन्द्रियमिदम्पयोमृतम्मधुं ॥ ७३ ॥ सो

मंमद्भ्यः ॥ सोमंमद्भ्योव्यंपिबच्छन्दंसाहꣳसःशुंचिषत् ॥

ऋतेनं सत्यमिन्द्रियं विपानंꣳ शुक्रमन्धंसऽइन्द्रंस्येन्द्रियमि

दम्पयोमृतम्मधुं ॥ ७४ ॥ शतम् ॥ ११०० ॥ अन्नात्परिस्रु

तं ॥ अन्नात्परिस्रुतोरसम्ब्रह्मणाव्यपिबत्क्षत्रम्पयꣳसोमम्प्र
जापतिः ॥ ऋतेनसत्त्यमिन्द्रियंविपानꣳशुक्रमन्धसऽइन्द्र
स्येन्द्रियमिदम्पयोमृतम्मधु ॥ ७५ ॥ रेतोमूत्रम् ॥ रेतोमूत्रं
विजहातियोनिम्प्रविशदिन्द्रियम् ॥ गर्भोजरायुणावृतऽउ
ल्वंजहातिजन्मना ॥ ऋतेनसत्त्यमिन्द्रियंविपानꣳशुक्रम
न्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥ ७६ ॥ दृष्ट्वारूपे । ॥२१५॥
व्याकरोत्सत्त्यानृतेप्रजापतिः ॥ अश्रद्धामनृतेदधाच्छ्र

द्धाᳪंसत्त्येप्प्रजापंतिः॥ ऋतेनंसत्त्यमिंन्द्रियंव्विपानंᳯशुक्क्रम
न्धंसऽइन्द्रंस्येन्द्रियमिदम्पयोमृतम्मधुं ॥ ७७ ॥ वेदेंनरू
पे । व्यंपिबत्त्सुतासुतौप्प्रजापंतिः ॥ ऋतेनंसत्त्यमिंन्द्रियंव्वि
पानंᳯशुक्क्रमन्धंसऽइन्द्रंस्येन्द्रियमिदम्पयोमृतम्मधुं॥७८॥
दृष्ट्वापंरितस्रुतंः ॥ दृष्ट्वापंरिस्रुतोरसंᳯशुक्क्रेणंशुक्क्रंव्यंपिब
त्पयःसोमंप्प्रजापंतिः॥ ऋतेनंसत्त्यमिंन्द्रियंव्विपानंᳯशुक्क्रम
न्धंसऽइन्द्रंस्येन्द्रियमिदम्पयोमृतम्मधुं ॥ ७९ ॥ [८-६]
५१३

सीसेनतन्त्रम् ॥ सीसेनतन्त्रम्मनसामनीषिणऽऊर्णासूत्रेणक
वयोव्वयन्ति ॥ अश्विनायज्ञꣳसवितासरस्वतीन्द्रस्यरूपंव्वरुणो
भिषज्यन् ॥ ८० ॥ तदस्य । रूपममृतꣳशचीभिस्तिस्रोद
धुर्देवताꣳसꣳरराणाः ॥ लोमानिशष्पैर्बहुधानतोक्मभि
स्त्वगस्यमाꣳसमभवन्नलाजाः ॥ ८१ ॥ तदश्विना । भिष
जारुद्रवर्त्तनीसरस्वतीव्वयतिपेशोऽअन्तरम् ॥ अस्थिमज्जान्



१ सीसेन तन्त्रम् । अत्र "भाविभ्यः सः षं समानपदे" ( शु. य. प्रा. ३ अ. ७६ सू. ) इत्यनेन प्राप्तषत्वं "अनुपसर्गेनोन्" । ( शु. य. प्रा. ३ अ. ८५ सू. ) इत्यनेन निषिध्यते । अतो न षकार इत्यर्थः ।

म्मासैरेङ्कारोतेरेणदधंतोगवान्त्वचि ॥ ८२ ॥ सरंस्वतीम
नंसा । पेशलंव्वसुनासंत्त्याऽभ्यांव्वयतिदर्शतंव्वपुंः ॥ रसंम्प
रिस्रुतानरोहितन्नग्नहुर्द्धीरस्त्तसंरन्त्वेमं ॥ ८३ ॥ पयंसाशुक्क
म् ॥ पयंसाशुक्कममृतंज्जनित्त्रहसुरंयाम्मूत्रांज्जनयन्तरेतंः ॥
अपामतिन्दुर्म्मतिम्बाधमानाऽऊवंध्यंवातंसब्वंन्तदारात्
॥ ८४ ॥ इन्द्रंःसुत्रामा ॥ इन्द्रंःसुत्रामाहृदयेनसत्त्यम्पुरो
सं. ३० डाशेनसवितांजंजान ॥ यकृत्क्लोमानंव्वरुणोभिषज्यन्मतंस्न्ने

शु. य. सहि. ॥२१७॥

पू. अ. ॥ १९ ।

व्वायुर्य्यैर्न्नमिंनातिपित्तम् ॥ ८५ ॥ आन्त्राणिंस्थालीः ॥ आन्त्रा

णिंस्थालीर्म्मधुपिन्वंमानागुदाꣳपात्राणिसुदुघानधेनुः ॥ श्ये

नस्यपत्रन्नप्लीहाशचींभिरासन्दीनाभिरुदरन्नमाता ॥८६॥ कु

म्भोव्वंनिष्ठुः ॥ कुम्भोव्वंनिष्ठुर्ज्जनिताशचींभिर्य्यस्मिन्नग्ग्रेयो

न्याङ्गर्भोऽअन्तः ॥ प्लाशिर्व्यक्तꣳशतधारऽउत्सोदुहेनकु

म्भीस्वधाम्पितृभ्यः ॥८७॥ मुखꣳसत् ॥ मुखꣳसदस्यशिरऽ ॥ २१७ ।

इत्सतेनजिह्वापवित्रमश्विनासन्त्सरस्वती ॥ चप्पन्नपायुर्भि

पगंस्यद्वालौंद्वस्तिर्न्नशेपोहरंसातरस्वी ॥ ८८ ॥ अश्विऽभ्या
ञ्चक्षुं÷ ॥ अश्विऽभ्याञ्चक्षुरमृतङ्ग्रहांऽभ्याञ्छागेनतेजोहवि
षांशृतेनं ॥ पक्ष्मांणिगोधूमैंःकुवंलैरुतानिपेशोनशुक्कमासितं
वसाते ॥ ८९ ॥ अविर्न्न । मेषोनासिवीर्य्यायप्राणस्यपन्थाऽ
अमृतोग्ग्रहांऽभ्याम् ॥ सरंस्वत्युपवाकैर्व्यानंनस्यांनिबर्हिर्ब
दरैर्ज्जजान ॥ ९० ॥ इन्द्रंस्यरूपम् ॥ इन्द्रंस्यरूपमृषभोब
लांयकर्णांऽभ्याᳪंश्रोत्रंममृतङ्ग्रहांऽभ्याम् ॥ यवानबर्हिऽर्भ्रुं

विकेसंराणिकर्कन्धुंजज्ञेमधुंसारघम्मुखात् ॥ ९१ ॥ आत्म
न्नुपस्त्थे ॥ आत्मन्नुपस्त्थेनवृकंस्यलोममुखेश्मश्रूणिन
व्याघ्रलोम ॥ केशानशीर्षन्यशंसेश्रियैशिखासिंहस्यलोम
त्विषिरिन्द्रियाणि ॥ ९२ ॥ अङ्गान्यात्मन् ॥ अङ्गान्या
त्मन्भिषजातदश्विनात्मानमङ्गैःसमंधात्सरस्वती ॥ इन्द्र
स्यरूपꣳशतमानमायुश्चन्द्रेणज्योतिरमृतन्दधानाः ॥ ९३ ॥
सरस्वतीयोन्याम् ॥ सरस्वतीयोन्याङ्गर्भमन्तरश्विभ्याम्प

त्क्रीसुकृतम्बिभर्त्ति ॥ अपा॑ᳪरसे॑न्नवरु॑णो॒नसाम्म्नेन्द्र॑ᳪश्रियै॑
जनय॑न्नप्सुराजा॑ ॥ ९४ ॥ तेजः॑पशूनाम् ॥ तेजः॑पशू
ना॑ᳪहविरि॑न्द्रियाव॑त्परि॒स्रुता॒पय॑सासार॒घम्मधु॑ ॥ अश्वि
भ्या॑न्दुग्धम्भि॒षजा॒सर॑स्वत्यासुतासुताभ्या॑मम॒ृत॒ᳪसोम॒ऽइ
न्दुः॑ ॥ ९५ ॥ [ १६-७ ] इतिश्रीवाजसनेयसंहितायामेकोन
विंशतितमोऽध्यायः ॥ १९ ॥ श्रीवेदपुरुषायनमः ॥ अनु

१ अपाᳪरसेन। अत्र "ऋषरेभ्यो नकारो णकारं समानपदे" ( शु. य. प्रा. ३ अ. ८५ सू. ) इत्यनेन विधीयमानं "स्वरयवहकपैश्च" ( शु. य. प्रा. ३ अ. ८६ सू. ) इत्यनेन एतैर्व्यवधानेऽप्यत्र णत्वं सकारस्य तदतिरिक्तवर्णस्य व्यवधानेनाप्राप्तमपि "शिलिमिमध्य०" ( शु. य. प्रा. ३ अ. ९६ सू. ) इत्यनेन णत्वमेतेषु व्यवहितेषु निषिध्यते तच्छिष्यबुद्धिव्युत्पत्त्यर्थम्। स्वरयवहकपातिरिक्तवर्णव्यवधाने ऋषरेभ्यो णत्वप्राप्त्यभावात्।

वाकसूत्रम् ॥ क्षत्रस्ययोनिस्त्रयोदश, यद्देवादश, भ्यादधा
म्यष्टौ, योभूतानाञ्चतस्त्रः, समिद्धऽइन्द्रऽएकादश, ऽआया
त्वष्टौ, समिद्धोऽअग्निर्द्वादश, श्विनाहविस्त्रयोदश, श्विना
तेजसैकादश, नव नवतिः ॥ [अ. २० मं. ९० अ. ९]
हरिः ॐ ॥ क्षत्रस्ययोनिः ॥ क्षत्रस्ययोनिरसिक्षत्रस्यनाभि
रसि ॥ मात्त्वांहिꣳसीन्मामांहिꣳसीः ॥ १ ॥ निषसाद । ॥२१९॥
धृतव्व्रतोव्वरुणःपस्त्यास्वा ॥ साम्म्राज्यायसुक्रतुः ॥ मृत्योः

पाहिविद्योत्त्पाहि ॥ २ ॥ देवस्यत्त्वा । सवितुःप्प्रसवेश्विनो

र्व्बाहुब्भ्याम्पूष्णोहस्त्ताब्भ्याम् ॥ अश्विनोर्ब्भैषज्ज्येनतेजसे

ब्रह्मवर्चसायाभिषिञ्चामिसरस्वत्त्यैभैषज्ज्येनव्वीर्य्यायान्नाद्या

याभिषिञ्चामीन्द्रस्येन्द्रियेणबलायश्श्रियैयशसेभिषिञ्चामि

॥ ३ ॥ कोसि । कतमोसिकस्म्मैत्त्वाकायत्त्वा ॥ सुश्श्लोक

सुमङ्गलसत्त्यराजन् ॥ ४ ॥ शिरोमे ॥ शिरोमेश्श्रीर्य्यशोमु

खन्त्विषिःकेशाश्चश्म्मश्श्रूणि ॥ राजामेप्प्राणोऽअमृतꣳसम्म्रा

ट्चक्षुर्व्विराट्श्रोत्रम् ॥ ५ ॥ जिह्वामे । भद्रंव्वाङ्महोमनोम
न्युःस्वराड्भामः ॥ मोदाꣳप्प्रमोदाऽअङ्गुलीरङ्गानिमित्रम्मे
सहः ॥ ६ ॥ बाहूमे ॥ बाहूमेबलमिन्द्रियꣳहस्तौमेकर्म्म
व्वीर्य्यम् ॥ आत्माक्षत्रमुरोमम ॥ ७ ॥ पृष्ठीर्म्मे । राष्ट्रमु
दरमꣳसौग्ग्रीवाश्चश्श्रोणी । ऊरूऽअरत्नीजानुनीव्विशोमेङ्गा
निसर्व्वतः ॥ ८ ॥ नाभिर्म्मे । चित्तंव्विज्ञानम्पायुर्म्मेपचिति
र्ब्भसत् ॥ आनन्दनन्दावाण्डौमेभगꣳसौभाग्ग्यम्पसः ॥

॥२२०॥

जङ्घाभ्याम्पद्भ्यान्धर्म्मोस्म्मिविशिराजाप्प्रतिष्ठितः ॥ ९ ॥
प्रतिक्षत्रे । प्प्रतितिष्ठामिराष्ट्रेप्प्रत्त्यश्वेषुप्प्रतितिष्ठामिगोषु
प्रत्त्यङ्गेषुप्प्रतितिष्ठाम्म्यात्क्मन्प्रतिप्प्राणेषुप्प्रतितिष्ठामिपुष्टे
प्प्रतिद्यावापृथिव्योःप्प्रतितिष्ठामियज्ञे ॥ १० ॥ त्रयादेवाः ॥
त्रयादेवाऽएकादशत्रयस्त्रिंशाःसुराधसः ॥ बृहस्प्पतिपुरोहि
तादेवस्यसवितुःसवे ॥ देवादेवैरवन्तुमा ॥ ११ ॥ प्रथमाद्वि
तीयैः ॥ प्रथमाद्वितीयैर्द्वितीयास्तृतीयैस्तृतीयाःसत्त्येनस

त्यँय्यज्ञेनेयज्ञोयजुर्भिर्य्यजूꣳषिसामभिꣳ सामान्यृग्भिर्ऋ
चः पुरो[1]नुवाक्याभिꣳपुरोनुवाक्यायाज्याभिर्य्याज्यावषट्का
रैर्व्वषट्काराऽआहुतिभिराहुतयोमेकामान्त्समर्द्धयन्तुभूःस्वा
हा ॥ १२ ॥ लोमानिप्प्रयतिꣳ ॥ लोमानिप्प्रयतिर्म्ममत्त्वङ्मऽ
आनतिरागतिꣳ ॥ माꣳसम्मऽउपनतिर्व्वस्वस्थिमज्जामऽआ
नतिꣳ ॥ १३ ॥ [ १३-१ ] यद्देवाꣳ ॥ यद्देवादेवहेडनन्देवा ॥२२१॥

१ पुरोनुवाक्याभिः। अत्र समानपदे "ऋपरेभ्यो णकारं समानपदे" ( शु. य. प्रा. ३ अ. ८५ सू. ) इत्यनेन णत्वप्राप्तौ "इन्द्राग्नी चित्रमान्ते" ( शु. य. प्रा. ३ अ. ९३ सू. ) इत्यनेन निषेधान्न णत्वम्।

सश्चकृमाव्वयम् ॥ अग्निर्म्मातस्म्मादेनंसोव्विश्वांन्मुञ्चत्त्वꣳहं

सꣳ ॥ १४॥ यदिदिवां ॥ यदिदिवायदिनक्त्तमेनांꣳसिचकृ

माव्वयम् ॥ व्वायुर्म्मातस्म्मादेनंसोव्विश्वांन्मुञ्चत्त्वꣳहंसꣳ

॥ १५ ॥ यदिजाग्ग्रंत् ॥ यदिजाग्ग्रद्यदिस्वप्प्नऽएनांꣳ

सिचकृमाव्वयम् ॥ सूर्य्योमातस्म्मादेनंसोव्विश्वांन्मुञ्चत्त्वꣳ

हंसꣳ ॥ १६ ॥ यद्ग्रामें ॥ यद्ग्रामेयदरण्ण्येयत्त्सभायाँ

य्यदिंन्द्रिये ॥ यच्छूद्रेयदर्य्येयदेनंश्चकृमाव्वयँय्यदेकस्या

धिधर्म्मणितस्यांवयजंनमासि ॥ १७ ॥ यदापः ॥ यदा
पोऽअग्घ्याऽइतिव्वरुणेतिशपामहेततोव्वरुणनोमुञ्च ॥ अवं
भृथनिचुम्पुणनिचेरुरसिनिचुम्पुणः ॥ अवदेवैर्देवकृतमेनोय
क्ष्यवमर्त्यैर्म्मर्त्यकृतम्पुरुराव्णोदेवरिषस्पाहि ॥ १८ ॥ समु
द्रेते ॥ समुद्रेतेहृदयमप्स्वन्तःसन्त्वाविशन्त्वोषधीरुतापः ॥
सुमित्रियानऽआपऽओषधयः सन्तुदुर्म्मित्रियास्तस्मैस
न्तुयोस्मान्द्वेष्टियञ्चवयन्द्विष्मः ॥ १९ ॥ द्रुपदादिवमु

चानः । स्विन्नःस्नातोमलादिव ॥ पूतम्पवित्रेणेवाज्यमापः
शुन्धन्तुमैनसः ॥ २० ॥ उद्वयम् ॥ उद्वयन्तमसस्परिस्वः
पश्यन्तऽउत्तरम् ॥ देवन्देवत्रासूर्य्यमगन्मज्योतिरुत्तमम्
॥ २१ ॥ अपोऽअद्य ॥ अपोऽअद्यान्वचारिषंरसेनसमसृ
क्ष्महि ॥ पयस्वानग्नऽआगमन्तम्मासꣳसृजवर्चसाप्रजया
चधनेनच ॥ २२ ॥ एधोसि ॥ एधोस्येधिषीमहिसमिदसि
तेजोसितेजोमयिधेहि ॥ समाववर्त्तिपृथिवीसमुषाःसमु
सं. ३८

रुर्यैः ॥ समुद्विश्श्वमिदञ्जगंत् ॥ वैश्श्वानुरञ्ज्योतिर्भूयासंविभूंकामान्व्यश्नवैभूःस्वाहां ॥ २३ ॥ [ १०-२ ] ॥ अब्भ्यादंधामि । सुमिधमग्ग्नेव्व्रतपतेत्त्वयिं ॥ व्व्रतञ्च्श्रुद्धाञ्चोपैमीन्धेत्त्वांदीक्षितोऽअहम् ॥ २४ ॥ यत्त्रब्ब्रह्मं । चक्क्षत्त्रञ्चसम्म्यञ्चौचरंतःसह ॥ तँल्लोकम्पुण्ण्यम्प्रज्ञेषँय्यत्त्रंदेवाःसहाग्ग्निनां ॥ २५ ॥ यत्त्रेन्द्रः ॥ यत्त्रेन्द्रश्च्चव्वायुश्च्चंसम्म्यञ्चौचरंतःसह ॥ ॥२२३
तँल्लोकम्पुण्ण्यम्प्रज्ञेषँय्यत्त्रसेदिर्न्नव्विद्यतें ॥ २६ ॥ अहशुनां

ते ॥ अहश्शुनांतेऽअहशुश्पूंह्वयताम्परूंपापरुः ॥ गन्धस्त्तेसो
मंमवतुमदांयरसोऽअच्युतः ॥ २७ ॥ सिञ्चन्तिपरिं । षिञ्च
न्त्युत्सिञ्चन्तिपुनन्तिच ॥ सुरांयैबभ्र्वैमदेंकिन्त्वोव्वंदतिकि
न्त्वः ॥ २८ ॥ धानावंन्तङ्करम्भिणंम् ॥ धानावंन्तङ्करम्भि
णंमपूपवंन्तमुक्थिनंम् ॥ इन्द्रंप्प्रातर्जुंषस्वनः ॥ २९ ॥ बृह
दिन्द्रांय । गायतमरुंतोवृत्रहन्तंमम् ॥ येनुज्योतिरजनयन्नृ
तावृधोंदेवन्देवायजागृंवि ॥ ३० ॥ अध्वंर्य्योऽअद्रिंभिः ।

सुतꣳ सोमम्पवित्त्रऽआनय ॥ पुनाहीन्द्रायपातवे ॥ ३१ ॥
[ ८-३ ] योभुतानाम् ॥ योभूतानामधिपतिर्य्यस्मिँल्लोकाऽ
अधिश्रिताः ॥ यऽईशेमहतोमहाँस्तेनगृह्णामित्त्वामहम्म
यिगृह्णामित्त्वामहम् ॥ ३२ ॥ उपयामगृहीतोसि ॥ उपयाम
गृहीतोस्यश्विभ्यान्त्वासरस्वत्यैत्त्वेन्द्रायत्त्वासुत्राम्णऽएष
तेयोनिरश्विभ्यान्त्वासरस्वत्यैत्त्वेन्द्रायत्त्वासुत्राम्णे ॥ ३३ ॥
प्राणपामे ॥ प्राणपामेऽअपानपाश्चक्षुष्पाःश्रोत्रपाश्चमे ॥

व्वाचोमेंव्विश्वभेषजोमनंसोसिव्विलायकः ॥ ३४ ॥ अश्विनं

कृतस्यते ॥ अश्विनंकृतस्यतेसरंस्वतिकृतस्येन्द्रेणसुत्राम्म्णाकृ

तस्यं ॥ उपंहूतऽउपंहूतस्यभक्षयामि ॥ ३५ ॥ [ ४-४ ]

समिद्धऽइन्द्रः ॥ समिद्धऽइन्द्रंऽउषसामनीकेपुरोरुचांपूर्व्वकृ

द्वावृधानः ॥ त्रिभिर्देवैस्त्रिꣳशताव्वज्रंबाहुर्ज्जघानंव्वृत्रंव्विदु

रोव्ववार ॥३६॥ नराशꣳसꣳस्पतिं ॥ नराशꣳसꣳस्पतिंशूरोमि

१ इन्द्रऽउषसा । अत्र "उषमहोभिः" (शु. य. प्रा. ३ अ. ११९ सू.) इत्यनेनास्मिन्परिगणितेभ्यः परेभ्य एव उषशब्दाकारस्य दीर्घविधानान्नात्र दीर्घः ।

मोनस्त्तनूनपात्त्प्रतिंयज्ञस्यधामं ॥ गोभिर्व्वपावान्त्मधुनासम
अन्हिरंण्ण्यैश्श्चन्द्रीसंजतिप्प्रचेताः ॥ ३७ ॥ ईडितोदेवैः ॥
ईडितोदेवैर्हरिवाँ २॥ऽअभिष्टिराजुह्वानोहविषाशर्द्धमानः ॥
पुरन्दरोगोत्त्रभिद्व ज्ज्रबाहुरायांतुयज्ञमुपंनोजुषाणः ॥ ३८ ॥
जुषाणोबर्हिः ॥ जुषाणोबर्हिर्हरिवान्नऽइन्द्रं॑प्प्राचीनंᳬसीद
त्त्प्रदिशांपृथिव्याः ॥ उरुप्प्रथाःप्प्रथमानᳬस्योनमादित्त्यैर
क्त्कंव्वसुभिःसजोषाः ॥३९॥ इन्द्रन्दुरंः । कवष्य्योधावमा



॥२२५॥

नाव्वृषांणँऽस्यन्तुजनंयꣳसुपत्क्कीꣳ ॥ द्वारोंदेवीरभितोव्विश्श्रंय

न्ताᳬंसुवीरांव्वीरम्प्रथंमानामहोंभिꣳ ॥ ४० ॥ उषासानक्क्तां ।

बृहतीबृहन्तम्पयंस्वतीसुदुघेशूरमिन्द्रंम् ॥ तन्तुंन्ततम्पेशंसा

संवयंन्तीदेवानांन्देवँऽयंजतꣳसुरुक्क्मे ॥ ४१ ॥ दैव्यामिमां

ना ॥ दैव्यामिमांनामनुंषꣳपुरुत्त्राहोतांराविन्द्रंप्रथमासुवा

चां ॥ मूर्द्धन्न्यज्ञस्यमधुंनादधांनाप्प्राचीनञ्ज्योतिंर्हविषांव्वृधा

१ प्रथमानामहोभिः उषासा । अत्र "उषमहोभिः" (शु. य. प्रा. ३ अ. ११९ सू.) इत्यनेन उष इत्ययं ह्रस्वो दीर्घमापद्यते महोभिः नक्त इम् इकार-एकारौकारनकारेभ्यः परश्चेत् । तेन महोभिः परस्य उषशब्दाकारस्य दीर्घाकारः । अत्र महोभिःशब्दात्पर उषशब्दो वर्तते । २ प्राचीनञ्ज्योतिः । अत्र "र-षऋकवर्गैश्च" इत्यनेनैतैरेवऽव्यवधाने समानपदे "ऋषरेभ्यो नकारो णकारं समानपदे" (शु. य. प्रा. ३ अ. ८२ सू.) इत्यनेन विधीयमानस्य णत्वस्यात्र

तदं ॥ ४२ ॥ तिस्रोदेवीः ॥ तिस्रोदेवीर्हविषावर्द्धमानाऽइ
न्द्रंञ्जुषाणाजनंयोनपत्नीः ॥ अच्छिन्नन्तन्तुम्पयंसासरंस्व
तीडांदेवीभारंतीविश्वतूंर्त्तिः ॥ ४३ ॥ त्वष्टादधंत् ॥ त्वष्टाद
धच्छुष्ममिन्द्रांयवृष्णेपाकोचिंष्टुर्यशसेंपुरूणि ॥ वृषाय
जन्वृषंणम्भूरिंरेतामूर्द्धन्यज्ञस्यसमंनक्तुदेवान् ॥ ४४ ॥ वन
स्प्पातिरवंसृष्टः ॥ वनस्प्पातिरवंसृष्टोनपाशैस्त्मन्यांसमञ्ज ॥२२६॥

---

व्यवधानोक्तातिरिक्तचवर्गस्य व्यवधानेनाप्राप्तं णत्वं "शिलिसिवर्गमध्यमव्यवहितोऽपि०" (शु. य. प्रा. ३ अ. ९६ सू.) इत्यनेन शकार-लकार-सकार-व्यवहितो मध्यमवर्गैश्चटतवर्गैर्व्यवहित ऋषरेभ्य उत्तरो नकारः प्रकृत्या भवति। इति णकारो निषिध्यते तच्छिष्यबुद्धिव्युत्पत्त्यर्थम्।

ञ्छंमितानदेवः ॥ इन्द्रंस्यहृद्यैर्जठरंम्पृणानःस्वदातियज्ञ
म्मधुनाघृतेनं ॥ ४५ ॥ स्तोकानामिन्दुम् ॥ स्तोकाना
मिन्दुम्प्रतिशूरऽइन्द्रो[1]वृषायमाणोवृषभस्तुराषाट् ॥ घृतप्रु
षामनंसामोदमानाःस्वाहादेवाऽअमृतामादयन्ताम् ॥ ४६ ॥
[११-५] आयातु ॥ आयात्विन्द्रोवसऽउपनऽइहस्तु
तःसधमादस्तुशूरः ॥ वावृधानस्तविषीर्यस्यपूर्वीर्द्यौर्न
क्षत्रमभिभूतिपुष्यात् ॥ ४७ ॥ आनः ॥ आनऽइन्द्रो

---

१ वृषायमाणः । अत्र यकारे परे वृषशब्दाकारस्य ''अथोदारिथ'' (शु. य. प्रा. ३ अ. ११५ सू.) इत्यनेन दीर्घः ।

दूरादानऽआसादभिष्टिकृदवसेयासदुग्ग्रः ॥ ओजिष्ठेभिर्नृपति
र्व्वज्ज्रबाहुꣳसङ्गेसमत्त्सुतुर्व्वणिः पृतन्न्यून् ॥ ४८ ॥ आनः ॥
आनऽइन्द्रोहरिभिर्य्यात्त्वच्छार्व्वाचीनोवसेराधसेच ॥ तिष्ठा
तिव्वज्ज्रीमघवाव्विरप्प्शीमँय्यज्ञमनुनोव्वाजसातौ ॥ ४९ ॥
त्रातारमिन्द्रम् ॥ त्रातारमिन्द्रमवितारमिन्द्रꣳहवेहवेसुहवꣳ
शूरमिन्द्रम् ॥ ह्वयामिशक्क्रम्पुरुहूतमिन्द्रꣳस्वस्तिनोमघवा
धात्त्विन्द्रः ॥ ५० ॥ इन्द्रः सुत्रामा ॥ इन्द्रः सुत्रामास्व

॥२२७॥

वाँ२॥ ऽअवोभिःसुमृडीकोभवतुविश्ववेदाः ॥ बाधतान्द्वेषोऽ
अभयङ्कृणोतुसुवीर्य्यस्यपतयःस्याम ॥ ५१ ॥ तस्यव्वयम् ॥
तस्यव्वयꣳसुमतौयज्ञियस्यापिभद्रेसौमनसेस्याम ॥ ससुत्रा
मास्ववाँऽइन्द्रोऽअस्म्मेऽआराच्चिद्द्वेषःसनुतर्य्युयोतु ॥ ५२ ॥
आमन्द्रैः ॥ आमन्द्रैरिन्द्रहरिभिर्य्याहिमयूररोमभिः ॥
मात्वाकेचिन्नियमन्विन्नपाशिनोतिधन्वेवताँ२॥ऽइहि॥ ५३ ॥
एवेत् ॥ एवेदिन्द्रंव्वृषणंव्वज्ज्रबाहुंव्वसिष्ठासोऽअभ्यर्च्चन्त्य

कैः ॥ सनंस्त्तुतोव्वीरवंद्धातुगोमंद्ध्युयम्पातस्वास्त्तिभिः सदांनः
॥ ५४ ॥ [ ८-६ ] समिंद्धोऽअग्निः ॥ समिंद्धोऽअग्निरंश्वि
नातप्पोघर्म्मोव्विराट्सुतः ॥ दुहेधेनुःसरंस्वतीसोमंᳪशुक्कमि
हेन्द्रियम् ॥ ५५ ॥ तनूपाभिषजां । सुतेश्विनोभासरंस्वती ॥
मद्धारजांᳪसीन्द्रियमिन्द्रांयपथिभिर्व्वहान् ॥ ५६ ॥ इन्द्रा
येन्दुंम् ॥ इन्द्रायेन्दुᳪसरंस्वतीनराशᳪसेननग्नहुंम् ॥ अधां
तामश्विनामधुंभेषजम्भिषजांसुते ॥ ५७ ॥ आजुह्वांनासरं

स्वती ॥ आजुह्वानासरस्वतीन्द्रायेन्द्रियाणिवीर्य्यम् ॥ इडा
भिरश्विनाविषᳪसमूर्जᳪसᳪरयिन्दधुः ॥ ५८ ॥ अश्विनान
मुचेः । सुतᳪसोमᳪशुक्रम्परिस्रुता ॥ सरस्वतीतमाभरद्ब
र्हिषेन्द्रायपातवे ॥५९॥ कवष्ष्योन । व्यचस्वतीरश्विभ्यान्न
दुरोदिशः ॥ इन्द्रोनरोदसीऽउभेदुहेकामान्त्सरस्वती ॥६०॥
उपासानक्क्तम् ॥ उपासानक्क्तमश्विनादिवेन्द्रᳪसायमिन्द्रि
सं. ३९ यैः ॥ सञ्ज्ञानानेसुपेशसासमञ्ज्ञातेसरस्वत्त्या ॥६१॥ पातन्नः ॥

पातन्नोऽअश्विनादिवांपाहिनक्क्तंᳬसरस्वति ॥ दैव्यांहोतारा
भिषजापातमिन्द्रᳬसचासुते ॥ ६२ ॥ तिस्स्त्रेधा । सरस्वत्त्य
श्विनाभारतीडा ॥ तीव्रम्पंरिस्स्रुतासोममिन्द्रायसुषुवुर्म्मदम्
॥ ६३ ॥ अश्विनाभेषजम् ॥ अश्विनाभेषजम्मधुभेषजन्नᳬ
सरस्वती ॥ इन्द्रेत्वष्ट्टायशᳬश्श्रियᳬरूपᳬरूपमधुᳬसुते ॥६४॥
ऋतुथेन्द्रः ॥ ऋतुथेन्द्रोव्वनस्प्पतिःशशमानःपरिस्स्रुता ॥ ॥२२९॥
कीलालमश्विभ्याम्मधुदुहेधेनुःसरस्वती ॥ ६५ ॥ गोभिर्न्न ।

सोमंमश्विनासरस्वतीपरिस्रुतं ॥ समंधातहुसरस्वत्यास्वाहे
न्द्रेसुतम्मधुं ॥ ६६ ॥ [ १२-७ ] अश्विनाहविः ॥ अश्वि
नाहविरिन्द्रियन्नमुचेर्द्धियासरस्वती ॥ आशुक्रमासुराद्धसुम
घमिन्द्रायजभ्रिरे ॥ ६७ ॥ यमश्विनां ॥ यमश्विनासर
स्वतीहविषेन्द्रमवर्द्धयन् ॥ सबिभेदबलम्मघन्नमुचावासुरेस
चां ॥ ६८ ॥ तमिन्द्रम् ॥ तमिन्द्रम्पशवहसचाश्विनोभासर
स्वती ॥ दधानाऽअभ्यनूषतहविषायज्ञऽइन्द्रियैः ॥ ६९ ॥

यऽइन्द्रे ॥ यऽइन्द्रंऽइन्द्रियन्दधुःसंविताव्वरुणोभगंः ॥ ससु
त्रामांहविष्प्पंतिर्य्यजंमानायसश्चत ॥७०॥ सविताव्वरुणं ॥
सविताव्वरुणोदधद्यजंमानायदाशुषे ॥ आदंत्तनमुचेर्व्वसुसुत्रा
माबलंमिन्द्रियम् ॥ ७१ ॥ व्वरुणंक्षत्रम् ॥ व्वरुणंक्षत्रमिं
न्द्रियम्भगेनसविताश्रियंम् ॥ सुत्रामायशंसाबलन्दधांनाय
ज्ञमांशत ॥ ७२ ॥ अश्विनागोभिंः ॥ अश्विनागोभिंरिन्द्र
यमश्वेभिर्व्वीर्य्यम्बलंम् ॥ हविषेन्द्रंसरंस्वतीयजंमानमवर्द्ध

यन् ॥ ७३ ॥ तानासंत्त्या । सुपेशंसाहिरंण्ण्यवर्त्तनीनरां ॥
सरंस्वतीहुविष्म्मुतीन्द्रकर्म्मसुनोवत ॥ ७४ ॥ ताभिपजां ।
सुकर्म्मणासासुदुघासरंस्वती ॥ सवृंत्रहाशतक्कंतुरिन्द्रांयदधु
रिन्द्रियम् ॥ ७५ ॥ युवꣳसुरामंम् ॥ युवꣳसुरामंम
श्विनानमुंचावासुरेसचां ॥ विपिपानाꣳसंरस्वतीन्द्रङ्कर्म्म
स्वावत ॥ ७६ ॥ पुत्रमिंवपितरौं ॥ पुत्रमिंवपितरांव
श्विनोभेन्द्रावथुꣳकाव्यैंर्दꣳसनांभिः ॥ यत्त्सुरामंव्यपिंबꣳश

चीभिꣳसरस्वतीत्त्वामघवन्नभिष्णक् ॥ ७७ ॥ यस्मिन्न
श्वासꣳ ॥ यस्मिन्नश्वासऽऋषभासऽउक्षणोव्वशामेषाऽअवसृ
ष्टासऽआहुताꣳ ॥ कीलालपेसोमपृष्ठायव्वेधसेहृदामतिञ्जनय
चारुमग्नये ॥ ७८ ॥ अहाव्यग्ने । हविरास्येतेस्रुचीवघृत
ञ्चम्वीवसोमः ॥ व्वाजसनिꣳरयिमस्मेसुवीरम्प्रशस्तन्धे
हियशसम्बृहन्तम् ॥ ७९ ॥ [१३-८] शतम् १२०० ॥ ॥२३१।
अश्विनातेजसा ॥ अश्विनातेजसाचक्षुः प्प्राणेनसरस्वतीव्वी

रसम् ॥ वाचेन्द्रोबलेनेन्द्रायदधुरिन्द्रियम् ॥ ८० ॥ गोमं
दूषुणासत्त्या ॥ गोमंदूषुणासत्त्याश्वावद्यातमश्विना ॥ वर्ती
रुद्रानृपाय्यम् ॥ ८१ ॥ नयत् ॥ नयत्त्परोनान्तरऽआदध
र्षदूषण्वसू ॥ दुःशःसोमत्त्योरिपुः ॥ ८२ ॥ तानंः ॥
तानऽआवोढमश्विनारयिम्पिशङ्गंसन्दृशम् ॥ धिष्ण्यांवरि
वोविदम् ॥ ८३ ॥ पावकानंः ॥ पावकानःसरस्वतीवाजे

१ गोमदूपु णासत्या । अत्र समानपदत्वाभावेन णत्वाप्राप्तौ "निषण्णाय°" (शु. य. प्रा. ३ अ. ८७ सू.) इत्यनेन णत्वस्य निपातः ।

भिर्व्वाजिनीवती ॥ य॒ज्ञं॑व्वष्टु॒धि॒याव॑सुः ॥ ८४ ॥ चो॒द॒यि॒त्री
सू॒नृता॑नाम् ॥ चो॒द॒यि॒त्रीसू॒नृता॑ना॒ञ्चेत॑न्तीसुमती॒नाम् ॥
य॒ज्ञन्द॑धे॒सर॑स्वती ॥ ८५ ॥ म॒हो॒ऽअर्ण्णः॑ ॥ म॒हो॒ऽअर्ण्ण॒ः
सर॑स्वती॒प्रचे॑तयति के॒तुना॑ ॥ धियो॒व्विश्वा॒व्विरा॑जति ॥ ८६ ॥
इन्द्रा॒या॑हि । चित्र॑भानो॒सु॒ताऽइ॒मेत्त्वा॒यवः॑ ॥ अण्वी॑भि॒स्त्त
ना॑पू॒तासः॑ ॥ ८७ ॥ इन्द्रा॒या॑हि । धि॒येषि॒तोव्विप्र॑जूतः

१ चित्रभानो । अत्र समानपदे "ऋपरेभ्यः" इत्यनेन भस्य व्यवधानेनाप्राप्तौ "स्वरयवहकपैश्च" इत्यनेन पवर्गव्यवधानेऽपि णत्वप्रनिप्रसवेन पुनर्णत्वप्राप्तौ "इन्द्राग्नी चित्रभानो॰" ( शु. य. प्रा. ३ अ. ९३ सू. ) इत्यनेन निषिद्ध्यते ।

सुतावतः ॥ उपब्रह्माणिशृणुतः ॥ ८८ ॥ इन्द्रायाहि ॥
इन्द्रायाहितूतुजानऽउपब्रह्माणिहरिवः ॥ सुतेदधिष्ष्वनश्च
नः ॥ ८९ ॥ अश्विनापिबताम् ॥ अश्विनापिबताम्मधुसरं
स्वत्यासजोषसा ॥ इन्द्रःसुत्रामावृत्रहाजुषताꣳसोम्म्यम्म
धुं ॥ ९० ॥ [११-९] इतिश्रीवाजसनेयसंहितायांविंशति-
तमोऽध्यायः ॥ २० ॥ पूर्वविंशतौ मंत्रसंख्या १२११ ॥

१ सुतावतः । अत्र "अश्वरश्मिमतिसुमतिश्वसुत०" (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन वकारे परे सुतस्याकारस्य दीर्घः ।

इति श्रीवाजसनेयसंहितायां पूर्वविंशतिः समाप्ता ॥

# अथ श्रीवाजसनेयसंहितोत्तरविंशतिप्रारम्भः ॥

शु. य. संहि. ॥ श्रीगणेशायनमः ॥ अनुवाकसूत्रम् ॥ इमम्मे, समिद्धोऽ उ. हि
अग्निरेकादशकौ, व्वसन्तेनऽऋतुना षड्, होतायक्षत्त्समिधा अ.
॥ १ ॥ ग्निन्द्वादशा, श्विनौच्छागस्य सप्त, देवम्बर्हिश्चतुर्द्दश, षडेक ॥ २१
षष्टिः [ अ. २१ मं. ६१ अनु. ६ ] ॥ हरिःॐ ॥ इमम्मे । व्वरु
णश्श्रुधीहवमद्याचमृडय ॥ त्वामवस्युराचके ॥ १ ॥ तत्त्वा ।
यामिब्ब्रह्मणाव्वन्दमानस्तदाशास्तेयजमानोहविर्भिः ॥ ॥ १ ॥
अहेडमानोव्वरुणेहबोद्ध्युरुशꣳसमानऽआयुःप्प्रमोषीः ॥ २ ॥

त्वन्नः ॥ त्वन्नोऽअग्नेव्वरुणस्यविद्वान्देवस्यहेडोऽअवयासि[1]

सीष्ठाः ॥ यजिष्ठोव्वह्नितमःशोशुचानोव्विश्वाद्वेषाᳬसिप्रमुमु

ग्ध्यस्म्मत् ॥ ३ ॥ सत्त्वम् ॥ सत्त्वन्नोऽअग्नेवमोभवोतीनेदि

ष्ठोऽअस्याऽउषसोव्युष्टौ ॥ अवयक्ष्वनोव्वरुणᳬरराणोव्वीहिमृ

डीकᳬसुहवोनऽएधि ॥ ४ ॥ महीमू षु । मा[2]तरᳬसुव्रतानामृत

---

१ अवयासिसीष्ठाः । अत्र "भाविभ्यः स षं समानपदे" (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन षत्वप्राप्तौ "पृथिविदिव्युपरिचर्षणिशकुनियासिभ्यः" (शु. य. प्रा. ३ अ. ८४ सू.) इत्यनेन प्रकृतिभावे न षत्वम् । २ मातरसुवᳬतानाम् । वर्णे तु मात्रिके पूर्वे ह्यनुस्वारो द्विमात्रिकः । या. शि. । मात्रिके ह्रस्ववर्णपूर्वेऽनुस्वारो द्विमात्रिको दीर्घᳬइत्याकारको ज्ञेयः । अत्र "अनुस्वारो ह्रस्वपूर्वोऽध्यर्द्धमात्रा पूर्वा चार्धमात्रा" (शु. य. प्रा. ४ अ. १४८ सू.) इति लिङ्गम् ।

अं. ४०

५५१.

स्यपत्नीमवंसेहुवेम ॥ तुविक्षत्रामजरंन्तीमुरूचीꣳसुशर्म्मा
णमदितिꣴसुप्प्रणीतिम् ॥ ५ ॥ सुत्रामाणम्पृथिवीम् ॥ सुत्रा
माणम्पृथिवीन्द्यामनेहसꣴसुशर्म्माणमदितिꣴसुप्प्रणीतिम् ॥
दैवीन्नाव[1]ꣳस्वरित्रामनागसमस्रवन्तीमारुहेमास्वस्त्तये ॥ ६ ॥
सुनावमारुहेयम् ॥ सुनावमारुहेयमस्रवन्तीमनागसम् ॥
शतारित्रा[2]ꣳस्वस्त्तये ॥ ७ ॥ आनः ॥ आनोमित्रावरुणाघृ ॥ २ ॥

---

१-२ संयोगाद्यश्च यो भवेत् । या. शि. । यत्र संयोगाद्यो मात्रिको द्विमात्रिको वा वर्णः सोऽपि ऋवर्णव्यञ्जनादिगं संयोगाद्यं वर्जयित्वा ह्रस्व एकमात्रिको भवति न तु गुरुभूतः । तत्र ह्रस्वोच्चारणप्रदर्शकं ꣳ इत्याकारकं चिह्नं ज्ञेयम् । दीर्घस्य ꣴ इत्याकारकं चिह्नम् ।

तैर्ग्गर्घ्यूंतिमुक्क्षतम् ॥ मद्धारजांठंसिसुक्क्रतू ॥ ८ ॥ प्रबाहवां ।
सिसृतञ्जीवसेनऽआनोगर्घ्यूंतिमुक्क्षतङ्घृतेनं ॥ आमाजनैश्श्र
वयतँऽयुवानाश्श्रुतम्मौमित्रावरुणाहवेमा ॥ ९ ॥ शन्नः ॥
शन्नौभवन्तुव्वाजिनोहवेषुदेवतातामितद्रंवर्हस्वर्क्काः ॥ जम्भय
न्तोहिंव्वृकठ्रक्क्षां[1]ठंसिसनैम्म्यस्म्मद्युयवन्नमीवाः ॥ १० ॥
व्वाजेंवाजेवत । व्वाजिनोनोधनेषुविप्प्राऽअमृताऽऋतज्ज्ञाः ॥

१ रक्षाठंसि । द्विमात्रे मात्रिकः स्यात् । या. शि. । यत्र द्विमात्रिकः पूर्ववर्णस्तत्र मात्रिको ह्रस्वोऽनुस्वारः ठं इत्याकारकः । अत्र "दीर्घाद्‌र्द्धमात्रा पूर्वा चाद्ध्यर्धा" (शु. य. प्रा. ४ अ. १४९ सू. ) लिङ्गम् ।

अस्यमद्ध्वं÷पिबतमादयंद्ध्वन्तृप्ष्तायातपथिभिर्द्देवयानैंः॥ ११ ॥
[ ११-१ ] समिद्धोऽअग्निः । समिधासुसंमिद्धो
व्वरेण्ण्यः ॥ गायत्रीच्छन्दंऽइन्द्रियन्त्र्यविग्गौर्व्वयोदधुः
॥ १२ ॥ तनूनपाच्छुचिंव्व्रतः ॥ तनूनपाच्छुचिंव्व्रतस्त्तनूपा
श्चसरंस्वती ॥ उष्णिणहाच्छन्दंऽइन्द्रियन्दित्त्यवाड्गौर्व्वयो
दधुः ॥ १३ ॥ इडांभिरग्निः ॥ इडांभिरग्निरीड्ड्यःसोमो
देवोऽअमर्त्त्यः ॥ अनुष्टुप्प्छन्दंऽइन्द्रियम्पञ्चाविग्गौर्व्वयो

दधुः ॥१४॥ सुबर्हिरग्निः । पूषण्वान्त्स्तीर्णबर्हिरमर्त्यः ॥
बृहतीच्छन्दऽइन्द्रियन्त्रिवत्सोगौर्व्वयोदधुः ॥ १५ ॥ दुरो
देवीः ॥ दुरोदेवीर्दिशोमहीर्ब्रह्मादेवोबृहस्पतिः ॥ पङ्क्तिश्छ
न्दऽइहेन्द्रियन्तुर्य्यवाड्गौर्व्वयोदधुः ॥ १६ ॥ उषेयह्वी ॥
उषेयह्वीसुपेशसाविश्वेदेवाऽअमर्त्त्याः ॥ त्रिष्टुप्छन्दऽइहेन्द्रि
यम्पष्ठवाड्गौर्व्वयोदधुः ॥ १७ ॥ दैव्याहोतारा । भिषजेन्द्रे
णसयुजायुजा ॥ जगतीच्छन्दऽइन्द्रियमनड्वान्गौर्व्वयोदधुः

॥ १८ ॥ तिस्रऽइडा ॥ तिस्रऽइडासरस्वतीभारतीमरुतो
३ ॥ विशः ॥ विराट्छन्दऽइहेन्द्रियन्धेनुग्गौर्न्नवयोदधुः ॥ १९ ॥ ॥ २१ ॥
त्वष्टातुरीपः ॥ त्वष्टातुरीपोऽअद्भुतऽइन्द्राग्नीपुष्टिवर्द्धना ॥
द्विपदाच्छन्दऽइन्द्रियमुक्षागौर्न्नवयोदधुः ॥ २० ॥ शमि
तानः ॥ शमितानोवनस्पतिःसविताप्प्रसुवन्भगम् ॥ ककु
प्छन्दऽइहेन्द्रियंवशावेहद्वयोदधुः ॥ २१ ॥ स्वाहायज्ञम् ॥ ॥ ४ ॥
स्वाहायज्ञंवरुणःसुक्षत्रोभेषजङ्करत् ॥ अतिच्छन्दाऽइन्द्रि

यंबृहद्द्रंभोगौर्व्वयोंदधुः ॥ २२ ॥ [११-२] व्वसन्तेनंऽऋ
तुनां । देवाव्वसंवस्त्रिवृतांस्तुताः ॥ रथन्तरेणतेजंसाहविरि
न्द्रेव्वयोंदधुः ॥ २३ ॥ ग्रीष्मेणंऽऋतुनां । देवारुद्राःपंञ्च
दशेस्तुताः ॥ बृहतायशंसाबलंर्ठ्हविरिन्द्रेव्वयोंदधुः ॥२४॥
व्वर्षाभिंर्ऋतुनां । दित्यास्तोमैंसप्तदशेस्तुताः ॥ व्वैरूपेणं
व्विशौजंसाहविरिन्द्रेव्वयोंदधुः ॥ २५ ॥ शारदेनंऽऋतुनां ।
देवाऽएंकविर्ठ्शऽऋभवंस्तुताः ॥ व्वैराजेनंश्रियाश्रियंर्ठ्हवि

रिन्द्रे वयो दधुः ॥ २६ ॥ हेमन्तेनऽऋतुना । देवास्त्रिणवे मरुत
स्स्तुताः ॥ बलेन शक्वरीꣳ सहो हविरिन्द्रे वयो दधुः ॥ २७ ॥ शैशि
रेणऽऋतुना । देवास्त्रयस्त्रिꣳशेमृतास्स्तुताः ॥ सत्येन रेवतीꣳ क्ष
त्रꣳ हविरिन्द्रे वयो दधुः ॥ २८ ॥ [ ६-३ ] होता यक्षत् । होता य
क्षत्समिधाग्निमिडस्पदेश्विनेन्द्रꣳ सरस्वतीमजो धूम्रो न गो
धूमैः कुवलैर्भेषजम्मधु शष्पैर्न्न तेजऽइन्द्रियम्पयः सोमः परि
स्रुता घृतम्मधु व्यन्त्वाज्यस्य होतर्य्यज ॥ २९ ॥ होता यक्षत्त

॥ ५ ॥

१ पादादौ च पदादौ च संयोगावग्रहेषु यः । जशब्द इति विज्ञेयो योऽन्यः स य इति स्मृतः । या. शि. । अत्र पदादौ यकारस्य सत्त्वाज्जकारो च्चारणम् ।

नूनपात्त्सरस्वतीम् ॥ होतायक्षत्तनूनपात्त्सरस्वतीमविर्म्मे
षोनभेषजम्पथामधुमताभरन्नश्विनेन्द्रायवीर्य्यम्बदरैरुपवा
काभिर्भेषजन्तोक्मभिꣳपयꣳसोमः परिस्रुताघृतम्मधुव्य
न्त्वाज्ज्यस्यहोतर्य्यज ॥ ३० ॥ होतायक्षन्नराशꣳसन्न ।
नग्नहुम्पतिꣳसुरयाभेषजम्मेषꣳसरस्वतीभिषग्ग्रथोनचन्द्र्य
श्विनोर्व्वपाऽइन्द्रस्यवीर्य्यम्बदरैरुपवाकाभिर्भेषजन्तोक्मभिꣳ
पयꣳसोमः परिस्रुताघृतम्मधुव्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ ३१ ॥

---

१ अत्र रकारयकारयोः संयोगाज्जकारोच्चारणम् । एवं होतर्य्यजेत्यादौ ।

होतांयक्षदि॒डेडि॒तः॒ ॥ होतांयक्षादि॒डेडि॒तऽआ॒जुह्वांनॗंसर॑ 
स्वती॒मिन्द्र॒म्बलेनव॒र्द्धयंन्नृष॒भेण॒गवेन्द्रि॒यम॒श्विनेन्द्रांयभे॒ष॒जं
ऽयवैः॒ कु॒र्कन्धु॑भि॒र्म्मधुं॒ल्ला॒जैर्न्नमासंर॒म्पय॒ꣳसोमंः॒ परि॒स्रुतां॒घृत ॥ २१ ॥
म्मधुं॒घ्यन्त्वाज्ज्यंस्य॒होत॒र्य्यजं ॥ ३२ ॥ होतांयक्षद्बु॒र्हिः
रू॒र्णम्म्रदाꣳ ॥ होतांयक्षद्बु॒र्हिरू॒र्णम्म्रदा॒भि॒षङ्ङ्गासंत्त्या
भि॒ष॒जा॒श्विना॒श्वा॒शि॒शुंमती॒भि॒ष॒ग्ग्धे॒नुः॒सरंस्वती॒भि॒ष॒ग्ग्दु॒हऽइ ॥ ६ ॥
न्द्रांयभे॒ष॒जम्पय॒ꣳसोमंः॒ परि॒स्रुतां॒घृतम्मधुं॒घ्यन्त्वाज्ज्यंस्य॒होत॒

र्य्यजं ॥ ३३ ॥ होतायक्षद्दुरोदिशः । कवष्योनव्यचस्व
तीरश्विभ्यान्नदुरोदिशऽइन्द्रोनरोदसीदुघेदुहेधेनुश्सरस्वत्य
श्विनेन्द्रायभेषजꣳशुक्रन्नज्योतिरिन्द्रियम्पयꣳसोमः परिस्रु
तांघृतम्मधुव्यन्त्वाज्ज्यस्यहोतर्य्यजं ॥ ३४ ॥ होतायक्ष
त्सुपेशसोषे । नक्तन्दिवाश्विनासमञ्ञातेसरस्वत्यात्त्विषिमि
न्द्रेनभेषजꣳश्येनोनरजसाहृदाश्रियानमासरम्पयꣳसोमः
परिस्रुतांघृतम्मधुव्यन्त्वाज्ज्यस्यहोतर्य्यजं ॥ ३५ ॥ होताय

शु. य. संहि. ७ ॥

उ. वि. अ. ॥ २१ ॥

क्षद्दैव्याहोतारा । भिषजाश्विनेन्द्रन्नजागृविदिवानक्तन्नभे
षजैश्शूषꣳसरस्वतीभिषक्सीसेनदुहऽइन्द्रियम्पयꣳसोमः परि
स्रुताघृतम्मधुव्यन्त्वाज्यस्यहोतर्य्यज ॥ ३६ ॥ होतायक्ष
त्तिस्रोदेवीः ॥ होतायक्षत्तिस्रोदेवीर्न्नभेषजन्त्रयस्त्रिधात
वोपसोरूपमिन्द्रेहिरण्ययमश्विनेडानभारतीव्वाचासरस्वती
महऽइन्द्रायदुहऽइन्द्रियम्पयꣳसोमः परिस्रुताघृतम्मधुव्य ॥ ७ ॥
न्त्वाज्यस्यहोतर्य्यज ॥ ३७ ॥ होतायक्षत्सुरेतसन्त्व

षभम् ॥ होतायक्षत्सुरेतसमृषभन्नर्य्यापसन्त्वष्टारमिन्द्र
मश्विनाभिषजन्नसरस्वतीमोजोनजूतिरिन्द्रियंव्वृकोनरभसो
भिषग्ग्यशꣳसुरयाभेषजꣳश्रियानमासरम्पयꣳसोमः परिस्रु
ताघृतम्मधुव्यन्त्वाज्यस्यहोतर्य्यज ॥ ३८ ॥ होतायक्षद्व
नस्प्पतिꣳशमितारम् ॥ होतायक्षद्वनस्प्पतिꣳशमितारꣳश
तक्क्रतुम्भीमन्नमन्युꣳराजानंव्याग्घ्रन्नमसाश्विनाभामꣳसर

---

१ "वर्णे तु मात्रिके पूर्वे ह्यनुस्वारो द्विमात्रिकः" या. शि. । मात्रिके (ह्रस्ववर्णपूर्वे) अनुस्वारो द्विमात्रिकः ꣳ इत्याकारको दीर्घो ज्ञेयो लेख्यश्च । अत्र अनुस्वारो ह्रस्वपूर्वोऽध्यर्द्धमात्रा पूर्वा चार्धमात्रा (शु. य. प्रा. ४ अ. १४८ सू.) इत्यनेन चोक्तम् । अत्र मन्युं राजानम् इत्यत्रानुस्वारस्य ह्रस्ववर्णपूर्वत्वं वर्तते ।

सं. ५१

स्वतीभिषगिन्द्रायदुहऽइन्द्रियम्पयꣳसोमः परिस्रुताघृतम्मधु
व्यन्त्वाज्ज्यस्यहोतर्यज ॥ ३९ ॥ होतायक्षदग्निꣳस्वाहा ॥
होतायक्षदग्निꣳस्वाहाज्ज्यस्यस्तोकानाꣳस्वाहामेदसाम्पृथ
क्स्वाहाछागमश्श्विभ्याꣳस्वाहामेषꣳसरस्वत्त्यैस्वाहऽऋषभ
मिन्द्रायसिꣳहायसहसऽइन्द्रियꣳस्वाहाग्निन्नभेषजꣳस्वाहा
सोममिन्द्रियꣳस्वाहेन्द्रꣳसुत्रामाणꣳसवितारंव्वरुणम्भिषजा ॥ ८ ॥
म्पतिꣳस्वाहाव्वनस्प्पतिम्प्रियम्पाथोनभेषजꣳस्वाहादेवाऽआ

ज्यपाजुंषाणोऽअग्निर्भैषजम्पयःसोमःपरिस्रुताघृतम्मधुव्य
न्त्वाज्यंस्यहोतर्य्यजं ॥४०॥ [१२-४] होतायक्षदश्विनौ
छागस्य । वपायामेदसोजुषेतां[1]ꣳहविर्होतर्य्यजं ॥ होतायक्ष
त्सरस्वतीम्मेषस्यवपायामेदसोजुषताꣳहविर्होतर्य्यजं ॥ हो
तायक्षदिन्द्रमृषभस्यवपायामेदसोजुषताꣳहविर्होतर्य्यजं
॥४१॥ होतायक्षदश्विनौसरस्वतीम् ॥ होतायक्षदश्विनौसर

१ "द्विमात्रिके मात्रिकः स्यात्" या. शि. । यत्र द्विमात्रिकः पूर्ववर्णः (दीर्घस्वरः) तत्रानुस्वारो ह्रस्वः ꣳ इत्याकारको ज्ञेयो लेख्य उच्चारणीयश्च । अत्र "दीर्घादर्द्धमात्रा पूर्वा चाद्व्यर्धा" (शु. य. प्रा. ४ अ. १४९ सू.) प्रमाणम् । अत्र "जुषतां ꣳ हविः" इति पदे दीर्घवर्णपूर्वोऽनुस्वारो वर्तते ।

स्वतीमिन्द्रꣳ सुत्रामाणमिमेसोमाꣳसुरामाणश्च्छागैर्न्नमेषैर्ऋ
षभैःसुताःशष्प्पैर्न्नतोक्मभिर्ल्लाजैर्म्महस्वन्तोमदामासरेणपरि[1]
ष्कृताःशुक्राःपयस्वन्तोमृताःप्प्रस्थितावोमधुश्चुतस्तानश्वि
नासरस्वतीन्द्रःसुत्रामावृत्रहाजुषन्ताꣳसोम्म्यम्मधुपिबन्तुम
दन्तुव्यन्तुहोतर्य्यज ॥४२॥ होतायक्षदश्विनौछागस्य । हवि
षऽआत्तामद्यमद्ध्यतोमेदऽउद्भृतम्पुराद्द्वेषोब्भ्यꣳपुरापौरुषेय्या ॥९॥

१ परिष्कृता । अत्र ''परिकृते षकारेण'' ( शु. य. प्रा. ३ अ. ५३ सू. ) इत्यनेन परिपदं कृते परे षकारेण व्यवधीयते । ततोऽत्र ''ऊष्मान्तस्थाभ्यश्च स्पर्शः'' ( शु. य. प्रा. ४ अ. १०२ सू. ) इत्यनेन द्वित्वं प्राप्त परञ्च ''ऋवर्णे च'' ( शु. य. प्रा. ४ अ. १११ सू. ) इत्यनेन कृतघटितकारे परे द्वित्वस्य निषेधात् द्वित्वं न ।

गृभोघस्त्तांन्नूनङ्घासेऽअंज्ज्राणाँऽय्यवंसप्प्रथमानाऽंसुमत्त्क्षंरा
णाऽंशतरुद्द्रियांणामग्ग्निष्ष्वात्तानाम्पीवोंपवसनानाम्पार्श्श्व
तःश्श्रोंणितःशिंतामतऽउंत्त्सादुतोङ्गांदङ्गादवंत्तानाङ्करंतऽए
वाश्श्विनांजुषेतांऽंहविर्होंतर्य्यंज ॥ ४३ ॥ होतांयक्ष
त्सरंस्वतीम्मेषस्यं । हविषऽआवंयदुद्य मंद्द्यतोमेदऽउद्धृंत
म्पुराद्द्वेषोंभ्यःपुरापौरुंषेय्यागृभोघसंन्नूनङ्घासेऽअंज्ज्राणाँऽय
वंसप्प्रथमानाऽंसुमत्त्क्षंराणाऽंशतरुद्द्रियांणामग्ग्निष्ष्वात्ता

१ पीवः उपवसनानाम् इत्यत्र "उपवसने पीवः" (शु. य. प्रा. ३ अ. १९ सू.) इत्यनेन उपवसने परे विसर्जनीयस्य लोपे "उवर्ण ओकारम्"

नाम्पीवोपवसनानाम्पार्श्वतश्श्रोणितश्शितामुतऽउत्सादतो
ऽङ्गादङ्गादवत्तानाङ्करदेवꣳसरस्वतीजुषताꣳहविर्होतर्य्यज
॥ ४४ ॥ होतायक्षदिन्द्रमृषभस्य । हविषऽआवयद्द्यमध्य
तोमेदऽउद्भृतम्पुराद्वेषोभ्यःपुरापौरुषेय्यागृभोघसन्नूनङ्घासेऽ
अज्ज्राणाँय्यवसप्प्रथमानाꣳसुमत्क्षराणाꣳशतरुद्रियाणा
मग्निष्वात्तानाम्पीवोपवसनानाम्पार्श्वतश्श्रोणितश्शिताम् ॥ १० ॥

( शु. य. प्रा. ४ अ. ५३ सू. ) इति गुणे रूपं भवति। १ अत्र स्वरात्संयोगादिर्द्विरुच्यते इति सूत्रेण शकारस्य द्वित्वे प्राप्तेऽपि "नास्वरपूर्वा०" इति सूत्रस्य वृत्तौ विसर्जनीयाद्व्यञ्जनपरस्य द्वित्वञ्चेत्स्पर्शवर्णस्यैवेति नियमात्स्पर्शातिरिक्तशकारस्य द्वित्वं न भवति। तेन न द्वित्वम्।

तऽउंत्त्सादुतोऽङ्गोदङ्गाद्वंत्तानाङ्करंदेुवामिन्द्रौंजुषताᳪंहुविहों
तुर्व्यंज ॥ ४५ ॥ होतांयक्षुद्वुनस्प्पातिंमुभि । हिपिुष्टतमयुा
रभिंष्ठयारशुनयाधिंत ॥ यत्राुश्विनोुश्च्छागंस्यहुविषं÷ प्प्रिया
धामांनिुयत्रुसरंस्वत्त्यामेुषस्यंहुविषं÷ प्प्रियाधामांनिुयत्रेन्द्रंस्य
ऽऋषुभस्यंहुविषं÷ प्प्रियाधामांनिुयत्राुग्नेश्प्प्रियाधामांनिुयत्रु
सोमंस्यप्प्रियुाधामांनिुयत्रेन्द्रंस्यसुुत्राम्म्णं÷ प्प्रियुाधामांनिुयत्रं
सवितुश्प्प्रियुाधामांनिुयत्रुव्वरुंणस्यप्प्रियुाधामांनिुयत्रुव्वनस्प्प

तेँ॒ऽप्प्रि॒यापा॑थाँ॑ᳬसि॒यत्त्रे॑दे॒वानां॑माज्ज्य॒पानां॒प्प्रि॒याधामा॑नि॒य

त्त्रा॒ग्ग्नेर्हो॒तुः॒प्प्रि॒याधामा॑नि॒तत्त्रै॒ताम्प्र॒स्त्तु॒त्त्यैवो॒प॒स्त्तु॒त्त्यैवो॒पाव

स्त्रक्क्ष॒द्द्र॒भीयस॒ऽइवकृ॒त्त्वीक॑रदे॒वन्दे॒वोव्व॒नस्प्पति॒र्ज्जु॒षताँ॑ᳬहवि

र्हो॒त॒र्य्यज॑॥४६॥ होता॒यक्क्षद॒ग्ग्निँ॑ᳬस्वि॒ष्ट्ट॒कृतम्॥ होता॒यक्क्षद

ग्ग्निँᳬस्वि॒ष्ट्ट॒कृत॒मया॒ऽड॒ग्ग्निर॒श्श्विनो॒श्च्छाग॑स्यह॒विषः॒प्प्रि॒याधा

मा॒न्न्यया॒ड्ड॒र॒स्व॒त्त्या॒मे॒षस्य॑ह॒विषः॒प्प्रि॒याधामा॒न्न्यया॒डि॑न्द्र॑स्यऽ ॥ ११ ॥



---

१ "संयोगाद्यश्च यो भवेत्" या. शि.। यद्यनुस्वारस्य पूर्वो वर्णो दीर्घो वा ह्रस्वः संयोगाद्यश्चेत्तदाऽनुस्वारो मात्रिकोᳬइत्याकारको ह्रस्वो ज्ञेयो लेख्य उच्चारणीयश्च सर्वत्र। परञ्च यत्र संयोगाद्य ऋवर्णव्यञ्जनादिगो दीर्घो वा ह्रस्वो वर्णस्तत्र तु ᳬ इत्याकारकोऽनुस्वारो दीर्घो ज्ञेयो बोद्धः। यथा देवानां हृ दयेन।

ऋषभस्येह हविषः ष्प्रिया धामान्ययाऽडग्नेः ष्प्रिया धामान्ययाट्सो
मस्य ष्प्रिया धामान्ययाऽडिन्द्रस्य सुत्राम्म्णः ष्प्रिया धामान्यया
ट्सवितुः ष्प्रिया धामान्ययाड्वरुणस्य ष्प्रिया धामान्ययाड्वन
स्पतेः ष्प्रिया पाथाꣳस्ययाड्देवानामाज्यपानां ष्प्रिया धामानि
यक्षदग्नेर्होतुः ष्प्रिया धामानि यक्षत्स्वम्महिमानमायजता
मेज्याऽइषः कृणोतु सोऽअध्वरा जातवेदा जुषताꣳ हविर्होतर्य्य
ज ॥४७॥ [७-५] देवम्बर्हिः। सरस्वती सुदेवमिन्द्रेऽअश्विना ॥

१ रकारहकारयोगेऽत्र करिण्यादीनां पंचस्वरभक्तीनां मध्ये "करिणी रहयोर्योगे" (या. शि.) इत्यनेन करिणी स्वरभक्तिर्ज्ञेया। एवं सर्वत्र।

तेजोनचक्षुरक्ष्योर्ब्बर्हिषादधुरिन्द्रियंव्वसुवनेव्वसुधेयस्यव्व्यन्तु
यज ॥ ४८ ॥ देवीर्द्वारः ॥ देवीर्द्वारोऽअश्विनाभिषजे
न्द्रेसरस्वती ॥ प्राणन्नवीर्य्यन्नासिद्वारोदधुरिन्द्रियंव्वसुवनेव्वसु
धेयस्यव्व्यन्तुयज ॥ ४९ ॥ देवीऽउषासौ ॥ देवीऽउषासाव
श्विनासुत्रामेन्द्रेसरस्वती ॥ बलन्नवाचमास्यऽउषाभ्यान्दधुरि
न्द्रियंव्वसुवनेव्वसुधेयस्यव्व्यन्तुयज ॥ ५० ॥ देवीजोष्ट्री ॥ ॥ १२ ॥
देवीजोष्ट्रीसरस्वत्त्यश्विनेन्द्रमवर्द्धयन् ॥ श्रोत्रन्नकर्ण्णयोर्य्य

शोजोष्ट्रीँभ्यान्दधुरिन्द्रियंव्वसुवनेंव्वसुधेयस्यव्यन्तुयज ॥५१॥
देवीऽऊर्ज्जाहुती ॥ देवीऽऊर्ज्जाहुतीदुघेसुदुघेन्द्रेसरस्वत्त्याश्वि
नांभिषजावतः ॥ शुक्क्रन्नज्ज्योतिस्त्तनयोराहुतीधत्तऽइन्द्रियं
व्वसुवनेंव्वसुधेयस्यव्यन्तुयज ॥ ५२ ॥ देवादेवानाम् ॥ देवा
देवानाम्भिषजाहोताराविन्द्रमाश्विना ॥ व्वषट्कारैःसरस्वती
त्त्विषिन्नहृदयेमतिँहोतृभ्यान्दधुरिन्द्रियंव्वसुवनेंव्वसुधेयस्य
व्यन्तुयज ॥ ५३ ॥ देवीस्त्तिस्रः ॥ देवीस्त्तिस्रस्तिस्रोदे

वीरश्विनेडासरस्वती ॥ शूपन्नमद्ध्योनाभ्यामिन्द्रायदधुरिन्द्रि
यंव्वसुवनेव्वसुधेयस्यव्यन्तुयज ॥ ५४ ॥ देवऽइन्द्रः ॥ देवऽ
इन्द्रोनराशꣳसस्त्रिवरूथःसरस्वत्याश्विभ्यामीयतेरथः ॥ रेतो
नरूपममृतञ्जनित्रमिन्द्रायत्त्वष्टादधदिन्द्रियाणिव्वसुवनेव्वसु
धेयस्यव्यन्तुयज ॥ ५५ ॥ देवोदेवैः ॥ देवोदेवैर्व्वनस्पति
र्हिरण्ण्यपर्णोऽअश्विभ्याꣳसरस्वत्यासुपिप्पलऽइन्द्रायपच्यते
मधु ॥ ओजोनजूतिर्ऋषभोनभामंव्वनस्पतिर्न्नोदधदिन्द्रि

याणिंव्वसुवनेव्वसुधेयंस्यव्यन्तुयज ॥ ५६ ॥ देवम्बर्हिः ॥
देवम्बर्हिर्व्वारितीनामद्ध्वरेस्तीर्ण्णमश्विभ्यामूर्ण्णम्म्रदाःसरस्व
त्यास्योनमिन्द्रतेसदः ॥ ईशायैमन्न्युꣳराजानम्बर्हिषादधु
रिन्द्रियंव्वसुवनेव्वसुधेयंस्यव्यन्तुयज ॥ ५७ ॥ देवोऽअग्निः ।
स्विष्टकृद्देवान्न्यक्षद्यथायथꣳहोतारावन्द्रमश्विनांव्वाचाव्वा
चꣳसरस्वतीमग्निꣳसोमꣳस्विष्टकृत्स्विष्टऽइन्द्रः सुत्रामासवि
ताव्वरुणोभिषगिष्टोदेवोव्वनस्पतिःस्विष्टादेवाऽआज्यपाःस्वि

ष्टोऽअग्निरग्निनाहोताहोत्रेस्विष्टकृद्यशोनदधदिन्द्रियमूर्ज्जम
पचितिँस्वधांवसुवनेवसुधेयस्यव्यन्तुयज ॥५८॥ अग्निमद्य ।
होतारमवृणीतायँयजमानःपचन्पक्तीःपचन्पुरोडाशान्ब
ध्नन्नश्विभ्याञ्छागँसरस्वत्यैमेषमिन्द्रायऽऋषभँसुन्वन्न
श्विभ्याँसरस्वत्याऽइन्द्रायसुत्राम्णेसुरासोमान्त्सूपस्थाऽ
अद्य ॥५९॥ सूपस्थाऽअद्य । देवोवनस्पतिरभवदश्विभ्या
ञ्छागेनसरस्वत्यैमेषेणेन्द्रायऽऋषभेणाक्षँस्तान्मेदस्तःप्र

तिंपचुताग्गृभीषुतावींवृधन्तपुरोडाशैरपुंराश्विनासंरस्वतीन्द्रःᳲ सुत्रामांसुरासोमाँस्त्वामुद्य ॥ ६० ॥ त्वामुद्य ॥ त्वामुद्यऽ ऋंषऽआर्षेयऽऋषीणान्नपादवृणीतायँऽयजंमानोबहुभ्युऽआ सङ्गंतेभ्युऽएषमेंदेवेषुवसुवार्य्यायंक्ष्यतऽइतितायादेवादेव दानान्यदुस्त्तान्यंस्म्माऽआचुशास्वाचंगुरस्वोषितश्चंहोतरासि भद्रवाच्च्यायप्प्रेषितोमानुषःसूक्तवाकायंसूक्ताब्रूहि ॥ ६१ ॥ [१४-६]इतिश्रीवाजसनेयसंहितायामेकविंशोऽध्यायः ॥२१॥

श्रीवेदपुरुषायनमः ॥ अनुवाकसूत्रम् ॥ तेजोसिपंचा, उ. वि.
मयऽएका, हिङ्कारायद्वे, तत्सवितुर्दश, विभूर्म्मात्रैका, अ.
कायद्वे, ऽआब्रह्मंस्त्रयोदश, शेपादेकैको, नविꣳशतिश्चतु- ॥ २२ ॥
स्त्रिꣳशत् [अ. २२ मं. ३४ अनु. १९] ॥ हरिः ॐ ॥
तेजोऽसि ॥ तेजोऽसिशुक्क्रममृतमायुष्प्पाऽआयुर्म्मेपाहि ॥ देव
स्यंत्वासवितुःप्प्रसवेऽश्विनोर्ब्बाहुभ्याम्पूष्णोहस्ताभ्यामाद ॥ १५ ॥

१ आयुष्पा "समानपदे च" (शु. य. प्रा. ३ अ. ३० सू.) इत्यनेन एकस्मिन्पदे यो विसर्गः तस्य विसर्जनीयस्य ककारपकारयोः परे यथायोगं सकारः पकारश्चैकपदे भवतः। इति पकारे कृते "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (शु. य. प्रा. ४ अ. १०२ सू.) इति पकारस्य द्वित्वम्।

दे ॥ १ ॥ इमामंगृब्भणन् ॥ इमामंगृब्भणन्रशनामृतस्यपूर्व्वेऽ
आयुंषिविदथेषुकव्या ॥ सानोऽअस्मिन्त्सुतऽआबंभूवऽऋ
तस्यसामन्त्सरमारपंन्ती ॥ २ ॥ अभिधाऽअंसि ॥ अभिधाऽ
अंसिभुवंनमसियन्तासिंधर्त्ता ॥ सत्वमग्निंवैश्वानरꣳसप्रंथ
सङ्गच्छस्वाहांकृतꣳ ॥ ३ ॥ स्वगात्वा । देवेभ्यंःप्रजापंत
येब्रह्मन्नश्वंम्भन्त्स्यामिंदेवेभ्यंःप्रजापंतयेतेनंराध्यासम् ॥
तम्बंधानदेवेभ्यंःप्रजापंतयेतेनंराध्नुहि ॥ ४ ॥ प्रजापंतये

शु. य. संहि. ॥ १६ ॥

उ. वि. अ. ॥ २२ ॥

त्त्वा ॥ प्रजापतयेत्त्वाजुष्टम्प्रोक्षामीन्द्राग्निभ्यान्त्वाजुष्टम्प्रो
क्षामिव्वायवेत्त्वाजुष्टम्प्रोक्षामिविश्श्वेभ्यस्त्वादेवेभ्योजुष्ट
म्प्रोक्षामिसर्व्वेभ्यस्त्वादेवेभ्योजुष्टम्प्रोक्षामि ॥ यो[1]ऽअँव्वि
न्तञ्जिघांᳬसतितमभ्यमीतिव्वरुणः ॥ परोमर्त्तः परश्श्वा ॥५॥
[५-१] अग्नयेस्वाहा ॥ अग्नयेस्वाहासोमायस्वाहापाम्मो
दायस्वाहासवित्रेस्वाहाव्वायवेस्वाहाव्विष्णवेस्वाहेन्द्रायस्वाहा ॥ १६ ॥
बृहस्पतयेस्वाहामित्रायस्वाहाव्वरुणायस्वाहा ॥ ६ ॥ [१-२]

१ अत्र द्वयोस्तु स्वरयोर्मध्ये सन्धिर्यत्र न दृश्यते विवृत्तिस्तत्र विज्ञेया । (या. शि.) तेनात्रोकाराकारयोः पूर्वरूपकारकः सन्धिर्न भवति ।

हिङ्कारायस्वाहा ॥ हिङ्कारायस्वाहाहिङ्कृतायस्वाहाक्क्रन्दते
स्वाहावक्क्रन्दायस्वाहाप्प्रोथतेस्वाहाप्प्रप्प्रोथायस्वाहागन्धाय
स्वाहाग्घ्रातायस्वाहानिविष्टायस्वाहोपविष्टायस्वाहासन्दिताय
स्वाहाव्वल्गतेस्वाहासीनायस्वाहाशयानायस्वाहास्वपतेस्वाहा
जाग्ग्रतेस्वाहाकूजतेस्वाहाप्प्रबुद्धायस्वाहाव्विजृम्भमाणायस्वा
हाव्विचृतायस्वाहासꣳहानायस्वाहोपस्त्थितायस्वाहायनाय
स्वाहाप्प्रायणायस्वाहा ॥ ७ ॥ [1]यतेस्वाहा ॥ यतेस्वाहा

---

१ अत्र यकारस्य पादादौ सत्त्वाज्जकारोच्चारणम् ।

॥ १७ ॥ धावतेस्वाहोद्द्रावायस्वाहोद्द्रुतायस्वाहाशूकारायस्वाहाशूकृता
यस्वाहानिषण्णायस्वाहोत्थितायस्वाहाजवायस्वाहाबलाय ॥ २२ ॥
स्वाहाव्विवर्त्तमानायस्वाहाव्विवृत्तायस्वाहाव्विधून्वानायस्वाहा
व्विधूतायस्वाहाशुश्रूषमाणायस्वाहाशृण्वतेस्वाहेक्षमाणाय
स्वाहेक्षितायस्वाहाव्वीक्षितायस्वाहानिमेषायस्वाहायदत्ति
तस्मैस्वाहायत्पिबतितस्मैस्वाहायन्मूत्रङ्करोतितस्मैस्वा ॥ १७ ॥

---

१ निषण्णाय। अत्र द्वयोर्नकारयोर्णत्वं निपात्यते। प्रथमस्य "तवर्गे च" (शु. य. प्रा. ३ अ. ९४ सू.) इत्यनेन तवर्गस्य व्यवधानेन णत्वाप्राप्तौ द्वितीयस्य नकारस्य "स्वरयवहकपैश्च" (शु. य. प्रा. ३ अ. ८६ सू.) इत्यनेन व्यवधानातिरिक्तनकारस्य व्यवधानाण्णत्वाप्राप्तौ "निषण्णाय°" (शु. य. प्रा. ३ अ. ८७ सू.) इत्यनेन णत्वनिपातः।

हांकुर्व्वतेस्वाहांकृतायस्वाहां ॥ ८ ॥ [ २-३ ] तत्त्संवि
तुः ॥ तत्त्संवितुर्व्वरेण्ण्यम्भर्ग्गोदेवस्यधीमहि ॥ धियोयो
नंःप्रचोदयांत् ॥ ९ ॥ हिरंण्ण्यपाणिमूतयें । सवितार
मुपंह्वये ॥ सचेत्तांदेवतांपदम् ॥ १० ॥ देवस्यचेततंः ॥
देवस्यचेतंतोमहीम्प्रसंवितुर्हवामहे ॥ सुमतिꣳसत्त्यरांधसम्
॥ ११ ॥ सुष्टुतिꣳसुंमतीवृधंः ॥ सुष्टुतिꣳसुंमतीवृधोंरातिꣳ
संवितुरींमहे ॥ प्रदेवायंमतीविदें ॥ १२ ॥ रातिꣳसत्त्प

१ सुमतीवृधः । अत्र "अश्वरश्मिसुमति" (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन वकारे परे ह्रस्वेकारस्य सुमतिशब्दस्य दीर्घत्त्वम् ।

तिम् ॥ रातिꣳसत्पतिम्महेसवितारमुपह्वये ॥ आसवन्देव
वीतये ॥ १३ ॥ देवस्यसवितुः ॥ देवस्यसवितुर्म्मतिमासवं
विश्वदेव्यम् ॥ धियाभगम्मनामहे ॥ १४ ॥ अग्निꣳस्तो
मेन । बोधयसमिधानोऽअमर्त्त्यम् ॥ हव्यादेवेषुनोदधत्
॥ १५ ॥ सहव्यवाट् ॥ सहव्यवाडमर्त्त्यऽउशिग्दूतश्चनो
हितꣳ ॥ अग्निर्द्धियासमृण्वति ॥ १६ ॥ अग्निन्दूतम् ॥
अग्निन्दूतम्पुरोदधेहव्यवाहमुपब्ब्रुवे ॥ देवाँ२॥ऽआसादया

दिह ॥ १७ ॥ अजीजनोहि । पवमानसूर्य्यंविधारेशक्क्मं
नापयं ॥ गोजीरयारᳲहमाणᳲपुरन्ध्या ॥ १८ ॥ [ १०-४ ]
विभूर्म्मात्रा । प्रभूश्पित्राश्वोसिहयोस्यत्त्योसिमयोस्यर्व्वासिस
प्तिरसिव्वाज्ज्यसिवृषासिनृमणाऽअसि ॥ ययुर्न्नामासिशिशुर्न्ना
मास्यादित्त्यानाम्पत्त्वान्विहिदेवाऽआशापालाऽएतन्देवेभ्यो
श्वम्मेधायप्प्रोक्षितᳲरक्क्षतेहरन्तिरिहरमतामिहधृतिरिहस्व
धृतिᳲस्वाहा ॥ १९ ॥ [ १-५ ] कायस्वाहा ॥ कायस्वाहाकस्मै

स्वाहाकतमस्म्मैस्वाहास्वाहाधिमाधीतायस्वाहामनः प्प्रजाप
तयेस्वाहाचित्तंविज्ञातायादित्त्यैस्वाहादित्त्यैमह्यैस्वाहादित्त्यै
सुमृडीकायैस्वाहासरस्वत्त्यैस्वाहासरस्वत्त्यैपावकायैस्वाहासर
स्वत्त्यैबृहत्त्यैस्वाहापूष्ण्णेस्वाहापूष्ण्णेप्प्रपत्थ्यायस्वाहापूष्ण्णे
नरन्धिषायस्वाहात्त्वष्ट्रेस्वाहात्त्वष्ट्रेतुरीपायस्वाहात्त्वष्ट्रेपुरुरूपा
यस्वाहाविष्ण्णवेस्वाहाविष्ण्णवेनिभूयपायस्वाहाविष्ण्णवेशि ॥१९॥
पिविष्टायस्वाहा ॥ २० ॥ विश्वोदेवस्य। नेतुर्म्मर्त्तोवुरीतसख्

ख्यम् ॥ विश्वोराय ऽइषुध्यति द्युम्नंवृणीतपुष्यसेस्वाहा ॥२१॥
[२-६] आब्रह्मन् ॥ आब्रह्मन्ब्राह्मणोब्रह्मवर्चसीजायतामारा
ष्ट्रेराजन्यꣳशूर ऽइषव्योतिव्याधीमहारथोजायतान्दोग्ध्रीधेनु
र्वोढानड्वानाशुःसप्तिꣳपुरन्धिर्योषाजिष्णूरथेष्ठाःसभेयोयु
वास्ययजमानस्यवीरोजायतान्निकामेनिकामेनꣳपर्ज्जन्योवर्ष
तुफलवत्योन ऽओषधयꣳपच्यन्ताँय्योगक्षेमोनꣳकल्पताम्
४३ ॥२२॥ [१-७] प्राणायस्वाहा । पानायस्वाहाव्यानायस्वाहा

. य. चक्षुषेस्वाहाश्श्रोत्रांयस्वाहावाचेस्वाहामनंसेस्वाहां ॥ २३ ॥ उ. वि.
संहि. [१-८] प्राच्यैदिशे । स्वाहार्वाच्यैदिशेस्वाहादक्षिणायैदिशे अ.
२० ॥ ॥ २२ ॥
स्वाहार्वाच्यैदिशेस्वाहाप्प्रतीच्यैदिशेस्वाहार्वाच्यैदिशेस्वाहोदी
च्यैदिशेस्वाहार्वाच्यैदिशेस्वाहोर्ध्वायैदिशेस्वाहार्वाच्यैदिशे
स्वाहावाच्यैदिशेस्वाहार्वाच्यैदिशेस्वाहां ॥ २४ ॥ [१-९]
अद्भ्यःस्वाहां । वार्भ्यःस्वाहोदकायस्वाहातिष्ठन्तीभ्यःस्वा ॥ २० ॥
हास्रवन्तीभ्यःस्वाहास्यन्दमानाभ्यःस्वाहाकूप्याभ्यः

स्वाहासूद्याभ्यःस्वाहाधार्याभ्यःस्वाहार्णवायस्वाहासमु
द्रायस्वाहासरिरायस्वाहा ॥ २५ ॥ [१-१०] वाता
यस्वाहा । धूमायस्वाहाभ्रायस्वाहामेघायस्वाहाविद्योतमा
नायस्वाहास्तनयतेस्वाहावस्फूर्जतेस्वाहावर्षतेस्वाहाववर्षते
स्वाहोग्रंवर्षतेस्वाहाशीघ्रंवर्षतेस्वाहोद्गृह्णतेस्वाहोद्गृहीताय
स्वाहाप्रुष्णतेस्वाहाशीकायतेस्वाहाप्रुष्वाभ्यःस्वाहाह्रादु
नीभ्यःस्वाहानीहारायस्वाहा ॥ २६ ॥ [१-११] अग्न

 येस्वाहा ॥ अग्नयेस्वाहासोमायस्वाहेन्द्रायस्वाहापृथिव्यै 
॥२१॥ स्वाहान्तरिक्षायस्वाहादिवेस्वाहादिग्भ्यःस्वाहाशाभ्यःस्वा
होर्व्यैदिशेस्वाहार्वाच्यैदिशेस्वाहा ॥ २७ ॥ [१-१२] ॥ २२ ॥
नक्षत्रेभ्यःस्वाहा। नक्षत्रियेभ्यःस्वाहाहोरात्रेभ्यःस्वाहा
र्द्धमासेभ्यःस्वाहामासेभ्यःस्वाहऽऋतुभ्यःस्वाहार्त्तवेभ्यः
स्वाहासंवत्सरायस्वाहाद्यावापृथिवीभ्याᳪस्वाहाचन्द्रायस्वा ॥ २१ ॥
हासूर्य्यायस्वाहारश्मिभ्यःस्वाहावसुभ्यःस्वाहारुद्रेभ्यः

स्वाहादित्येभ्यः स्वाहा मरुद्भ्यः स्वाहा विश्वेभ्यो देवेभ्यः
स्वाहा मूलेभ्यः स्वाहा शाखाभ्यः स्वाहा वनस्पतिभ्यः स्वा
हा पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहौषधीभ्यः स्वाहा ॥ २८ ॥
[ १-१३ ] १३०० शतम् ॥ पृथिव्यै स्वाहा ॥ पृथिव्यै स्वाहान्त
रिक्षाय स्वाहा दिवे स्वाहा सूर्याय स्वाहा चन्द्राय स्वाहा नक्ष
त्रेभ्यः स्वाहाद्भ्यः स्वाहौषधीभ्यः स्वाहा वनस्पतिभ्यः स्वा
हा परिप्लवेभ्यः स्वाहा चराचरेभ्यः स्वाहा सरीसृपेभ्यः स्वाहा

॥ २९ ॥ [१-१४] अस॑वे॒स्वाहा॑ ॥ अस॑वे॒स्वाहा॒वस॑वे॒स्वाहा॑
वि॒भुवे॒स्वाहा॒विव॑स्वते॒स्वाहा॑गण॒श्रिये॒स्वाहा॑गण॒प॑तये॒स्वाहा॑भि॒
भुवे॒स्वाहाधि॑पतये॒स्वाहा॑शू॒षाय॒स्वाहा॑सꣳस॒र्प्पाय॒स्वाहा॑च॒न्द्रा
य॒स्वाहा॒ज्ज्योति॑षे॒स्वाहा॑मलि॒म्लुचा॑य॒स्वाहा॒दिवा॑प॒तय॑ते॒स्वाहा॑
॥ ३० ॥ [१-१५] मध॑वे॒स्वाहा॑ ॥ मध॑वे॒स्वाहा॒माध॑वाय॒
स्वाहा॑शु॒क्राय॒स्वाहा॒शुच॑ये॒स्वाहा॒नभ॑से॒स्वाहा॑नभ॒स्या॒य॒स्वाहे॒ ॥ २२ ।
षाय॒स्वाहो॒र्ज्जाय॒स्वाहा॒सह॑से॒स्वाहा॑सह॒स्या॒य॒स्वाहा॒तप॑से॒स्वाहा॑

तपस्यायस्वाहांऽंहसस्पतयेस्वाहां॥ ३१ ॥ [१-१६] व्वाजाय
स्वाहा । प्प्रसवायस्वाहांपिजायस्वाहाक्क्रतवेस्वाहास्वः स्वा
हांमूर्द्धेस्वाहांव्यश्नुविनेस्वाहान्त्यांयस्वाहान्त्यांयभौवनाय
स्वाहाभुवनस्यपतयेस्वाहाधिपतयेस्वाहांप्प्रजापतयेस्वाहां
॥ ३२ ॥ [१-१७] आयुर्य्यज्ञेनं । कल्पताऽंस्वाहांप्प्राणो
यज्ञेनंकल्पताऽंस्वाहांपानोयज्ञेनंकल्पताऽंस्वाहांव्यानो
यज्ञेनंकल्पताऽंस्वाहोंदानोयज्ञेनंकल्पताऽंस्वाहांसमा

नोयज्ज्ञेनकल्पताꣳस्वाहाचक्षुर्य्यज्ज्ञेनकल्पताꣳस्वाहा
श्श्रोत्रँय्यज्ज्ञेनकल्पताꣳस्वाहाव्वाग्ग्यज्ज्ञेनकल्पताꣳस्वा
हामनोयज्ज्ञेनकल्पताꣳस्वाहात्क्मायज्ज्ञेनकल्पताꣳस्वा ॥२२॥
हाब्ब्रह्मायज्ज्ञेनकल्पताꣳस्वाहाज्ज्योतिर्य्यज्ज्ञेनकल्पताꣳ
स्वाहास्वर्य्यज्ज्ञेनकल्पताꣳस्वाहापृष्ठँय्यज्ज्ञेनकल्पताꣳ
स्वाहायज्ज्ञोयज्ज्ञेनकल्पताꣳस्वाहा॥३३॥[१-१८]एकस्म्मै ॥२३॥
स्वाहा ॥ एकस्म्मैस्वाहाद्वाब्भ्याꣳस्वाहाशतायस्वाहैकशताय

स्वाहाव्युष्ट्यैस्वाहांस्वर्गायस्वाहां ॥३४॥ [१-१९] इतिश्रीवा-
जसनेयसंहितायां द्वाविंशोऽध्यायः ॥ २२ ॥ श्रीवेदपुरुषाय
नमः ॥ अनुवाकसूत्रम् ॥ हिरण्यगर्भोसश्प्राणतोद्विकौ, युञ्ज
न्त्यष्टौ, वायुष्ट्वापञ्च, प्राणायतिस्र, उत्त्सक्थ्याद्वादश, गायत्री
त्रिष्टुप्, कस्त्वापट्कौ, कश्स्विदष्टौ, कास्विद्दश, सुभूःस्वयंभू-
स्तिस्र, एकादश पञ्चषष्टिः ॥ [अ. २३ मं. ६५ अनु. ११]
हरिः ॐ ॥ हिरण्यगर्भश्सम् ॥ हिरण्यगर्भश्समवर्त्तताग्रे

भूतस्यंजातःपतिरेकंऽआसीत् ॥ सदाधारपृथिवीन्द्यामुते
॥ २४ ॥ माङ्कस्मैदेवायहविषांविधेम ॥ १ ॥ उपयामगृहीतोसि ।
प्प्रजापंतयेत्त्वाजुष्टङ्गृह्णाम्म्येषतेयोनिःसूर्य्यस्तेमहिमा ॥ ॥ २३ ॥
यस्तेहंन्तसंवत्त्सरेमंहिमासम्बभूवयस्तेव्वायावन्तरिक्षेम
हिमासम्बभूवयस्तेदिविसूर्य्येमहिमासम्बभूवतस्मैतेमहि
म्म्नेप्प्रजापंतयेस्वाहादेवेब्भ्यः ॥ २ ॥ [२-१] यःप्प्राण ॥ २४ ॥
तः ॥ यःप्प्राणतोनिमिषतोमंहित्त्वैकऽइद्राजाजगतोबभूव ॥

यऽईशेऽअस्यद्द्विपदश्चतुष्पदꣳकस्म्मैदेवायहविषाविधेम ॥ ३ ॥ उपयामगृहीतोसि । प्प्रजापतयेत्त्वाजुष्टङ्गृह्णाम्म्येष तेयोनिश्चन्द्रमास्त्तेमहिमा ॥ यस्त्तेरात्त्रौसंवत्त्सरेमहिमासम्ब भूवयस्त्तेपृथिव्यामग्नौमहिमासम्बभूवयस्त्तेनक्षत्त्रेषुचन्द्रम सिमहिमासम्बभूवतस्म्मैतेमहिम्म्नेप्प्रजापतयेदेवेब्भ्यꣳस्वाहा

१ द्वयोस्तु स्वरयोर्मध्ये सन्धिर्यत्र न दृश्यते। विवृत्तिस्तत्र विज्ञेया "यऽईशे" तु निदर्शनम्। या. शि.। अत्र यः इति पदस्थस्य विसर्गस्य "कण्ठ्यपूर्वो यकारमरिफितः" (शु. य. प्रा. ४ अ. ४७ सू.) इत्यनेन यकारे "यवयोः पदान्तयोः स्वरमध्ये लोपः" (शु. य. प्रा. ४ अ. १२५ सू.) इत्यनेन यस्य लोपेऽकारेकारयोः "कण्ठ्यादिवर्ण एकारम्" (शु. य. प्रा. ४ अ. ५३ सू.) इत्यनेनैकारे प्राप्ते "न परकालः पूर्वकाले पुनः" (शु. य. प्रा. ३ अ. ४ सू.) इत्यनेन निषेधे सन्ध्यभावः। उच्चारणेऽप्यर्धमात्राकालिको विरामः। तज्ज्ञापकं(ऽ)इत्याकारकं चिह्नम्। अत्र पाकवतीवृत्तिर्ज्ञेया प्रारम्भे ह्रस्वयोगात्।

॥ ४ ॥ [ २-२ ] युञ्जन्तिब्ब्रुद्ध्नम् ॥ युञ्जन्तिब्ब्रुद्ध्नमंरुषञ्चरं
न्तुम्परिंतुस्त्थुषंः ॥ रोचंन्तेरोचुनादुिवि ॥५॥ युुञ्जन्त्यंस्य ॥
युुञ्जन्त्यंस्युकाम्म्याुहरीुव्विपंक्क्षसारथें ॥ शोणांधृुष्णूनृवा
हंसा ॥ ६ ॥ यद्वातंः ॥ यद्वातोंऽअुपोऽअगंनीगन्प्प्रियामिन्द्रंस्य
तुन्न्वम् ॥ एतꣳस्तोंतरुनेनंपुथापुनरश्श्वुमावंर्त्तयासिनः ॥ ७॥ ॥२५॥
व्वसंवस्त्त्वा । ञ्जन्तुगायुत्रेणुच्छन्दंसारुुद्द्रास्त्त्वांञ्जन्तुत्रैष्टुंभे
नुच्छन्दंसादुित्त्यास्त्त्वांञ्जन्तुजागंतेनुच्छन्दंसा ॥ भूब्भुर्वुवंस्स्व

र्ल्जीजी३॥ न्छाची३॥ न्यघ्येगघ्यंऽएतदन्नमत्तदेवाऽएतदन्नंम
द्धिप्प्रजापते ॥ ८॥ कश्श्वित् ॥ कश्श्विदेकाकीचंरातिकऽउंस्वि
ज्जायतेपुनं÷ ॥ किंᳬस्विद्धिमस्यंभेषजाङ्किम्म्वावपंनम्महत्
॥ ९ ॥ सूर्य्यंऽएकाकी । चंरतिचन्द्रमांजायतेपुनं÷[1] ॥
अग्निर्हिमस्यंभेषजम्भूमिरावपंनम्महत् ॥ १० ॥ कास्वित् ॥
कास्विदासीत्त्पूर्व्वचित्तिंᳬकिंᳬस्विदासीद्बृहद्वयं÷ ॥ कास्विदा

---

१ यत्र संयोगपरोऽसंयोगपरो वकाररहितो वकारसहितः सविसर्गो मात्रिकः स्वरितस्वरस्तस्मात्परस्य विसर्गस्य( ÷ )इत्याकारक उभयक्षेपः। मात्रिके भयं क्षिपेत्। (या. शि.) सवकारे द्विमात्रिक तूभयक्षेपः। जात्यकारात्परस्य विसर्गस्याप्युभयक्षेपः "सदुस्यै÷"।

सं. ४३

सीत्पिलिप्पिलाकास्विदासीत्पिशङ्गिला ॥ ११ ॥ द्यौरासी
त् ॥ द्यौरासीत्पूर्वचित्तिरश्वऽआसीद्बृहद्वयः ॥ अविरा
सीत्पिलिप्पिलारात्रिरासीत्पिशङ्गिला ॥ १२ ॥ [ ८-३ ]
वायुष्ट्वा । पचतैरवत्वसितग्रीवश्छागैर्न्यग्रोधश्चमसैश्शं
ल्मलिर्वृद्ध्या ॥ एषस्यरात्थ्योवृषापड्भिश्चतुर्भिरेदंगन्ब्रह्मा
कृष्णश्चनोवतुनमोग्नये ॥ १३ ॥ सꣳशितोरश्मिना ॥ ॥ २६ ॥
सꣳशितोरश्मिनारथꣳसꣳशितोरश्मिनाहयः ॥ सꣳ

१ यत्र मात्रिकात्द्विमात्रिकाद्वानुदात्तात्परो विसर्गस्तस्य विसर्गस्य( ं ) इत्याकारिकया कनिष्ठिकया निर्देशः।

शिंतोऽअप्प्स्वप्प्सुजाब्रह्ममासोमंपुरोगवं ॥ १४ ॥ स्वयं

वांजिन् ॥ स्वयंवांजिँस्तन्वङ्कल्पयस्वस्वयँय्यंजस्वस्वयञ्जु

षस्व ॥ महिमातेन्येननसन्नशें ॥ १५ ॥ नवै ॥ नवाऽ

[1]उंऽएतन्म्रियसेनारिष्यसिदेवाँ२॥ऽइदेंपिपथिभिं÷सुगेभिं÷ ॥

यत्रासंतेसुकृतोयत्रतेययुस्तत्रंत्त्वादेवश्शंसवितादंधातु ॥ १६ ॥

अग्निश्पशुः ॥ अग्निश्पशुरांसीत्तेनांयजन्तसऽएतँल्लोक

---

१ "उकारोऽपृ ` स्पर्शात्" (शु. य. प्रा. ४ अ. ९० सू.) अपृक्त एकवर्ण उकारोऽस्पर्शात्परः प्रकृत्या भवति स्वरे प्रत्यये। अत्रोकारोऽपृक्तोऽस्पर्शात्परः एतदिति स रे तस्मान्न सन्धिः।

शु. य. संहि.

मंजयुद्यस्मिन्नग्निःसतेँलोकोभंविष्ष्यतितञ्जेष्ष्यसिपिबैताऽ उ. हि.

॥२७॥ अपः ॥ व्वायुःपशुरांसीत्तेनांयजन्तसऽएतँल्लोकमंजयुद्य अ.

स्मिन्व्वायुःसतेँलोकोभंविष्ष्यतितञ्जेष्ष्यसिपिबैताऽअपः ॥ ॥२१॥

सूर्य्यःपशुरांसीत्तेनांयजन्तसऽएतँल्लोकमंजयुद्यस्मिन्त्सू

र्य्यःसतेँलोकोभंविष्ष्यतितञ्जेष्ष्यसिपिबैताऽअपः ॥ १७ ॥

[५-४] प्राणायस्वाहां । पानायस्वाहांव्यानायस्वाहां ॥ ॥२७॥

१ मात्रिकाद्विमात्रिकादुदात्तात् परस्य विसर्जनीयस्य (ः) इत्याकारिकया निर्देशः ।

अम्बेऽअम्बिकेम्बालिकेनमानयतिकश्चन ॥ ससस्त्यश्वकः
सुभद्रिकाङ्काम्पीलवासिनीम् ॥ १८ ॥ गणानान्त्वा ।
गणपतिᳬहवामहेप्प्रियाणान्त्वाप्प्रियपतिᳬहवामहेनिधीना
न्त्वानिधिपतिᳬहवामहेव्वसोमम ॥ अहमजानिगर्ब्भध
मात्त्वमजासिगर्ब्भधम् ॥ १९ ॥ ताऽउभौचतुरः पदः स
म्प्रसारयावस्वर्ग्गेलोकेप्प्रोर्ण्णुवाथांव्वृषाव्वाजीरेतोधारेतोदधातु
॥ २० ॥ [३-५] उत्सक्थ्याऽअव । गुदन्धेहिसमञ्जि

ञ्चारयाव्वृषन् ॥ यस्त्रीणाञ्जीवभोजनꣳ ॥ २१ ॥ यका
सकौ । शकुन्तिकाहलगितिव्वञ्चति । आहन्तिगभेपसो
निगल्गलीतिधारका ॥ २२ ॥ यकोसकौ । शकुन्तकऽ
आहलगितिव्वञ्चति ॥ व्विवक्षतऽइवतेमुखमद्ध्वर्य्योमानस्त्व
मभिभाषथाꣳ ॥ २३ ॥ माताच । तेपिताचतेग्ग्रंव्वृक्षस्य
रोहतꣳ ॥ प्रतिलामीतितेपितागभेमुष्टिमतꣳसयत् ॥ २४ ॥ ॥२८॥

१ चारयावृषन् । अत्र "अश्वरश्मिमन्तिसुमतिश्चसुतचारय°" (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन वृषन् इत्यस्य वकारे परे चारयाकारस्य दीर्घाकारः ।

मातांचं । तेपिताचतेग्ग्रंवृक्षस्यंक्रीडतः ॥ विवंक्षतऽइवते

मुखम्ब्रह्मन्मात्त्वंवंदोबहु ॥ २५ ॥ ऊर्द्ध्वामेनाम् ॥ ऊर्द्ध्वां

मेनामुच्छ्रांपयगिरौभारꣳहरंन्निव ॥ अथांस्यैमद्ध्यमेधताꣳ

शीतेव्वातेपुनन्निव ॥ २६ ॥ ऊर्द्ध्वमेनम् ॥ ऊर्द्ध्वमेनमुच्छ्रंय

ताद्गिरौभारꣳहरंन्निव ॥ अथांस्यमद्ध्यमेजतुशीतेव्वातेपुन

न्निव ॥ २७ ॥ यदंस्याः ॥ यदंस्याऽअꣳहुभेद्याःकृधुस्त्थू

---

१ यत्र मात्रिकाद्विमात्रिकाद्वा प्रचयात्परो विसर्गस्तत्र विसर्गस्य ( ꣴ ) इत्याकारिकया कनिष्ठिकया निर्देशः ।

शु. य. संहि. ॥२९॥

लमुपातंसत् ॥ मुष्कादिदंस्याऽएजतोगोशफेशंकुलाविव

॥ २८ ॥ यद्देवासं ॥ यद्देवासोलामंगुम्प्रविष्टीमिनमा

विषुः ॥ सक्थनादेंदिश्यतेनारीसत्त्यस्याक्षिभुवोयथा ॥२९॥

यद्धरिणः ॥ यद्धरिणोयवमत्तिनपुष्टम्पशुमन्न्यते ॥ शूद्राय

दर्य्यंजारानपोषांयधनायति ॥ ३० ॥ यद्धरिणः ॥ यद्धरि

णोयवमत्तिनपुष्टम्बहुमन्न्यते । शूद्रोयदर्य्यायैजारोनपोषम

नुंमन्न्यते ॥ ३१ ॥ दधिक्काव्णोऽअकारिषम् ॥ दधिक्का



उ. वि. अ. ॥ २३ ॥

॥ २९ ॥

वण्णोऽअकारिपञ्चिष्णोरश्वस्यवाजिनं॑ः ॥ सुरभिनोमुखा

करत्प्रणऽआयूंषितारिषत् ॥ ३२ ॥ [ १२-६ ] गायत्री

त्रिष्टुप् ॥ गायत्रीत्रिष्टुब्जगंत्यनुष्टुप्पङ्क्त्यासह ॥ बृहत्यु

ष्णिहांककुप्सूचीभिः शम्म्यन्तुत्वा ॥ ३३ ॥ द्विपंदायाः ॥

द्विपंदायाश्चतुष्पदास्त्रिपंदायाश्चषट्पंदाः ॥ विच्छंन्दायाश्चस

च्छंन्दाःसूचीभिः शम्म्यन्तुत्वा ॥ ३४ ॥ महानाम्न्योरे

वत्यंः ॥ महानाम्न्योरेवत्योविश्वाऽआशांःप्रभूवरीः ॥

मैधीर्व्विद्युतोव्वाचः सूचीभिः शम्यन्तुत्त्वा ॥ ३५ ॥ नार्य्यं
स्त्ते ॥ नार्य्यस्त्तेपत्न्योलोमव्विचिन्वन्तुमनीषया ॥ देवा
नाम्पत्न्योदिशः सूचीभिः शम्यन्तुत्त्वा ॥ ३६ ॥ रजता
हरिणीः ॥ रजताहरिणीःसीसायुजोयुज्यन्तेकर्म्मभिः ॥
अश्वस्यव्वाजिनस्त्वचिसिमाःशम्यन्तुशम्यन्तीः ॥ ३७ ॥
कुविदङ्ग । यवमन्तोयवञ्चिद्यथादान्त्यनुपूर्व्वंव्वियूय ॥ इहेहै
षाङ्कृणुहिभोजनानियेबर्हिषोनमउक्तिंयजन्ति ॥ ३८ ॥ ॥ ३० ॥

[६-७] कस्त्वा ॥ कस्त्वाच्छ्यतिकस्त्वाव्विशास्तिकस्ते
गात्राणिशम्म्यति ॥ कऽउंतेशमिताकविः ॥ ३९ ॥ ऋत
वंस्ते ॥ ऋतवंस्तऽऋतुथापर्व्वशमितारोव्विशासतु ॥ संवत्सर
स्यतेजंसाशमीभिंःशम्म्यन्तुत्त्वा ॥ ४० ॥ अर्द्धमासाःप
रूᳬषि । तेमासाऽआच्छ्यन्तुशम्म्यंन्तः ॥ अहोरात्राणि
मरुतोव्विलिष्टᳬसूदयन्तुते ॥ ४१ ॥ दैव्याऽअद्ध्वर्य्यवंः ॥
दैव्याऽअद्ध्वर्य्यवस्त्वाच्छ्यन्तुव्विचशासतु ॥ गात्राणिपर्व्व
६०९

ु. य. संहि. उ. वि. अ.

२१॥

शस्त्तेसिमांᳬकृण्वन्तुशम्म्यंन्तीᳬ ॥ ४२ ॥ द्यौस्त्तें । पृथि

द्युन्तरिक्क्षंव्वायुश्च्छिद्द्रंपृणातुते॥ सूर्य्यस्त्तेनक्क्षत्रैᳬसहलोक ॥ २२ ॥

ङ्कृणोतुसाधुया ॥ ४३ ॥ शन्तें ॥ शन्तेपरेंब्भ्योगात्रेंब्भ्यᳬ

शमस्त्त्ववरेंब्भ्यᳬ ॥ शमस्त्थब्भ्योमज्जब्भ्यᳬशम्म्वस्त्तुतन्व्वै

तवं ॥ ४४ ॥ [६-८] कश्स्वित् ॥ कश्स्विदेकाकी ॥ ३१ ॥

चंरतिकऽउंस्विज्जायतेपुनः ॥ किᳬस्विद्धिमस्यंभेषजाङ्कि

१ "द्विमात्रिकं क्षिपेद्‌क म्" (या. शि.) इति नियमेन दीर्घस्वरितस्वराद्यत्र परो विसर्गस्तत्र(९)इत्याकारकः कनिष्ठिकानिर्देशवाचकोऽगुलिनिर्देशः सर्वत्र कार्यः ॥

म्न्वावपंनम्महत् ॥ ४५ ॥ सूर्य्यऽएकाकी । चंरतिचन्द्र
मांजायतेपुनंः ॥ अग्निर्हिमस्यभेषजम्भूमिरावपंनम्महत्
॥ ४६ ॥ किंस्वित् ॥ किंस्वित्सूर्यसमञ्ज्योतिःकिं
संमुद्रसंमह्सरंः ॥ किंस्वित्पृथिव्यैवर्षीयःकस्यमात्रानविं
द्यते ॥ ४७ ॥ ब्रह्मसूर्य्यसमम् ॥ ब्रह्मसूर्य्यसमञ्ज्योतिर्द्यौः
संमुद्रसंमह्सरंः ॥ इन्द्रंःपृथिव्यैवर्षीयान्गोस्तुमात्रानविं
द्यते ॥ ४८ ॥ पृच्छामित्त्वा । चितयेदेवसखयदित्त्वमत्रम

नंसाजुगन्थं ॥ येषुव्विष्ण्णुस्त्रिषुपदेष्ष्वेष्टुस्त्तेषुव्विश्श्वम्भुवनमा

विवेशा ३ ॥ ॥ ४९ ॥ अपितेषुं । त्रिषुपदेष्ष्वस्मिन्येषुव्विश्श्व

म्भुवनमाविवेशं ॥ सद्यःपर्य्यैमिपृथिवीमुतद्यामेकेनाङ्गेनदि

वोऽअस्यपृष्ठम् ॥ ५० ॥ केष्ष्वन्तः । पुरुषऽआविवेशका

न्यन्तःपुरुषेऽअर्प्पितानि ॥ एतद्ब्रह्मन्नुपवल्हामसित्त्वाकि

स्विन्नःप्प्रतिवोचास्यत्रं ॥ ५१ ॥ पञ्चस्वन्तः । पुरुषऽआवि ॥ ३२ ॥

१ "कुर्वणी लहकारयोः" (या. शि.) लकारहकारयोर्योगे कुर्वणीनाम स्वरभक्तिः । अत्र पञ्चानां स्वरभक्तीनां मध्ये कुर्वणी वर्तते ।

वेशुतान्य॒न्तश्पु॑रुषे॒ऽअर्प्पि॑तानि ॥ एतत्त्वात्र॒ प्प्रति॑मन्न्वा॒नोऽ

अ॒स्म्मि॒नमा॒यया॑भवस्युत्त॑रो॒मत् ॥५२॥ [ ८-९ ] कास्वित् ॥

कास्विदासी॒प्पू॒र्व्वचि॑त्ति॒ः किᳪं स्विदासीद्बृहद्वय॑ः ॥ कास्वि

दासीत्त्पिलिप्पि॒लाकास्विदासीत्त्पिशङ्गि॒ला ॥ ५३ ॥ द्यौरा

सीत् ॥ द्यौरासीत्त्पू॒र्व्वचि॑त्ति॒रश्व॑ऽआसीद्बृहद्वय॑ः ॥ अविरासी

त्त्पिलिप्पि॒लारात्त्रिरासीत्त्पिशङ्गि॒ला ॥ ५४ ॥ काऽईम् ॥

काऽईमरे॒पिशङ्गि॒लाकाऽईंकुरु॒पिशङ्गि॒ला ॥ कऽईमास्क॒न्दम

र्षतिकऽईम्पन्थांव्विसर्प्पति ॥ ५५ ॥ अजारे । पिशङ्गिला
श्वावित्कुरुपिशङ्गिला ॥ शशऽआस्कन्दमर्षत्यहिꣳपन्थांव्वि
सर्प्पति ॥५६॥ कत्त्यस्य । व्विष्ठाःकत्त्यक्षराणिकतिहोमासꣳक
तिधासमिद्धꣳ ॥ यज्ज्ञस्यत्त्वाव्विदथापृच्छमत्रकतिहोतारऽऋतु
शोयजन्ति॥५७॥षडस्य । व्विष्ठाःशतमक्षराण्ण्यशीतिर्होमाꣳ
समिधोहतिस्रः ॥ यज्ज्ञस्यतेव्विदथाप्प्रब्ब्रवीमिसप्तहोतारऽऋतु

१ अत्र "या तु हंसपदानाम सा तु रेफषकारयोः । (या. शि.) रकारषकारयोर्योगे हंसपदानाम स्वरभक्तिः । अत्र हंसपदानामस्वरभक्तिः । एवं सर्वत्र ।

ज्ञोयंजन्ति ॥५८॥ कोऽअस्य। वेद भुवनस्य नाभिङ्कोद्यावापृथि
वीऽअन्तरिक्षम्॥ कःसूर्य्यस्य वेदबृहतोजनित्रङ्कोवेदचन्द्रम
सँय्यतोजाः ॥५९॥ वेदाहम्॥ वेदाहमस्यभुवनस्यनाभिंवेदद्या
वापृथिवीऽअन्तरिक्षम्॥ वेदसूर्य्यस्यबृहतोजनित्रमथोवेदच
न्द्रमंसँय्यतोजाः ॥६०॥ पृच्छामित्त्वा ॥ पृच्छामित्त्वापरमन्तं
म्पृथिव्याःपृच्छामियत्रभुवनस्यनाभिः ॥ पृच्छामित्त्वावृ
ष्णोऽअश्वस्यरेतःपृच्छामिवाचःपरमंव्योम ॥ ६१ ॥ इयं

व्वेदि॑ः ॥ इ॒यंव्वेदि॒ᳪपरो॒ऽअन्तः॑पृथि॒व्याऽअ॒यँय्य॒ज्ञोभुव॑नस्य॒
नाभि॑ः ॥ अ॒यᳫसोमो॒व्वृष्णो॒ऽअश्वस्य॒रेतो॑ब्र॒ह्मायंव्वाचᳮप॑र॒मं
व्योम ॥ ६२ ॥ [ १०-१० ] सु॒भूᳮस्व॒य॒म्भूᳮ । प्र॒थ॒मो॒न्त
र्म॑ह॒त्त्य॒र्ण॒वे ॥ द॒धे॒ह॒गर्भ॑मृ॒त्त्वियँय्य॒तो॑जा॒तᳮप्र॒जाप॑तिᳪ
॥ ६३ ॥ होता॑यक्षत् ॥ होता॑यक्षत्प्र॒जाप॑ति॒ᳪसोम॑स्यम
हि॒म्न्नᳮ ॥ जु॒षता॒म्पिब॑तु॒सोम॒ᳪहोत॒र्य्यज॑ ॥ ६४ ॥ प्रजा॑पते॒
न । त्त्वदे॒तान्न्य॒न्न्यो॒व्विश्वा॑रू॒पाणि॒परि॒ताब॑भूव ॥ यत्का॑मा ॥३४॥

स्त्तेजुहुमस्त्तन्नोऽअस्त्तुव्वयꣳस्यामपतंयोरयीणाम् ॥ ६५ ॥
[ ३-११ ] इतिश्रीवाजसनेयसंहितायां त्रयोविंशोऽध्याय:
॥ २३ ॥ ॥ श्रीवेदपुरुषाय नम: ॥ अनुवाकसूत्रम् ॥
अश्वस्तूपरो, धूम्म्रान्वसन्ताय, समुद्रायशिशुमारान्, मयुः
प्प्राजापत्त्योदशका, श्चत्वारश्चत्वारिꣳशत् [ अ. २४ मं.
४० अनु. ४ ] ॥ हरि: ॐ ॥ अश्वस्त्तूपरः ॥ अश्वस्त्तूपरोगो
मृगस्त्तेप्प्राजापत्त्याःकृष्णग्ग्रीवऽआग्नेयोरराटेपुरस्त्तात्सार

शु. य. संहि. स्वतीमेष्यधस्ताद्धन्वोराश्विनावधोरामौबाह्वोःसौमापौ उ. सि.
ष्णःश्यामोनाभ्याᳬसौर्य्यायमौश्वेतश्चकृष्णश्चपार्श्वयो अ.
३५॥ स्त्वाष्ट्रौलोमशसक्थौसक्थ्योर्वायव्यःश्वेतःपुच्छऽइन्द्रायस्व ॥ २४ ॥
पस्यायवेहद्वैष्णवोवामनः ॥ १ ॥ रोहितोधूम्म्ररोहि
तः । कर्कन्धुरोहितस्तेसौम्म्याबभ्रुररुणबभ्रुःशुकबभ्रुस्ते
वारुणाःशितिरन्ध्रोऽन्यतःशितिरन्ध्रःसमन्तशितिरन्ध्रस्ते ॥ ३५ ॥
सावित्राःशितिबाहुरन्यतःशितिबाहुःसमन्तशितिबाहुस्ते

बार्हस्पत्त्याः पृषतीक्षुद्रपृषतीस्त्थूलपृषतीतामैत्रावरुण्ण्य÷

॥ २ ॥ शुद्धवालंसर्व्वशुद्धवालः ॥ शुद्धवालंसर्व्वशुद्धवा

लोमाणिवालस्त्तऽआश्विनाःश्येत÷श्येताक्षोरुणस्त्तेरुद्राय

पशुपतयेकर्ण्णायामाऽअवलिप्तारौद्रानभोरूपाःपार्ज्जन्न्याः

॥ ३ ॥ पृश्निस्तिरश्चीनपृश्निः ॥ पृश्निस्तिरश्चीनपृश्निरूर्द्ध्व

पृश्निस्त्तेमारुताःफल्ग्गूर्ल्लोहितोर्ण्णीपलक्षीताःसारस्वत्त्य÷

प्लीहाकर्ण्णः शुण्ठाकर्ण्णोद्ध्यालोहकर्ण्णस्त्तेत्त्वाष्ट्राःकृष्ण

ग्ग्रीवःशितिकक्क्षोञ्जिसक्क्थस्त्तऽऐन्द्राग्ग्नाःकृष्ण्णाञ्जिरल्प्पा
ञ्जिर्म्महाञ्जिस्त्तऽउषस्याः ॥ ४ ॥ शिल्प्पाव्वैश्वदेव्व्यः ॥
शिल्प्पाव्वैश्वदेव्व्योरोहिण्ण्यस्त्र्यवयोव्वाचेविज्ज्ञाताऽअदित्त्यैस
रूपाधात्रेव्वत्त्सतर्य्योदेवानाम्पत्नीब्भ्यः ॥ ५ ॥ कृष्ण्ण
ग्ग्रीवाऽआग्ग्नेयाः । शितिब्भ्रवोव्वसूनाꣳरोहितारुद्द्राणाꣳ
श्वेताऽअवरोकिणऽआदित्त्यानान्नभोरूपाःपार्ज्जन्याः ॥ ६ ॥ ॥ ३६ ॥

---

१ अञ्जिसक्थस्ते। अत्र "भात्रिभ्य सः षं समानपदे" (शु. य. प्रा. ३ अ. ५९ सू.) इत्यनेन सस्य षत्वे प्राप्ते "अनुसन्तनो तु बृहस्पतिसुतस्य सुमसिद्धाय सुसन्दशमसत्वाऽभिसंविशन्तु सुसस्याअतिस्थूलम्मुसले पत्नी संयाजान्क्रतुस्थालञ्जिक्स्थो (शु. य. प्रा. ३ अ. ८२ सू.) इत्यनेन सस्य प्रकृतिभावे रूपम।

उन्नतऽऋषभः ॥ उन्नतऽऋषभोव्वामनस्तऽऐन्द्रावैष्णवाऽ
उन्नतःशितिबाहुःशितिपृष्ठस्तऽऐन्द्राबार्हस्पत्याःशुकरूपा
व्वाजिनाःकल्म्माषाऽआग्निमारुताःश्यामाःपौष्णाः ॥ ७ ॥
एताऽऐन्द्राग्नाः ॥ एताऽऐन्द्राग्नाद्विरूपाऽअग्नीषोमीयां
व्वामनाऽअनड्वाहऽआग्नावैष्णवाव्वशामैत्रावरुण्योन्यतऽए
न्योमैत्र्यः ॥ ८ ॥ कृष्णग्रीवाऽआग्नेयाः ॥ कृष्णग्री

---

१ अत्र "जात्ये च स्वरिते चैव वकारो यत्र दृश्यते । कर्तव्यस्तूभयक्षेपो "वायव्या÷ इति निदर्शनम्" (या. शि.) न्युब्जापरपर्याये जात्यस्वरे वकारे यकारे वा वत्सशृङ्गवत् कुमारीकुचयुग्मवत् (÷) इत्याकारको दक्षिणहस्तस्यांगुल्या उभयक्षेपः कार्यः । यथा वकारयोगे जात्य उभयक्षेपस्तथैव यकारेऽप्युभयक्षेपः ।

वाऽआग्नेयाबभ्रवः सौम्याः श्वेतावायव्याऽअविज्ञाताऽ
अदित्यैसरूपाधात्रेवत्सतर्य्योदेवानाम्पत्नीभ्यः ॥ ९ ॥
कृष्णाभौमाः ॥ कृष्णाभौमाधूम्राऽआन्तरिक्षाबृहन्तो
दिव्याः शबलावैद्युताः सिध्माः स्तारकाः ॥ १० ॥ [ १०-१ ]
धूम्रान्वसन्ताय ॥ धूम्रान्वसन्तायालभतेश्वेतान्ग्रीष्माय
कृष्णान्वर्षाभ्योरुणाञ्छरदेपृषतोहेमन्तायपिशङ्गाञ्छि
शिराय ॥ ११ ॥ त्र्यवयोगायत्र्यै । पञ्चावयस्त्रिष्टुभेदित्य

वाहोजगंत्त्यैत्रिवृत्त्साऽअनुष्टुब्भैतुर्य्यवाहऽउष्णिहे ॥ १२ ॥
पृष्ठवाहौव्विराजे ॥ पृष्ठवाहौव्विराजऽउक्षाणौबृहत्त्याऽऋष
भाःककुभेनड्वाहःपङ्क्त्यैधेनवोतिच्छन्दसे ॥ १३ ॥ कृष्णग्
ग्ग्रीवाऽआग्नेयाः ॥ कृष्णग्ग्रीवाऽआग्नेयाबब्भ्रवःसौ
म्म्याऽउपध्वस्त्ताःसावित्त्रावत्त्सतर्य्यःसारस्वत्त्यःश्यामाः
पौष्णाःपृश्न्नयोमारुताबहुरूपावैश्श्वदेवाव्वशाद्यावापृथिवी
योः ॥ १४ ॥ उक्ताःसञ्चराः ॥ उक्ताःसञ्चराऽएताऽऐन्द्रा

सं. ४६

शु. य. संहि. ॥ २८ ॥

ग्नाःकृष्ष्णाव्वारुणाःपृश्श्नयोमारुताःकायास्तूपराः ॥ १५ ॥ उ. वि. अ.

अग्नयेनीकवते । प्प्रथमजानालभतेमरुद्भ्यःसान्तपने ॥ २४ ॥

भ्यःसवात्त्यान्मरुद्भ्योगृहमेधिभ्योबष्क्किहान्मरुद्भ्यः

क्क्रीडिभ्यःसꣳसृष्टान्मरुद्भ्यःस्वतवद्भ्योनुसृष्टान् ॥ १६ ॥

उक्ताःसञ्चराः ॥ उक्ताःसञ्चराऽएताऽऐन्द्राग्नाःप्प्राशृङ्गा[1] ॥ ३८ ॥

माहेन्द्राबहुरूपाव्वैश्श्वकर्म्मणाः ॥ १७ ॥ धूम्म्राबभ्रुनीका

१ प्राशृङ्गा। अत्र प्रशृङ्ग इति पदम्। प्रशब्दात् शृङ्गशब्दे परे "प्रवणशृङ्गयासेषु" (शु. य. प्रा. ३ अ. १०५ सू.) इत्यनेन ह्रस्वाकारस्य दीर्घाकारे प्राशृङ्गा।

शाᳬ । पितृणाᳪँसोमवताम्बब्भ्रवोधूम्म्रनीकाशाᳬपितृणांबर्हि

षदाङ्कृष्ण्णाबब्भ्रुनीकाशाᳬपितृणामग्निष्ष्वात्तानाङ्कृष्ण्णाᳬपृ

षन्तस्त्रैयम्बकाः ॥ १८ ॥ उक्क्ताःसञ्चराः ॥ उक्क्ताः

सञ्चराऽएताᳬशुनासीरीयाᳬश्वेतावायव्व्याᳬश्वेताःसौर्य्याः

॥ १९ ॥ वसन्तायकपिञ्जलान् ॥ वसन्तायकपिञ्जलानाल

---

१ सोमवतीम् । अत्र "विश्वदेव्यसोमौ" ( शु. य. प्रा. ३ अ. ११८ सू. ) इत्यनेन वतीशब्दपरे सोमशब्दाकारस्य दीर्घाकारविधानान्न वतापरे भवति, अतो न दीर्घः । २ कृष्ण्णा बब्भ्रुनीकाशाः । अत्र समानपदे "ऋषरेभ्य" इति णत्वप्राप्तौ "निवनिनसः प्रपीनम्" ( शु. य. प्रा. ३ अ. ९१ सू. ) इत्यनेन नि वनि नस प्रपीनम् एते नकारा प्रकृत्या भवन्ति समानपदे इति निषेधान्नात्र णत्वम् । त्वत्र निशब्दस्य दीर्घत्वं "पीबासोमम्" ( शु. य. प्रा. ३ अ. १३० सू. ) इत्यनेन भवति ।

भतेग्ग्रीष्म्मायंकलविङ्कांन्वर्षाब्भ्यंस्त्तित्तिरींन्छरदेव्वर्त्तिकाहे
मन्तायकक्करांञ्छिशिरायव्विकक्करान् ॥ २० ॥ [ १०-२ ]
समुद्रायंशिशुमारांन् ॥ समुद्रायंशिशुमारानालभतेपर्ज्जन्न्यां
यमण्डूकांनद्भ्योमत्त्स्यांन्मित्रायंकुलीपयान्वरुणायनाक्क्रा
न् ॥ २१ ॥ सोमांयहꣳसान् ॥ सोमांयहꣳसानालभतेव्वायवेब
लाकांऽइन्द्राग्निब्भ्यांक्रुञ्चांन्मित्रायंमद्गून्वरुणायचक्क्रवाका
न् ॥ २२ ॥ अग्नयेंकुटरून् ॥ अग्नयेंकुटरूनालंभतेव्वनस्पाति ॥ ३९ ॥

भ्यऽउलूँकानग्नीषोमाभ्याञ्चाषानश्विभ्याम्मयूरान्मित्राव
रुणाभ्याङ्कपोतान् ॥ २३ ॥ सोमायलबान् ॥ सोमायलबा
नालभतेत्त्वष्ट्रेकौलीकान्गोषादीर्देवानाम्पत्नीभ्यःकुलीका
देवजामिभ्योग्नयेगृहपतयेपारुष्णान् ॥ २४ ॥ अह्नेपाराव
तान् ॥ अह्नेपारावतानालभतेरात्र्यैसीचापूरहोरात्रयोःसन्धि
भ्योजतूर्म्मासेभ्योदात्त्यौहान्त्संवत्त्सरायमहतःसुपर्णान्
॥ २५ ॥ भूम्म्याऽआखून् ॥ भूम्म्याऽआखूनालभतेन्तरि

क्षायपाङ्क्ष्णान्दिवेकशान्दिग्ग्भ्योनकुलाञ्वभ्भुकानवान्तर
दिशाब्भ्यः ॥ २६ ॥ वसुब्भ्यऽऋश्यान् ॥ वसुब्भ्यऽऋश्या
नालभतेरुद्द्रेब्भ्योरुरूनादित्येब्भ्योन्यङ्कून्विश्वेब्भ्योदेवेब्भ्यः
पृषतान्त्साद्ध्येब्भ्यःकुलुङ्गान् ॥ २७ ॥ ईशानायपरस्वतऽ ॥
ईशानायपरस्वतऽआलभतेमित्त्रायगौरान्वरुणायमहिषान्बृह
स्प्पतयेगवयाँस्त्वष्ट्रऽउष्ट्रान् ॥ २८ ॥ प्रजापतयेपुरुषान् ॥ ॥ ४० ॥
प्रजापतयेपुरुषान्हस्तिनऽआलभतेव्वाचेप्लुषींश्चक्षुषेमश

काऽऽन्ध्रोत्रायमृङ्गां ॥ २९ ॥ शतम् ॥ १४०० ॥ प्रजापतये च ।
व्वायवे च गोमृगो व्वरुणायारण्योमेषो यमाय कृष्णो मनुष्यरा
जाय मर्क्कटः शार्दूलाय रोहिदृषभाय गवयी क्षिप्रश्येनाय व्व
र्त्तिका नीलङ्गोः क्रिमिः समुद्राय शिशुमारो हिमवते हस्ती
॥ ३० ॥ [ १०-३ ] मयुः प्राजापत्यः ॥ मयुः प्राजापत्यऽ
उलो हलिक्क्षणो वृषदंशस्ते धात्रे दिशाङ्कङ्को धुङ्क्षाग्नेयी कल
विङ्को लोहिताहिः पुष्करसादस्ते त्वाष्ट्राव्वाचे क्रुञ्चः ॥ ३१ ॥

सोमायकुलुङ्गः ॥ सोमायकुलुङ्गऽआरण्योजोनकुलःशका
तेपौष्णाःक्रोष्टामायोरिन्द्रस्यगौरमृगःपिद्वोन्न्यङ्कुःकक्कट
स्तेनुमत्त्यैप्प्रतिश्रुत्कायैचक्रवाकः ॥ ३२ ॥ सौरीबलाका ।
शार्ग्गःसृञ्जयःशयाण्डकस्तेमैत्राःसरस्वत्त्यैशारिःपुरुषवाक्
श्वाविद्धौमी[1]शार्द्दूलोवृकःपृदाकुस्तेमन्न्यवेसरस्वतेशुकःपुरुष
वाक् ॥ ३३ ॥ सुपर्णःपार्ज्जन्न्यः ॥ सुपर्णःपार्ज्जन्न्यऽ
आतिर्व्वाहसोदर्व्विदातेव्वायवेबृहस्प्पतयेव्वाचस्प्पतयेपैङ्गराजो ॥४१॥

१ श्वाविद्धौमी । अत्र श्वविद्धौमी इति पदम् । "अश्वरश्मिमतिसुमतिश्वसुत०" (शु. य. प्रा. ३ अ. ५८ सू.) इत्यनेन वकारे परे श्वस्य ह्रस्वाकारस्य दीर्घाकारः ।

लजऽआन्तरिक्षःप्लुवोमद्गुर्म्मत्स्यस्तेनदीपतयेद्यावापृथिवी

यंःकूर्म्मः ॥ ३४ ॥ पुरुषमृगश्चन्द्रमसं ॥ पुरुषमृगश्चन्द्र

मंसोगोधाकालकादा[1]र्वाघाटस्तेवनस्प्पतीनाङ्कृकवाकुःसावि

त्रोहंसोवातस्यनाक्रोमकरंकुलीपयस्तेकूपारस्याह्रियैशल्य

कं ॥ ३५ ॥ एण्यह्नः ॥ एण्यह्नोमण्डूकोमूषिकाति[2]

---

१ दार्वाघाटः। दारु आघातः इति पदम्। अत्र "त आपादनाऽम्बरात्" ( शु. य. प्रा. ३ अ. ४८ सू. ) इत्यनेनानादम्बरादाघाशब्दात्परस्य तकारस्य मूर्द्धन्यो भवति दार्वाघाट इति। २ तित्तिरिस्ते। अत्र "सकारे परे च" ( शु. य. प्रा. ३ अ. ७८ सू. ) इत्यनेन सकारपरादेकाक्षरादेकारपरे तकारे विसर्जनीयस्य सकारः प्राप्तः। सः "प्रकृत्या नानापदस्थे तकारे (शु. य. प्रा. ३ अ. ८१ सू.) इत्यनेन प्रकृतिभावे प्राप्ते "अनुसन्तनोतु०" ( शु. य. प्रा. ३ अ. ८२ सू. ) इत्यनेन निषिद्ध्यते। सकारो भवत्येव।

त्तिरिस्त्तेसर्प्पाणाँल्लोपाशऽआश्विनःकृष्णोरात्र्याऽऋक्षोज
तूःसुषिलीकातऽइतरजनानाञ्जहकावैष्णवी ॥ ३६ ॥ अन्य
वापोर्द्धमासानाम् ॥ अन्यवापोर्द्धमासानामृश्श्योमयूरः
सुपर्णस्त्तेगन्धर्वाणामपामुद्रोमासाङ्कश्श्यपोरोहित्कुण्डृणा
चीगोलत्तिकातेप्प्सरसाम्मृत्त्यवेसितः ॥ ३७ ॥ वर्षाहूर्ऋतु
नाम् ॥ वर्षाहूर्ऋतूनामाखुःकशोमान्थालस्त्तेपितृणाम्बलाया



१ "ए-ओ-आभ्यामुदात्ताभ्यामकारो निहितश्च यः। स च यत्र प्रलुप्येते तं चाभिनिहितं विदुः" या. शि. ॥ अत्र ते अप्सरसामित्यासीत्। अत्रैकारात्परस्याकारस्य "एङोदॄभ्यामकारः" (शु. य. प्रा. अ. ३६१ सू.) इत्यनेनाकारस्य पूर्वरूपः। अत्राभिनिहितस्वरो ज्ञेयः। तथौकारेऽपि वेदोसीत्यादौ।

जगरोव्वसूनाङ्कपिञ्जलँकपोतऽउलूकँशशस्तेनिर्ऋत्यैव्वरुणा
यारण्ण्योमेषः ॥ ३८ ॥ श्वित्रऽआदित्यानाम् ॥ श्वित्रऽ
आदित्यानामुष्ट्रो[1]घृणीवान्[2]वार्ध्रीनसस्तेमत्त्याऽअरण्ण्यायसृ
मरोरुरूरौद्रः क्क्रयिः कुटरुर्दात्त्यौहस्तेव्वाजिनाङ्कामायपिकः
॥ ३९ ॥ खड्गोव्वैश्वदेवः । श्वाकृष्ण्णःकर्ण्णोगर्दभस्तरक्षु
स्तेरक्षसामिन्द्रायसूकरःसिंहोमारुतःकृकलासःपिप्पकाश

---

१ घृणीवान् । अत्र "अश्वरश्मिमतिसुमतिश्वसुतचारयघृणि" इत्यनेन वकारे परे घृणिशब्दस्येकारस्य दीर्घकारः । २ वार्ध्रीनसे । अत्र समानपदे "ऋषरेभ्यः" इति णत्वप्राप्तौ "निवनिनसः प्रपीनम्" (शु. य. प्रा. ३ अ. ९१ सू.) इत्यनेन नसः णत्वं निषिद्ध्यते । अतो न णत्वम् ।

कुनिस्त्तेशंरुध्यायैर्व्विश्वेषान्देवानाम्पृषतः ॥ ४० ॥ [ १०-४ ]

इति श्रीवाजसनेयसंहितायां चतुर्विंशोऽध्यायः ॥ २४ ॥

श्रीवेदपुरुषाय नमः ॥ अनुवाकसूत्रम् ॥ शादन्दद्भिर्नवैकैका,
हिरण्यगर्भश्चतस्त्र, ऽआनोदश, मानोमित्रो, यदश्वस्या
ष्टकौ, यत्तेपडि, मानुकंद्वे, पञ्चदशसप्तचत्वारिᳪशत् ॥
[ अ. २५-मं. ४७ अनु. १५ ] हरिः ॐ ॥ शादन्दद्भिः ॥ ॥४३॥
शादंन्दद्भिरवकान्दन्तमूलैर्म्मृदम्बस्वैस्त्तेगान्दᳪष्ट्राब्भ्याᳪ

सरस्वत्त्याऽअग्ग्रजिह्वञ्जिह्वायांऽउत्त्सादमवक्क्रन्देनतालुव्वा
जꣳहनुभ्यामपऽआस्येनव्वृषणमाण्डाभ्यामादित्त्याँश्मश्रु
भिꣳपन्थानम्भ्रूभ्यान्द्यावापृथिवीव्वर्तोभ्यांव्विद्युतङ्कनीनका
भ्याꣳशुक्लायस्वाहाकृष्णायस्वाहापार्य्याणिपक्ष्माण्यवा
र्य्याऽइक्षवोवार्य्याणिपक्ष्माणिपार्य्याऽइक्षवः ॥ १ ॥
[१-१] व्वातम्प्राणेन ॥ व्वातम्प्राणेनापानेननासिकेऽउपयाम

सं. ४७ १ अवक्रन्देन तालु इत्यत्र “ऋषरेभ्यः” इत्यनेन समानपदे नस्य प्राप्तं णत्वं “तवर्गे च” (शु. य. प्रा. ३ अ. ९४ सू.) इत्यनेन निषेधाद्भवति।

मधरेणौष्ठेनसदुत्तरेणप्प्रकाशेनान्तरमनूकाशेनबाह्यन्निवेष्प्य
म्मूर्ध्नास्तनयित्नुन्निर्बाधेनाशनिम्मस्तिष्क्केणविद्युतङ्कनी
नकाभ्याङ्कर्ण्णाभ्याᳪंश्रोत्रᳪंश्रोत्राभ्याङ्कर्ण्णौतेदनीमधर
कण्ठेनापःशुष्क्ककण्ठेनचित्तम्मन्याभिरदितिᳬंशीर्ष्णानि
र्ऋतिन्निर्जर्ल्ल्येनशीर्ष्णासङ्क्रोशैःप्प्राणान्रेष्म्माणᳪंस्तुपेन ॥ ४४ ॥
॥२॥ [१-२] मशकान्केशैः[२५।] ॥ मशकान्केशैरिन्द्रᳪंस्वपसावहेन

बृहस्प्पतिँ शकुनिसादेनकूर्म्माञ्छफैराक्रमणँ स्थूराभ्या
मृक्षलाभिः कपिञ्जलाञ्जवञ्जङ्घाभ्यामद्ध्वानम्बाहुभ्याञ्जा
म्बीलेनारण्यमग्निमतिरुग्भ्याम्पूषणन्दोर्भ्यामश्विनावँ
साभ्याँ रुद्रँ रोराभ्याम् ॥३॥ [१-३] अग्नेः पक्षतिः ॥
अग्नेः पक्षतिर्व्वायोर्न्निपक्षतिरिन्द्रस्यतृतीयासोमस्यचतुर्त्थ्य
दित्त्यैपञ्चमीन्द्राण्यैषष्ठीमरुताँ सप्तमीबृहस्प्पतेरष्टम्म्यर्य्य

१ शकुनि सादेन। अत्र "भाविभ्य सः षं समानपदे" (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन सस्य षत्वप्राप्तौ "पृथिवीदिव्युपरिचर्षणिशकुनिया-सिभ्यः" (शु. य. प्रा. ३ अ. ८४ सू.) इत्यनेन शकुनिपरस्य सस्य प्रकृतिभावे न षत्वम्।

ष्ण्णोनंवमीधातुर्द्दंशमीन्द्रस्यैकादशीव्वरुणस्यद्वादशीयमस्यंत्र
योदशी ॥४॥ [ १-४ ] इन्द्राग्न्योःपक्षतिः । सरस्वत्त्यैनि
पक्षतिर्म्मित्रस्यंतृतीयापाञ्चंतुत्थीनिर्ऋत्त्यैपञ्चम्म्यग्नीषोम
योःषष्ठीसर्प्पाणाꣳसप्तमीव्विष्णोरष्टमीपूष्णोनवमीत्त्वष्टुर्द्द
शमीन्द्रस्यैकादशीव्वरुणस्यद्वादशीयम्म्यैत्रयोदशीद्यावापृथि
व्व्योर्द्दक्षिणम्पार्श्वंव्विश्वेषान्देवानामुत्तरम् ॥ ५ ॥ [ १-५ ] ॥४५॥
मरुताꣳस्कन्धाः ॥ मरुताꣳस्कन्धाव्विश्वेषान्देवानाम्प्रथ

माकींसारुद्राणान्द्वितीयादित्त्यानान्तृतीयाव्वायोश्पुच्छम
ग्नीषोमंयोर्भासदौक्कुञ्चौश्श्रोणिंब्भ्यामिन्द्राबृहस्पतीऽऊ
रुब्भ्यांम्मित्रावरुणावल्गाब्भ्यांमाक्कमंणᳪस्थूराब्भ्याम्बल
ङ्कुष्ठांब्भ्याम् ॥ ६ ॥ [ १-६ ] पूषणंव्वनिष्ठुना । न्धाही
न्त्स्थूलंगुदयांसर्प्पान्गुदांभिर्व्विहुतऽआन्त्रैरपोव्वस्त्तिनाव्वृषंण
माण्डाब्भ्यांव्वाजिंनद्दशेपेनप्प्रजाᳪरेतंसाचाषांन्पित्तेनंप्प्रदरा
न्पायुनांकूश्म्माञ्छकपिण्डैः ॥ ७ ॥ [ १-७ ] इन्द्रस्य

स्थूरा

शु. य. संहि. क्क्रोडः ॥ इन्द्रस्यक्क्रोडोदित्यैपाजस्यन्दिशाञ्जत्रवोदित्यै शु. वि. अ.
॥४६॥ भसज्जीमूतान्हृदयौपशेनान्तरिक्षम्पुरीततानभऽउदर्य्येणच ॥२५॥
क्क्रवाकौमतस्नाभ्यान्दिवंव्वृक्काभ्याङ्गिरीन्प्लाशिभिरुपला
न्प्लीह्नावल्मीकान्क्लोमभिर्ग्लौभिर्गुल्मान्हिराभिःस्रव
न्तीर्ह्रदान्कुक्षिभ्याꣳसमुद्रमुदरेणवैश्वानरम्भस्मना ॥८॥
[ १-८ ] विधृतिन्नाभ्यां । घृतꣳरसेनापोयूष्णामरीचीर्वि ॥४६॥ ची
प्प्रुड्भिर्न्नीहारमूष्मणाशीनंव्वसयाप्प्रुष्वाऽअश्रुभिर्ह्रादुनी

ईषीकाभिरस्त्रारक्षाꣳसिचित्राण्यङ्गैर्नक्षत्राणिरूपेणपृथि
वीन्त्वचाजुम्बकायस्वाहा ॥ ९ ॥ [ १-९ ] हिरण्यग
र्भःसम् ॥ हिरण्यगर्भःसमवर्त्तताग्रेभूतस्यजातःपतिरे
कऽआसीत् ॥ सदाधारपृथिवीन्द्यामुतेमाङ्कस्मैदेवायहवि
षाविधेम ॥ १० ॥ यःप्राणतः ॥ यःप्राणतोनिमिष
तोमहित्वैकऽइद्राजाजगतोबभूव ॥ यऽईशेऽअस्यद्विपद
श्चतुष्पदःकस्मैदेवायहविषाविधेम ॥ ११ ॥ यस्येमे ।

हि॒मव॑न्तोमहि॒त्त्वायस्य॑सम॒द्र॒ᳪ॑र॒सया॑स॒हाहुः॑ ॥ यस्ये॒माः॑

प्प्रदिशो॒यस्य॑बा॒हूकस्म्मै॑दे॒वाय॑ह॒विषा॑व्विधेम ॥ १२ ॥ यऽ

आ॑त्म॒दाः॑ ॥ यऽआ॑त्म॒दाब॑ल॒दायस्य॒व्विश्श्व॑ऽउ॒पास॑ते॒प्प्र॒शिषँ॒

यस्य॑दे॒वाः॑ ॥ यस्य॑च्छा॒याम॒तँयस्य॑मृ॒त्युःकस्म्मै॑दे॒वाय॑ह॒वि

षा॑व्विधेम ॥ १३ ॥ [४-१०] आनः॑ ॥ आनो॑भ॒द्राःक्क्र॑

त॑वोयन्तु॒व्विश्श्व॑तोद॑ब्धासो॒ऽअप॑रीतासऽउ॒द्भिदः॑ ॥ दे॒वानो॒य

था॒सद॒मिद्वृ॒धेऽअस॒न्नप्प्रा॑युवोरक्षि॒तारो॑दि॒वेदि॑वे ॥१४॥ दे॒वा

नांम्भद्राः ॥ देवानांम्भद्रासुमतिर्ऋ[1]जूयतान्देवानांꣳराति

रभिनोनिवर्त्तताम् ॥ देवानांꣳसख्यमु[2]पसेदिमाव्वयन्देवानऽ

आयुꣳप्प्रतिरन्तुजीवसे ॥ १५ ॥ तान्पूर्व्वया । निविदाहू

महेव्वयम्भगम्मित्रमदितिन्दक्षमस्रिधम् ॥ अर्य्यमणंव्वरुणꣳ

सोमंमश्विनासरस्वतीनꣳसुभगामयस्करत् ॥ १६ ॥ तन्नः ॥

तन्नोव्वातोमयोभुव्वातुभेषजन्तन्मातापृथिवीतत्त्पिताद्यौः ॥

---

१ ऋजूयता । अत्र यकारे परे "अथोदारिथ" ( शु. य. प्रा. ३ अ. ११३ सू. ) इत्यनेन ह्रस्वाकारस्य दीर्घे ऋजूयता । २ उपसेदिमाव्वयम् । अत्र "अश्वरश्मिमतिसुमतिश्वसुतश्वरयघ्रणिसेदिमे" ( शु. य. प्रा. ३ अ. ९८ सू. ) इत्यनेन वकारे परे उपसेदिमपदघटितह्रस्वाकारस्य दीर्घः कृतः ।

शु. य. संहि. तद्ग्रावाणꣳसोमसुतौमयोभुवस्तदश्विनाशृणुतन्धिष्ण्यायुवम् उ. वि.

॥ १७ ॥ तमीशानम् ॥ तमीशानञ्जगतस्तस्थुषस्प्प अ.

॥४८॥ तिन्धियञ्जिन्वमवसेहूमहेवयम् ॥ पूषानोयथावेदसामसद्वृधे ॥२५॥

रक्षितापायुरदब्धꣳस्वस्तये ॥ १८ ॥ स्वस्तिनः ॥ स्वस्ति

नऽइन्द्रोवृद्धश्रवाꣳस्वस्तिनःपूषाविश्ववेदाꣳ ॥ स्वस्तिन

स्तार्क्ष्योऽअरिष्टनेमिꣳस्वस्तिनोबृहस्प्पतिर्द्दधातु ॥ १९ ॥ ॥४८॥

---

१ बृहस्पतिः । अत्र "तद्बृहतौ करपत्योस्तलोपश्च" (शु. य. प्रा. ३ अ. ५२ सू.) तद् बृहतैतौ करपतिशब्दयोर्यथासंख्यं सकारेण व्यवधीयेते तकारस्य लोपं भवति । अत्र बृहच्छब्दात्पतिशब्दे परे तकारस्य लोपे सकारस्य विधानम् । तत "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (शु.य.प्रा.४अ.१०२) इत्यनेन पकारस्य द्वित्वम् ।

पृषदश्वामरुतः ॥ पृषदश्वामरुतंपृश्निमातरंशुभंय्या
वांनोविदथेषुजग्मंयं ॥ अग्निजिह्वामनवःसूरचक्षसोवि
श्वेनोदेवाऽअवसागमन्निह ॥ २० ॥ भद्रङ्कर्णेभिः ।
शृणुयामदेवाभद्रम्पश्येमाक्षभिर्यजत्राः ॥ स्थिरैरङ्गैस्तु
ष्टुवाᳫंसस्तनूभिर्व्यशेमहिदेवहितंय्यदायुः ॥ २१ ॥ शत
मित् ॥ शतमिन्नुशरदोऽअन्तिदेवायत्रानश्चक्राजरसन्तनूना
म् ॥ पुत्रासोयत्रपितरोभवन्तिमानोमध्यारीरिषतायुर्गन्तोः

॥ २२ ॥ अदि॑तिर्द्यौः ॥ अदि॑तिर्द्यौरदि॑तिर॒न्तरि॑क्षमदि॑ति
॥ ४९ ॥ र्म्मा॒तासपि॒तासपु॒त्रः ॥ व्विश्वे॑दे॒वाऽअदि॑ति॒ꣳपञ्च॒जना॒ऽअदि॑ ॥ २५ ॥
तिर्ज्जा॒तमदि॑ति॒र्ज्जनि॑त्त्वम् ॥ २३ ॥ [ १०-११ ] मानः ॥
मानो॑मि॒त्रोव्वरु॑णोऽअर्य्य॒मायुरिन्द्र॑ऽऋभुक्षाम॒रुत॒ꣳपरि॑कख्य
न् ॥ यद्वा॒जिनो॑दे॒वजा॑तस्य॒सप्ते॑ꣳप्रव॒क्ष्यामो॑वि॒दथे॑व्वी॒र्य्या॑णि
॥ २४ ॥ यन्नि॒र्णि॑जा ॥ यन्नि॒र्णि॑जा॒रेक्ण॑सा॒प्प्रावृ॑तस्यरा॒ति ॥ ४२ ।
ङ्गृ॑भी॒ताम्मु॑ख॒तोनय॑न्ति ॥ सुप्प्रा॑ङ्जोमेम्म्य॑द्वि॒श्वरू॑पऽइन्द्रा

पूष्णोऽअप्प्रियमप्प्येतिपाथः ॥२५॥ एषच्छागः । पुरोऽअश्वे
नव्वाजिनापूष्णोभागोनीयतेव्विश्वदेव्यः ॥ अभिप्प्रियँय्य
त्पुरोडाशमर्वतात्त्वष्टेदेनᳬंसौश्रवसायंजिन्वति ॥२६॥ यद्धवि
ष्ष्यम् ॥ यद्धविष्ष्यमृतुशोदेवयानन्त्रिर्म्मानुषाःपर्य्यश्वन्न
यन्ति ॥ अत्त्रापूष्णःप्रथमोभागऽएतियज्ज्ञन्देवेभ्यःप्प्र
तिवेदयन्नजः ॥ २७ ॥ होताद्ध्वर्य्युः ॥ होताद्ध्वर्य्युरावयाऽ
अग्निमिन्धोग्ग्रावग्ग्राभऽउतशᳬंस्तासुविप्प्रः ॥ तेनयज्ज्ञे

सं. ४८

१ अत्रापूष्णः । अत्र "पूष्णो जहीमस्तेष्वत्र" (शु. य. प्रा. ३ अ. १२१ सू.) इत्यनेन पूष्णः जहीमः ते इत्येतेषु पदेषु परेषु अत्रशब्दस्य दीर्घाकारः ।

६४।७

नस्वरङ्कृतेनास्विष्टेनव्वक्षणाऽआपृणद्ध्वम् ॥ २८ ॥ यूपव्व्रस्का
ऽउत । येयूपवाहाश्चषालँय्येऽअश्वयूपायतक्क्षति ॥ येचार्व्व
तेपचनꣳसम्भरन्त्युतोतेषामभिगूर्त्तिर्न्नऽइन्वतु ॥ २९ ॥
उपप्र ॥ उपप्रागात्सुमन्मेधायिमन्मदेवानामाशाऽउपवीत
पृष्ठꣳ ॥ अन्वेनंविप्राऽऋषयोमदन्तिदेवानाम्पुष्टेचकृमासुब
न्धुम् ॥ ३० ॥ यद्वाजिनं ॥ यद्वाजिनोदामसन्दानमर्व्व
तोयाशीर्षण्ण्यारशनारज्जुरस्य ॥ यद्वाघास्यप्प्रभृतमास्येतृणꣳ

सर्व्वांताते॒ऽअपि॑दे॒वेष्ष्वंस्त्तु ॥ ३१ ॥ [८-१२] यदश्श्वंस्य ।
क्क्रवि॑षो॒मक्क्षि॒काश॒यद्द्वास्व॒रौस्वधि॑तौरि॒प्त्तमस्ति॑ ॥ यद्ध
स्त्तंयो॑ऽर्श॒मि॒तुर्य्यन्नखे॒षुसर्व्वांता॒तेऽअपि॑दे॒वेष्ष्वंस्त्तु ॥ ३२ ॥
यदूवंद्ध्यम् ॥ यदूवंद्ध्यमु॒दरंस्याप॒वाति॒यऽआ॒मस्यंक्क्र॒विषो॑
ग॒न्धोऽअस्ति॑ ॥ सुकृ॒ताततच्छ॑मि॒तारं॑ कृण्वन्तु॒तमे॒धंॐशृत॒
पाकंम्पचन्तु ॥ ३३ ॥ यत्तैं ॥ यत्तेंगात्रां॑द॒ग्ग्निनांपच्च्य
मांनाद॒भिशूलन्निहंतस्याव॒धावंति ॥ मातद्भ्म्याामाश्श्रिष॒

तूतमे

शु. य.
संहि.

॥५१॥

न्मातृणेषुदेवेभ्यस्त्तदुशद्भ्योरातमंस्त्तु ॥ ३४ ॥ येव्वाजि उ. वि.
नम् ॥ येव्वाजिनम्पारिपश्श्यन्तिपक्क्वँय्यऽईमाहुःस्सुरभिर्न्नि अ.
र्हरेति ॥ येचार्व्वतोमाᳪंसभिक्क्षामुपासंतऽउतोतेषामभिगूर्त्ति ॥ २५ ॥
र्न्नऽइन्न्वतु ॥३५॥ यन्नीक्क्षणम् ॥ यन्नीक्क्षणम्माँस्प्पचन्न्याऽ
उख्खायायापात्त्राणियूष्णणऽआसेचनानि ॥ ऊष्म्मण्ण्यापिधा
नाचरूणामङ्काःस्सूनाःपरिभूषन्त्यश्श्वम् ॥ ३६ ॥ मात्त्वा ॥ ॥ ५१ ॥
मात्त्वाग्ग्निर्द्ध्वनयीद्धूमगन्धिर्म्मोख्खाभ्राजन्त्यभिविक्त्तज

ग्ध्रिः ॥ इष्टंवीतमभिगूर्त्तंवषट्कृतन्तन्देवासःप्रतिगृब्भ्णन्त्य
श्वम् ॥३७॥ निक्क्रमणन्निषदनम् ॥ निक्क्रमणन्निषदनंव्विवर्त्त
नँय्यच्चपड्वीशमर्व्वतः ॥ यच्चपपौयच्चघासिञ्जघाससर्व्वाता
तेऽअपिदेवेष्ष्वस्तु ॥ ३८ ॥ यदश्श्वाय ॥ यदश्श्वायव्वासऽ
उपस्तृणन्त्यधीवासँय्याहिरण्ण्यान्यस्म्मै ॥ सन्दानमर्व्वन्त
म्पड्वीशम्प्प्रियादेवेष्ष्वायामयन्ति ॥ ३९ ॥ [८-१२] यत्ते ।

१ अधीवासम् । अत्र "अश्वरश्मि०" (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन वासमित्यस्य वकारे परे अधि इत्यस्य ह्रस्वाकारस्य दीर्घैकारः ।

शु. य. संहि. सादेमहंसाशूकृतस्यपाष्ण्र्याँव्वाकशंयाव्वातुतोदं ॥ स्त्रुचेवताहु उ. वि. अ.
विषोंऽअद्ध्वरेषुसव्र्वाताते ब्रह्मणासूदयामि ॥ ४० ॥ चतुंस्त्रिᳬं
॥५२॥ ॥२५॥
शद्वाजिनं÷ ॥ चतुंस्त्रिᳬंशद्वाजिनोंदेवबंन्धोर्व्वङ्क्रीरश्श्वंस्यस्वाधि
तिᳬंसमेंति ॥ अच्छिद्राागात्रााव्वयुनांकृणोतपरुंष्प्परुरनुघुंष्ष्या
व्विशंस्त्त ॥ ४१ ॥ एकुस्त्वष्टुं÷ ॥ एकुस्त्वष्टुर[2]श्श्वंस्याव्विश
स्त्ताद्वायुन्तारांभवतुस्त्तथंऽऋतुः ॥ यातेगात्राणामृतुथाकृ ॥५२॥

१ अनुघुष्य्याविशस्त । अत्र "अश्वरश्मिमतिसुमतिश्वसुतचारय०" (शु.य.आ.३अ.९८सू.) इत्यनेन वकारे परे घुष्येत्यस्य ह्रस्वाकारस्य दीर्घाकारः । २ अश्व-स्याविशस्तारः० । अत्र "अश्वरश्मिमतिसुमतिश्वसुताचारयघृणिसेदिसेन्द्रियधारयचित्रमनुरयुनाथस्य०" इत्यनेन वकारे परे अश्वशब्दस्याकारस्य दीर्घाकारः ।

णोमिताताप्रिण्डांनाम्प्रजुंहोम्म्यग्नौ ॥ ४२ ॥ माऽत्त्वां ।
तपत्प्रियऽआत्माऽपियन्तम्मास्वधिंतिस्त्तन्वुऽआतिंष्ठिपत्ते ॥
मातेंगृध्नुरंविशुस्त्ताऽतिहायंछिद्रागात्राण्यसिनामिथूकः ॥ ४३ ॥
नवै ॥ नवाऽउंऽएतन्म्रियसेनरिष्य्यसिदेवाँ२॥ ऽइदेषिपथि
भिं॰सुगेभिं॰ ॥ हरीतेयुञ्जापृषंतीऽअभूतामुपांस्त्थाद्वाजीधु
रिरासंभस्य ॥ ४४ ॥ सुगव्व्यंन्नः ॥ सुगव्व्यंन्नोव्वाजीस्वश्व्यंम्पुः
सःपुत्राँ२॥ ऽउतविश्श्वापुषंरयिम् ॥ अनागास्त्त्वन्नोऽअदिं

१ विश्वापुषः। अत्र "विश्वसहमुव्युषवसुषु"। ( शु. य. प्रा. ३ अ. १०२ सू. ) इत्यनेन पुषपरे विश्वाकारस्य दीर्घाकारः।

तिःकृणोतुक्षत्रन्नोऽअश्वोंवनताᳫंहविष्मान् ॥ ४५ ॥
'५३॥ [ ६-१३ ] इमानु । कम्भुवनासीषधामेन्द्रश्चविश्वेचदेवाः ॥ ॥ २५ ॥
आदित्यैरिन्द्रःसगणोमरुद्भिरस्म्मभ्यंभेषजाकरत् ॥ यज्ञ
न्नःस्तन्वम्प्रजाश्चादित्यैरिन्द्रःसहसीषधाति ॥ ४६ ॥
अग्नेत्त्वम् ॥ अग्नेत्त्वन्नोऽअन्तमऽउतत्राताशिवोभवावरू
त्थ्यः ॥ वसुरग्निर्वसुश्रवाऽअच्छानक्षिद्युमत्तमᳫंरयिन्दाः ॥ ॥ ५३ ॥

---

१ सीषधामेन्द्रश्च । सीसधामेन्द्रश्च इति पदम् । अत्र "भाविभ्यः सः षं समानपदे" ( शु. य. प्रा. ३ अ. ५६ सू. ) सकारस्य षत्वे रूपम् ।

तन्त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ॥ ४७ ॥

[२-१४] इति श्रीवाजसनेयसंहितायां पञ्चविंशोऽध्यायः ॥२५॥

श्रीवेदपुरुषाय नमः ॥ अनुवाकसूत्रम् ॥ अग्निश्च पंचदशो, ब्रातऽ एकादश, द्वौ षड्विᳪशतिः [ अ. २६ मं. २६ अनु. २ ] ॥ हरिः ॐ ॥ अग्निश्च । पृथिवी च सन्नते ते मे सन्नमतामदो वायुश्चान्तरिक्षञ्च सन्नते ते मे सन्नमतामदऽआदित्यश्च द्यौश्च सन्नते ते मे सन्नमतामदऽआपश्च वरुणश्च सन्नते ते मे सन्नमतामदः ॥ सप्त सᳪस

दौऽअष्ट्टमीभूतसाधनी ॥ सकामाँ२ ॥ ऽअध्वनस्कुरुसँज्ञानमस्त्तु
मेमुना ॥ १ ॥ यथेमाम् ॥ यथेमांव्वाचङ्कल्याणीमावदानिजने
भ्यꣳ ॥ ब्रह्मराजन्याभ्याꣳशूद्रायचार्य्यायचस्वायचारणा
यच ॥ प्रियोदेवानान्दक्षिणायैदातुरिहभूयासमयम्मेकामꣳ
समृद्ध्यतामुपमादोनमतु ॥ २ ॥ बृहस्पतेऽअति ॥ बृहस्पतेऽ
अतियदर्य्योऽअर्हाद्द्युमद्विभातिक्क्रतुमज्जनेषु ॥ यद्दीदयच्छवं



---

१ अध्वनस्कुरु इति पदे । "अध्वनस्कुर्विति च" (शु. य. प्रा. ३ अ. २७ सू.) इत्यनेनात्र कुरूत्तरे पदे अध्वनो विसर्जनीयस्य सकारो जातः । तत "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन ककारस्य द्वित्वम् ।

सऽकृतप्प्रजातान्तदुस्म्मासुद्द्रविंणन्धेहिचित्रम् ॥ उपयामगृं
हीतोसिबृहस्प्पतंयेत्त्वैषतेयोनिर्बृहस्प्पतंयेत्त्वा ॥ ३ ॥ इन्द्र
गोमंन् ॥ इन्द्रगोमंन्निहायांहिपिबासोमंᳯशतक्क्रतो ॥
व्विद्यद्भिर्ग्ग्रावंभिःᳯसुतम् ॥ उपयामगृंहीतोसीन्द्रांयत्त्वागोमंतऽ
एपतेयोनिरिन्द्रांयत्त्वागोमंते ॥ ४ ॥ इन्द्रायांहि ॥ इन्द्रा
यांहिवृत्त्रहन्न्पिबासोमंᳯशतक्क्रतो ॥ गोमंद्भिर्ग्ग्रावंभिःᳯसुतम् ॥
उपयामगृंहीतोसीन्द्रांयत्त्वागोमंतऽएपतेयोनिरिन्द्रांयत्त्वा

गोमंते ॥ ५ ॥ ऋतावांनंव्वैश्वानरम् ॥ ऋतावांनंव्वैश्वानरमृत
स्यज्ज्योतिषस्प्पतिम् ॥ अजंस्त्रङ्घर्म्ममीमहे ॥ उपयामगृही
तोसिव्वैश्वानरायंत्त्वैषतेयोनिंर्व्वैश्वानरायंत्त्वा ॥ ६ ॥ व्वैश्वा
नरस्यंसुमतौ । स्यामराजाहिकम्भुवंनानामभिश्रीः ॥ इतो
जातोव्विश्वंमिदंव्विचंष्टेव्वैश्वानरोयंततेसूर्य्येण ॥ उपयामगृही
तोसिव्वैश्वानरायंत्त्वैषतेयोनिंर्व्वैश्वानरायंत्त्वा ॥ ७ ॥ व्वैश्वान ॥ ५५ ॥
रोनंः ॥ व्वैश्वानरोनंऽऊतयऽआप्प्रयांतुपरावतंः ॥ अग्निरु

क्त्थेनब्वाहंसा ॥ उपयामगृंहीतोसिव्वैश्वानरायंत्त्वैषतेयोनिर्व्वै
श्वानरायंत्त्वा ॥ ८ ॥ अग्निर्ऋषिः ॥ अग्निर्ऋषिंपवंमानः
पाञ्चंजन्यंपुरोहितः ॥ तमीमहेमहागयम् ॥ उपयामगृंही
तोस्यग्नयेंत्त्वाव्वर्च्चंसऽएषतेयोनिरग्नयेंत्त्वाव्वर्च्चंसे ॥ ९ ॥ महाँ
२॥ऽइन्द्रः ॥ महाँ २॥ऽइन्द्रोव्वज्ज्रंहस्तःषोडशीशर्म्मंयच्छ
तु ॥ हन्तुंपाप्प्मानँय्योस्म्मान्द्वेष्टि ॥ उपयामगृंहीतोसिमहे
न्द्रायंत्त्वैषतेयोनिर्म्महेन्द्रायंत्त्वा ॥ १० ॥ तंव्वः ॥ तंव्वोद

सं. ४१

शु. य. संहि. स्म्ममृंतीषहुंव्वसोम्मंन्दानमन्धसः ॥ अंभिवत्त्सन्नस्वसंरेषुधे उ. वि. अ.

॥५६॥ नवऽइन्द्रंङ्गीर्ब्भिर्न्नवामहे ॥ ११ ॥ यद्वाहिंष्ठम् ॥ यद्वाहिंष्ठ ॥ २६ ॥

न्तदग्ग्नयेबृहदंर्च्चविभावसो ॥ महिंषीवत्त्वद्रयिस्त्त्वद्वाजाऽउ

दीरते ॥ १२ ॥ एहि ॥ एह्युषुब्रवाणितेग्ग्नंऽइत्त्थेतंरागिरंः ॥

एभिर्व्वंर्द्धासऽइन्दुंभिः ॥ १३ ॥ ऋतवंस्त्ते ॥ ऋतवंस्त्तेयज्ज्ञं

व्वितंन्व्वन्तुमासारक्षन्तुतेहविंः ॥ संव्वत्त्सरस्तेंयज्ज्ञन्दंधातुनः ॥ ५६ ॥

---

१ अभिवत्सन् । अत्र "अश्वरश्मिमति°" (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन प्राप्तस्य अभिशब्दस्य वकारे परे प्राप्तस्य दीर्घेकारस्य "अभिविख्येपं धीरविश्ववत्स°" (शु. य. प्रा. ३ अ. १०० सू.) इत्यनेन एतेषु परेषु दीर्घनिषेधाभावात् वत्सशब्दपरे दीर्घेकारः ।

प्प्रजाब्भ्रपरिपातुनः ॥ १४ ॥ उपह्वरेगिरीणाम् ॥ उपह्वरेगि
रीणाᳫंसङ्गमेचनदीनाम् ॥ धियाव्विप्प्रोऽअजायत ॥ १५ ॥
[ १५-१ ] उच्चाते ॥ उच्चातेजातमन्धसोदिविसद्भूम्म्याददे ॥
उग्रᳫंशर्म्ममहिश्श्रवः ॥ १६ ॥ सनः ॥ सनऽइन्द्रायय
ज्ज्यवेव्वरुणायमरुद्भ्यः ॥ व्वरिवोवित्त्परिस्स्रव ॥ १७ ॥
एनाव्विश्श्वानि ॥ एनाव्विश्श्वान्न्यर्य्यऽआद्युम्म्नानिमानुषाणाम् ॥

---

१ अत्र भूमिः आददे । "भूमेश्चाकारेऽपृक्ते" ( शु. य. प्रा. ४ अ. ३८ सू. ) इत्यनेनाकारेऽपृक्तपरे भूमिशब्दस्य विसर्गस्य लोपः ततो यकारे भूम्याददे ।

सिषासन्तोवनामहे ॥ १८ ॥ अनुवीरैः ॥ अनुवीरैरनु
पुष्यास्मगोभिरन्वश्वैरनुसर्वैणपुष्टैः ॥ अनुद्विपदानुचतु
ष्पदावयन्देवानोंयज्ञमृतुथानयन्तु ॥१९॥ अग्नेपत्नीः ॥
अग्नेपत्नीरिहावहदेवानामुशतीरुप ॥ त्वष्टारह्सोमपीतये
॥२०॥ अभियज्ञम् ॥ अभियज्ञङ्गृणीहिनोग्नावोनेष्टःपिब
ऽऋतुना ॥ त्वह्हिरत्नधाऽअसि ॥ २१ ॥ द्रविणोदाःपिपी
षति ॥ जुहोतप्रचतिष्ठत ॥ नेष्ट्रादृतुभिरिष्यत ॥ २२ ॥

तवायम् ॥ तवायꣳसोमस्त्वमेह्यर्वाङ्शश्वत्तमꣳसुमनाऽअ
स्यपाहि ॥ अस्मिन्यज्ञेबर्हिष्यानिषद्यादधिष्वेमञ्जठरऽ
इन्दुमिन्द्र ॥ २३ ॥ अमेवंनः ॥ अमेवंनःसुहवाऽआहिगन्त
नानिबर्हिषिसदतनारणिष्टन ॥ अथामन्दस्वजुजुषाणोऽअन्ध
सस्त्वष्टर्देवेभिर्जनिभिःसुमद्गणः ॥ २४ ॥ स्वादिष्ठयामदि
ष्ठया ॥ स्वादिष्ठयामदिष्ठयापवस्वसोमधारया ॥ इन्द्रायपात
वेसुतः ॥ २५ ॥ रक्षोहाविश्वचर्षणिरभियोनिमयोहते ॥

द्रोणेसधस्त्थमासंदत् ॥ २६ ॥ [११-२] ॥ २ ॥ इति
श्रीवाजसनेयसंहितायां षड्विंशतितमोऽध्यायः ॥ २६ ॥ ॥
श्रीवेदपुरुषाय नमः ॥ अनुवाकसूत्रम् ॥ समास्त्त्वादशो,
द्वौऽअस्य, पीवोऽअन्नाद्द्वादशका, वभिस्त्वैकादश, चत्त्वारः
पंचचत्त्वारिꣳशत् [अ. २७ मं. ४५ अनु. ४] ॥ हरिःॐ॥
समास्त्त्वा ॥ समास्त्त्वाग्नऽऋतवोवर्द्धयन्तुसंवत्सराऽऋषयो ॥५८॥
यानिसत्त्या ॥ सन्दिद्द्येनदीदिहिरोचनेनविश्श्वाऽआभाहिप्र

दिशश्चतंस्रः ॥ १ ॥ सञ्चं ॥ सञ्चेद्धस्वाग्नेप्रचंबोधयैनमुच्चं
तिष्ठमहतेसौभंगाय ॥ माचंरिषदुपसत्तातेऽअग्नेब्रह्माणंस्ते
यशसंःसन्तुमान्ये ॥ २ ॥ त्वामंग्ने ॥ त्वामंग्नेवृणतेब्राह्म
णाऽइमेशिवोऽअंग्नेसंवरंणेभवानः ॥ सपत्नहानोंऽअभिमा
तिजिच्चस्वेगयेंजागृह्यप्रंयुच्छन् ॥३॥ इहैव ॥ इहैवाग्नेऽअ
धिंधारयारयिम्मात्त्वानिक्रंन्पूर्वंचितोंनिकारिणंः ॥ क्षत्रमं
ग्नेसुयमंमस्तुतुभ्यंमुपसत्तावंर्द्धतान्तेऽअनिंष्टृतः ॥४॥ क्षत्रे

णांग्ग्ने ॥ क्षत्रेणांग्ग्नेस्वायुःसःरंभस्वमित्रेणांग्ग्नेमित्रधेयेयत
स्व ॥ सजातानांम्मध्यमस्त्थाऽएंधिराज्ज्ञांमग्ग्नेविहव्योदीदि
हीह ॥ ५ ॥ अतिनिहंः ॥ अतिनिहोऽअतिस्त्रिधोत्त्यचि
त्तिमत्त्यरांतिमग्ग्ने ॥ विश्वाह्यग्ग्नेदुरितासहस्वाथास्म्मब्भ्यंः
सहवींराःरयिन्दांः ॥ ६ ॥ अनाधृष्ष्योजातवेदाः ॥ अनाधृ
ष्ष्योजातवेदाऽअनिंष्टृतोविराडंग्ग्नेक्क्षत्रभृद्दीदिहीह ॥ विश्वा ॥५९॥
ऽआशाःप्रमुञ्चन्मानुषीभिर्यःशिवेभिंरद्यपरिपाहिनोवृधे

॥ ७ ॥ बृहस्प्पतेसवितः ॥ बृहस्प्पतेसवितर्ब्बोधयैनᳬसᳬशि
तञ्चित्त्सन्तराᳬसᳬशिशाधि ॥ वर्द्धयैनम्महतेसौभगायव्वि
श्वंऽएनमनुमदन्तुदेवाः ॥ ८ ॥ अमुत्रभूयादध ॥ अमुत्रभू
यादधयद्यमस्यबृहस्प्पतेऽअभिशस्त्तेरमुञ्चः ॥ प्प्रत्यौहताम
श्विनामृत्त्युमस्म्माद्देवानामग्ग्नेभिषजाशचीभिः ॥ ९ ॥ उद्व
यम् ॥ उद्वयन्तमसस्प्परिस्वःपश्श्यन्तऽउत्त्तरम् ॥ देवन्देवत्रा
सूर्य्यमगन्म्मज्ज्योतिरुत्त्तमम् ॥ १० ॥ [ १०-१ ] ऊर्द्ध्वाऽअ

स्यसमिधोभवन्त्यूर्द्ध्वाशुक्राशोचीᳬंष्यग्नेः ॥ द्युमत्तमासुप्र
तीकस्यसूनोः ॥ ११ ॥ तनूनपादसुरः ॥ तनूनपादसुरोवि
श्ववेदादेवोदेवेषुदेवः ॥ पथोऽअनक्तुमद्ध्वाघृतेन ॥ १२ ॥
मद्ध्वायज्ञम्॥ मद्ध्वायज्ञन्नक्षसेप्रीणानोनराशᳬंसोऽअग्ने॥
सुकृद्देवःसविताविश्ववारः ॥ १३ ॥ अच्छायम् ॥ अच्छाय
मेतिशवसाघृतेनेडानोवह्निर्न्नमसा ॥ अग्निᳬंस्रुचोऽअद्ध्वरे ॥ ६० ॥
षुप्रयत्सु ॥ १४ ॥ सयक्षत् ॥ सयक्षदस्यमहिमानमग्नेः

सऽईम्मुन्द्रासुंप्प्रयसेः ॥ व्वसुश्चेतिंष्ठोव्वसुधातंमश्च ॥१५॥ द्वारों
देवीः ॥ द्वारोंदेवीरन्न्वंस्युव्विश्वेंव्व्रतादंदन्तेऽअग्ग्नेः ॥ उरुव्व्यचंसो
धाम्म्नापत्त्यंमानाः ॥१६॥ शतम् १६०० ॥ तेऽअंस्य ॥ तेऽअस्य
योषंणेदिव्व्येनेयोनांऽउषासानक्क्ता ॥ इमँय्युज्ज्ञमंवतामद्ध्वर
न्नंः ॥ १७ ॥ दैव्व्यांहोतारा ॥ दैव्व्यांहोताराऽऊर्द्ध्वमंद्ध्वरन्नो
ग्ग्नेर्जिह्वामभिगृणीतम् ॥ कृणुतन्नःस्विष्टिम् ॥ १८ ॥ तिस्रो

१ योनाऽउषासा । अत्र ओकारात्परस्य उष इत्यस्य "उष महोभिर्नक्तेमीकारैकारौकारनकारेभ्यः" (शु. य. प्रा. ३ अ. ११९ सू.) इत्यनेन उष इत्यत्र ह्रस्वो दीर्घत्वमापद्यते महोभि इत्यादिपरेषु सत्सु । तेनात्र ह्रस्वाकारस्य दीर्घाकारः ।

देवीः ॥ तिस्रोदेवीर्बर्हिरेदᳬंसदन्त्विडासरस्वतीभारती ॥
महीगृणाना ॥१९॥ तन्नः ॥ तन्नस्तुरीपमद्भुतम्पुरुक्षुत्त्वष्टा
सुवीर्य्यम् ॥ रायस्पोषंविष्ष्यतुनाभिमस्मे ॥ २० ॥ वनं
स्पतेवं ॥ वनस्पतेवसृजाररराणस्त्मनादेवेषु ॥ अग्निर्हव्यᳬं
शमितासूदयाति ॥ २१ ॥ अग्नेस्वाहा । कृणुहिजातवेदऽ
इन्द्रायहव्यम् ॥ विश्वेदेवाहविरिदञ्जुषन्ताम् ॥ २२ ॥ ॥ ६१ ॥
[ १२-२ ] पीवोऽअन्नारयिवृधः । सुमेधाःश्वेतःसिषक्तिनि

युता॑ऽअ॒भिश्री॑ः ॥ तेन्वा॒यवे॒ सम॑नसो॒ वित॑स्थु॒र्विश्वेन्नर॑ः स्वप

त्यानि॑ चक्रुः ॥ २३ ॥ रा॒ये नु । यञ्ज॒ज्ञतू॒ रोद॑सी॒मे रा॒ये दे॒वी धि॒

षणा॒ धाति दे॒वम् ॥ अध॑ वा॒युन्नि॒युत॑ः सश्चत॒ स्वाऽउ॒त श्वे॒तं वसु॑धि

तिन्नि॒रेके ॥ २४ ॥ आपो॒ह ॥ आपो॑ ह॒ यद्बृ॑ह॒तीर्विश्व॒माय॒न्ग

र्भ॒न्दधा॑ना ज॒नय॑न्तीर॒ग्निम् ॥ ततो॑ दे॒वाना॒ᳪ समव॑र्त्त॒तासु॒रे

कः कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम ॥ २५ ॥ यश्चि॒त् ॥ यश्चि॒दापो॑

महि॒ना प॒र्यप॑श्य॒द्दक्ष॒न्दधा॑ना ज॒नय॑न्तीर्य॒ज्ञम् ॥ यो दे॒वे

ष्वाधिदेवऽएकऽआसीत्कस्म्मैदेवायहविषाविधेम ॥ २६ ॥
प्रयाभिः ॥ प्रयाभिर्य्यासिदाश्वाꣳसमच्छानियुद्भिर्व्वायविष्ट
येदुरोणे ॥ निनोरयिꣳसुभोजंसँय्युवस्वानिवीरङ्गव्यमश्व्यंञ्च
राधः ॥ २७ ॥ आनः ॥ आनोनियुद्भिःशतिनीभिरध्वरꣳ
संहस्रिणीभिरुपयाहियज्ञम् ॥ व्वायोऽअस्म्मिन्त्सवनेमादय
स्वयूयम्पातस्वस्तिभिःसदानः ॥ २८ ॥ नियुत्वान्वायो ॥
नियुत्त्वान्वायवागह्ययꣳशुक्क्रोऽअयामिते ॥ गन्तासिसुन्व

तोगृहम् ॥ २९ ॥ व्वायोंशुक्रः ॥ व्वायोंशुक्रोऽअंयामितेम
द्धोऽअग्ग्रन्दिविष्टिषु ॥ आयांहिसोमंपीतयेस्प्पाहोंदेंवनियुत्त्वं
ता ॥ ३० ॥ व्वायुरंग्ग्रेगाः ॥ व्वायुरंग्ग्रेगायंज्ज्ञप्प्रीःसाकङ्गन्म
नंसायज्ज्ञम् ॥ शिवोनियुद्भिंः शिवाभिंः ॥ ३१ ॥ व्वायोये । तेंस
हुस्त्रिणोरथांसस्त्तेभिरागंहि ॥ नियुत्त्वान्त्सोमंपीतये ॥ ३२ ॥
एकंयाच । दुशभिंश्चस्वभूतेद्द्वाब्भ्यांमिष्टयेंव्विंध्शतीच ॥
तिसृभिंश्चव्वहंसेत्रिंध्शतांचनियुद्भिंर्व्वायविहताव्विमुंञ्च ॥ ३३ ॥

तवंद्वायो ॥ तवंद्वायवृत[1]स्प्पतेत्त्वष्टुर्ज्जामातरद्भुत ॥ अवाꣳ
स्यावृंणीमहे ॥३४॥ [ १२-३ ] अभित्त्वा । शूरनोनुमोदुग्ग्धाऽ
इवधेनवं÷ ॥ ईशानमस्यजगंतःस्वर्द्दशमीशानमिन्द्रतस्त्थुषं÷
॥ ३५ ॥ नत्त्वावान् ॥ नत्त्वावाँ२॥ ऽअन्न्योदिव्व्योनपार्त्थि
वोनजातोनजंनिष्ष्यते ॥ अश्श्वायन्तोमघवन्निन्द्रव्वाजिनोग
व्यन्तंस्त्त्वाहवामहे ॥ ३६ ॥ त्वामित् ॥ त्वामिद्धिहवामहे

नत्वा



१ ऋतस्प्पते अत्र । "प्रकृत्या कपयोः खफयोश्च" (शु. य. प्रा. ३ अ. ११ सू.) इति प्रकृतिभावे प्राप्ते "ऋताव्वरौ च परयोः" (शु. य. प्रा. ३ अ. ५१ सू.) ऋतः अवरश्च यथासंख्यं पतिपरयोः सकारेण व्यवधीयते। इति सकारे तत्र "ऊष्मान्तस्थाभ्यश्च स्पर्शाः" (शु. य. प्रा. ४ अ. १०२सू.) इत्यनेन पकारस्य द्वित्वम्।

सातौवाजस्यकारवः ॥ त्वांवृत्रेष्विन्द्रसत्पतिन्नरस्त्वाङ्का
ष्ठास्वर्वतः ॥ ३७ ॥ सत्त्वम् ॥ सत्त्वन्नश्चित्रवज्रहस्तधृ
ष्णुयामहस्त्वंवानोऽअद्रिवः ॥ गामश्वंरथ्यमिन्द्रसङ्किर
सत्राव्वाजन्नजिग्युषे ॥ ३८ ॥ कयानः ॥ कयानश्चित्रऽ
आभुवदूतीसदावृधःसखा ॥ कयाशचिष्ठयावृता ॥ ३९ ॥
कस्त्वा । सत्त्योमदानाम्मंहिष्ठोमत्सदन्धसः ॥ दृढाचिदा
रुजेवसु ॥ ४० ॥ अभीषुणः ॥ अभीषुणःसखीनामविता

१ अभीषुणः । अत्र अभीषुनः । अत्र समानपदत्वाभावेन णत्वाप्राप्तौ "निषणाय०" (शु. य. प्रा. ३ अ. ८१ सू.) इत्यनेन णत्वं निपात्यते ।

जरितॄणाम् ॥ शतम्भवास्युतये ॥ ४१ ॥ यज्ञायंज्ञावः ॥
यज्ञायंज्ञावोऽअग्नयेगिरागिराचदक्षसे ॥ प्प्रंवयममृतं
ज्ञातवेदसम्प्प्रियम्मित्रन्नशंसिषम् ॥४२॥ पाहिनः ॥ पाहि
नोऽअग्नऽएकयापाह्युतद्द्वितीयया ॥ पाहिगीर्भिस्तिसृभि
रूर्ज्जाम्पतेपाहिचतसृभिर्व्वसो ॥ ४३ ॥ ऊर्ज्जोनपातम् ॥ ॥ ६४ ॥
ऊर्ज्जोनपातꣳसहिनायमंस्म्मयुर्दाशेमहव्यदातये ॥ भुवद्वा
जेष्ष्ववितामुवद्वृधऽउतत्त्रातातनूनाम् ॥ ४४ ॥ संवत्सरो

सि । परिवत्त्सरोसीदावत्त्सरोसीद्द्वत्त्सरोसिव्वत्त्सरोसि ॥ उष
संस्त्तेकल्प्पन्तामहोरात्त्रास्त्तेकल्प्पन्तामर्द्धमासास्त्तेकल्प्पन्ता
म्मासांस्त्तेकल्प्पन्तामृतवंस्त्तेकल्प्पन्ताᳪसंव्वत्त्सरस्त्तेकल्प्प
ताम् ॥ प्रेत्त्याऽएत्त्यैसञ्चाञ्चप्प्रंचसारय ॥ सुपर्ण्णाचिदंसितयां
देवतंयाङ्गिरस्वद्ध्रुवश्सीद ॥ ४५ ॥ [ ११-४ ] इति श्रीवाज-
सनेयसंहितायां सप्तविᳪशोऽध्यायः ॥ २७ ॥ श्रीवेदपुरुषाय
नमः ॥ अनुवाकसूत्रम् ॥ होतायक्षदेकादश, देवंबर्हिर्द्वादश,

पुनरप्प्येवं, चत्त्वारः षट्चत्त्वारिꣳशत् [अ. २८ मं. ४६
अनु. ४ ] हरिः ॐ ॥ होतायक्क्षत् ॥ होतायक्क्षत्त्समिधेन्द्रं
मिडस्प्पदेनाभाप्पृथिव्व्याऽअधिं ॥ दिवोव्वर्ष्मन्त्समिंद्धयतऽ
ओजिष्ठश्चर्षणीसहांव्वेत्त्वाज्ज्यंस्यहोतर्य्यंज ॥ १ ॥ होतां
यक्क्षत्तनूनपांतमूतिभिं÷ ॥ होतायक्क्षत्तनूनपांतमूतिभिर्ज्जे
तांरमपराजितम् ॥ इन्द्रंन्देवꣳस्वर्व्विदंम्पथिभिर्म्मधुमत्त

१ चर्षणीसहांवेत्तु । अत्र "भाविभ्य सः षं समानपदे" (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन चर्षणीशब्दात्परस्य सस्य षत्वापत्तौ "पृथिवीदिव्युपरिचर्षणि शकुनियासिभ्यः" (शु. य. प्रा. ३ अ. ८४ सू.) इत्यनेन तत्परस्य सस्य प्रकृतिभावे न षत्वम् ।

मैन्नराशꣳसैनतेजंसाव्वेत्त्वाज्ज्यंस्यहोतर्य्यंज ॥ २ ॥ होतां यक्क्षदिडांभिरिन्द्रम् ॥ होतांयक्क्षदिडांभिरिन्द्रंमीडितमाजु ह्वांनममंर्त्त्यम् ॥ देवोदेवैःसवींर्य्योंव्वज्ज्रंहस्तꣳपुरन्दरोव्वेत्त्वा ज्ज्यंस्यहोतर्य्यंज ॥ ३ ॥ होतांयक्क्षद्दुर्हिंषीन्द्रंम् ॥ होतां यक्क्षद्दुर्हिंषीन्द्रंन्निषद्दरंव्वृंषभन्नर्य्यांपसम् ॥ व्वसुंभीरुद्रैरांदि त्त्यैꣳसयुग्गिंभर्व्वर्हिंरासंदद्व्वेत्त्वाज्ज्यंस्यहोतर्य्यंज ॥ ४ ॥ होतां यक्क्षदोजोन ॥ होतांयक्क्षदोजोनव्वीर्य्यꣳसहोद्वारऽइन्द्रंम

वर्द्धयन् ॥ सुप्प्रायणाऽअस्मिन्न्यज्ञेव्विश्श्रयन्तामृतावृधो
द्वारऽइन्द्रायमीढुषेव्व्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ ५ ॥ होता
यक्षदुषेऽइन्द्रस्य । धेनूसुदुघेमातरामही ॥ सवातरौनते
जसावत्समिन्द्रमवर्द्धतांव्वीतामाज्ज्यस्यहोतर्य्यज ॥ ६ ॥ होता
यक्षद्दैव्याहोतारा । भिषजासखायाहविषेन्द्रम्भिषज्ज्यतꣳ ॥
कवीदेवौप्प्रचेतसाविन्द्रायधत्तऽइन्द्रियंव्वीतामाज्ज्यस्यहोत
र्य्यज ॥ ७ ॥ होतायक्षत्तिस्रोदेवीः ॥ होतायक्षत्तिस्रोदेवी

न्भैपजन्त्रयंस्त्रिधातंवोपसऽइडासरंस्वतीभारंतीमहीः ॥ इन्द्रं

पत्नीर्हविप्मंतीर्व्यन्त्वाज्ज्यंस्यहोतर्य्यजं ॥ ८ ॥ होतांयक्ष

त्त्वष्टांरमिन्द्रंम् ॥ होतांयक्षत्त्वष्टांरमिन्द्रन्देवम्भिषजंᳬसुय

जंङ्घृताश्श्रियंम् ॥ पुरुरूपंᳬसुरेतंसम्मघोनमिन्द्रांयत्त्वष्टादधांदि

न्द्रियाणिवेत्त्वाज्ज्यंस्यहोतर्य्यजं ॥९॥ होतांयक्षद्वनस्प्पातिंᳬ

शमितारंम् ॥ होतांयक्षद्वनस्प्पातिंᳬशमितारंᳬशतक्क्रंतुन्धि

योजोष्टारंमिन्द्रियम् ॥ मध्वांसमञ्ञन्पाथिभिंःसुगेभिंःस्वदांति

यज्ज्ञम्मधुनाघृतेनव्वेत्त्वाज्ज्यंस्यहोतर्य्यज ॥१०॥ होतांयक्ष
दिन्द्रꣳस्वाहां ॥ होतांयक्षदिन्द्रꣳस्वाहाज्ज्यंस्यस्वाहामेदꣳस
स्वाहांस्त्तोकानाꣳस्वाहास्वाहांकृतीनाꣳस्वाहांहव्यसूंक्तीना
म् ॥ स्वाहांदेवाऽआंज्ज्यपाजुंषाणाऽइन्द्रऽआज्ज्यंस्यव्यन्तुहो
तर्य्यजं ॥ ११ ॥ [ ११-१ ] देवम्बर्हिरिन्द्रंम् ॥ देवम्बर्हि
रिन्द्रꣳसुदेवन्देवैर्व्वीरवंत्त्स्तीर्ण्णव्वेद्यांमवर्द्धयत् ॥ व्वस्तोर्वृत ॥ ६७ ॥
म्प्राक्त्तोर्भृतꣳरायाबर्हिष्ष्मतोत्त्यंगाद्वसुवनेंव्वसुधेयंस्यव्वेतुय

जं ॥ १२ ॥ देवीर्द्वारः ॥ देवीर्द्वारऽइद्रंऽसङ्घातेवीड्वीर्यामन्नवर्द्धयन् ॥ आवत्सेनतरुणेनकुमारेणंचमीवतापावार्णऽरेणुकंकाटन्नुदन्तांवसुवनेवसुधेयंस्यव्यन्तुयज ॥ १३ ॥ देवीऽउपासानक्ता ॥ देवीऽउपासानक्तेन्द्रंव्युज्ज्ञेप्रंयत्त्यहेताम् ॥ देवीर्विशःप्रायांसिष्टाऽसुप्रीतेवसुधितेवसुवनेवसुधेयंस्यवीताँय्यज ॥ १४ ॥ देवीजोष्ट्री ॥ देवीजोष्ट्रीवसुधितीदेवमि

---

१ देवी उपासा। अत्र "उषमहोभिर्नक्तमीकारैकारौकारनकारेभ्यः" (शु. य. प्रा. ३ अ. ११९ सू.) इत्यनेन देवीशब्दस्यैकारात्परस्य उष इत्यस्य
सं. ५१ ह्रस्वाकारस्य दीर्घाकारः।

न्द्रमवर्द्धताम् ॥ अयांव्यन्न्याघाद्वेषाᳪंस्यान्न्यावक्षद्वसुवार्य्याँ
णियजमानायशिक्षितेवसुवनेवसुधेयस्यवीताँय्यज ॥ १५ ॥
देवीऽऊर्जाहुती ॥ देवीऽऊर्जाहुतीदुघेसुदुघेपयसेन्द्रमवर्द्धता
म् ॥ इषमूर्जमन्न्यावक्षत्सग्धिᳪंसपीतिमन्न्यानवेनपूर्व्वन्दयं
मानेपुराणेननवमधांतामूर्जमूर्जाहुतीऽऊर्जयमानेवसुवार्य्याँ
णियजमानायशिक्षितेवसुवनेवसुधेयस्यवीताँय्यज ॥ १६ ॥ ॥ ६८ ॥
देवादैव्यां ॥ देवादैव्याहोतारादेवमिन्द्रमवर्द्धताम् ॥ हुताघ

शꣳसावाभांष्ट्रींवसुवार्य्याणियजमानायशिक्षितौवसुवनेवसु
धेयंस्यवीताँस्यजं ॥ १७ ॥ देवीस्तिस्रः ॥ देवीस्तिस्रस्ति
स्रोदेवीःपतिमिन्द्रमवर्द्धयन् ॥ अस्पृक्षद्भारतीदिवꣳरुद्रैर्य्य
ज्ञꣳसरस्वतीडावसुमतीगृहान्वसुवनेवसुधेयस्यव्यन्तुयज
॥ १८ ॥ देवऽइन्द्रः ॥ देवऽइन्द्रोनराशꣳसस्त्रिवरूथस्त्रिब
न्धुरोदेवमिन्द्रमवर्द्धयत् ॥ शतेनंशितिपृष्ठानामाहितꣳसहस्रेण
प्प्रवर्त्ततेमित्रावरुणेदस्यहोत्रमर्हतोबृहस्पतिस्तोत्रमश्विना

द्धंऊर्ध्वंव्वसुवनेव्वसुधेयस्यव्वेतुयज ॥ १९ ॥ देवोदेवैः ॥ देवो
देवैर्व्वनस्पतिर्हिरण्यपर्णोमधुशाखꣳसुपिप्पलोदेवमिन्द्रमव
र्द्धयत् ॥ दिवमग्ग्रेणास्पृक्षदान्तरिक्षम्पृथिवीमदृꣳहीद्वसुव
नेव्वसुधेयस्यव्वेतुयज ॥ २० ॥ देवम्बर्हिः ॥ देवम्बर्हिर्व्वारिती
नान्देवमिन्द्रमवर्द्धयत् ॥ स्वासस्थमिन्द्रेणासन्नमन्याब
र्हीꣳष्यभ्यभूद्वसुवनेव्वसुधेयस्यव्वेतुयज ॥ २१ ॥ देवोऽ
अग्निः ॥ देवोऽअग्निःस्विष्टकृद्देवमिन्द्रमवर्द्धयत् ॥ स्विष्टकृ

वैन्तिस्वष्टृक्त्स्विष्टमुग्घ्यकंरोतुनोव्वसुवनेव्वसुधेयस्यव्वेतुयज

॥ २२ ॥ अुग्निमुद्य । होतारमवृणीतायँऽयजमानहंपचुन्प

क्तीहंपचन्त्पुरोडाशम्बध्नान्निन्द्रायच्छागम् ॥ सूपस्त्थाऽअुद्यदे

वोव्वनस्प्पतिरभवदिन्द्रायच्छागेन ॥ अद्युत्तम्मेदुस्त्तश्प्रातिपचु

ताग्ग्रभीदवीवृधत्पुरोडाशेन ॥ [1]त्वामुद्यऽऋषे ॥ २३ ॥ [ १२-२ ]

होतायक्षत्समिधानम्महत् ॥ होतायक्षत्समिधानम्महद्य

शहंसुसमिद्धंव्वरेण्ण्यमुग्निमिन्द्रंव्वयोधसम् ॥ गायत्रीञ्छन्दऽ

---

१. अ. २१, मं. ६१—त्वामुद्यऽऋषऽ आ० ॥ १ ॥ इति प्रतीकः ॥

इन्द्रियन्त्र्यविङ्गांव्वयोदधद्वेत्त्वाज्ज्यस्यहोतर्य्यज ॥ २४ ॥ होता
यक्षत्तनूनपातमुद्भिदम् ॥ होतायक्षत्तनूनपातमुद्भिदँय्य
ङ्गर्भमदितिर्द्दधेशुचिमिन्द्रंव्वयोधसम् ॥ उष्णिहञ्छन्दऽ
इन्द्रियन्दित्यवाहङ्गांव्वयोदधद्वेत्त्वाज्ज्यस्यहोतर्य्यज ॥ २५ ॥
होतायक्षदीडेन्न्यमीडितम् ॥ होतायक्षदीडेन्न्यमीडितंव्वृत्रह
न्तमिडाभिरीड्यꣳसहꣳसोममिन्द्रंव्वयोधसम् ॥ अनुष्टुभञ्छ ॥ ७० ॥
न्दऽइन्द्रियम्पञ्चाविङ्गांव्वयोदधद्वेत्त्वाज्ज्यस्यहोतर्य्यज ॥ २६ ॥

होतायक्षत्सुबर्हिषम्पूषण्वन्तम् ॥ होतायक्षत्सुबर्हिषम्पू
षण्वन्तममर्त्यꣳसीदन्तम्बर्हिषिप्प्रियेमृतेन्द्रंव्वयोधसम् ॥
बृहतीञ्छन्दऽइन्द्रियन्त्रिवत्सङ्गांव्वयोदधद्वेत्वाज्ज्यस्यहोतर्य्य
ज ॥२७॥ होतायक्षद्द्व्यचस्वतीꣳसुप्प्रायणाः ॥ होतायक्ष
द्व्यचस्वतीꣳसुप्प्रायणाऽऋतावृधोद्वारोदेवीर्हिरण्ययीर्ब्रह्मा
णमिन्द्रंव्वयोधसम् ॥ पङ्क्तिञ्छन्दऽइहेन्द्रियन्तुर्य्यवाहङ्गांव्व
योदधद्द्व्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ २८ ॥ होतायक्षत्सुपेशा

सासुशिल्पे।बृहतीऽउभेनक्तोषासानदर्शतेविश्वमिन्द्रंवयो
धसम् ॥ त्रिष्टुभञ्छन्दऽइहेन्द्रियम्पष्ठवाहङ्गांवयोदधद्वीता
माज्ज्यस्यहोतर्य्यज ॥२९॥ होतायक्षत्प्रचेतसादेवानाम् ॥
होतायक्षत्प्रचेतसादेवानामुत्तमँय्यशोहोतारादैव्याकवीस
युजेन्द्रंवयोधसम्॥ जगतीञ्छन्दऽइन्द्रियमनड्वाहङ्गांवयोदध
द्वीतामाज्ज्यस्यहोतर्य्यज ॥३०॥ होतायक्षत्पेशस्वतीस्ति ॥७१॥
स्रः ॥ होतायक्षत्पेशस्वतीस्तिस्रोदेवीर्हिरण्ययीर्भारती

र्बृहतीम्मंहीश्पतिमिन्द्रंव्वयोधसम् ॥ व्विराजञ्छन्दऽइहेन्द्रि
यन्धेनुङ्गान्नव्वयोदधद्व्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ ३१ ॥ होता
यक्षत्त्सुरेतंसन्त्वष्टारम् ॥ होतायक्षत्त्सुरेतंसन्त्वष्टारम्पुष्टिव
र्द्धनꣳरूपाणिबिब्भ्रंतम्पृथक्पुष्टिमिन्द्रंव्वयोधसम् ॥ द्विपदञ्छ
न्दऽइन्द्रियमुक्षाणङ्गान्नव्वयोदधद्वेत्त्वाज्ज्यस्यहोतर्य्यज ३२॥
होतायक्षद्वनस्प्पतिꣳशमितारम्॥ होतायक्षद्वनस्प्पतिꣳश
मितारꣳशतक्कतुꣳहिरण्ण्यपर्ण्णमुक्थिनꣳरशनाम्बिब्भ्रंतंव्व

शिम्भगमिन्द्रँवयोधसंम् ॥ ककुभञ्छन्दऽइहेन्द्रियँवेहतङ्गांव
योदधद्वेत्त्वाज्ज्यस्यहोतर्यजं ॥ ३३ ॥ होतायक्षत्त्वाहाकृती
रग्निम् ॥ होतायक्षत्त्वाहाकृतीरग्निङ्गृहपतिम्पृथग्वरुणम्भे
षजङ्कविङ्क्षत्रमिन्द्रँवयोधसंम् ॥ अतिच्छन्दसञ्छन्दऽइन्द्रि
यम्बृहदृषभङ्गांवयोदधद्व्यन्त्वाज्ज्यस्यहोतर्यजं ॥ ३४ ॥
[ ११-३ ] देवम्बर्हिः ॥ देवम्बर्हिर्वयोधसन्देवमिन्द्रंमवर्द्ध
यत् ॥ गायत्र्याच्छन्दसेन्द्रियञ्चक्षुरिन्द्रेवयोदधद्वसुवनेवसु

धेयंस्यव्वेतुयज ॥ ३५ ॥ देवीद्द्वारं ॥ देवीद्द्वारोव्वयोधसᳬं
शुचिमिन्द्रमवर्द्धयन् ॥ उष्णिहाच्छन्दसेन्द्रियम्प्राणमिन्द्रे
व्वयोदधद्वसुवनेव्वसुधेयंस्यव्यन्तुयज ॥ ३६ ॥ देवीऽउषासा
नक्ता । देवमिन्द्रंव्वयोधसन्देवीदेवमवर्द्धताम् ॥ अनुष्टुभा
च्छन्दसेन्द्रियम्बलमिन्द्रेव्वयोदधद्वसुवनेव्वसुधेयंस्यव्वीताँय्यज
॥ ३७ ॥ देवीजोष्ट्री ॥ देवीजोष्ट्रीव्वसुधितीदेवमिन्द्रंव्वयो
धसन्देवीदेवमवर्द्धताम् ॥ बृहत्याच्छन्दसेन्द्रियᳬंश्रोत्रमि

न्द्रेव्वयोदधंद्धसुवनैव्वसुधेयंस्यव्वीताँऽयज ॥ ३८ ॥ देवीऽऊ
र्ज्जाहुती ॥ देवीऽऊर्ज्जाहुतीदुघेसुदुघेपयसेन्द्रंम्व्वयोधसन्देवी
देवमंवर्द्धतान् ॥ पङ्क्त्याच्छन्दसेन्द्रियᳬशुक्रमिन्द्रेव्वयोद
धंद्धसुवनैव्वसुधेयंस्यव्वीताँऽयज ॥ ३९ ॥ देवादैव्या ॥ देवा
दैव्याहोतारादेवमिन्द्रंव्वयोधसन्देवौदेवमंवर्द्धताम् ॥ त्रिष्टुभा
च्छन्दसेन्द्रियन्त्विषिमिन्द्रेव्वयोदधंद्धसुवनैव्वसुधेयंस्यव्वीतां
ऽयज ॥ ४० ॥ देवीस्तिस्रः ॥ देवीस्तिस्रस्तिस्रोदेवीव्वयो

धसम्पतिमिन्द्रंमवर्द्धयन् ॥ जगत्त्याच्छन्दसेन्द्रियꣳशूषमि
न्द्रेव्वयोदधंद्वसुवनेव्वसुधेयस्यव्यन्तुयज ॥ ४१ ॥ देवोनराशꣳ
सं ॥ देवोनराशꣳसोदेवमिन्द्रंव्वयोधसन्देवोदेवमवर्द्धयत् ॥
व्विराजाच्छन्दसेन्द्रियꣳरूपमिन्द्रेव्वयोदधंद्वसुवनेद्वसुधेयस्य
व्वेतुयज ४२ ॥ देवोव्वनस्पतिः ॥ देवोव्वनस्पतिर्देवमिन्द्रं
व्वयोधसन्देवोदेवमवर्द्धयत् ॥ द्विपदाच्छन्दसेन्द्रियम्भगमि
न्द्रेव्वयोदधंद्वसुवनेव्वसुधेयस्यव्वेतुयज ॥ ४३ ॥ देवम्बर्हिः ॥

सं. ५२

शु. य. संहि. देवम्बर्हिर्व्वारितीनान्देवमिन्द्रंव्वयोधसंन्देवन्देवमंवर्द्धयत् ॥ उ. वि.
ककुभाच्छन्दंसेन्द्रियँय्यशऽइन्द्रेव्वयोदधंद्वसुवनेव्वसुधेयंस्यव्वे अ.
॥७५॥ तुयजं ॥ ४४ ॥ देवोऽअग्निः । स्विष्टकृद्देवमिन्द्रंव्वयोधसंन्दे ॥२८॥
वोदेवमंवर्द्धयत् ॥ अतिच्छन्दसाच्छन्दंसेन्द्रियङ्क्षत्रमिन्द्रेव्व
योदधंद्वसुवनेव्वसुवधेयंस्यव्वेतुयजं ॥ ४५ ॥ अग्निमद्य ।
होतारमवृणीतायँय्यजमानः पचन्पक्तीः पचन्पुरोडाशम्बध्न ॥७४॥
न्निन्द्रायव्वयोधसेच्छागम् ॥ सुपस्थाऽअद्यदेवोव्वनस्पतिर्

भवदिन्द्रायवयोधसेच्छागेन ॥ अघुत्तम्मेदुस्त्तश्प्रतिंपचुता
ग्ग्रंभीदवींवृधत्त्पुरोडाशेन ॥ त्वामद्यऽऋंषे ॥ ४६ ॥ [ १२-४ ]
इतिश्रीवाजसनेयसंहितायाम् अष्टाविंशोऽध्यायः ॥ २८ ॥
श्रीवेदपुरुषायनमः ॥ अनुवाकसूत्रम् ॥ समिद्धोऽअग्ग्ने
कादश, यदक्कन्दस्त्रयोदश, समिद्धोऽअद्यद्वादश, केतुंकृण्ण्वँ
श्चतुर्व्विंꣳशति, श्चत्वारःषष्टिः [ अ. २९ मं. ६० अनु. ४ ] ॥
हरिः ॐ ॥ समिद्धोऽअग्ग्न् ॥ समिद्धोऽअग्ग्न्कृदंरम्मती

१. अ. २१ ॥ मं. ६१ ॥ त्वामद्यऽऋष॰ १ ॥ इति प्रतीकः ॥

नाङ्कृतमंग्नेमधुंमत्त्पिन्न्वंमानः ॥ व्वाजीव्वहंन्त्वाजिनंञ्जातवे
दोदेवानांव्वक्क्षिप्प्रियमासधस्त्थंम् ॥१॥ घृतेनाञ्ञ्जन् ॥ घृते
नाञ्ञ्जन्त्सम्पथोदेवयानांम्प्रजानन्वाज्ज्यप्प्येतुदेवान् ॥ अनु
त्त्वासप्प्तेप्प्रदिशंः सचन्ताॅ स्वधामस्म्मैयजंमानायधेहि॥२॥
ईड्यंश्च ॥ ईड्यश्चासिव्वन्द्यंश्चव्वाजिन्नाशुश्चासिमेद्ध्यंश्चसप्प्ते ॥
अग्निष्ट्वांदेवैर्व्वसुभिः सजोषांः प्प्रीतंव्वह्निंव्वहतुजातवेदाः ॥३॥
स्त्तीर्ण्णम्बर्हिः। सुष्टरींमाजुषाणोरुपृथुप्प्रथंमानम्पृथिव्व्याम् ॥

देवेभिर्युक्तमदितिꣳसजोषाꣳस्योनङ्कृण्वानासुवितेदधातु

॥ ४ ॥ एताऽउवꣳ । सुभगाविश्वरूपाविपक्षोभिꣳश्रयमाणाऽ

उदातैꣳ ॥ ऋष्वाꣳसतीꣳकवषꣳशुम्भमानाद्वारोदेवीꣳसुप्राय

णाभवन्तु ॥ ५ ॥ अन्तरामित्रावरुणा ॥ अन्तरामित्रावरु

णाचरन्तीमुखँय्यज्ञानामभिसंविदाने ॥ उषासावाꣳसुहिर

ण्येसुशिल्पेऽऋतस्ययोनाविहसादयामि ॥ ६ ॥ प्रथमावा

म् ॥ प्रथमावाꣳसराधिनासुवर्णादेवौपश्श्यन्तौभुवनानिवि रथिना

शु. य. संहि. ॥७६॥

श्वा ॥ अपिंप्प्रयुञ्ज्ञोदनावाम्मिममानाहोताराज्ज्योतिःप्प्रदिशा | उ. वि. भ.
दिशन्ता ॥ ७ ॥ आदित्यैर्न्नः ॥ आदित्यैर्न्नोभारतीवष्ट्टुय | ॥ २९ ॥
ज्ञᳯसरस्वतीसहरुद्रैर्न्नऽआवीत् ॥ इडोपहूतावसुभिःसजोषा
यज्ञन्नोदेवीरमृतेषुधत्त ॥८॥ त्वष्टारंवीरम् ॥ त्वष्टारंवीरन्देवका
मञ्जजानत्त्वष्टुरर्वाजायतऽआशुरश्वः ॥ त्वष्टेदंविश्वम्भुवनञ्ज
जानबहोःकर्त्तारमिहयक्षिहोतः ॥९॥ अश्वोघृतेन ॥ अश्वोघृ ॥ ७६ ॥
तेनत्त्मन्यासमक्तऽउपदेवाँ २॥ऽऋतुशःपाथऽएतु ॥ वनस्प

तिं दैवलोकम्प्रंजानन्नग्निनांहुव्यास्वंदितानिं वक्षत् ॥ १० ॥
प्रजापतेस्तपंसा । वावृधानः सद्योजातोदंधिषेयज्ञमंग्ने ॥
स्वाहांकृतेनहुविषांपुरोगायाहिसाद्ध्याहुविरंदन्तुदेवाः ॥ ११ ॥
[ ११-१ ] यदक्रंन्दः । प्प्रथमञ्जायमानऽउद्यन्त्संमुद्रादु
तवापुरीषात् ॥ श्येनस्यंपक्षाहंरिणस्यंबाहूऽउपस्तुत्त्यम्माहिं
जातन्तेंऽअर्वन् ॥ १२ ॥ यमेनंदुत्तम् ॥ यमेनंदुत्तन्त्रितऽ
एंनमायुनगिन्द्रंऽएणम्प्रथमोऽअद्ध्यंतिष्ठत् ॥ गन्धर्वोऽअंस्य

१ इन्द्रऽएणम् । अत्र असमानपदत्वेनाप्राप्तौ "निषण्णाय रथवाहणमिन्द्रऽएणम्०" ( शु. य. प्रा. ३ अ. ८७ सू. ) इत्यनेन णत्वं निपात्यते ।

रशनामंगृब्भ्णात्त्सूरादश्श्वंव्वसवोनिरंतष्ट ॥ १३ ॥ असियु

मः ॥ असियमोऽअस्यांदित्त्योऽअंर्व्वन्नसिंत्रितोगुह्येनव्व्रतेनं ॥

असिसोमेनसमयाविपृंक्तऽआहुस्त्तेत्रीणिंदिविबन्धंनानि

॥ १४ ॥ त्रीणिंते ॥ त्रीणिंतऽआहुर्दिविबन्धंनानित्रीण्ण्यप्प्सु

त्रीण्ण्यन्तःसंमुद्रे ॥ उतेवंमेव्वरुंणश्छन्त्स्यर्व्वन्त्यत्रांतऽआहुः

परमञ्जनित्रंम् ॥ १५ ॥ इमातेंव्वाजिन् ॥ इमातेंव्वाजिन्नव

मार्ज्जनानीमाशफानांᳬसनितुर्न्निधानां ॥ अत्रांतेभद्द्रारंश

नाऽअपश्श्यमृतस्ययाऽअभिरक्षन्तिगोपाः ॥ १६ ॥ आत्मा
नन्ते ॥ आत्मानन्तेमनसाराद्जानामवोदिवापतयन्तम्प
तङ्गम् ॥ शिरोऽअपश्श्यम्पथिभिः सुगेभिररेणुभिर्जेहमान
म्पतत्रि ॥ १७ ॥ अत्राते[1] । रूपमुत्तममपश्श्यञ्जिगीषमा
णमिषऽआपदेगोः ॥ यदातेमर्त्तोऽअनुभोगमानडादिद्ग्रसि
ष्ठऽओषधीरजीगः ॥ १८ ॥ अनुत्वा ॥ अनुत्वारथोऽअनु
मर्य्योऽअर्वन्ननुगावोऽनुभगः कनीनाम् ॥ अनुव्व्रातासस्तव

[1] अत्राते । अत्र ते परे अत्रशब्दस्य ह्रस्वाकारस्य "पूष्णो जर्हीमस्तेष्वत्र" ( शु. य. प्रा. ३ अ. १२१ सू. ) इत्यनेन दीर्घः ।

शु. य. संहि. ७८ ॥ सख्यमीयुरनुदेवामंमिरेव्वीर्य्यन्ते ॥ १९ ॥ हिरंण्यशृङ्गो शु. वि.
यं॑ ॥ हिरंण्यशृङ्गोयोंऽअस्यपादामनोजवाऽअवंरऽइन्द्रंऽ अ.
आसीत् ॥ देवाऽइदंस्यहविरद्यंमायन्योऽअर्व्वन्तम्प्रथमोऽअ ॥ २९ ॥
द्ध्यतिंष्ठत् ॥ २० ॥ ईर्म्मान्तांसःसिलिंकमद्ध्यमासः ॥ ईर्म्मा
न्तांसःसिलिंकमद्ध्यमासःसꣳशूरंणासोदिव्यासोऽअत्त्याः ॥
हꣳसाऽइंवश्रेणिशोयंतन्तेयदाक्षिषुर्द्दिव्यमज्ममश्वाः ॥ ७८ ॥
॥ २१ ॥ तवशरीरम् ॥ तवशरीरम्पतयिष्ण्वर्व्वन्तवंचित्तं

व्रातंऽइवर्ज्ज्रीमान् ॥ तवशृङ्गाणिविष्ठिताप्पुरुत्त्रारण्येषुजर्ब्भुराणाचरन्ति ॥२२॥ उपप्र ॥ उपप्प्रागाच्छसंनंव्वाज्ज्यर्व्वादेवद्रीचामनंसादीद्ध्यांनः ॥ अजःपुरोनीयतेनाभिरस्यानुपश्चात्कवयोंयन्तिरेभाः ॥२३॥ उपप्र ॥ उपप्प्रागांत्परमँय्यत्सधस्त्थमर्व्वाँ २ ॥ऽअच्छांपितरम्मातरंञ्च ॥ अद्यादेवाञ्जुष्टंतमोहिगम्म्याऽअथाशांस्तेदाशुषेव्वार्य्याणि ॥२४॥ [१३-२] समिद्धोऽअद्य ।

१ भ्रजिमान् । अत्र "शृणुतत्विविधजिभयत पिबेतस्तनिष्ठरक्षा मकारे" (शु. य. प्रा. ३ अ. ११७ सू.) इत्यनेन मकारे परे एते दीर्घा भवन्ति तेन दीर्घ भ्रजीमान् ।

मनुंषोदुरोणेदेवोदेवान्यंजासिजातवेदः ॥ आचवहंमित्रमह
श्चिकित्वान्त्वन्दूतःकुविरंसिप्रचेताः॥२५॥ तनूंनपात्पथः॥
तनूंनपात्पथऽऋतस्ययानान्मध्वांसमञ्जन्त्स्वंदयासुजिह्व ॥ म
न्मांनिधीभिरुतयुज्ञमृन्धन्देवत्राचंकृणुह्यध्वरन्नंः।२६॥नरा
शꣳसंस्यमहिमानम् ॥ नराशꣳसंस्यमहिमानंमेषामुपंस्तोषा
मयजतस्ययुज्ञैः॥येसुक्रतंवःशुचंयोधियन्धाःस्वदंन्तिदेवा
ऽउभयांनिहव्या ॥२७॥ आजुह्वांनऽईड्यंः ॥ आजुह्वांनऽ

ईडुयोवन्द्यश्चायाह्यग्नेवसुभिꣳसजोषाः ॥ त्वन्देवानामसियह्व
होतासऽएनान्यक्षीषितोयजीयान् ॥ २८ ॥ प्राचीनम्बर्हिःप्र
दिशापृथिव्यावस्तोरस्यावृज्यतेऽअग्रेऽअह्नाम् ॥ व्युप्रथतेवि
तरंवरीयोदेवेभ्योऽअदितयेस्योनम् ॥ २९ ॥ व्यचस्वतीरुर्विया ।
विश्रयन्ताम्पतिभ्योनजनयꣳशुम्भमानाः ॥ देवीर्द्वारोबृहतीर्वि
श्वमिन्वादेवेभ्योभवतसुप्रायणाः ॥ ३० ॥ आसुष्वयन्तीय
जतेऽउपाकेऽउषासानक्तासदतान्नियोनौ ॥ दिव्येयोषणेबृहती

१ उपाकेऽउषासा । अत्र एकारात्परस्य उप इत्यस्य ह्रस्वाकारस्य "उपमहोभिर्नक्ते०" (शु. य. प्रा. ३ अ. ११९ सू.) इत्यनेन दीर्घाकारः ।

सुरुक्मेऽअधिश्श्रियंᳪशुक्रपिशन्दधाने॥३१॥ दैव्याहोतारा।
प्प्रथमासुवाचामिमानायज्ज्ञम्मनुषोयजध्यै॥ प्रचोदयन्तावि
दथेषुकारूप्प्राचीनञ्ज्योतिःप्प्रदिशादिशन्ता॥३२॥ आनः॥
आनोयज्ज्ञम्भारतीतूयमेत्त्विडामनुष्ष्वादिहचेतयन्ती॥ तिस्रो
देवीर्बर्हिरेदᳪस्योनᳪसरस्वतीस्वपसःसदन्तु॥३३॥ यऽइमे।
द्यावापृथिवीजनित्रीरूपैरपिᳪशद्भुवनानिविश्वा॥ तमद्यहोत ॥८०॥

१ अद्यहोतरि। अत्र "अद्य तं हकारचकारभवतवृणीमहेदेवेषु" (शु. य. प्रा. ३ अ. ११५ सू.) इत्यनेन हकारे परे दीर्घे प्राप्ते "नहोतरि" (शु. य. प्रा. ३ अ. ११६ सू.) इत्यनेन निषेधान्न दीर्घः।

रिषितोयजीयान्देवन्त्वष्टारमिहयक्षिविद्वान् ॥ ३४ ॥ उपाव
सृजत्कमन्व्या । समञ्जन्देवानाम्पाथऽऋतुथाहवीᳬषि ॥ वन
स्प्पतिंःशमितादेवोऽअग्निश्स्वदन्तुहव्यम्मधुनाघृतेन॥३५॥
सद्योजातश्॥सद्योजातोव्यमिमीतयज्ञमग्निर्देवानामभवत्पु
रोगाश् ॥ अस्यहोतुंःप्प्रदिश्श्यृतस्यवाचिस्वाहाकृतᳬहविरद
न्तुदेवाश् ॥३६॥ [ १२-३ ] केतुङ्कृण्वन् ॥ केतुङ्कृण्वन्नकेत

१ वनस्पतिः । अत्र "पत्यौ च सकारेण" (शु. य.प्रा. ३ अ. ५० सू.) इत्यनेन पतिशब्दे परे वनशब्दः सकारेण व्यवधीयते । तत ऊष्मान्तस्थाभ्य-श्च स्पर्शः (शु. य. प्रा. ३ अ. १०२ सू.) इत्यनेन पकारस्य द्वित्वे रूपम् । "प्रकृत्या कपयोः खफयोश्च" (शु. य.प्रा. ३ अ. ११ सू.) इत्यस्यापवादोऽयम् ।

वेपेशोमरुर्याऽअपेशसे ॥ समुषाद्भिरजायथाः ॥३७॥ जीमूत
स्येवभवति ॥ जीमूतस्येवभवतिप्रतीकँयद्वर्मीयातिसमदा
मुपस्थे ॥ अनाविद्धयातन्वाजयत्वᳪसत्वावर्म्मणोमहिमा
पिपर्त्तु ॥ ३८ ॥ धन्वनागाः ॥ धन्वनागाधन्वनाजिञ्जयेमध
न्वनातीव्राःसमदोजयेम ॥ धनुःशत्रोरपकामङ्कृणोतिधन्व
नासर्वाःप्रदिशोजयेम ॥ ३९ ॥ वक्ष्यन्तीवेत् ॥ वक्ष्यन्ती ॥८१॥
वेदागनीगन्तिकर्णम्प्रियᳪसखायम्परिषस्वजाना ॥ योपेव

शिक्षेविततावधिधन्वज्याऽइयꣳसमनेपारयन्ती ॥ ४० ॥ तेऽ
आचरन्ती ॥ तेऽआचरन्तीसमनेवयोषामातेवपुत्रम्बिभृता
मुपस्थे ॥ अपशत्रून्विध्यताꣳसंविदानेऽआर्त्नीऽइमेवि
ष्फुरन्तीऽअमित्रान् ॥ ४१ ॥ बह्वीनाम्पिता । बहुरस्यपुत्र
श्चिश्चाकृणोतिसमनावगत्य ॥ इषुधिꣳसङ्काꣳपृतनाश्चसर्वाः
पृष्ठेनिनद्धोजयतिप्रसूतꣳ ॥ ४२ ॥ रथेतिष्ठन् ॥ रथेतिष्ठन्नय
तिवाजिनःपुरोयत्रयत्रकामयतेसुषारथिः ॥ अभीशूनाम्म

शु. य. संहि. ॥८२॥

हिमानंम्पनायतमनंः पश्चादनुयच्छन्तिरश्मयंः ॥ ४३ ॥ उ. वि.

तीव्रान्घोषांन् ॥ तीव्रान्घोषांन्कृण्वतेवृषंपाणयोश्वारथेभिः अ.

सहवाजयंन्तः ॥ अवक्क्रामंन्तःप्प्रपदैरमित्त्रांन्क्षिणन्तिशत्रूँ ॥ २९ ॥

१॥ऽरनंपव्ययन्तः ॥४४॥ रथवाहंणꣳहविः ॥ रथवाहंणꣳ

हविरंस्यनामयत्रायुंधन्निहितमस्यवर्म्मं ॥ तत्रारथमुपंशग्ग्मꣳ

संदेमाविश्श्वाहांवयꣳसुमनस्यमांनाः ॥ ४५ ॥ स्वादुषꣳसदंः ॥ ८२ ॥

---

१ रथवाहणः । अत्र थकारेण व्यवधानाण्णत्वाप्राप्तौ "निषण्णाय रथवाहणमिन्द्रऽएणम्परिणीयते समिन्द्रणऽउरुष्याणो रक्षाणः पूणःषुणःपूणासस्या स्वर्णास्थूरिणौप्रणऽआयूंषि" ( शु. य. प्रा. ३ अ. ८७ क.) इत्यनेन णत्वं निपात्यते ।

पितरः ॥ स्वादुषꣳसदः पितरो वयोधाः कृच्छ्रेश्रितः शक्ती[1]
वन्तो गभीराः ॥ चित्रसेनाऽइषुबलाऽअमृध्राः सतोवीराऽउर
वो व्रातसाहाः ॥ ४६ ॥ ब्राह्मणासः पितरः ॥ ब्राह्मणासः
पितरः सोम्यासः शिवे नो द्यावापृथिवीऽअनेहसा ॥ पूषा नः
पातु दुरितादृतावृधो रक्षा[2] माकिर्नोऽअघशꣳसऽईशत ॥ ४७ ॥
सुपर्णं वस्ते । मृगोऽअस्या दन्तो गोभिः सन्नद्धा पतति प्रसूता ॥

१ शक्तीवन्तः । अत्र "अश्वरश्मिमतिसुमति°" (शु. य. प्रा. ३ अ. ९८ क.) इत्यनेन वन्त इति वकारे परे शक्तिशब्दस्य ह्रस्वेकारस्य दीर्घेकारः ।
२ रक्षामा । अत्र "शृणुतत्विपिभ्रजि" (शु. य. प्रा. ३ अ. १११ सू.) इत्यनेन माकारे परे रक्षशब्दस्य ह्रस्वाकारस्य दीर्घाकारः । तेन रक्षामा ।

यत्रानरꣳसञ्चविचद्रवन्तितत्रास्मभ्यमिषवꣳशर्म्मयꣳसन्
॥४८॥ ऋजीतेपरि । वृङ्धिनोऽश्माभवतुनस्तनूः ॥ सोमोऽ
अधिब्रवीतुनोदितिꣳशर्म्मयच्छतु ॥ ४९ ॥ आजङ्घन्ति ॥
आजङ्घन्तिसान्वेषाञ्जघनाँ२॥ऽउपजिघ्नते ॥ अश्वाजनिप्र
चेतसोश्वान्त्समत्सुचोदय ॥ ५० ॥ अहिरिवभोगैः । पर्य्ये
तिबाहुञ्ज्यायाहेतिम्परिबाधमानः ॥ हस्तघ्नोविश्वावयुनां
निविद्वान्पुमान्पुमाꣳसम्परिपातुविश्वतः ॥ ५१ ॥ वन



---

१ यत्रानरः । अत्र "नरस्सस्तऽऋपीन्नस्तऽआहुर्नियुद्धिष्षु यत्र" (शु. य. प्रा. ३ अ. १२२ सू.) इत्यनेनात्र नरपरे यत्रशब्दाकारस्य दीर्घः ।

स्प्पतेव्वीड्वङ्गः ॥ व्वनस्प्पतेव्वीड्वङ्गोहिभूयाऽअस्म्मत्त्सखाप्प्र
तरणःसुवीरः ॥ गोभिःसन्नद्धोऽअसिव्वीडयस्वास्त्थाता
तेजयतुजेत्त्वानि ॥ ५२ ॥ दिवः[1]पृथिव्व्याः ॥ दिवः
पृथिव्व्याःपर्य्योजऽउद्धृतंव्वनस्प्पतिब्भ्यःपर्य्याभृतःसहः ॥
अपामोज्ज्मानम्परिगोभिरावृतमिन्द्रस्यव्वज्ज्रःहविषारथँयज
ज ॥ ५३ ॥ इन्द्रस्यव्वज्ज्रः ॥ इन्द्रस्यव्वज्ज्रोमरुतामनीक

१ दिवःपृथिव्याः । इत्यत्र "दिवोऽककुत्पृथिव्योः" (शु. य. प्रा. ३ अ. १८ सू.) इत्यनेनाककुत्पृथिव्योः सत्वनिषेधाद्विसर्जनीय एव नान्यत् ।

म्मित्रस्यगर्ब्भौव्वरुणस्यनाभिः ॥ से[1]मान्नौहव्यदातिञ्जुषाणो
देवरथम्प्रतिहव्यागृभाय ॥ ५४ ॥ उपश्वासय । पृथिवीमुत
द्याम्पुरुत्रातेमनुतांविष्ठितञ्जगत् ॥ सदुन्दुभेसजूरिन्द्रेणदेवै
र्दूराद्दवीयोऽअपसेधशत्रून् ॥ ५५ ॥ आक्क्रन्दय ॥ आक्क्रन्द
यबलमोजोनऽआधानि[2]ष्टनिहिदुरिताबाधमानः ॥ अपप्प्रो

॥ ८४ ॥

१ सः इमाम् इति पदद्वयम् । अत्र "सऽओषधीमयोः" (शु. य. प्रा. ३ अ. १५ सू.) इत्यनेन इमे परे सपदघटितस्य विसर्जनीयस्य "लोपे च गुणे सेमाम्" इति सिद्ध्यति । २ निष्टनिहि । अत्र "नेः स्त्यास्तनोः" (शु. य. प्रा. ३ अ. ७० सू.) नेरुपसर्गात्परस्य स्त्यास्तनयोः सकारस्य षकारः । इति स्तनोः सकारस्य षत्वे ष्टुत्वे "ऊष्मान्तस्थाभ्यश्च स्पर्शः"। (शु. य. प्रा. ४ अ. १०० सू.) इत्यनेन द्वित्वम् ।

थदुन्दु भेदुच्छुनांऽइतऽइन्द्रंस्यमुष्टिरोंसिव्वीडयस्व ॥ ५६ ॥
आमूः ॥ आमूरंजप्प्रुत्त्यावंर्त्तयेमाःकेंतुमद्दुन्दुभिर्व्वावदी
ति ॥ समश्श्वंपर्ण्णाश्चरंन्तिनोनरोस्म्माकंमिन्द्ररंथिनोंजयन्तु
॥ ५७ ॥ आग्ग्नेयःकृष्ण्णग्ग्रीवंः । सारस्वतीमेषीबब्भ्रुः
सौम्म्यःपौष्ण्णःइयामःशिंतिपृष्ठोबांर्हस्प्पत्त्यःशिल्प्पोवैंश्श्व

१ रथिनो जयन्तु । अत्र "ऋवरेभ्यः°" (शु. य. प्रा. ३ अ. ८५ सू.) इत्यनेन "स्वरयवहकपैश्च" (शु. य. प्रा. ३ अ. ८६ सू.) इत्यनेनैतैर्व्यवधान-विहितस्य णत्वस्य विहितातिरिक्तथकारव्यवधानेनाप्राप्तावपि "शिलिसिवर्गमध्यमव्यवहितोऽपि" (शु. य. प्रा. ३ अ. ९६ सू.) इत्यनेन प्रकृतिभावो विधीयते। इदं शिष्यबुद्धिव्युत्पादनार्थम्।

शु. य. संहि. ॥ ८५ ॥

उ. वि. अ. ॥ २९ ॥

देवऽऐन्द्रोरुणोमारुतश्कल्माषऽऐन्द्राग्नश्सꣳहितोधोरामः
सावित्रोवारुणश्कृष्णऽएकशितिपात्पेत्वः ॥ ५८ ॥ अग्न
येनीकवते ॥ अग्नयेनीकवतेरोहिताञ्जिरनड्वानधोरामौसावि
त्रौपौष्णौरजतनाभीवैश्वदेवौपिशङ्गौतूपरौमारुतश्कल्माष
ऽआग्नेयश्कृष्णोजश्सारस्वतीमेषीवारुणश्पेत्वः ॥ ५९ ॥
अग्नयेगायत्राय । त्रिवृतेराथन्तरायाष्टाकपालऽइन्द्रायत्रैष्टु ॥ ८५ ॥
भायपञ्चदशायबार्हतायैकादशकपालोविश्वेभ्योदेवेभ्योजा

गतेभ्यᳫंसप्तदशेभ्योँवैरूपेभ्योद्वादशकपालोमित्रावरुणा
भ्यामानुष्टुभाभ्यामेकविᳫंशाभ्याँवैराजाभ्याम्पयस्याबृह
स्पतयेपाङ्क्तायत्रिणवायशाक्वरायचरुᳫंसवित्रऽऔष्णिहाय
त्रयस्त्रिᳫंशायरैवतायद्वादशकपालᳫंप्राजापत्त्यश्चरुरदित्त्यैवि
ष्णुपत्न्यैचरुरग्नयेवैश्वानरायद्वादशकपालोनुमत्त्याऽअष्टा
कपालᳫं ॥६०॥ [२४-४] ॥ इतिश्रीवाजसनेयसंहितायामेको-
सं. ५४ नत्रिंशोऽध्यायः ॥२९॥ श्रीवेदपुरुषाय नमः ॥ अनुवाकसूत्र-

म् ॥ देवसवितः षट्, तपसेकौलालꣳषोडश, द्वौ द्वाविꣳशतिः ॥
[अ. ३० मं. २२ अ. २] हरिःॐ॥ देवसवितꣳ ॥ देवसवितꣳ
प्प्रसुवयज्ज्ञम्प्रसुवयज्ज्ञपतिम्भगाय ॥ दिव्योगन्धर्व्वःकेतपूः
केतन्नꣳपुनातुव्वाचस्प्पतिर्व्वाचन्नꣳस्वदतु ॥ १ ॥ तत्सवितुः ॥
तत्सवितुर्व्वरेण्यम्भर्गोदेवस्यधीमहि ॥ धियोयोनःप्प्रचो
दयात् ॥ २ ॥ व्विश्वानिदेव । सवितर्दुरितानिपरासुव ॥
यद्भद्रन्तन्नऽआसुव ॥ ३ ॥ व्विभक्तारꣳहवामहे ॥ व्विभ

क्क्तारं॑ꣳहवामहे॒व्वसो॑श्च्चि॒त्रस्य॒राधं॑सः ॥ स॒वि॒तारं॑न्नृ॒चक्क्षं॑सम्
॥४॥ ब्रह्मं॑णेब्राह्म॒णम् ॥ ब्रह्मं॑णेब्राह्म॒णङ्क्ष॒त्राय॑राज॒न्य॒म्म॒
रुद्भ्यो॒व्वैश्य॒न्तपं॑से॒शू॒द्रन्तमं॑से॒तस्क॑रन्ना॒र॒काय॑व्वी॒र॒हणं॑म्पा॒
प्म॒नेक्क्ली॒बमा॑क्क॒याया॑ऽअयो॒गूङ्कामा॑यपुँश्च्च॒लूमति॑क्क्रुष्टाय
मा॒ग॒धम् ॥ ५ ॥ नृ॒त्ताय॑सू॒तम् ॥ नृ॒त्ताय॑सू॒तङ्गी॒ताय॑शैलू॒षन्ध
र्म्मा॑यसभाच॒रन्न॒रिष्ठा॑यैभी॒म॒लन्न॒र्म्माय॑रे॒भꣳहसा॑य॒कारि॑मान॒
न्दाय॑स्त्री॒ष॒खम्प्र॒मदे॑कुमारीपु॒त्रम्मे॒धायै॑रथका॒रन्धैर्य्या॑य॒तक्क्षा॑

णम् ॥ ६ ॥ [ ६-१ ] तपसेकौलालम् ॥ तपसेकौलालम्मा
यायैकर्म्मारँ रूपायमणिकारँ शुभेव्वपँ शरव्यायाऽइषुका
रँ हेत्यैधनुष्ककारङ्कर्म्मणेज्ज्याकारन्दिष्टायरज्जुसर्ज्जम्मृत्यवे
मृगयुमन्तकायश्श्वनिनम् ॥ ७ ॥ नदीभ्यः पौञ्जिष्ठम् ॥
नदीभ्यः पौञ्जिष्ठमृक्षीकाभ्योनैषादम्पुरुषव्याग्घ्रायदुर्म्मदं
गन्धर्व्वाप्सरोभ्योव्व्रात्यम्प्रयुग्भ्यऽउन्मत्तँ सर्प्पदेवजने
भ्योऽप्प्रतिपदमयेभ्यः कितवमीर्य्यतायाऽअकितवम्पिशाचे

भ्योविदलकारीँयातुधानेभ्यःकण्टकीकारीम् ॥८॥ सन्ध
येजारम्॥ सन्धयेजारङ्गेहायोपपतिमार्त्यैपरिवित्तन्निर्ऋत्यैप
रिविविदानमराद्ध्याऽएदिधिषुःपतिन्निष्कृत्यैपेशस्कारीᳩ
सञ्ज्ञानायस्मरकारीम्प्रकामोद्यायोपसदंव्वर्णायानुरुधम्ब
लायोपदाम्॥९॥ उत्सादेभ्यःकुब्जम्॥ उत्सादेभ्यःकुब्ज
म्प्रमुदेव्वामनन्द्वार्भ्यःस्रामᳩस्वप्नायान्धमधर्म्मायबधिरम्प
वित्रायभिषजम्प्रज्ञानायनक्षत्रदर्शमाशिक्षायैप्रश्निनमु

पशिक्क्षायांऽअभिप्प्राश्निनंम्मर्य्यादायैप्प्रश्नविवाकम् ॥ १० ॥
अर्म्मैब्भ्योहस्त्तिपम् ॥ अर्म्मैब्भ्योहस्त्तिपञ्जवायांश्वपम्पुष्ट्यै
गोपालंव्वीर्य्यायाविपालन्तेजसेजपालमिरायैकीनाशंङ्कीलाला
यसुराकारम्भद्रायंगृहपᳪश्रेयसेवित्तधमाद्ध्यंक्क्ष्यायायानुक्क्ष
त्तारम् ॥ ११ ॥ भायैदार्व्वाहारम् ॥ भायैदार्व्वाहारम्प्रभायांऽअ
ग्ग्न्येधम्ब्रद्ध्नस्यंव्विष्टपायाभिषेक्क्तारंव्वर्षिंष्ठायनाकायपरिवेष्टा
रन्देवलोकायंपेशितारम्मनुष्ष्यलोकायंप्प्रकरितारᳪसर्व्वेब्भ्यो

लोकेब्भ्यंऽउपसेक्क्तारन्नवंऽऋत्त्यैब्ब्धायोपमन्थितारम्मेधाय
व्वासःपल्प्पूलीम्प्रकामायंरजयित्त्रीम् ॥ १२ ॥ ऋतयेस्त्तेनहृ
दयम् ॥ ऋतयेस्त्तेनहृदयंव्वैरहत्त्यायापिशुनंव्विविक्त्त्यैक्ष
त्तारमौपद्रष्ट्र्यायानुक्षत्तारम्बलायानुचरम्भूम्नेपरिष्कन्
न्दम्प्रियायप्प्रियवादिनमरिष्ट्यैऽअश्वसादंस्वर्ग्गायलोकाय
भागदुघंव्वर्षिष्ठायनाकायपरिवेष्टारम् ॥ १३ ॥ मन्न्यवेयस्त्ता

---

१ वासः पल्पूलीम् । अत्र "समानपदे" (शु. य. प्रा. ३ अ. ३९ सू.) इत्यनेन षकारे प्राप्ते "वाजपतिर्वासऽएविधिपुरन्तःपर्शव्येनान्तः पार्ष्ण्यमिति च" (शु. य. प्रा. ३ अ. ३८ सू.) इति सूत्रेण वासशब्दघटितविसर्जनीयस्य षकारनिषेधः ।

शु. य.
संहि.
॥८९॥

व. वि.
अ.
॥ ३० ॥

पम् ॥ मन्यवेयस्तापङ्क्रोधायनिसरँय्योगाययोक्तारंशोका

याभिसर्त्तारङ्क्षेमायविमोक्तारमुत्कूलनिकूलेब्भ्यस्त्रिष्ठिनंव

पुषेमानस्कृतंशीलायाञ्जनीकारीन्निर्ऋत्यैकोशकारीँय्यमा

यासूम् ॥ १४ ॥ यमायंयमसूम् ॥ यमायंयमसूमथर्व्व

ब्भ्योवतोकांसंवत्सरायपर्य्यायिणीम्परिवत्सरायाविजाता

मिदावत्सरायातीत्वरीमिद्वत्सरायातिष्क्कद्वरींवत्सरायावि ॥८९॥

जर्ज्जरांसंवत्सरायपलिक्नीमृभुब्भ्योजिनसन्धंसाध्येब्भ्य

[1]श्चर्म्मम्नम् ॥ १५ ॥ सरोँभ्योधैवरम् ॥ सरोँभ्योधैवरमु
पस्त्थावंराँभ्योदाशँवैशन्ताँभ्योवैन्दन्नड्वलाँभ्यःशौष्कक
लम्पारायंमार्ग्गारमंवारायंकेवर्त्तन्तीर्त्थेँभ्यंऽआन्दंविषमे
ँभ्योमैनालꣳस्वनेँभ्यःपर्ण्णकङ्गुहाँभ्यःकिरातꣳसानुँभ्यो
जम्भकम्पर्व्वतेँभ्यःकिम्पूरुषम् ॥ १६ ॥ बीभत्त्सायैपौ
ल्क्कसम् ॥ बीभत्त्सायैपौल्क्कसंव्वर्ण्णायैहिरण्यकारन्तुला

१ चर्म्मम्नम् । अत्र "ऋषरेभ्यो०" (शु.य.प्रा.३अ.८५सू.) इत्यनेन समानपदे प्राप्तस्य णत्वस्य "इन्द्राग्नी०" (शु.य.प्रा.३अ.९३सू.) इत्यनेन निषेधान्न णत्वम् ।

यैव्वाणिजम्पश्चादोषायग्ग्लाविनंव्विश्वेब्भ्योभूतेब्भ्यःसिद्ध्म
लम्भूत्यैजागरणमभूत्त्यैस्वपनमार्त्त्यैजनवादिनंव्यृद्ध्याअपग
ल्भँसँशरायप्प्रच्छिदम् ॥ १७ ॥ अक्क्षराजायकित
वम् ॥ अक्क्षराजायकितवङ्कृतायादिनवदर्शन्त्रेतायैकल्पिनं
न्द्वापरायाधिकल्पिनमास्कन्दायसभास्थाणुम्मृत्यवेगो
व्यच्छमन्तकायगोघातङ्क्षुधेयोगांव्विकृन्तन्तम्भिक्क्षमाणऽउ ॥ ९० ॥
पतिष्ठतिदुष्कृतायचरकाचार्य्यम्पाप्मनेसैलगम् ॥ १८ ॥ प्रति

श्रुत्त्कायाऽअर्त्तनम् ॥ प्रतिश्रुत्त्कायाऽअर्त्तनङ्घोषायभषम
न्तायबहुवादिनमनन्तायमूकंशब्दाया[1]ऽडम्बराघातम्महसेवी
णावादङ्क्रोशायतूणवद्ध्मम[2]वरस्प्परायशङ्खद्ध्मंवनायवनप
मन्यतोरण्ण्यायदावपम् ॥१९॥ नर्म्मायपुँश्चलूम् ॥ नर्म्मायपुँश्च
लूᳬहसायकारिँय्यादसेशाबल्ल्याङ्ग्रामण्ण्यङ्गणकमभिक्क्रोश

---

१ आडम्बराघातम् । अत्र "त आघादनाडम्बरात्" (शु.य.प्रा. ३ अ. ४८सू.) इत्यनेनानाडम्बरात्परस्य विधानादाघातशब्दघटितस्य तकारस्य मूर्धन्यत्वं (टः) न भवति । २ अवरस्पराय । अत्र "प्रकृत्या कखयोः पफयोश्च" (शु. य. प्रा. ३ अ. ११ सू.) इति "अवरः" इत्यस्य विसर्गस्य प्रकृतिभावे प्राप्ते "ऋतावरौ च पतिपरयोः" (शु. य. प्रा. अ. ३ सू. ५०) ऋतः अवरश्च शब्दौ सकारेण व्यवधीयेते यथासंख्यं पतिपरयोः । इत्यनेनात्रावरशब्दस्य विसर्गस्य परे पदपरे सत्वे जाते "ऊष्मान्तस्थाभ्यश्च स्पर्शाः" (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन पकारस्य द्वित्वे रूपम् ।

कुन्ताभ्महꣳसेव्वीणावादम्पांणिग्घ्नन्तूणवद्ध्मन्तान्नृत्तायान
न्दायंतलवम् ॥२०॥ अग्न्नयेपीवानम् ॥ अग्न्नयेपीवानम्पृथिव्व्यै
पीठसर्प्पिणंव्वायवेचाण्डालमन्तरिक्षायव्वꣳशनर्त्तिनन्दिवेख
लतिꣳसूर्य्यायहर्य्यक्षन्नक्षत्रेभ्यꣳकिर्म्मिरञ्चन्द्रमसेकिला
समह्नेशुक्लम्पिङ्गाक्षꣳरात्र्यैकृष्णम्पिङ्गाक्षम् ॥२१॥ अथै
तान् ॥ अथैतानष्टौव्विरूपानालभतेतिदीर्घञ्चातिह्रस्वञ्चाति[1] ॥ २१ ॥

१ अतिस्स्थूलम्। अत्र "भाविभ्यः सः षं समानपदे" (शु. य. प्रा. ३ अ. ५६ क.) इत्यनेन समानपदे स्थूलस्य सस्य षकारे प्राप्ते "अनुसन्तनोतु बृहस्पतिसुतस्य सुसमिद्धाय सुसन्दृशमभिसत्वाऽभिसंविशन्तु सुसस्यातिस्थूलं०" (शु. य. प्रा. अ. ३ सू. ८२) इत्यनेन प्रकृतिभावे न षत्वम्। तत "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (शु. य. प्रा. ४ अ. १०२ सू.) इति थस्य द्वित्वे चर्त्वे तकारः।

स्त्थूलञ्चातिंकृशञ्चातिंशुक्लञ्चातिंकृष्णञ्चातिंकुल्वञ्चातिंलोम
शञ्च ॥ अशूंद्राऽअब्राह्मणास्त्तेप्प्राजापत्त्याः ॥ मागधः पुंश्च
लीकिंतवःक्लीबोशूंद्राऽअब्राह्मणास्त्तेप्प्राजापत्त्याः ॥ २२ ॥
[ १६-२ ] इतिश्रीवाजसनेयसंहितायां त्रिंशत्तमोऽध्याय:
॥ ३० ॥ श्रीवेदपुरुषाय नम: ॥ अनुवाकसूत्रम् ॥ सहस्र-
शीर्षा षोडश,ब्ध्य:संभृत: षट्, द्वौ द्वाविंश्शति: [ अ. ३१
मं. २२ अनु. २ ] ॥ हरि:ॐ ॥ सहस्रशीर्षापुरुषः । सह

सं. ५५

७३१.

स्त्राक्षः॒सहस्रपात् ॥ सभूमिᳪं᳭सर्व्वतंस्पृत्त्वात्त्यतिष्ठद्दशाङ्गु
लम् ॥ १ ॥ पुरुषऽएव ॥ पुरुषएवेदᳪं᳭सर्व्वँय्यद्भूतँय्यच्चभा
व्यम् ॥ उतामृतत्त्वस्येशानोयदन्नेनातिरोहति ॥ २ ॥ एता
वानस्य । महिमातोज्ज्यायाँश्चपूरुषः ॥ पादोस्यव्विश्वाभूता
नित्रिपादस्यामृतन्दिवि ॥ ३ ॥ त्रिपादूर्द्ध्वः ॥ त्रिपादूर्द्ध्वऽ
उदैत्पुरुषःपादोस्येहाभवत्पुनः ॥ ततोव्विष्ष्वङ्व्यक्क्राम
त्साशनानशनेऽअभि ॥ ४ ॥ ततोव्विराट् ॥ ततोव्विराडजा

यतव्विराजोऽअधिपूरुषः ॥ सजातोऽअत्त्यरिच्च्यतपश्श्चाद्भूमि
मथौपुरः॥५॥ तस्म्माद्यज्ज्ञात॥ तस्म्माद्यज्ज्ञात्त्सर्व्वहुतःसम्भृं
तम्पृषदाज्ज्यम् ॥ पशूँस्त्ताँश्श्चक्क्रेव्वायव्व्यानारण्ण्याग्ग्राम्म्या
श्श्चये ॥६॥ तस्म्माद्यज्ज्ञात् ॥ तस्म्माद्यज्ज्ञात्त्सर्व्वहुतऽऋचः
सामानिजज्ज्ञिरे ॥ छन्दाꣳसिजज्ज्ञिरेतस्म्माद्यजुस्त्तस्म्माद
जायत ॥ ७ ॥ तस्म्मादश्श्वाः ॥ तस्म्मादश्श्वाऽअजायन्त
येकेचोभयादतः ॥ गावोहजज्ज्ञिरेतस्म्मात्तस्म्माज्जाताऽअ

जा॒वयं॑÷ ॥ ८ ॥ तँ॒ऽयु॒ज्ञम् ॥ तँ॒ऽयु॒ज्ञम्बु॒र्हिंषि॒प्प्रौक्ष॒न्पुरु॑ष

ञ्ञातऽम॑ग्ग्र॒तः॑ ॥ तेन॑दे॒वाऽअ॑यजन्तसा॒ध्याऽऋष॑यश्च॒ये ॥ ९ ॥

य॒त्पुरु॑षम् ॥ य॒त्पुरु॑षं॒व्यद॑धुः॒कति॒धाव्य॑कल्पयन् ॥ मुख॒

ङ्किम॑स्यासी॒त्किम्बा॒हूकिमू॒रूपादा॑ऽउच्येते ॥ १० ॥ ब्राह्म॒

णो॒स्य ॥ ब्रा॒ह्मणो॒स्यमु॒खंमा॑सीद्बाहूरा॑ज॒न्य॑÷कृ॒तः॑ ॥ ऊ॒रू

तद॑स्य॒यद्वैश्य॑÷प॒द्भ्या॑ᳪ॒शू॒द्रोऽअ॑जायत ॥ ११ ॥ च॒न्द्रमा॒

मन॑सः॒ ॥ च॒न्द्रमा॒मन॑सोजा॒तश्च॒क्षोः॒सूर्यो॑ऽअजायत ॥

श्रोत्राँद्वायुश्चँप्राणश्चमुखाँदग्निरँजायत ॥ १२ ॥ नाभ्याँऽ
आसीत् ॥ नाभ्याँऽआसीदन्तरिक्षꣳशीर्ष्णोँद्यौःसमँवर्त्त
त ॥ पद्भ्याम्भूमिर्दिशꣳश्रोत्रात्तथाँलोकाँ२ऽअँकल्पयन्
॥ १३ ॥ यत्पुरुँषेण । हविषाँदेवायज्ञमतन्वत ॥ वसन्तो
स्यासीदाज्यंग्रीष्मऽइद्ध्मःशरद्धविः ॥ १४ ॥ सप्तास्या
सन् ॥ सप्तास्यासन्परिधयस्त्रिःसप्तसमिधः कृताः ॥ देवा
यद्यज्ञन्तन्वानाऽअबँध्नन्पुरुँषम्पशुम् ॥१५॥ यज्ञेनँयज्ञ

म् ॥ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्माणिप्रथमान्या उ. वि.
सन् ॥ तेहनाकम्महिमानःसचन्तयत्रपूर्व्वेसाध्याःसन्तिदेवाः अ.
॥ १६ ॥ [ १६-१ ] अद्भ्यःसम्भृतः । पृथिव्यैरसाच्चवि ॥ ३१ ॥
श्वकर्म्मणःसमवर्त्तताग्ग्रे ॥ तस्यत्त्वष्टाविदधद्रूपमेतितन्म
र्त्त्यस्यदेवत्त्वमाजानमग्ग्रे ॥ १७ ॥ वेदाहम् ॥ वेदाहमेतम्पु
रुषम्महान्तमादित्त्यवर्ण्णन्तमसःपरस्त्तात् ॥ तमेवाविदित्त्वा ॥ ९४ ॥

१ तमसःपरस्तात् । अत्र "तमसोऽपरस्तात्" ( शु. य. प्रा. ३ अ. २६ सू. ) इत्यनेन विधीयमानं सत्वं न भवति तत्रापरस्तादित्युक्तत्वात् ।

तिंमृत्त्युमेतिनान्न्यःपन्थांव्विद्यतेयंनाय ॥ १८ ॥ प्रजापति

श्चरति ॥ प्रजापतिश्चरतिगर्ब्भेऽअन्तरजायमानोबहुधाव्विजा

यते ॥ तस्ययोनिम्परिंपश्श्यन्तिधीरास्त्तस्मिन्हतस्त्थुर्भुवं

नानिव्विश्श्वा ॥१९॥ योदेवेब्भ्यः ॥ योदेवेब्भ्यऽआतपतियो

देवानाम्पुरोहितः ॥ पूर्व्वोयोदेवेब्भ्योजातोनमोरुचायब्राह्मये

॥ २० ॥ रुचम्ब्राह्मम् ॥ रुचम्ब्राह्मञ्जनयन्तोदेवाऽअग्ग्रेत

दब्रुवन् ॥ यस्त्वैवम्ब्राह्मणोव्विद्यात्तस्यदेवाऽअसन्वशे ॥ २१ ॥

श्रीश्चं॥ श्रीश्चंतेलक्ष्मीश्चपत्क्न्यांवहोरात्रेपार्श्वेनक्क्षंत्राणिरूप
मुश्विनौघ्यात्तम् ॥ इष्णन्निषाणामुम्मंऽइषाणसर्वंलोकम्मऽ
इषाण ॥ २२ ॥ [ ६-२ ]॥ इतिश्रीवाजसनेयसंहितायामे-
कत्रिंशोऽध्यायः ॥ ३१ ॥ ॥ श्रीवेदपुरुषाय नमः ॥ अनु-
वाकसूत्रम्॥ तदेव सप्त, वेनस्तन्नव, द्वौ षोडश [ अ. ३२ मं.
१६ अनु. २ ]॥ हरिःॐ ॥ तदेव ॥ तदेवाग्निस्त्तदांदित्त्यस्त्त
द्वायुस्त्तदुंचन्द्रमाः ॥ तदेवशुक्कन्तद्ब्रह्मताऽआपःसप्प्रजा

॥ ९५ ॥

पतिं ॥१॥ सर्व्वेनिमेषाः ॥ सर्व्वेनिमेषाजज्ज्ञिरेविद्युतःपुरुषा
दधि॥ नैनमूर्द्धन्नतिर्य्यञ्चन्नमध्येपरिंजग्ग्रभत् ॥ २ ॥ नतस्य
प्रतिमाऽअस्तियस्यनाममहद्यशः ॥ हिरण्यगर्भऽइत्येष
मामाहिंसीदित्येषायस्म्मान्नजातऽइत्येषः ॥ ३ ॥ एषोह
देवःप्रदिशोनुसर्व्वाःपूर्व्वोहजातःसऽउगर्भेऽअन्तः॥ सऽएव
जातःसजनिष्ष्यमाणःप्रत्त्यङ्जनास्तिष्ठतिसर्व्वतोमुखः ॥४॥

१ हिरण्यगर्भःसं० चत्वारि० ४ अ. २५ मंत्र १०।११।१२।१३। ॥ १ मामाहिंसीत्. १ अ. १२ मं. १०२ ॥ १ यस्मान्न. १ १ इंद्रश्च. १ अ. ८ मं. ३६ मं. ३७ ॥ इति प्रतीकानि ॥

यस्म्मांज्जातम् ॥ यस्म्मांज्जातन्नपुराकिञ्चनैवयऽआंबभूवभुवं
नानिविश्श्वां ॥ प्रजापंतिंःप्प्रजयांसꣳरराणस्त्रीणिज्ज्योतींꣳ
षिसचतेसषोडशी ॥ ५ ॥ येनद्यौः ॥ येनद्यौरुग्ग्राप्पृंथिवी
चंदृढायेनस्वःस्तभितंयेननाकंः ॥ योऽअन्तरिंक्क्षेरजंसो
विमानःकस्म्मैदेवायंहविषांविधेम ॥ ६ ॥ यङ्क्रन्दंसी ॥
यङ्क्रन्दंसीऽअवंसातस्तभानेऽअभ्यैक्क्षेंताम्मनंसारेजंमाने ॥ ॥ १६ ।
यत्राधिसूरऽउदिंतोविभातिकस्म्मैदेवायंहविषांविधेम ॥

आपोहयद्बृंहुतीर्य्याश्चिदापंः ॥७॥ [७-१] वेनस्तत् ॥ वेन
स्तत्त्पश्श्यन्निहितङ्गुहासद्यत्रविश्श्वम्भवत्त्येकंनीडम्॥ तस्मिम
न्निदꣳसञ्चविचैतिसर्व्वꣳसऽओतंःप्प्रोतंश्चविभूःप्प्रजासु ॥८॥
प्रतत् ॥ प्रतद्वोचेदमृतन्नुविद्वान्गन्धर्व्वोधामविभृतङ्गुहासत् ॥
त्रीणिपदानिनिहितागुहास्ययस्तानिवेदसपितुःपितासत् ॥९॥
सनंः ॥ सनोबन्धुर्ज्जनितासविधाताधामानिवेदभुवनानि

१ आपांह. १ यश्चित्. १ अ. २८ मं. २५ मं. २६ इति प्रतीके ॥

व्विश्श्वा ॥ यत्रदेवाऽअमृतंमानशानास्तृतीयेधामंन्नद्ध्यैरयन्त
॥ १० ॥ परीत्त्यंभूतानि । परीत्त्यंलोकान्परीत्त्यसर्व्वाःप्प्रदि
शोदिशश्श्च ॥ उपस्त्थायंप्प्रथमजामृतस्यात्त्मनात्त्मानंम
भिसंविंवेश ॥ ११ ॥ परिद्यावापृथिवी । सद्यऽइत्त्वापरिलो
कान्परिदिशःपरिस्वः ॥ ऋतस्यतन्तुंव्विततंव्विचृत्त्यतदंपश्श्यत्
त्तदंभवत्तदासीत् ॥ १२ ॥ सदंसस्प्पतिम् ॥ सदंसस्प्पति
मद्भुतम्प्रियमिन्द्रंस्यकाम्म्यम् ॥ सनिम्मेधामंयासिषᳪस्वाहा

॥ १३ ॥ याम्मेधाम् ॥ याम्मेधान्देवगणाश्पितरश्श्चोपासते ॥
तयामामद्यमेधयाग्ग्नेमेधाविनङ्कुरुस्वाहा ॥ १४ ॥ मेधाम्मे ॥
मेधाम्मेव्वरुणोददातुमेधामग्ग्निश्प्रजापतिः ॥ मेधामिन्द्रश्च
वायुश्श्चमेधान्धातादत्दातुमेस्वाहा ॥ १५ ॥ इदम्मे ॥ इदम्मे
ब्रह्मचक्क्षत्रञ्चोभेश्श्रियमश्नुताम् ॥ मयिदेवादधतुश्श्रियमुत्त
मान्तस्यैतेस्वाहा ॥ १६ ॥ [९-२] ॥ इतिश्रीवाजसनेय-
सं. ५६ संहितायां द्वात्रिंशोऽध्यायः ॥ ३२ ॥ श्रीवेदपुरुषाय नमः ॥

शु. य. संहि. ॥९८॥ अनुवाकसूत्रम्॥ अस्याजरासः सप्तदश, पक्षित् द्वादश, विभ्रा उ. वि. अ. ॥३३॥
ट् चतुर्दश, प्रवावृजऽएकादश, प्रवायुं पञ्चदश, प्रवीरया पञ्च
दश,ऽआनस्त्रयोदश, सप्त सप्तनवतिः [ अ. ३३ मं. ९७
अनु. ७ ] ॥ हरिः ॐ॥ अस्याजरासः ॥ अस्याजरासोदमाम
रित्राऽअर्चद्धूमासोऽअग्नयः पावकाः ॥ श्वितीचयः श्वात्रा
सोभुरण्यवोवनर्षदोवायवोनसोमाः ॥ १ ॥ हरयोधूमके ॥९८॥

१ वनसदः इति पदम् । अत्र "वनसदोऽवेरो रेफेण" ( शु. य. प्रा. ३ अ. ४८ सू. ) इत्यनेन सदशब्दे परे वनशब्दो रेफेण व्यवधीयते ।

तवꣳ ॥ हरंयोधूमकेतवोवातंजूताऽउपद्यविं ॥ यतंन्तेवृथंग
ग्नयं÷ ॥२॥ यजांनꣳ ॥ यंजांनो[1]मित्रावरुणायजांदेवाँ२॥ऽ
ऋतम्बृहत् ॥ अग्नेयक्षिस्वन्दमंम् ॥ ३ ॥ युक्ष्वाहि। देव
हूतंमाँ२॥ऽअश्वाँ२॥ऽअग्नेरथीरिंव ॥ निहोतापूर्व्यंश्संदꣳ ॥४॥
देविरूधे । चरतꣳस्वत्थेंऽअन्यान्यांवृत्समुपंधापयेते ॥
हरिरन्यस्यांम्भवांतिस्वधावांञ्छुक्रो[2]ऽअन्यस्यांन्ददृशेसुवर्चांꣳ

१ यजानो । अत्र यजशब्दस्य ह्रस्वाकारस्य नः इति नकारे परे "धारयाव स्वेजाव" ( शु. य. प्रा. ३ अ. १०८ सू. ) इत्यनेन दीर्घाकारः ।
२ स्वधावाञ्छुक्रः । अत्र "शकारे च" ( शु. य. प्रा. ४ अ. ९६ सू. ) इत्यनेन शकारे परे तवर्गश्चवर्गं प्राप्नोति । अतः शुक्रस्य शकारे परे स्वधावान् इत्यस्य नकारस्य ञकारः । ततः "परश्चास्पर्शपरश्छम्" ( शु. य. प्रा. ४ अ. ९७ सू. ) इत्यनेन शकारस्य छकारे कृते "स्वधावाञ्छुक्र" इति ।

॥ ५ ॥ शतम् ॥ १७०० ॥ अयमिह । प्प्रथमोधायिधातृ
भिर्होतायजिंष्ठोऽअद्ध्वरेष्ष्वीड्यः ॥ यमप्प्नवानोभृगंवोव्विरुरु
चुर्व्वनेषुचित्रंव्विब्भ्वंव्विशेविंशे ॥ ६ ॥ त्रीणिंशता । त्रीसहस्त्रा ॥ २२ ॥
ण्ण्यग्निन्त्रिशच्चंदेवानवंचासपर्य्यन् ॥ औक्क्षंन्घृतैरस्तृणन्ब
र्हिरंस्म्माऽआदिद्धोतारन्न्यसादयन्त ॥ ७ ॥ मूर्द्धानंन्दिवः ॥
मूर्द्धानंन्दिवोऽअंरतिम्पृथिव्याव्वैश्श्वानरमृतऽआजातमग्निम् ॥ ॥ ११ ॥
कविःसम्म्राजमतिंथिञ्जनांनामासन्नापात्रञ्जनयन्तदेवाः ॥ ८ ॥

अग्निर्वृत्राणि । जङ्घनद्द्रविणस्युर्विपन्यया ॥ समिद्धःशु
क्रऽआहुतः ॥९॥ विश्वेभिःसोम्म्यम् ॥ विश्वेभिःसोम्म्यम्म
ध्वग्नऽइन्द्रेणवायुना ॥ पिबामित्रस्यधामभिः ॥१०॥ आयत् ॥
आयदिषेनृपतिन्तेजऽआनट्शुचिरेतोनिषिक्तन्द्यौरभीके ॥
अग्निःशर्द्धमनवद्यँय्युवानꣳस्वाध्यञ्जनयत्सूदयच्च ॥११॥
अग्नेशर्द्ध । महतेसौभगायतवद्युम्म्नान्युत्तमानिसन्तु ॥

१ पिबामित्रस्य । अत्र "शृणुतरिवषिध्रजिभवतपिबेतस्यमतिष्ठरक्षा मकारे" (शु. य. प्रा. ३ अ. ११७ क.) इत्यनेन मकारे बस्य दीर्घे पिबामित्रस्य ।

सञ्ज्ञांस्पृत्त्यꣳसुयमुमाकृणुष्ष्वशत्रूयतामुभितिष्ठामहाꣳसि
॥ १२ ॥ त्वाꣳहि । मुन्द्रतंममर्कशोकैर्वृमहेमहिंनुःश्रो
ष्यंग्ग्ने ॥ इन्द्रुन्नत्त्वाुशवंसादेुवतांवायुम्पृणन्तिुराधंसानृतंमाः
॥ १३ ॥ त्वेऽअंग्ग्ने । स्वाहुतप्प्रियासंःसन्तुसूरयंः ॥ युन्ता
रोयेमुघवांनोुजनांनामूर्वान्दयंन्तुगोनांम् ॥ १४ ॥ श्रुधिश्श्रु
त्त्कर्ण्ण ॥ श्रुधिश्श्रुंत्त्कर्ण्णवह्निंभिर्द्देवैरंग्ग्नेसुयावंभिः ॥ आसीं
दन्तुबुर्हिंषिंमिुत्रोऽअंर्य्यमाप्प्रांतुर्य्यावांणोऽअद्धुरम् ॥ १५ ॥

व्विश्वेषामदितिः ॥ व्विश्वेषामदितिर्य्यज्ञियानांव्विश्वेषामति
थिर्म्मानुषाणाम् ॥ अग्ग्निर्देवानामवऽआवृणानःसुमृडीको
भवतुजातवेदाः ॥ १६ ॥ महोऽअग्ग्नेः । समिधानस्यश
र्म्मण्ण्यनागामित्रेव्वरुणेस्वस्तये ॥ श्रेष्ठेस्यामसवितुःसवीम
नितद्देवानामवोऽ[1]अद्यावृणीमहे ॥ १७ ॥ [ १७-१ ] आप
श्चित् ॥ आपश्चित्पिप्युस्तर्य्योनगावोनक्षन्नृतञ्जरितारस्तऽ

---

१ अद्या वृणीमहे। अत्र "अद्य तं हकारवकारभवतवृणीमहे दैवेषु" (शु. य. प्रा. ३ अ. ११५ सू.) इत्यनेन अद्य इत्यस्य वृणीमहे परे दीर्घं अद्यावृणीमहे अद्य शब्दस्य दकारस्य स्वरात्सं० इत्यनेन द्वित्वम्।

इन्द्र ॥ याहिवायुर्न्नीनियुतोंनोऽअच्छात्त्वꣳहिधीभिर्दयसेवि
वाजांन् ॥ १८ ॥ गावऽउप ॥ गावऽउपांवतावतम्महीयज्ञ
स्यंरप्सुदां ॥ उभाकर्णाहिरण्ययां ॥ १९ ॥ सदुद्य । सूरऽ
उदितेनांगामित्रोऽअर्य्यमा ॥ सुवातिसविताभगः ॥ २० ॥
आसुतेसिञ्चतश्श्रियरोदस्योरभिश्श्रियंम् ॥ रसादधीतवृष
भम् ॥ तंम्प्रत्क्कथायंवेनः ॥ २१ ॥ आतिष्ठन्तम्परि ॥ आति





१ तम्प्रत्क्कथां. १ अ. ७ मं. १२ ॥ १ अयंवेनः. १ अ. ७ मं. १६ ॥ इति प्रतीके ॥

छन्तम्परिविश्वेऽअभूषञ्छ्रियोवसानश्चरतिस्वरोचिः ॥ महत्त
द्वृष्णोऽअसुरस्यनामाविश्वरूपोऽअमृतानितस्थौ ॥ २२ ॥
प्रवः ॥ प्रवोमहेमन्दमानायान्धसोर्चा[1]विश्वानराय[2]विश्वाभुवे[3] ॥
इन्द्रस्ययस्यसुमखंसहोमहिश्रवोनृम्णञ्चरोदसीसपर्यतः
॥ २३ ॥ बृहन्नित् ॥ बृहन्निदिध्मऽएषाम्भूरिशस्त्तम्पृथुः
स्वरुः ॥ येषामिन्द्रोयुवासखा ॥ २४ ॥ इन्द्रेहि ॥ इन्द्रेहि

---

१ अर्चाविश्वानराय । अत्र "अश्वरश्मिमतिसुमति०" (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन विश्वानराय इत्यस्य वकारे परे अर्चशब्दस्य ह्रस्वाकारस्य दीर्घाकारः । २ विश्वानराय । अत्र "नरहामित्रेषु च" (शु. य. प्रा. ३ अ. १०३ सू.) इत्यनेन नरशब्दे परे विश्वशब्दाकारस्य दीर्घाकारो विधीयते । ३ विश्वाभुवे । अत्र "विश्व सहभुवस्वुवसुषु" । (शु. य. प्रा. ३ अ. १०२ सू.) इत्यनेन भुवे परे विश्वशब्दाकारस्य दीर्घाकारः ।

मत्स्यन्धंसोविश्वौभिꣳसोमपर्वभिः ॥ मुहाँ२॥ऽअंभिष्टिरोज
सा ॥ २५ ॥ इन्द्रोवृत्रम् ॥ इन्द्रोवृत्रमंवृणोच्छर्द्धनीतिꣳप्र
मायिनांममिनाद्वर्प्पणीतिः ॥ अहन्व्यꣳसमुशधग्गवनेष्वा
विर्द्धेनांऽअकृणोद्राम्म्याणांम् ॥ २६ ॥ कुतस्त्वम् ॥ कुतस्त्व
मिन्द्रमाहिंनꣳसन्नेकोयासिसत्पतेकिन्तंऽइत्था ॥ सम्पृच्छसे
समराणःशुभानैर्वोचेस्तन्नोहरिवोयत्तेऽअस्मे ॥ मुहाँ२॥ऽइ



१ मुहाँ२॥ऽइन्द्रोय. १ अ. ७ मं. ४० ॥ १ कुदाचुन. अ. ८ मं. २ ॥ १ कुदाचुनप्र. अ. ८ मं. ३ ॥ इति प्रतीकानि ॥

न्द्रोयऽओजंसाकुदाचुनस्तुरीरंसिकुदाचुनप्प्रयुंच्छसि ॥२७॥
आतत् ॥ आतत्तंऽइन्द्रायवंः पनन्ताभियऽऊर्वंङ्गोमंन्तुन्ति
तृंत्त्सान् ॥ सुकृत्त्स्वँ्यंयेपुंरुपुत्राम्मुहीᳫंसुहस्त्रंधाराम्बृहुतीन्दु[1]
दुंक्षन् ॥२८॥ इुमान्तें ॥ इुमान्तोधियम्प्रभंरेमुहोमुहीमुस्य
स्त्तोत्रेधिषणायत्तंऽआनुजे ॥ तमुंत्त्सवेचंप्प्रसुवेचंसासुहिमि
न्द्रंन्देुवासुᳫंशवंसामदुन्ननुं ॥२९॥ [१२-२] विुभ्राड्बृहत् ॥

---

1 "दुदुक्षन्"। अत्र दुधुक्षन् इति पदम्। "दुधुक्षन्धो दकारम्" (शु. य. प्रा. ३ अ. ५५ सू.) इत्यनेन दुधुक्षन् शब्दघटितस्य धकारस्य दकारः।

व्विभ्राड्बृहत्त्पिबतुसोम्म्यम्मद्ध्वायुर्द्दधद्यज्ज्ञपतावविह्रुतम् ॥
व्वातंजूतोयोऽअभिरक्क्षतित्त्मनाप्प्रजाः पुपोषपुरुधाव्विराज
ति ॥ ३० ॥ उदुत्त्यम् ॥ उदुत्त्यञ्जातवेदसन्देवंव्वहन्तिकेतवः ॥
दृशेव्विश्श्वायसूर्य्यम् ॥ ३१ ॥ येनापावक ॥ येनापावकचक्क्ष
साभुरण्यन्तञ्जनाँ२ ॥ऽअनु ॥ त्वंव्वरुणपश्श्यसि ॥ ३२ ॥ दैव्व्यां
वद्ध्वर्य्यू ॥ दैव्व्यावद्ध्वर्य्यूऽआगतंरथेनसूर्य्यत्त्वचा ॥ मद्ध्वा
यज्ज्ञꣳसमञ्जाथे ॥ तम्प्रत्त्कथायंव्वेनाश्चित्रन्देवानाम् ॥ ३३ ॥

१ तंप्रत्नथा. १ अ. ७ मं. १२ ॥ १ अयंव्वेनः. १ अ. ७ मं. १६ ॥ १ चित्रंदेवानाम्. १ अ. १३ मं. ४६ ॥ इति प्रतीकानि ॥



॥१०३॥

आनंः ॥ आनऽइडाभिर्व्विदथेसुशस्त्तिव्विश्श्वानंरःसवितादेवऽ
एंतु ॥ अपियथांयुवानोमंत्त्संथानोव्विश्श्वञ्जगंदाभिपित्त्वेमंनी
षा ॥ ३४ ॥ यदद्य । कच्चंवृत्रहन्नुदगांऽअभिसूंर्य्य ॥ सर्व्वं
न्तादिंन्द्रतेवशें ॥ ३५ ॥ तरणिर्व्विश्श्वदंर्शतः ॥ तरणिर्व्विश्श्वदंर्श
तोज्योतिष्कृदंसिसूर्य्य ॥ व्विश्श्वमाभांसिरोचनम् ॥ ३६ ॥ तत्त्सू
र्य्यस्य । देवत्त्वन्तन्महित्त्वम्मद्ध्याकर्त्तोर्व्विततःसञ्जंभार ॥

१ मत्सथ नः इति पदम् । अत्र मत्सथ इत्यस्य थकारस्य ह्रस्वाकारस्य नः इति नकारे परे "धारयाम॰" (शु. य. प्रा. ३ अ. १०८ सू.) इत्यनेन दीर्घाकारे मत्सथानः ।

यदेदयुक्क्तहरितं÷सधस्त्थादाद्द्रात्रीव्वासंस्त्तनुतेसिमस्म्मै
॥ ३७॥ तन्मित्रस्यं ॥ तन्मित्रस्यव्वरुणस्याभिचक्क्षेसूर्य्योरू
पङ्कृणुतेद्द्योरुपस्त्थे ॥ अनन्तमन्न्यद्रुशंदस्यपाजं÷कृष्ण्णमन्न्य
द्धरितंसम्भंरन्ति ॥ ३८ ॥ बण्ण[1]महान् ॥ बण्णमहाँ२॥ऽअंसि
सूर्य्यबडांदित्त्यमहाँ२॥ऽअंसि ॥ महस्त्तेंसतोमंहिमापंनस्य
तेद्धादेवमहाँ२॥ऽअंसि ॥ ३९ ॥ बट्सूर्य्य ॥ बट्सूर्य्यश्श्रवंसा ॥ १०४ ।

१ अत्र बट्महान् । "पञ्चमे पञ्चमम्" (शु. य. प्रा. ४ अ. १२१ सू.) इत्यनेन पञ्चमे स्पर्शे परे अपञ्चमः स्प[illegible]: पञ्चमो भवति । इति टस्य णकारे द्वित्वे च रूपम् ।

महाँ२॥ऽअसिसत्रादेवमहाँ२॥ऽअसि ॥ मह्नादेवानामसुर्य्यः
पुरोहितोविभुज्योतिरदाभ्यम् ॥४०॥ श्रायन्तऽइवसूर्य्यम् ॥
श्रायन्तऽइवसूर्य्यँविश्वेदिन्द्रस्यभक्षत ॥ वसूनिजातेजनमा
नऽओजसाप्प्रतिभागन्नदीधिम ॥४१॥ [1]अद्यादेवाः ॥ अद्यादे
वाऽउदितासूर्य्यस्यनिरꣳहसः[2]पिपृतानिरवद्यात् ॥ तन्नोमित्रो
वरुणोमामहन्तामदितिः सिन्धुः पृथिवीऽउतद्यौः ॥४२॥

१ अद्यदेवाः। अत्र "अद्य तं हकारचकारभवत वृणीमहे देवेषु" (शु. य. प्रा. ३ अ. ११५ सू.) इत्यनेन देवाः इति परे दीर्घे अद्यादेवाः। २ पिपृत निरवद्यात् इति पदम्। अत्र तकाराकारस्य निघटितनकारे परे "धारयामः॰" (शु. य. प्रा. ३ अ. १०८ सू.) इत्यनेन दीर्घे पिपृतानिरवद्यात्।

आकृष्णेनं ॥ आकृष्णेनरजंसावर्त्तमानोनिवेशयंन्नमृतम्म
र्त्त्यंञ्च ॥ हिरण्ययेनसवितारथेनादेवोयांतिभुवंनानिपश्श्यं
न् ॥ ४३ ॥ [ १४-३ ] प्र[1]वांवृजे । सुप्प्रयाबर्हिरेषामावि
श्पतीवबीरिटऽइयाते ॥ विशामक्तोरुषसंः पूर्वहूंतौवायुः
पूषास्वस्त्तयेनियुत्त्वांन् ॥ ४४ ॥ इन्द्रवायूबृहस्पतिम् ॥
इन्द्रवायूबृहस्पतिम्मित्राग्निम्पूषणम्भगंम् ॥ आदित्त्या ॥ १०५ ॥

१ प्रववृजे इति पदम् । अत्र "ववृधववृजोः" ( शु. य. प्रा. ३ अ. ११४ सू. ) इत्यनेन वृजे परे वेत्यस्य ह्रस्वाकारस्य दीर्घाकारे प्रवावृजे ।

न्मारुतङ्गणम् ॥ ४५ ॥ व्वरुणहंप्प्राविता । भुवन्मित्रोविि

श्वाभिरुतिभिंः ॥ करतान्नहंसुराधसहं ॥ ४६ ॥ अधिं

नहं ॥ अधिन्नऽइन्द्रैषांव्विष्ण्णोसजात्त्यानाम् ॥ [1]इतामरुतोऽ

अश्विना ॥ [2]तम्प्रत्क्कथायंव्वेनोयेदेवासऽआनऽइडाभिर्व्विश्वेभिहं

सोम्म्यम्मद्धोमासश्चर्षणीधृतहं ॥४७॥ अग्ग्नऽइन्द्र ॥ अग्ग्नऽ

इन्द्रव्वरुणामित्रदेवाहंशर्द्धहंप्प्रयन्तमारुतोतव्विष्ण्णो ॥ उभा

---

१ इतमरुतः । अत्र "शृणुतत्विधिध्रजिभवतपिबेतस्मातिष्ठरक्षा मकारे" (शु. य. प्रा. अ. ३ सू. ११७) इत्यनेन मकारे परे दीर्घे इतामरुतः ।
२ तंप्रत्क्कथां. अ. ७ मं. १२ ॥ १ अयंव्वेनः. अ. ७ मं. १६॥ १ येदेवासः. अ. ७ मं. १९॥ १ आनऽइडाभिः. अ. ३३ मं. ३४॥ १ विश्वेभिहं सोम्म्यम्. अ. ३३ मं. १० ॥ १ ओमासश्चर्षणीधृतः. अ. ७ मं. ३३ ॥ इति प्रतीकानि ॥

नासंत्त्यारुद्रोऽअंधग्नाःपूषाभगंःसरस्वतीजुषन्त ॥ ४८ ॥
इन्द्राग्नीमित्रावरुणा ॥ इन्द्राग्नीमित्रावरुणादितिंस्वः
पृथिवीन्द्याम्मरुतंःपर्वताँ२॥ऽअपः ॥ हुवेविष्णुम्पूषणम्ब्रह्म
णस्प्पतिम्भगन्नुशꣳसꣳसवितारमूतये ॥४९॥ अस्म्मेरुद्राः ॥
अस्म्मेरुद्रामेहनापर्वतासोवृत्रहत्त्येभरहूतौसजोषाः ॥ यंः
शꣳसंतेस्तुवतेधायिपज्जऽइन्द्रज्ज्येष्ठाऽअस्म्माँ२॥ऽअंवन्तुदे
वाः ॥५०॥ अर्व्वाञ्चोऽअद्य ॥ अर्व्वाञ्चोऽअद्याभंवतायजत्राऽ



१ अद्य भवत । अत्र "अद्य तं हकारचकारभवतवृणीमहे देवेषु" (शु. य. प्रा. अ. ३ सू. ११५) इत्यनेन भवतपरे दीर्घं अद्याभव इति।

आवोहार्हिंभयमानोव्ययेयम् ॥ त्रादध्वंन्नोदेवानिजुरोवृकस्य त्रादध्वङ्कर्त्तादवपदोयजत्राः ॥ ५१ ॥ विश्वेऽअद्य । मरुतोविश्वऽऊतीविश्वेभवन्त्वग्नयःसमिद्धाः ॥ विश्वेनोदेवाऽअवसागमन्तुविश्वमस्तुद्रविणंवाजोऽअस्मे ॥ ५२ ॥ विश्वेदेवाः । शृणुतेमᳬहवम्मेयेऽअन्तरिक्षेयऽउपद्यविष्ठ ॥ येऽअग्निजिह्वाऽउतवायजत्राऽआसद्यास्मिन्बर्हिषिमादयद्ध्वम् ॥ ५३ ॥

---

२ उपद्यविष्ठ । “यतेश्च” (शु. य. प्रा. अ. ३ सू. ५९) इत्यनेन द्यविशब्दात्परस्य स्थघटितसकारस्य षत्वे कृते “ऊष्मान्तस्थाभ्यश्च स्पर्शः” (शु. य. प्रा. अ. ४ सू. १०२) इत्यनेन ठकारस्य द्वित्वम् ।

देवेभ्योहि । प्प्रथमँउयुज्ज्ञियेभ्योमृतत्त्वꣳसुवसिभागमुत्तमम् ॥ आदिद्दामानꣳसवितर्व्यूर्ण्णुषेनूचीनाजींविितामानुषेभ्यः ॥ ५४ ॥ [ ११-४ ] प्रवायुम् ॥ प्रवायुमच्छाबृहतीमंनीपाबृहद्रयिंविश्श्ववारꣳरथप्प्राम् ॥ द्युतद्यामानियुतःपत्त्यमानःकविःकविमियक्षसिप्प्रयज्ज्यो ॥५५॥ इन्द्रवायूऽइमे । सुताऽउपप्प्रयोभिरागंतम् ॥ इन्दवोवामुशन्तिहि ॥ ५६ ॥ मित्रꣳहुवे । पूतदक्षंवरुणञ्चरिशादसम् ॥ धियङ्घृताचीꣳसा

धं॑न्ता ॥५७॥ द॒स्रा॑यु॒वाकं॑वः । सु॒तानासं॑त्त्याव्रृ॒क्तब॑र्हिषः ॥

आयां॑तᳪरुद्रवर्त्तनी ॥ तं॒म्प्रत्क॒थाय॒ंव्वे॒नः ॥५८॥ व्वि॒दद्य॒दीं ॥

व्वि॒दद्य॒दीस॒रमा॑रु॒ग्गणम॒द्रे॒र्म्मर्हि॒पाथं॑ः पू॒र्व्यᳪस॒द्ध्र्य॒क्कः ॥

अग्रं॑न्नयत्सु॒पद्य॒क्षरा॑णा॒मच्छा॒रवं॒म्प्रथ॒मा जा॑न॒ती गा॑त् ॥५९॥

न॒हिस्प॒र्शम् ॥ न॒हिस्प॒र्शम॑विद॒न्न॒न्यम॒स्म्मा॒द्वै॑श्वा॒न॒रात्पु॑रऽ

ए॒तार॑म॒ग्नेः ॥ ए॒मे॑नमवृ॒धन्न॒मृ॒ताऽअम॑र्त्यंव्वै॑श्वा॒न॒रङ्क्षै॑त्रजि

१ तंप्रत्कथा. अ. ७ मं. १२ ॥ १ अ॒यं॑व्वे॒नः. अ. ७ मं. १६ ॥ इति प्रतीके ॥

त्त्यायदे॒वाः ॥ ६० ॥ उ॒ग्राव्विघ॒निनां ॥ उ॒ग्राव्विघ॒निना॒मृधँऽ

॥१०८॥ इन्द्रा॒ग्नीहं॑वामहे ॥ तानो॑मृडातऽई॒दृशे॑ ॥ ६१ ॥ उपा॑स्म्मै । ॥ ३२ ।

गा॒यतानर॒ꣳपव॑मानायेन्द॑वे ॥ अ॒भिदे॒वाँ२॥ऽइयक्क्षते ॥ ६२ ॥

ये॒त्त्वा॑ ॥ हि॒हत्त्यै॑मघव॒न्नव॑र्द्ध॒न्न्येशा॑म्ब॒रेहं॑रिवो॒येगवि॑ष्ट्रौ ॥ येत्त्वा॑

नू॒नम॑नु॒मद॑न्ति॒व्विप्प्रा॒ꣳपिबे॑न्द्र॒सोम॒ꣳसग॑णोम॒रुद्भिः॑ ॥ ६३ ॥

ज॒नि॑ष्ठाऽउ॒ग्ग्रः । सह॑सेतु॒राय॑म॒राय॑म॒न्द्रऽओजि॑ष्ठोबहु॒लाभि॑ ॥१०८॥

१ गायत्त नरः इति पदम् । तकारोत्तरवर्त्तिनो ह्रस्वाकारस्य नकारे परे "धारयाम०"(शु. य. प्रा. ३ अ. १०८ सू.) इत्यनेन दीर्घे आयतानरः इति ।

मानं ॥ अवंर्द्धन्निन्द्रंम्मरुतंश्चिदत्रंमातायद्वीरन्दधनद्दनिष्ठा ॥ ६४ ॥ आतु ॥ आंतूनंऽइन्द्रवृत्रहन्नस्म्माकंमर्द्धमागहि ॥ महान्महीभिंरूतिभिंः ॥ ६५ ॥ त्वामिंन्द्र ॥ त्वामिंन्द्रप्र तूर्त्तिष्व्वभिविश्वांऽअसिस्पृधंः ॥ अशस्त्तिहाजंनिताव्विश्व तूरंसित्त्वन्तूंर्य्यतरुष्यतः ॥ ६६ ॥ अनुंते ॥ अनुंतेशुष्म्मं न्तुरयंन्तमीयतुःक्षोणीशिशुन्नमातरां ॥ व्विश्वांस्त्तेस्पृधंःश्न

---

१ आतु न इन्द्रः इति पदम्। तुक,...त्तरवर्तिनो ह्रस्वोकारस्य "धारय म" (शु. य. प्रा. ३ अ. १०८ सू.) इत्यनेन नकारे परे दीर्घ आतून इन्द्र इति।

थयन्तमन्न्यवैंव्वृत्रँऽस्यदिन्द्रतूर्व्वसि ॥ ६७॥ सुज्ज्ञोदेवानाम् ॥

सुज्ज्ञोदेवानाम्प्रत्त्यैतिसुम्न्नमादित्त्यासोभवतामृडयन्तः ॥

आवोर्व्वाचीसुमतिर्व्ववृत्त्यादहोश्चिद्याव्वरिवोवित्तरासत्॥६८॥

अदब्धेभिःसवितः । पायुभिष्ट्वꣳ शिवेभिरद्यपरिपाहिनोग

यम् ॥ हिरण्ण्यजिह्वःसुवितायनव्यसेरक्षामाकिन्नोऽअघशꣳ

सऽईशत ॥ ६९ ॥ [ १५-५ ] प्रवीरया । शुचयोदद्रिरेवाम ॥१०९॥

१ पायुभिः त्वम् । इति पदम् । अत्र "भातृभिरर्च्चिर्भिः पायुभिर्वरूत्रीः" (शु. य. प्रा. ३ अ. ७९ सू.) इत्यनेन एकाक्षरे पदे परे पायुभिः इत्यस्य विसर्गस्य षत्वे "षात्तथौ मूर्धन्यम्" (शु. य. प्रा. ३ अ. ८० सू.) तस्य टकारे "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (शु. य. प्रा. ४ अ. १०२ सू.) इति टस्य द्वित्वम् ।

ध्रुर्षुभिर्म्मधुंमन्तहसुतासंः ॥ वहंवायोनियुतोयाह्यच्छापि
बांसुतस्यान्धसोमदाय ॥ ७० ॥ गावऽउप ॥ गावऽउपावता
वतम्महीयुज्ञस्यंरुप्सुदा ॥ उभाकर्णाहिरण्ययां ॥ ७१ ॥
काव्ययोराजानेषु ॥ काव्ययोराजानेषुक्रत्वादक्षस्यदुरोणे॥
रिशादसासधस्थऽआ ॥७२॥ दैव्यावद्ध्वर्यू ॥ दैव्यावद्ध्व
र्यूऽआगंतहरथेनसूर्य्यत्वचा ॥ मद्ध्वायुज्ञहसमंञ्जाथे ॥ तं

सं. ५८ १ तंप्रत्नथां. १ अ. ७ मं. १२ ॥ अयंवेनः. १ अ. ७ मं. १६ ॥ इति प्रतीके ॥

म्मृत्कथायंव्वेनः ॥ ७३ ॥ तिरश्चीनोव्वितंतः ॥ तिरश्चीनो
व्वितंतोरश्मिरेषामधःस्विदासी३दुपरिस्विदासी३त् ॥ रेतो
धाऽआसन्महिमानऽआसन्त्स्वधाऽअवस्तात्प्रयंतिःपरस्ता
त् ॥ ७४ ॥ आरोदंसी ॥ आरोदंसीऽअपृणदास्वंर्म्महज्ज्ञा
तँग्यदेनमपसोऽअधारयन् ॥ सोऽअंध्वरायपरिणीयतेकविर
त्योनव्वाजंसातयेचनोहितः ॥७५॥ उक्तथेभिर्व्वृत्रहन्तमा ॥
उक्तथेभिर्व्वृत्रहन्तमायामंन्दानाचिदागिरा ॥ आङ्गूषैराविवा

सतः ॥ ७६ ॥ उपंनः । सूनवोगिरः॑शृण्वन्त्वमृतस्यये ॥
सुमृडीकाभंवन्तुनः ॥ ७७ ॥ ब्रह्माणिमे । मतयःशꣳसुता
सःशुष्मंइयर्तिप्रभृतोमेअद्रिः ॥ आशासतेप्रतिहर्य्य
न्त्युक्थेमाहरीवहतस्तानोअच्छ ॥ ७८ ॥ अनुत्तमाते ।
मघवन्नकिर्नुनत्वावाँ२॥ऽअस्तिदेवताविदानः ॥ नजायमा
नोनशतेनजातोयानिकरिष्याकृणुहिप्रवृद्ध ॥७९॥ तदित् ॥
तदिदासभुवनेपुज्येष्ठँय्यतोजज्ञऽउग्रस्त्वेषनृम्णः॥ सद्यो

जंज्ज्ञानोनिरिंणातिशत्रूननुयंव्विश्श्वेमदन्त्यूमाꣳ ॥८०॥ इमाऽ
उंक्था । पुरूवसो[1]गिरोंवर्द्धन्तुयाममं ॥ पावकवंर्ण्णाꣳशुचंयो
व्विपश्चितोभिस्तोमैरनूपत ॥ ८१ ॥ यस्यायम् ॥ यस्यायंव्वि
श्श्वऽआर्य्योदासंः शेवधिपाऽअरिः ॥ तिरश्चिंद्दर्य्येरुशमेपवीं
रवितुब्भ्यैत्सोऽअंज्ज्यतेरयिः ॥८२॥ अयꣳसहस्रंम् ॥ अयꣳ
सहस्रमृषिंभिꣳसहंस्कृतꣳसमुद्रऽइंवपप्प्रथे ॥ सत्त्यःसोऽअंस्य
महिमागृंणेशवोयज्ज्ञेषुंव्विप्प्रराज्ज्ये ॥८३॥ अदंब्धेभिꣳसवि



१ पुरूवसः । अत्र "अश्वरश्मिमर्नसुमति" ( शु. य. प्रा. ३ अ. ९८ सू. ) इत्यनेन वसः इत्यस्य वकारे परे पुरुशब्दस्य ह्रस्वोकारस्य दीर्घोकारः ।

तः । पायुभिष्ट्वꣳशिवेभिरद्यपरिपाहिनोगयम् ॥ हिरण्ययजिह्वःसुवितायनव्यसेरक्षामाकिर्नोऽअघशꣳसऽईशत ॥ ८४ ॥
[ १५-६ ] आनः ॥ आनोयज्ञन्दिविस्पृशंवायोयाहिसुमन्मभिः ॥ अन्तःपवित्रंऽउपरिश्रीणानोयꣳशुक्रोऽअयामिते ॥ ८५ ॥ इन्द्रवायूसुसन्दृशा । सुहवेहहवामहे ॥ यथानःसर्वऽइज्जनोनमीवःसङ्गमेसुमनाऽअसत् ॥ ८६ ॥ ऋधगित्था । समर्त्यःशशमेदेवतातये ॥ योनूनम्मित्रावरुणावभिष्टयऽ

आचक्केहृद्द्यदांतये ॥ ८७॥ आयांतम् ॥ आयांतमुपंभूषत
म्मर्द्धं ऽपिबतमाश्विना ॥ दुग्गधम्पयोंवृषणाजेन्यावसूमानोंम
र्द्धिष्टमागंतम् ॥८८॥ प्रैतुं ॥ प्रैतुब्रह्मणस्प्पातिंः प्प्रदेद्द्येतुसून्र
तां ॥ अच्छांव्वीरन्नर्य्यम्पङ्क्तिरांधसन्देवायज्ज्ञंन्नयन्तुनंः ॥८९॥
चन्द्रमांऽअप्प्सु ॥ चन्द्रमांऽअप्प्स्वन्तरासुंपर्णोंधांवतेदिवि ॥
रयिम्पिशङ्गंम्बहुलम्पुंरुस्पृहंहरिंरेतिकनिंक्कदत् ॥९०॥ देव
न्देवंव्वः ॥ देवन्देवंव्वोवसेदेवन्देवमभिष्टंये ॥ देवन्देवंः हुवेम

वाजंसातयेगृणन्तोंदेव्याधिया ॥ ९१ ॥ दिविपृष्टः ॥ दिवि

पृष्टोऽअंरोचताग्निर्वैश्वानरोबृहन् ॥ क्ष्मयांवृधानऽओजंसा

चनोंहितोज्योतिंपाबाधतेतमं: ॥ ९२ ॥ इन्द्राग्नीऽअपा

त् ॥ इन्द्राग्नीऽअपादियम्पूर्वागांत्पद्वतींभ्यः ॥ हित्वीशि

रोंजिह्वयावावंदच्चरंत्त्रिꣳशत्पदान्यंक्रमीत् ॥ ९३ ॥ देवासो

हि[1] । ष्मामनवेसमंन्यवोविश्वेसाकꣳसरांतयः ॥ तेनोंऽ

१ हिष्ममनवे इति पदम् । अत्र "शृणुतत्विविधिजिभवतपिबेतस्तिष्ठरक्षा मकारे" ( शु. य. प्रा ३ अ. ११७ सू. ) इत्यनेन मकारे स्म इत्यस्याकारस्य दीर्घाकारे विधीयमाने हिष्मामनवे । अत्र मस्य द्वित्वं "ऊष्मान्तस्थाभ्यश्च स्पर्शः" ( शु. य. प्रा. ३ अ. १०२ सू. ) इत्यनेन ज्ञेयम् ।

अद्यतेऽअंपरन्तुचेतुनोभवन्तुवरिवोविदंः ॥ ९४ ॥ अपांध
मत् ॥ अपांधमदभिशंस्तीरशस्तिहाथेन्द्रोद्युम्न्याभवत् ॥
देवास्तंऽइन्द्रसख्यायंयेमिरेबृहंद्भानोमरुंद्गण ॥ ९५ ॥
प्रवंः ॥ प्रवऽइन्द्रांयबृहतेमरुतोब्रह्मांर्चत ॥ वृत्रꣳहंनतिवृत्र
हाशतक्रंतुर्वज्रेणशतपर्वणा ॥ ९६ ॥ अस्येत् ॥ अस्येदि
न्द्रोवावृधेवृष्ण्यꣳशवोमदेसुतस्यविष्णवि ॥ अद्यातमंस्यम ॥ ११३ ॥

१ अद्यत तस्य इति पदम्। "अद्य ं हकारचकारभवतवृणीमहे देवेषु" (शु. य. प्रा. ३ अ. ११५ सू.) इत्यनेन ह्रस्वतकारे [illegible] अकारस्य दीर्घः अद्यातमस्य इति।

हिमानंमायवोनुंष्टुंवन्तिपूर्व्वथा ॥ इमाऽउंत्त्वायस्यायमयꣳ

सहस्रंमूर्द्धंऽऊपुणं॥ ९७ ॥ [१३-८] इतिश्रीवाजसनेय-

संहितायां त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ श्रीवेदपुरुषाय नमः ॥

अनुवाकसूत्रम् ॥ यज्जाग्रतो दश, पञ्चनद्यो दश, सोमोधेनु

न्दश, ऽआकृष्णेन दश, पूषन्तव दश, नतदष्टौ, षडष्टपञ्चा-

१ अनुष्टुवन्ति । अत्र ''अनोः स्तुवन्त्याम्'' (शु. य. प्रा. ३ अ. ७२ सू.) इत्यनेन अनोरुपसर्गात्परस्य स्तुवन्तिपदे परे तद्घटितसकारस्य षकारः । तत ''ऊष्मान्तस्थाभ्यश्च स्पर्शः'' (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन हकारस्य द्वित्वम् । २ इमाऽउत्त्वा. अ. ३३ मं. ८१ ॥ १ यस्यायम्. मं. ८२ ॥ १ अयꣳसहस्रम्. मं. ८३ ॥ १ ऊर्द्ध्वऽऊषुणः अ. ११ मं. ४२ ॥ इति प्रतीकानि ॥

शत् [अ. ३४ मं. ५८ अनु. ६] ॥ हरिःॐ ॥ यज्जाग्ग्रं
तᳬ ॥ यज्जाग्ग्रंतोदूरमुदैतिदैवन्तदुसुप्तस्यतथैवैति ॥ दूरङ्गम
ञ्ज्योतिषाञ्ज्योतिरेकन्तन्मेमनंःशिवसङ्कल्प्पमस्तु ॥ १ ॥
येनकर्म्माणि ॥ येनकर्म्माण्ण्यपसोमनीषिणोयज्ञेकृण्ण्वन्ति
व्विदथेषुधीराᳬ ॥ यदपूर्व्वँय्यक्षमन्तःप्प्रजानान्तन्मेमनंः
शिवसङ्कल्प्पमस्तु ॥ २ ॥ यत्प्रज्ञानम् ॥ यत्प्रज्ञानमुत
चेतोधृतिश्चयज्ज्योतिरन्तरमृतम्प्रजासु ॥ यस्मान्नऽऋतेकि

ज्ञानकर्म्मीकिङ्क्रियतेतन्मेमनंःशिवसङ्कल्पमस्तु ॥ ३ ॥ येने
दम् ॥ येनेदम्भूतम्भुवंनम्भविष्यत्त्परिंगृहीतममृतेंनसर्व्वम् ॥
येनंयुज्ञस्त्तायतेंसप्तहोंतातन्मेमनंःशिवसङ्कल्पमस्तु॥४॥
यस्मिन्नृचः ॥ यस्मिन्नृचःसामयजूᳪंपियस्मिन्प्रति
ष्ठितारथनाभाविवाराः ॥ यस्मिँम्मांश्चित्तᳬसर्व्वमोतंम्प्रजाना
न्तन्मेमनंःशिवसङ्कल्पमस्तु ॥ ५ ॥ सुपाराथिरश्वांनिव ॥
सुपाराथिरश्वांनिवयन्मंनुष्यान्नेनीयतेभीशुंभिर्व्वाजिनंऽइव ॥

हृत्प्रतिष्ठुँय्यदंजिरञ्जविष्ठुन्तन्मेमनंःशिवसंङ्कल्पमस्तु॥६॥
पितुन्नु । स्तोषम्महोधर्म्माणन्तवीषीम् ॥ यस्यंत्रितोव्यो
जंसावृत्रंविपर्वमुर्द्दयंत् ॥ ७ ॥ अन्विंत् ॥ अन्विदंनुमते
त्वम्मन्यासैशञ्चंनस्कृधि ॥ क्रत्वेदक्षायनोहिनुप्प्रणऽआ
यूंठंपिंतारिषः ॥ ८ ॥ शतम् ॥ १८०० ॥ अनुंनः ॥ अनुं
नोद्यानुंमतिर्य्यज्ञन्देवेषुंमन्यताम् ॥ अग्निश्चंहव्यवाहंनोभ
वंतन्दाशुषेमयंः ॥ ९ ॥ सिनींवालिपृथुंष्टुके ॥ सिनींवालिपृथुं

ह्वकेयादेवानामासिस्वसा ॥ जुषस्वंहव्यमाहुतम्प्रजान्दोविदि
दिड्ढिनः ॥ १० ॥ [ १-१ ] पञ्चनद्यः ॥ पञ्चनद्यःसरस्वती
मपियन्तिसस्रोतसः ॥ सरस्वतीतुपञ्चधासोदेशेभवत्सरित्
॥ ११ ॥ त्वमग्ने । प्रथमोऽअङ्गिराऽऋषिर्देवोदेवानामभवः
शिवःसखा ॥ तवव्रतेकवयोविद्मनापसोजायन्तमरुतोभ्रा
जदृष्टयः ॥ १२ ॥ त्वन्नः ॥ त्वन्नोऽअग्नेतवदेवपायुभिर्म्म
घोनोरक्षतन्वश्चवन्द्य ॥ त्रातातोकस्यतनयेगवामस्यनिमेषः

. ५९

रक्षमाणस्त्तवंव्व्रते ॥ १३ ॥ उत्तानायामवं । भराचिकित्वा
न्त्सद्यःप्प्रवीताव्वृषणञ्जजान ॥ अरुषस्त्तूपोरुशंदस्यपाजऽइडां
यास्प्पुत्रोव्वयुनेजनिष्ट ॥ १४ ॥ इडायास्त्वा । पदेव्वयन्ना
भांपृथिव्व्याऽअधि ॥ जातवेदोनिधीमह्यग्नेहव्व्यायव्वोढवे
॥ १५ ॥ प्रमंन्महे । शवसानायंशूषमाङ्गूषङ्गिर्व्वणसेऽअङ्गिर
स्वत् ॥ सुवृक्तिभिस्त्तुवतऽऋग्ग्मियायार्च्चामार्क्कन्नरेव्विश्श्रुता
य ॥ १६ ॥ प्रवं÷ ॥ प्रवोमहेमहिनमोभरद्ध्वमाङ्गूष्यंशव



॥ ११६ ॥

सानायसामं ॥ येनांनःपूर्वांपितरःपदज्ञाऽअर्चन्तोऽअङ्गिर
सोगाऽअविन्दन् ॥१७॥ इच्छन्तित्त्वा ॥ सोम्म्यासःसखायः
सुन्वन्तिसोमन्दधंतिप्प्रयांᳫसि ॥ तितिक्क्षन्तेऽअभिशंस्त्त
ञ्जनांनामिन्द्रत्त्वदाकश्चनहिप्प्रकेतः ॥ १८ ॥ नते । दूरेपर
माचिद्रजांᳫस्यातुप्प्रयांहिहारिवोहरिंब्भ्याम् ॥ स्थिरायवृ
ष्णेसवनाकृतेमायुक्ताग्ग्रावांणःसमिधानेऽअग्नौ ॥ १९ ॥

---

१ येन नः इति पदम् । अत्र येनेत्यस्य नकाराकारस्य नः पदे परे "धारयामयोजावसचस्वनुदमोषुजयतोरुष्यरक्षयजयच्छमस्सथपिपृतगायतातुयेन नकारे" ( शु. य. प्रा. ३ अ. १०८ सू. ) इत्यनेन दीर्घाकारे जाते येनानः इति पदम् ।

अषांढँयुत्सु । पृतंनासुपप्प्रिᳬस्वर्षाम्प्सांवृजनंस्यगोपाम् ॥
भरेषुजाᳬसुक्षितिᳬसुश्रवंसञ्जयन्तन्त्वामनुमदेमसोम ।२०।
[ १०-२ ] सोमोंधेनुम् ॥ सोमोंधेनुᳬसोमोऽअर्वन्तमाशुᳬ
सोमोंवीरङ्कर्मण्यन्ददाति ॥ सादन्यंविदथ्यᳬसभेयम्पितृ
श्रवंणँयोददांशदस्मै ॥ २१ ॥ त्वमिमाः ॥ त्वमिमाऽ
ओषंधीःसोमविश्वास्त्वमपोऽअंजनयस्त्वङ्गाः ॥ त्वमाततं



१ स्वःसाम् इति पदम् । अत्र "स्वर्धूः साᳬसहयोः (शु. य. प्रा. ३ अ. ४१ सू.) इत्यनेन यथासंख्यं स्वस्य विसर्जनीयस्य साम् पदे परे रेफत्वं सकारस्य च मूर्धन्यषत्वञ्च जातम् ।

न्थोर्व्वन्तरिक्षन्त्वज्ज्योतिषाव्वितमौव्ववत्थ ॥२२॥ देवेनन्नः ॥
देवेनन्नोमनसादेवसोमरायोभागᳫं सहसावन्नभियुद्ध्य ॥ मात्त्वा
तन्नदीशिषेव्वीर्य्यस्योभयेब्भ्यःप्प्रचिकित्त्सागविष्टौ ॥ २३ ॥
अष्टौव्वि ॥ अष्टौव्यख्यत्ककुभःपृथिव्यास्त्रीधन्न्वयोजनासप्
प्तसिन्धून् । हिरण्ण्याक्षःसवितादेवऽआगाद्दधद्रत्नादाशु
षेव्वार्य्याणि ॥ २४ ॥ हिरण्ण्यपाणिᳫंसविता । विचर्षणिरुभे
द्यावापृथिवीऽअन्तरीयते ॥ अपामीवाम्बाधतेव्वेतिसूर्य्यमभि

कृष्णेनरजंसाद्यामृंणोति ॥ २५ ॥ हिरंण्ण्यहस्त्तोऽअसुरः ।
सुनीथश्सुंमृडीकश्स्ववांयात्त्वर्व्वाङ् ॥ अपसेधंन्रक्क्षसोयातु
धानानस्त्थांद्देवश्प्प्रंतिदोषङ्गृंणानश् ॥२६॥ येतें ॥ येतेपन्थाः
सवितःपूर्व्यासोंरेणवःसुकृंताऽअन्तरिंक्क्षे ॥ तेभिंन्नोंऽअद्यप
थिभिंःसुगेभीरक्क्षांचनोऽअधिंचब्रूहिदेव ॥२७॥ उभापिंबत
म् ॥ उभापिंबतमश्विनोभानःशर्म्मयच्छतम् ॥ अविद्रियां ॥ ११८
भिरूतिभिंः ॥ २८ ॥ अप्प्रस्वतीमश्विना ॥ अप्प्रस्वतीम

श्विनावाचंमस्म्मेकृतन्नोदस्त्रावृषणामनीषाम् ॥ अद्युत्त्येवंसे
निह्वंयेवांवृधेचंनोभवतंवाजंसातौ ॥ २९ ॥ द्युभिरक्तुभि÷ ॥
द्युभिरक्तुभिंःपरिपातमस्म्मानरिंष्टेभिराश्विनासौभंगेभिः ॥
तन्नोंमित्रोवरुंणोमामहन्तामदिंतिःसिन्धु÷पृथिवीऽउतद्यौः
॥ ३० ॥ [ १०-३ ] आकृष्णेनं ॥ आकृष्णेनरजंसावर्त्तं
मानोनिवेशयंन्नमृतम्मर्त्यंञ्च ॥ हिरण्ययेंनसवितारथेनादे
वोयांतिभुवंनानिपश्श्यंन् ॥ ३१ ॥ आरांत्रि ॥ आरांत्रिपा

शु. य. संहि. ॥११९॥ अ. वि. अ. ॥ ३४ ॥ ॥ ११९ ॥

र्त्थिवꣳरजः पितुरप्प्रायिधामभिः ॥ दिवस्सदाꣳसिबृहतीवि

तिष्ठसऽआत्त्वेषंवर्त्ततेतमः ॥ ३२ ॥ उषस्तत् ॥ उषस्तच्चि

त्रमाभरास्मभ्यंवाजिनीवति ॥ येनंतोकञ्चतनयञ्चधामहे

॥ ३३ ॥ प्रातरग्निम् ॥ प्रातरग्निम्प्रातरिन्द्रꣳहवामहेप्रात

र्म्मित्रावरुणाप्प्रातरश्विना ॥ प्रातर्ब्भगम्पूषणम्ब्रह्मणस्प्पतिं

म्प्रातस्सोममुतरुद्द्रꣳहुवेम ॥ ३४ ॥ प्रातर्ज्जितम्भगम् ॥ प्रात

र्ज्जितम्भगमुग्ग्रꣳहुवेमवयम्पुत्रमदितेर्य्योविधर्त्ता ॥ आद्ध्रश्चि

द॒ध्यम्मन्य॑मानस्तु॒रश्चि॒द्राजा॑चि॒द्यम्भगं॑म्भ॒क्षीत्त्याह॑ ॥३५॥
भग॒प्प्रणे॑तः ॥ भग॒प्प्रणे॑त॒र्भग॒सत्त्य॑राधो॒भग॒ेमान्धिय॒मुद॑
वा॒दद॑न्नः ॥ भग॒प्प्रणो॑जनय॒गोभि॒रश्वै॒र्भग॒प्प्रनृभि॑र्नृ॒वन्त॑ः
स्याम ॥ ३६ ॥ उ॒तेदानीम् ॥ उ॒तेदानी॒म्भग॑वन्तः स्यामो॒त
प्प्र॒पि॒त्त्वऽउ॒तमद्ध्ये॒ऽअह्ना॑म् ॥ उ॒तोदि॑तामघव॒न्त्सूर्य॑स्यव॒य
न्दे॒वाना॑ꣳसु॒मतौ॑स्याम ॥ ३७ ॥ भग॑ऽएव । भग॑वाँ२॥ऽअ

१ प्रनो जनयगोभिः । अत्र समानपदस्याभावेन "रषाभ्यां०" इत्यनेन णत्वाप्राप्तौ "निपणनाय०" इत्यनेनासमानपदेऽपि विधीयमानस्य णत्वस्य प्रनः इत्यस्य आयुषिपर एव विधानाच्च "जनयगोभिः पदे" परे णत्वम् ।

स्त्तुदेवास्त्तेनंव्वयम्भगंवन्तःस्याम ॥ तन्त्वांभगसर्व्वऽइज्जोह
वीतिसनोंभगपुरऽएताभंवेह ॥ ३८ ॥ समंध्वरायं ॥ समं
ध्वरायोषसोंनमन्तदधिक्क्रावेंवशुचंयेपदायं ॥ अर्व्वाचीनंव्वसु
विदम्भगंन्नोरथंमिवाश्वांव्वाजिनऽआवहन्तु ॥ ३९ ॥ अश्वांव
तीग्गोमंतीः ॥ अश्वांवतीग्गोमंतीर्न्नऽउषासोंव्वीरवंतीःसदमु
च्छन्तुभद्राः ॥ घृतन्दुहानाव्विश्वतःप्रपीतायूयंपातस्वस्ति



१ नऽउषासः । अत्र नकारात्परस्य उष ह्रस्वस्य [१]स्याकारस्य "उषमहोभिर्नकेमीकारे" (शु. य. प्रा. ३ अ. ११९ सू.) इत्यनेन दीर्घाकारः ।

भिꣳहसदानꣳ ॥ ४० ॥ [ १०-४ ] [1]पूषन्तवं । व्व्रतेव्वयन्नरिष्ष्ये
मकदाचन ॥ स्स्तोतारस्त्तऽइहस्स्मसि ॥ ४१ ॥ पथस्प्पथꣳ
परिपतिम् ॥ पथस्प्पथꣳपरिपतिंव्वचस्याकामेनकृतोऽअब्भ्या
नडुक्कम् ॥ सनोरासच्छुरुधश्श्चन्द्राग्ग्राधियन्धियꣳसीषधाति
प्प्रपूषा ॥४२॥ त्रीणि[2]पदाव्विचक्क्रमेव्विष्णुर्ग्गोपाऽअदाब्भ्यꣳ॥
अतोधर्म्माणिधारयन् ॥ ४३ ॥ तद्विप्प्रासꣳ ॥ तद्विप्प्रासो

---

१ पूषन्तव । अत्र "ऋषरेभ्यः" इत्यनेन समानपदे विधीयमानं णत्वं "प्रकृत्या पदान्तीयः" ( शु. य. प्रा. ३ अ. ९० सू. ) इत्यनेन निषिध्यते ।
२ "त्रीणि पदा" अत्र पदानिघटितस्य निकारस्य "निशब्दो बहुलम्" ( शु. य. प्रा. ३ अ. १८ सू. ) इत्यनेन लोपे "त्रीणि पदा" इति पदम् ।

विपन्यवोजागृवाꣳसꣳसमिन्धते ॥ विष्णोर्यत्परमम्पदम्
॥ ४४ ॥ घृतवतीभुवनानाम् ॥ घृतवतीभुवनानामभिश्रि
योर्वीपृथ्वीमधुदुघेसुपेशसा ॥ द्यावापृथिवीवरुणस्यधर्म्मणा
विष्कभितेऽअजरेभूरिरेतसा ॥ ४५ ॥ येनः । सपत्नाऽअ
पतेभवन्त्विन्द्राग्निभ्यामवबाधामहेतान् ॥ वसवोरुद्राऽ
आदित्याऽउपरिस्पृशम्मोग्रञ्चेत्तारमधिराजमक्रन् ॥ ४६ ॥
आनासत्या । त्रिभिरेकादशैरिहदेवेभिर्य्यातम्मधुपेयमश्वि

॥१२१॥

ना ॥ प्रायुस्त्तारिंह्रन्नीरपां॑ꣳसिमृक्क्षतꣳसेधं॑तन्द्वेषो॑भवं॑तꣳ
सच्चाभुर्वा ॥ ४७ ॥ एषवं॑÷ ॥ एषवुस्त्तोमोंमरुत॑ऽइयङ्गी
म्मौन्दाऽर्य्यस्यंमान्यस्यंकारोः ॥ एषायांसीष्ट्तन्व्वेव्वयांव्विद्या
मेषंव्वृजनंञ्जीरदांनुम् ॥ ४८ ॥ सहस्त्तोंमाꣳसहछन्दसꣳ ॥
सहस्त्तोंमाꣳसहछन्दसऽआवृतं॑÷सहप्प्रंमाऽऋषंयꣳसप्तदै
व्याः॥ पूर्व्वैषाम्पन्थांमनुदृश्श्यधीराऽअन्व्वालेभिरेरत्थ्योन
रश्मीन् ॥ ४९ ॥ आयुष्यंव्वर्च्चस्यम् ॥ आयुष्यंव्वर्च्चस्यꣳराय

सं. ६०

७९१

स्पोषमौद्भिदम् ॥ इदꣳहिरण्यंव्वर्च्चस्वज्जैत्रायाविशतादुमाम्
॥५०॥ [१०-५] नतत् ॥ नतद्रक्क्षांꣳसिनपिशाचास्त्तरन्तिदे
वानामोजः प्रथमजꣳह्येतत् ॥ योबिभर्त्तिदाक्क्षायणꣳहिरं
ण्यꣳसदेवेषुकृणुतेदीर्घमायुꣳसमनुष्येषुकृणुतेदीर्घमायुः
॥५१॥ यदाबद्ध्नन् ॥ यदाबद्ध्नन्दाक्क्षायणाहिरण्यꣳशता
नीकायसुमनस्यमानाः ॥ तन्मऽआबद्ध्नामिशतशारदायायु ।। १२२ ।।
ष्म्माञ्जरदष्टिर्य्यथासम् ॥५२॥ उतनः ॥ उतनोहिर्बुद्ध्न्यः

शृणोत्त्वज ऽएकंपात्पृथिवीसंमुद्रः ॥ विश्वेंदेवा ऽऋंतावृधोंहु
वानास्त्तुतामन्त्रांऽकविशस्त्ताऽअंवन्तु ॥५३॥ इमागिरंः ॥ इ
मागिरंऽआदित्त्येभ्योंघृतस्नूंऽसनाद्राजंभ्योजुह्वाजुहोमि ॥
शृणोतुंमित्रोऽअंर्य्यमाभगोंनस्त्तुविजातोवरुंणोदक्षोऽअं
शंः ॥५४॥ सप्तऽऋषंयः ॥ सप्तऽऋषंयःप्रतिंहिताःशरींरे
सप्तरंक्षन्तिसदुमप्प्रंमादम् ॥ सप्तापःस्वपंतोलोकमींयुस्त्त
त्रंजागृतोऽअस्वंप्नजौसत्रसदौंचदेवौ ॥ ५५ ॥ उत्तिंष्ठ ।

ब्रह्मणस्पतेदेवयन्तंस्त्वेमहे ॥ उपप्प्रयन्तुमरुतंःसुदानंवऽ

इन्द्रंप्प्राशूर्भवासचां ॥५६॥ प्रनूनम् ॥ प्रनूनम्ब्रह्मणस्प्पतिर्म्मं

त्रंवदत्युक्थ्यम् ॥ यस्मिन्निन्द्रोवरुणोमित्रोऽअर्य्यमादे

वाऽओकांꣳसिचक्क्रिरे ॥५७॥ ब्रह्मणस्प्पते ॥ ब्रह्मणस्प्पतेत्त्व

मस्ययन्तासुक्तस्यंबोधितनंयञ्चजिन्व ॥ विश्श्वन्तद्भद्रँय्यदवं

१ ब्रह्मणस्पते। अत्र विसर्जनीयस्य "प्रकृत्या कखयोः पफयोश्च" (शु. य. प्रा. ३ अ. ११ सू.) इत्यनेन प्रकृतिभावे प्राप्तेऽपि "पतितालव्यस्वरोदये" (शु. य. प्रा. ३ अ. ३५ सू.) इत्यनेन पतिशब्दे परे सकारो विधीयते। तत "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन पकारस्य द्वित्वम्। २ भव सचा इति पदम्। वकाराकारस्य सचा परे "सचावरूथ्यवाजस्पायुषु च" (शु. य. प्रा. ३ अ. ११० सू.) इत्यनेन एतेषु परेषु भवेत्येतत्पदं दीर्घं भवति। अतो दीर्घाकारे भवासचा इति पदम्।

न्तिदेवाबृहद्वदेमविदथेसुवीराः ॥ यऽइमाविश्वाविश्वकर्म्मा योनः पिताऽन्नपतेन्नस्यनोदेहि ॥ ५८ ॥ [ ८-६ ] ॥ इति श्री-वाजसनेयसंहितायां चतुस्त्रिंशोऽध्यायः ॥३४॥ श्रीवेदपुरुषाय नमः ॥ अनुवाकसूत्रम् ॥ अपेतो दश, पाघन्द्वादश, द्वौ द्वाविꣳशतिः [ अ. ३५ मं. २२ अनु. २ ] ॥ हरिःॐ॥अपेतश॥ अपेतो यन्तुपणयोसुम्न्नादेवपीयवः॥ अस्यलोकश्सुतावतः ॥ द्युभिरहोभिरक्तुभिर्व्यक्तꣳयमोददात्त्ववसानमस्म्मै ॥ १ ॥ सवि

१ यऽइमाविश्वा. अ. १७ मं. १७ ॥ १ विश्वकर्माविमना. अ. १७ मं. २६ ॥ १ योनः पिता. अ. १७ मं. २७ ॥ १ अन्नपतेन्नस्य. अ. ११ मं. ८३ ॥ इति प्रतीकानि ॥

शु. य. संहि. ॥१२४॥ तातें ॥ सवितातेशरीरेभ्यःपृथिव्याँल्लोकमिच्छतु ॥ तस्मै उ. वि. अ.
युज्यन्तामुस्रियाः ॥ २ ॥ वायुःपुनातु । सवितापुनात्व ॥ ३५ ॥
ग्नेर्भ्राजसासूर्य्यस्यवर्च्चसा ॥ विमुच्यन्तामुस्रियाः ॥ ३ ॥
अश्वत्थेवः ॥ अश्वत्थेवोनिषदनम्पर्णेवोवसतिष्कृता ॥
गोभाजइत्किलासथयत्सनवथपूरुषम् ॥ ४ ॥ सवितातें ॥
सवितातेशरीराणिमातुरुपस्थआवपतु ॥ तस्मैपृथिविश ॥ १२४ ॥
म्भव ॥ ५ ॥ प्रजापतौत्वा । देवतायामुपोदकेलोकेनिद

धाम्म्यसौ ॥ अपंनुᳪशोशुंचदुघम् ॥ ६ ॥ परंम्मृत्त्यो ॥
परंम्मृत्त्योऽअनुपरेंहिपन्थाँम्यस्त्तेंऽअन्यऽइतंरोदेवयानांत् ॥
चक्क्षुंष्म्मतेशृण्ण्वतेतेंब्रवीमिमानंःप्प्रजाᳪरींरिषोमोतवीरान्
॥ ७ ॥ शंव्वातंः ॥ शंव्वातुᳪशᳪहितेघृणिᳪशन्तेंभवन्त्विष्टं
काᳪ ॥ शन्तेंभवन्त्वग्नयᳪपार्त्थिवासोमात्त्वाभिशूंशुचन्
॥ ८ ॥ कल्प्पंन्तान्ते ॥ कल्प्पंन्तान्तेदिशस्त्तुब्भ्यमापंःशि
वतंमास्त्तुब्भ्यंम्भवन्तुसिन्धंवᳪ ॥ अन्तारिंक्षᳪशिवन्तुब्भ्य

[illegible]न्तान्तेदिशुहंसर्व्वाः ॥९॥ अश्मन्वतीरीयतेसंरंभद्ध्वमु
[illegible]प्रतंरतासखायः ॥ अत्रांजहीमोशिंवायेऽअसंञ्छिवान्व
[illegible]मुत्तरेमाभिवाजान् ॥ १० ॥ [१०-१] अपाघम् ॥ अपाघमप
[illegible]षमपकृत्त्यामपोरपः ॥ अपामार्ग्गत्त्वमस्म्मदपदुःष्व
[illegible]प्न्यंसुव ॥ ११॥ सुमित्रियानः ॥ सुमित्रियानऽआपऽओषं
[illegible]सन्तुदुर्म्मित्रियास्तस्म्मैसन्तुयोस्म्मान्द्वेष्टियञ्चवयन्द्वि ॥ १२५ ॥

१ अत्रा जहीमः । अत्र जहीमः इति पदे परे अत्रशब्दस्य ह्रस्वाकारस्य "पूर्णो जहीममेष्वत्र" (शु. य. प्रा. ३ अ. १२१ सू.) इत्यनेन दीर्घो भवति ।
२ दुःष्वप्न्यᳪं सुव । अत्र "भाविभ्यः सः षं समानपदे" (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन विसर्जनीयस्य व्यवधानात्षत्वाप्राप्तौ "दुःष्वप्न्यम्" (शु. य. प्रा. ३ अ. ७३ सू.) इत्यनेन दोःपरात्स्वप्नघटितसस्य षत्वं निपात्यते ।

ष्म्मः ॥१२॥ अनड्वाहमन्वारभामहे ॥ अनड्वाहमन्वारभाम
हे सौरभेयᳪस्वस्तये ॥ सनऽइन्द्रऽइवदेवेभ्योवह्निः सन्तार
णोभव ॥ १३ ॥ उद्वयम् ॥ उद्वयन्तमसस्परिस्वः पश्यं
न्तऽउत्तरम् ॥ देवन्देवत्रासूर्य्यमगन्मज्योतिरुत्तमम् ॥ १४॥
इमञ्जीवेभ्यः । परिधिन्दधामिमैषान्नुगादपरोऽअर्थमेतम् ॥
शतञ्जीवन्तुशरदः पुरूचीरन्तर्म्मृत्युन्दधताम्पर्वतेन ॥ १५ ॥

१ अनस् वाहम् इति पदम् । अत्र "अनसो वाहौ सकारो डकारम्" ( शु. य. प्रा. ३ अ. ४५ सू. ) अत्र अनश्शब्दस्य सकारस्य वाहौ परे डकारो विधीयते तेन अनड्वाहम् ।

अग्नऽआयूꣳषि । पवसऽआसुवोर्ज्जमिषञ्चनः ॥ आरेबाध
स्वदुच्छुनाम् ॥ १६ ॥ आयुष्मानग्ने । हविषावृधानोघृत
प्प्रतीकोघृतयोनिरेधि ॥ घृतम्पीत्त्वामधुचारुगव्यम्पितेवपुत्र
मभिरक्षतादिमान्त्स्वाहा ॥ १७॥ परीमे । गामनेषतपर्य्य
ग्निमहृषत ॥ देवेष्ष्वक्रतश्रवःकऽइमाँ२॥ऽआदधर्षति
॥ १८ ॥ क्रव्यादमग्निम् ॥ क्रव्यादमग्निम्प्रहिणोमिदूरँय्य
मराज्ज्यङ्गच्छतुरिप्रवाह[1] ॥ इहैवायमितरोजातवेदादेवेभ्यो



---

१ प्रहिणोम्मि ॥ अत्र समानपदत्वाभावेन "ऋषरेभ्यः" इत्यनेन णत्वाप्राप्तौ "प्र नेतिनुदातिहिनोमीनाम्" (शु. य. प्रा. ३ अ. ८९ सू.) इत्यनेन णत्वम् ।

हव्यंवहतुप्रजानन् ॥ १९ ॥ वहंवपाम् ॥ वहंवपाञ्जातवेदः
पितृभ्योयत्रैनान्वेत्थनिहितान्पराके ॥ मेदसःकुल्याऽउप
तान्त्स्रवन्तुसत्त्याऽएषामाशिषःसन्नमन्ताᳪस्वाहा ॥ २० ॥
स्योनापृथिवि । नोभवान्नृक्षरानिवेशनी ॥ यच्छानःशर्म्म
सप्प्रथाः ॥ अपनःशोशुचदघम् ॥ २१ ॥ अस्म्मात्त्वम् ॥
अस्म्मात्त्वमधिजातोसित्त्वदयञ्जायताम्पुनः ॥ असौस्वर्ग्गा
यंलोकायस्वाहा ॥ २२ ॥ [१२-२] इति श्रीवाजसनेयसंहि-

तायां पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥ श्रीवेदपुरुषाय नमः ॥
अनुवाकसूत्रम् ॥ ऋचंवाचꣳषोडश, द्यौःशान्तिरष्टौ, द्वौ
चतुर्विꣳशतिः [अ. ३६ मं. २४ अनु. २] ॥ हरिः ॐ ॥
ऋचंवाचंम् ॥ ऋचंवाचम्प्रपंद्येमनोयजुःप्रपंद्येसामंप्प्राण
म्प्रपंद्येचक्षुःश्रोत्रम्प्रपंद्ये ॥ वागोजंःसुहौजोमयिंप्प्राणापा
नौ ॥ १ ॥ यन्मे । च्छिद्रञ्चक्षुंषोहृदंयस्यमनंसोवातिंतृण्णम्बृ
हस्पतिंर्म्मतेंदधातु ॥ शन्नोंभवतुभुवंनस्ययस्पतिंः ॥ २ ॥

भूर्भुवः ॥ भूर्भुवःस्वः तत्सवितुर्वरेण्यम्भर्गोदेवस्यधीम

हि ॥ धियोयोनः प्रचोदयात् ॥ ३ ॥ कयानः ॥ कयानश्चित्रऽ

आभुवदूतीसदावृधः सखा ॥ कयाशचिष्ठयावृता ॥ ४ ॥ क

स्त्वा । सत्योमदानाम्मंहिष्ठोमत्सदन्धसः ॥ दृढाचिदारु

जेवसु ॥५॥ अभीषुणः ॥ अभीषुणः सखीनामविताजरितॄणा

म् ॥ शतम्भवास्यूतिभिः ॥६॥ कयात्वम् ॥ कयात्वन्नऽऊत्या

---

१ अभीषुणः । अत्र अभिसुनः इति पदम् । अत्र "अभेश्च" (शु. य. प्रा. ३ अ. ६३ सू.) इत्यनेन अभेरुपसर्गात्परस्य सुशब्दस्य षत्वे रूपम् ।

भिष्प्रमंन्दसेव्वृषन् ॥ कयांस्त्तोतृब्भ्युऽआभंर ॥ ७ ॥ इन्द्रो
व्विश्वंस्य राजति ॥ शन्नोंऽअस्त्तुद्विपदेशञ्चतुंष्प्पदे ॥ ८ ॥
शन्नंः ॥ शन्नोंमित्रश्शंव्वरुंणꣳशन्नोंभवत्त्वर्य्यमा ॥ शन्नऽइ
न्द्रोबृहस्प्पतिꣳशन्नोव्विष्ण्णुंरुरुक्क्रमः ॥ ९ ॥ शन्नोव्वातंः ।
पवताꣳशन्नंस्त्तपतुसूर्य्यः ॥ शन्नꣳकनिंक्क्रदद्देवःपर्ज्जन्न्योऽ
अभिवंर्षतु ॥ १० ॥ अहांनिशम् ॥ अहांनिशम्भंवन्तुनꣳश
ꣳरात्रीꣳप्रतिंधीयताम् ॥ शन्नंऽइन्द्राग्ग्नीभंवतामवोंभिꣳश

न्नऽइन्द्रावरुणारातहव्या ॥ शन्नऽइन्द्रापूषणावाजंसातौशमि
न्द्रासोमासुवितायशँय्योः ॥ ११ ॥ शन्नं ॥ शन्नोदेवीरभि
ष्टयऽआपोभवन्तुपीतये ॥ शँय्योरभिस्रवन्तुनः ॥ १२ ॥
स्योनापृथिवि । नोभवानृक्षरानिवेशनी ॥ यच्छानःशर्म्मस
प्रथाः ॥ १३ ॥ आपोहि । ष्ठामयोभुवस्तानऽऊर्ज्जेदधात
न ॥ महेरणायचक्षसे ॥ १४ ॥ योवः । शिवतमोरसस्तस्य

१ अत्र यच्छ नः इति पदम् । यच्छ इत्यस्य ह्रस्वाकारस्य नः इत्यस्य नकारे परे "धारयामयोजावसचस्वनुदमोवुजयतोरुष्यरक्षयजयच्छमत्स्वपिपृत-गायतातुयेन नकारे ( शु. य. प्रा. ३ अ. १०८ सू. ) इत्यनेन दीर्घाकारे कृते यच्छानः ।

भाजयतेहनंः ॥ उशतीरिवमातरंः ॥ १५॥ तस्म्माऽअरंम् ॥
तस्म्माऽअरङ्गमामवोयस्यक्क्षयायजिन्वथ ॥ आपोजनयं
थाचनः ॥ १६ ॥ [१६-१] द्यौःशान्तिः ॥ द्यौःशान्तिरन्त
रिक्क्षःशान्तिःपृथिवीशान्तिरापःशान्तिरोषधयःशान्तिः ॥
वनस्प्पतंयःशान्तिर्व्विश्श्वेदेवाःशान्तिर्ब्रह्मशान्तिःसर्व्वःशा
न्तिःशान्तिरेवशान्तिःसामाशान्तिरेधि ॥ १७ ॥ दृतेदृꣳह
मा । मित्त्रस्यमाचक्क्षुषासर्व्वाणिभूतानिसमीक्क्षन्ताम् ॥ मित्त्र

स्याहञ्चक्षुंषासर्वांणिभूतानिसमीक्क्षे ॥ मित्रस्यचक्क्षुंषासमी
क्क्षामहे ॥ १८ ॥ दृतेदृढंहं मा । ज्योक्त्तेंसन्दृशिंजीव्यासु
ज्योक्त्तेंसन्दृशिंजीव्यासम् ॥ १९ ॥ नमंस्त्ते ॥ नमंस्त्तेहरं
सेशोचिषेनमंस्त्तेऽअस्त्वर्चिषें ॥ अन्न्याँस्त्तेंऽअस्म्मत्तंपन्तु
हेतयंः पावकोऽअस्म्मब्भ्यंꣳशिवोभंव ॥ २० ॥ नमंस्त्ते ।
ऽअस्तुविद्युतेनमंस्त्तेस्त्तनयित्क्नवें ॥ नमंस्त्तेभगवन्नस्त्तुयतंः
स्वंः समीहंसे ॥ २१ ॥ यतोंयतंःसमीहंसेततोंनोऽअभंयङ्कुरु ॥

शन्नः॑ कुरु प्प्रजाभ्यो॒ऽभ॑यन्नः प॒शुभ्यः॑ ॥२२॥ सुमि॒त्रियानः॑॥
सुमि॒त्रिया न॒ऽआप॒ऽओष॑धयः सन्तु दु॒र्म्मित्रियास्तस्म्मै सन्तु
यो॒स्म्मान्द्वेष्टि॒यञ्च॑ व॒यन्द्वि॒ष्म्मः॑ ॥२३॥ तच्चक्षुः॑ ॥ तच्चक्षु॑
र्द्दे॒वहि॑तम्पु॒रस्त्ता॑च्छु॒क्क्रमुच्च॑रत् ॥ पश्ये॑म श॒रदः॑ श॒तञ्जीवे॑
म श॒रदः॑ श॒तꣳ शृणु॑याम श॒रदः॑ श॒तम्प्रब्र॑वाम श॒रदः॑ श॒तमदी॑
नाः स्याम श॒रदः॑ श॒तम्भूय॑श्च श॒रदः॑ श॒तात् ॥ २४ ॥ [८-२] ॥ १२० ॥
इति श्रीवाजसनेयसंहितायां षट्त्रिंशोऽध्यायः ॥ ३६ ॥ ॥

श्रीवेदपुरुषाय नमः ॥ अनुवाकसूत्रम् ॥ देवस्यत्त्वा दश, यमाय
त्त्वैकादश, द्वा,वेकविꣳशतिः [अ. ३७ म. २१ अनु. २] ॥
हरिः ॐ॥ देवस्यत्त्वा । सवितुश्प्प्रसवेश्विनोर्ब्बाहुब्भ्याम्पूष्णो
हस्ताब्भ्याम् ॥ आददेनारिरसि ॥ १ ॥ युञ्जतेमनः ॥ युञ्ज
तेमनऽउतयुञ्जतेधियोव्विप्प्राव्विप्प्रस्यबृहतोव्विपश्चितः ॥ विहो
त्रान्दधेव्वयुनाविदेकऽइन्महीदेवस्यसवितुश्परिष्टुतिः ॥ २ ॥
देवीद्यावापृथिवी । मखस्यवामद्यशिरोराद्ध्यासन्देवयजनेपृथि

व्याः ॥ मुखायंत्त्वामुखस्यंत्त्वाशीष्णे ॥ ३ ॥ देव्योँव्व
म्मय्यं ॥ देव्योँव्वम्भ्रयोभूतस्यंप्प्रथमुजामुखस्यंवोद्यशिरौराद्धा
सन्देवुयजंनेपृथिव्याः ॥ मुखायंत्त्वामुखस्यंत्त्वाशीष्ष्णे ॥४॥
शतम् ॥ १९०० ॥ इयुत्त्यग्ग्रे ॥ इयुत्त्यग्ग्रेऽआसीन्मुखस्यं
तेद्यशिरौराद्धासन्देवुयजंनेपृथिव्याः ॥ मुखायंत्त्वामुखस्यं
त्त्वाशीष्ष्णे ॥ ५ ॥ इन्द्रुस्यौजंः ॥ इन्द्रुस्यौजंस्त्थमुखस्यंवो
द्यशिरौराद्धासन्देवुयजंनेपृथिव्याः ॥ मुखायंत्त्वामुखस्यंत्त्वा

शीर्षण्णें ॥ मखायंत्त्वामखस्यंत्त्वाशीर्षण्णें ॥ मखायंत्त्वामखस्यं
च । स्वरितश्चेद् भवेत्तश्चात्स एव निहितः स्मृतः ॥ उदात्तान्निहितः स्यार्यः स्यारोदात्तो न तत्परं ॥ स्वरो यश्च तथाभूतो ज्ञेयः स प्रचयः सदा ॥ उदात्तानुदात्तयोर्योगे स्वरितः स्वर उच्यते । एवं तत्प्रचयः प्रोक्तः मन्त्रिषेण मिथोद्धृतः ॥ मात्रिकं वा द्विमात्रिकं वा स्वरितं यदिहाक्षरम् । तस्यादितोऽर्धमात्रा वै शेषं च परतो भवेत् ॥ उच्चस्थानगते ह्रस्वे स्वरितं नोपपद्यते । अधस्तात्तु यदा गच्छेत् स्वरितं न तदा भवेत् ॥

९१३

रौद्रा दन्त्यास्तकारादयः॥ औष्ठ्या आश्विन्याः पकारादयः॥ शेषा वैश्वदेवाः॥ अम् इत्येवमादयः॥ स्वरास्तु ब्राह्मणा ज्ञेया वर्गाणां प्रथमाश्च ये ॥ द्वितीयाश्च तृतीयाश्च चतुर्थाश्चापि भूमिपाः ॥ २ ॥ वर्गाणां पञ्चमा वैश्या अन्तःस्थाश्च तथैव च ॥ ऊष्माणश्च हकारश्च शूद्रा एव प्रकीर्त्तिताः ॥ ३ ॥ शुक्लवर्णानि नामानि आख्याता रोहिता मताः ॥ कपिञ्जलास्तूपसर्गाः कृष्णाश्चैव निपातकाः ॥ ४ ॥ भार्गवगोत्राणि नामानि भारद्वाजा आख्याताः॥ वासिष्ठा उपसर्गास्तु निपाताः काश्यपाः स्मृताः ॥ पीतवर्णश्चोपसर्गो निपातः कृष्णवर्णकः ॥ सर्वं तु सौम्यमाख्यातं नाम वायव्यं दृश्यते ॥ आग्नेयस्तूपसर्गः स्यान्निपातो वारुणः स्मृतः ॥ ५ ॥ प्रथमाश्च तथान्तःस्थाः स्त्रीलिङ्गाः परिकीर्त्तिताः ॥ शेषाक्षराणि षण्ढानि प्राहुर्लिङ्गविवेचकाः ॥ ६ ॥ नाम्नामिन्द्रो देवता वरुण उपसर्गाणामादित्यः सर्वस्याक्षरगणस्य स्वरा विसर्जनीयो यमाश्च पुँल्लिङ्गाः॥ ङञणनमा यरलवाः स्त्रीलिङ्गाः ॥ शेषाण्यक्षराणि नपुंसकलिङ्गानीति ॥ सन्धिश्चतुर्विधो भवतीति ॥ लोपागमौ वर्ण-



१ आदित्यो मुनिभिः प्रोक्तः सर्वाक्षरगणस्य च । स्वरा विसर्जनीयाश्च यमाः पुँल्लिङ्गकाः स्मृताः ॥

विकारः प्रकृतिभावश्चेति ॥ तद्यथा । तत्र लोपो भवति । अयक्ष्माः मा। अयक्ष्मामा ॥ शततेजाः वायुः । शततेजावायुः ॥ तिग्मतेजाः द्विषतः ॥ तिग्मतेजाद्विषतः ॥ इति लोपः ॥ आगमो भवति । यथा–प्रत्यङ्सोमः प्रत्यङ्क्सोमः ॥ प्राङ्सोमः प्राङ्क्सोमः ॥ अस्मान् सीते । अस्मान्त्सीने ॥ त्रीन् समुद्रान् । त्रीन्त्समुद्रान् ॥ इति आगमः ॥ विकारो भवति । यथा–आ इदम् । एदम् ॥ आ इमे । एमे ॥ आ इष्टयः । एष्टयः ॥ प्र इषितः । प्रेषितः ॥ इति विकारः ॥ प्रकृतिभावः । यथा–आशुः शिशानः ॥ युञ्जानः प्रथमम् ॥ अदितिः षोडशाक्षरेण ॥ देवो वः सविता ॥ इति प्रकृतिभावः ॥ आकाशस्था यथा विद्युत्स्फुटितं मणिसूत्रवत् ॥ एष च्छेदोविवृत्तीनां यथा बालेषु कर्तरी ॥ ७ ॥ द्वयोस्तु स्वरयोर्मध्ये सन्धिर्यत्र न दृश्यते ॥ विवृत्तिस्तत्र विज्ञेया य ईशेति निदर्शनम् ॥८॥ पिपीलिका पाकवती तथा वत्सानुसारिणी ॥ वत्सानुसंसृता (जा) चैव चतस्रस्तु विवृत्तयः ॥९॥ पञ्च रङ्गाः प्रवर्तन्ते घातनिर्घातवज्रिणः ॥ अहरप्रहरो ज्ञेय अइउऋओ इति निदर्शनम् ॥१०॥ पिपीलिका आद्यन्तदीर्घा नाभ्याऽआसीदिति निदर्शनम् ॥ पाकवत्युभयोर्ह्रस्वा

विनऽइन्द्रेति निदर्शनम् ॥ ११ ॥ अन्ते च वत्सानुसृजता तानेत्यसौ आवोढमश्विनेति नि० ॥
वत्सानुसारिणी चादौ दीर्घा ताऽअस्येति नि० ॥ १२ ॥ करिणी कुर्विणी चैव हरिणी हारिणीति च ॥
तथा हंसपदा नाम पञ्चैताः स्वरभक्तयः ॥ १३ ॥ करिणी रहयोर्योगे कुर्विणी लहकारयोः ॥
हरिणी र(श)षयोर्योगे हारितं ऋषकारयोः ॥ १४ ॥ या तु हंसपदा नाम सा तु रेफषकारयोः ॥
हरिणी हरयोर्विद्यात्कुर्विणी ल्हकारयोः ॥ १५ ॥ देवम्बर्हिरिति करिणी उपह्व(बल्ह)रेति कुर्विणी ॥
हरिणीं अरे(प)षस इत्याहुर्हारिणी शतवल्हेति च ॥ १६ ॥ वर्षोवर्षीयतेसीति तथा हंसपदेति च ॥
स्वरभक्तिं प्रयुञ्जानस्त्रीन्दोषान्परिवर्जयेत् ॥ १७ ॥ इकारं चाप्युकारं च ग्रस्तदोषं तथैव च ॥
एतल्लक्षणमाख्यातं याज्ञवल्क्येन धीमता ॥ १८ ॥ सम्यक् पाठस्य सिद्ध्यर्थं शिष्याणां हितकाम्यया ॥
अर्धमात्रास्वरं किञ्चित्पृथङ्न्यूनमिवोच्चरन् ॥ ऋकारे च हकारे च हृत्कण्ठमनसानि[2] च ॥ १९ ॥
नैतत्स्वरितपूर्वाङ्गे नापराङ्गे कथञ्चन ॥ न स्वरे न च मात्रायां कथं स्वारो विधीयते ॥ २० ॥

---

१ रलाभ्यां पर ऊष्माणो यत्र स्युः स्वरितोदयाः । स्वरभक्तिरसौ ज्ञेया पूर्वमाक्रम्य पठ्यते ॥ २ पि च ।

पराङ्गस्य तु यत्पूर्वं पूर्वाङ्गस्य तु यत्परम् ॥ उभयार्द्धर्द्धिसंयोगे स्वारं कुर्याद्विचक्षणः ॥ २१ ॥
संयोगे तु परं स्वार्थं परं संयोगनामकम् ॥ संयुक्तस्य तु वर्णस्य न स्वार्थं पूर्वमक्षरम् ॥ २२ ॥
उदात्तादनुदात्ते तु वामाया भ्रुव आरभेत् ॥ उदात्तात्स्वरितोदात्तौ क्रमाद्दक्षिणतो न्यसेत् ॥ २३ ॥
स्वरितादनुदात्ता ये प्रचयांस्तान्प्रचक्षते ॥ एकस्वरानपि च तानाहुस्तत्त्वार्थविचिन्तकाः ॥ २४ ॥
प्रचयो यत्र दृश्येत तत्र हन्यात्स्वरं बुधः ॥ स्वरितः केवलो यत्र मृदुस्तत्र निपातयेत् ॥ २५ ॥
दुर्बलस्य यथा राष्ट्रं हरते बलवान्नृपः ॥ एवं व्यञ्जनमासाद्य अकारो हरते स्वरम् ॥ २६ ॥
उच्चादुच्चतरं नास्ति नीचान्नीचतरं तथा ॥ अक्षरात्तुल्ययोगाच्च नीचे नीचंगतानि च ॥ २७ ॥
स्वर उच्चः स्वरो नीचः स्वरः स्वरित एव च ॥ स्वरप्रधानैस्तैः स्वार्यं व्यञ्जनं तेन सस्वरम् ॥ २८ ॥
व्यञ्जनान्यनुवर्तन्ते यत्र तिष्ठति सस्वरः ॥ स्वरप्रधानं त्रैस्वर्यमाचार्याः प्रवदन्ति हि ॥ २९ ॥
मणिवद्व्यञ्जनं विद्यात्सूत्रवच्च स्वरं विदुः ॥ आचार्याः सममिच्छन्ति पदच्छेदं तु पण्डिताः ॥ ३० ॥

---

२ अवग्रहे पदच्छेदे उदात्तो दृश्यते यदि । स्वरान्तं स्वरितं प्राहुः सन्धौ तु स्वार्यते परम् ॥ स्वरसन्धिविधानेन नीचोच्चत्वं विधीयते । व्यञ्जनाद्वा स्वराद्वापि तत्सन्धौ स्वर उच्यते ॥

त्रि[1]यो मधुरमिच्छन्ति विक्रुष्टमितरे जनाः ॥ उदात्तं नानुवर्तन्ते नीचन्न स्वरितं तथा ॥ ३१ ॥ विस्वरं तं विजानीयाद्दीर्घह्रस्वविवर्जितम् ॥ हरिवरुणवरेण्येषु धारापुरुषेषु च ॥ स्वरिते रेफवैश्वानरो नकारः शेषाकारः स्वरिता नकाराः ॥३२॥ द्वौ वरुणौ च स्वरितौ ॥ उदुत्तमं वरुणधारयंवरोरुधारा उरुधारा च हो[2]इते ॥ मात्रिकं वा द्विमात्रं वा स्वरितं यदिहाक्षरम् ॥ तस्यादितोऽर्द्धमात्रा वै शेषं च परतो भवेत् ॥ ३३ ॥ नकारान्ते पदे पूर्वे श्मश्रुभिः परतः स्थिते ॥ छकारं न प्रयुञ्जीत ञशसन्धि समुच्चरेत् ॥ ३४ ॥ ओकारं प्लुतविज्ञेयं प्लुतमग्नाद्वितीयकम् ॥ लाजीं छाचीं तृतीयं च विवेशेति चतुर्थकम् ॥ ३५ ॥ अधःस्विदासीत्पञ्चमं चोपरिस्विदासीच्च षष्ठकम् ॥ सप्तमं तु भ्रुवोः स्मार अष्टमं नैव विद्यते ॥ ३६ ॥ उच्चस्थानगते हस्ते स्वरितं नोपपद्यते ॥ अधःस्था तु यदा गच्छेत्स्वरितं न तदा भवेत् ॥ कचटतपा दृश्यन्ते सन्धिस्थानेषु नित्यशः ॥ स्ववर्गेणैव संयुक्ता मोक्षं तत्र न [3]कारयेत् ॥ तकारान्ते पदे पूर्वे सकारे परतः स्थिते ॥ प्रत्यारम्भन्न कुर्वीत पापावित 

---

१ उदात्तं नानुवर्तेत नीचं न स्वरितं तथा । विस्वरं तु विजानीयाद्दीर्घह्रस्वविवर्जितम् ॥ २ दोहने० । ३ कुर्वीत ।

निदर्शनम् ॥ ककारान्ते पदे पूर्वे सकारे परतः स्थिते ॥ खसवर्णं विजानीयात् भिखक्सेति निदर्शनम् ॥ तकारान्ते पदे पूर्वे चवर्गे परतः स्थिते ॥ मोक्षं तत्र च कुर्वीत यच्च पापौ निदर्शनम् ॥ ङकारान्ते पदे पूर्वे सकारे परतः स्थिते ॥ कसवर्णं विजानीयात्प्राङ्क्सोमेति निदर्शनम् ॥ टकारान्ते पदे पूर्वे सकारे परतः स्थिते ॥ टसवर्णं विजानीयात्सम्म्राट्ट्भृतेति निदर्शनम् ॥ तकारान्ते पदे पूर्वे सकारे परतः स्थिते ॥ छसवर्णं विजानीयात् तत्सवितुरिति निदर्शनम् ॥ नकारान्ते पदे पूर्वे सकारे परतः स्थिते ॥ तसवर्णं विजानीयात्रीन्त्समुद्रेति निदर्शनम् ॥ पकारान्ते पदे पूर्वे शकारे परतः स्थिते ॥ छसवर्णं विजानीयादनुष्टुप्छारदीति निदर्शनम् ॥ मकारान्ते पदे पूर्वे सवर्णे परतः स्थिते ॥ मसवर्णं विजानीयादिमम्मेति निदर्शनम् ॥ वर्णे तु मात्रिके पूर्वे अनुस्वारो द्विमात्रकः ॥ द्विमात्रे मात्रिको ज्ञेयः संयोगाद्यस्य यो भवेत् ॥ अनुस्वारो द्विमात्रः स्याद्दवर्णव्यञ्जनादिगः ॥ ह्रस्वाद्वा यदि वा दीर्घाद्देवानाᳬहृदयेभ्य इति ॥ अनुस्वारस्योपरिष्टात्संवृतं यत्र दृश्यते ॥ दीर्घं तं तु विजानीयाच्छ्रोताग्रावाणेति निदर्शनम् ॥ अनुस्वारस्योपरिष्टात्संयोगो यत्र दृश्यते ॥ ह्रस्वं तं तु विजानीयात्सꣳस्थेति निदर्शनम् ॥ अनुस्वारश्च यो दीर्घादक्षराद्यो भवेत्परः ॥

स तु ह्रस्व इति ज्ञेयो मन्त्रेष्वेव विभाषया ॥ ओभावश्च विवृत्तिश्च शषसा रेफ एव च ॥
जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः ॥ यथा भावप्रसन्धानमुकारादिपरं पदम् ॥
स्वरान्तं तादृशं विद्याद्यदन्यद्व्यक्तमूष्मणः ॥ उभावादुत्थितश्चोष्मा तां तु केलिं विनिर्दिशेत् ॥
विवृतं प्रति या ऊष्मा विज्ञेया विकटानना ॥ लीढातिलीढविद्युच्च शषसेषु प्रकीर्तिताः ॥
जिह्वामूले च रेफे च विज्ञेया विठकाशठाः ॥ उपध्मानीयसंहितां पुष्पिणीं तां विनिर्दिशेत् ॥
अन्यत्र यो भवेदूष्मा सुलभां तां विनिर्दिशेत् ॥ पादाद्यन्तं पदाद्यन्तं तथावग्रहकालिकम् ॥
ईषत्स्पृष्टं विजानीयात्तस्मिन्काले तु कारयेत् ॥ पादादौ च पदादौ च संयोगावग्रहेषु च ॥
यः(य)शब्द इति विज्ञेयो योन्यः स य इति स्मृतः ॥ उपसर्गपरो यस्तु पदादिरपि दृश्यते ॥
ईषत्स्पृष्टं यथा विद्युत्पदच्छन्दात्परं भवेत् ॥ त्वदर्थवाचिनौ वो वां वा वै यदि निपातजौ ॥
आदेराजविकल्पार्था ईषत्स्पृष्टा इति स्मृताः ॥ विभाषायामेकारः स्यात्तथा नेतैः पदात्परः ॥ ॥ १८६ ॥
भवन्तेत्यपि पूर्वेत्र तथा च सपदादपि ॥ यदेव लक्षणं यस्य वकारस्यापि तद्भवेत् ॥
यत्र यत्र विशेषः स्यादिदानीं स स कथ्यते ॥ वकारस्त्रिविधः प्रोक्तो गुरुर्लघुर्लघूत्तरः ॥

आदौ गुरुर्लघुर्मध्ये पदान्ते तु लघूत्तरः ॥ उपांशु त्वरितं चैव योऽधीते हृदि संज्ञकः ॥
अपि रूपसहस्रेषु सदेहेषु प्रवर्तते ॥ पञ्चविद्यां न गृह्णन्ति जडाः स्तब्धाश्च ये नराः ॥
आलस्याश्चैव रोगाश्च येषां च विस्मृतं मनः ॥ अहिरिव गणाद्भीतः संमानान्नरकादिव ॥
राक्षसीभ्य इव स्त्रीभ्यः स विद्यामधिगच्छति ॥ न भोजनविलम्बी स्यान्न च नारीनिबन्धनः ॥
सुदूरमपि विद्यार्थी व्रजेद्गरुडहंसवत् ॥ यथा खनन्खनित्रेण नरो वार्यधिगच्छति ॥ तथा गुरुगतां
विद्यां शुश्रूषुरधिगच्छति ॥ सुखार्थी चेत्त्यजेद्विद्यां विद्यार्थी चेत्त्यजेत्सुखम् ॥ सुखिनस्तु कुतो
विद्या सुखं विद्यार्थिनः कुतः ॥ गुणिता शतशो विद्या सहस्रावर्तिता पुनः ॥ आगमिष्यति जिह्वाग्रे
स्थलनिम्नमिवोदकम् ॥ शतेन गुणिता विद्या सहस्रेण च तिष्ठति ॥ शतानां च सहस्रेण प्रत्यक्षद-
वतिष्ठति ॥ जलमभ्यासयोगेन शिलायाः कुरुते क्षयम् ॥ कर्णार्णामृदुतस्तस्य किमभ्यासान्न
साध्यते ॥ गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा ॥ अथवा विद्यया विद्या चतुर्थं नोपलभ्यते ॥
शुश्रूषारहिता विद्या ह्यल्पमेधागुणैः सह ॥ वन्ध्या च यौवनी तस्या न विद्या फलिनी भवेत् ॥
हयानामिव जात्यानामर्द्धमात्रार्द्धशायिनाम् ॥ न हि विद्यार्थिनां निद्रा चिरं नेत्रेषु तिष्ठति ॥

यथा पिपीलिकाभिः पांसुभिर्वल्मीकं क्रियते महत् ॥ न तत्र बलसामर्थ्यमुद्यमस्तत्र कारणम् ॥ अञ्जनस्य क्षयं दृष्ट्वा वल्मीकस्य तु सञ्चयम् ॥ अवन्ध्यं दिवसं कुर्याद्दानाध्ययनकर्मसु ॥ अन्नव्यञ्जनयोर्भागस्तृतीयमुदकस्य च ॥ वायोः सञ्चारणार्थाय चतुर्थमुपकल्पयेत् ॥ हकारं पञ्चमैर्युक्तमन्तस्थैश्चापि संयुतम् ॥ औरसं तं विजानीयात्कण्ठ्यमाहुरसंयुतम् ॥ हकारो यत्र पूर्वस्थो ह्यन्तस्थाद्यो भवेत्परः ॥ पदकाले वियुज्येत संहितायां स औरसः ॥ मेघदुन्दुभिनिर्घोषो ज्ञायते पयसो ह्रदात् ॥ एवं नादं प्रयोक्तव्यं सिंहस्य रुदितं यथा ॥ मासे भाद्रपदे मेघाः शब्दं कुर्वन्ति यादृशम् ॥ एवं गह्वरमासाद्य शुक्रं दुदुह्वेति दर्शनम् ॥ शेषाणां वानरा युद्धमुत्पतन्ति पतन्ति च ॥ एवं वर्णाः प्रयोक्तव्या इहेहैषान्निदर्शनम् ॥ यथा पुत्रवती स्नेहाच्चुम्बते निजमौरसम् ॥ एवं वर्णाः प्रयोक्तव्या युञ्जानेति निदर्शनम् ॥ दुर्दुरो जयदेशे च प्रफतेषुर्नयाप्यया ॥ एवं वर्णाः प्रयोक्तव्या अपाम्फेनेति निदर्शनम् ॥ यथा भारभराक्रान्ता निश्वसन्ति नरा भुवि ॥ एवं वर्णाः प्रयोक्तव्या अह्वः सम्भृत इत्यपि ॥ कुक्कुटः कामलुब्धश्च ककारद्वयमुच्चरेत् ॥ एवं वर्णाः प्रयोक्तव्याः कुक्कुटोसीति दर्शनम् ॥ वडवा च हयं दृष्ट्वा योनिं

॥ १८७ ॥

विकुरुते यथा ॥ एवं वर्णाः प्रयोक्तव्याः सदुन्दुभेति दर्शनम् ॥ रङ्गे चैव समुत्पन्ने नो ग्रसेत्पूर्वमक्षरम् ॥ स्वरं दीर्घं प्रयुञ्जीत पश्चान्नासिक्यमाचरेत् ॥ यथा सौराष्ट्रिका नारी अराँ इत्यभिभाषते ॥ एवं रङ्गः प्रवक्तव्यो ङकारः परिवर्जितः ॥ द्विमात्रिको मात्रिको वा नासामूलं समाश्रितः ॥ अन्ते प्रयुञ्जते रङ्गः पञ्चमैः सानुनासिकः ॥ यथा सौराष्ट्रिका नारी अराँ इत्यभिभाषते ॥ एवं रङ्गं विजानीयात् ङकारपरिवर्जितम् ॥ अनन्तरं मकारस्य यो रङ्गस्तत्र रञ्ज्यते ॥ सर्वानुनासिकं विद्यादेषा मध्योपधानिका । [2]यरलवशषसहरज्यन्ते चोपधानिका ॥ गर्वान्ते रङ्गते यस्तु सर्वैः सर्वानुनासिका ॥ [3]नासादुत्पद्यते रङ्गः कांस्येन समनिःस्वनः ॥ मृदुश्चैव द्विमात्रः स्याद्दृष्टिमान्स्यान्निदर्शनम् ॥ यथा [4]व्याघ्री हरेत्पुत्रान्दंष्ट्राभिर्न च पीडयेत् ॥ भीता पतनभेदाभ्यां तद्वद्वर्णान्प्रयोजयेत् ॥ मधुरं च न

---

१ यथा कामातुरा नारी शब्दं कुर्यादिने दिने । तच्छब्दं कुरुते प्राज्ञः सि(ं)ह्यासि निदर्शनम् ॥ पक्षौ वितत्य खे गृध्रो भ्रान्त्या सङ्कुच्य तिष्ठति । एवं वर्णाः प्रयोक्तव्या वार्ध्रीनस्ते निदर्शनम् ॥ २ यरलवाः शषसहा अष्टैते चोपधानिनः । वर्गान्ते रज्यते यस्तु सर्वैः सर्वानुनासिकः ॥ ३ नस्तः । ४ यादृशी रत्नवर्णाभा जपायाः कुसुमेऽथवा । तादृशं रञ्जयेद्दूर्णं प्रान्ते नासिक्यमाचरेत् ॥ लाक्षारक्तं यथा तोयं नकारान्तं पदं तथा । सर्वं रङ्गं विजानीयाच्छत्रूनिति निदर्शनम् ॥ लुप्ते नकारे यत्स्वारं रञ्जन्ति शौनकादयः । एवं रङ्गं विजानीयान्नाभ्याऽआसी-

सं. ७१

चाव्यक्तं व्यक्तं चापि न पीडितम् ॥ सनाथस्यैकदेशस्य न वर्णाः शङ्करं गताः ॥ यथा सुमत्तनागेन्द्रः पदात्पदं निधापयेत् ॥ एवं पदं पदाद्यन्तं दर्शनीयं पृथक् पृथक् ॥ गीती शीघ्री शिरःकम्पी यथालिखितपाठकः ॥ अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः ॥ माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः ॥ धैर्यं लयसमत्वं च षडेते पाठका गुणाः ॥ चतुरक्षरषट्कं च निवर्तेत पुनः पुनः ॥ आवर्तते पदं यत्र द्विस्त्रिराम्रेडितं हि तत् ॥ यथा धाम्ने धाम्नेति यजुषे यजुषेति निदर्शनम् ॥ हीयते वर्धते चापि पदं यत्र कृशोदरम् ॥ उपचारः स विज्ञेय उभे सुश्चन्द्रेति निदर्शनम् ॥ अथ सप्तविधाः संयोगपिण्डाः ॥ ॥ अयःपिण्डो दारुपिण्ड ऊर्णापिण्डो ज्वालापिण्डो मृत्पिण्डो वायुपिण्डो वज्रपिण्डश्चेति ॥ यमान्विद्यादयःपिण्डान्सान्तःस्थं दारुपिण्डवत् ॥ अन्तःस्थं यमवर्जं तु ऊर्णापिण्डं विनिर्दिशेत् ॥ अन्तःस्थं यमसंयोगे विशेषो नोपलभ्यते ॥ अशरीरं यमं विद्यादन्तःस्थः पिण्डनाशकम् ॥ ज्वालापिण्डान्सनासिक्यान्सानुस्वारांस्तु मृन्मयान् ॥ सोपध्मा वायुपिण्डाश्च जिह्वमूले तु वज्रिणः ॥ अयःपिण्डो नाम यथा ॥ अग्नीः । पङ्क्तीः । नातनक्ष्मि ॥ दारुपिण्डो नाम यथा ॥ अश्वः । सूर्यः । विश्वाज-





त्रिदर्शनम् ॥ पञ्चरङ्गाः प्रवर्तन्ते घात–निर्घात–वज्रिणः । अहिणः प्रहिणो ज्ञेय आ-ई-ऊ-ऋ ओ-निदर्शनम् । १ सङ्करङ्गताः । २ वायुवज्र ।

तीति भवति ॥ तत्र ऊर्णापिण्डो नाम यथा ॥ यस्म्मिन् । अत्यस्म्मिन् अमुष्म्मिन् । इति भवति ॥ तत्र ज्वालापिण्डो नाम यथा ॥ ब्रह्मा । वह्निः । गृह्णामीति भवति ॥ तत्र मृत्पिण्डो नाम यथा ॥ साँस्था सँस्कर्त्तारः । सँस्वर्त्तऽइति ॥ तत्र वायुपिण्डो नाम यथा ॥ देव सवितः । युञ्जानः प्रथमम् । प्रादिवः ककुत्सुक्षामिति भवति ॥ तत्र वज्रापिण्डो नाम यथा ॥ इष्कृतिः । निष्कृतिः । ऋक्साम इति भवति ॥ प्रथममेव षकारेण सकारेणैव संयुतम् ॥ एतत्स्वरं समासाद्य अग्निष्वात्तान्निदर्शनम् ॥ प्रथमेन ठकारेण थकारेणैव संयुतम् ॥ एतत्स्वरं समासाद्य अधिष्ठाननिदर्शनम् ॥ प्रथममेव णकारेण नकारेणैव संयुतम् ॥ एतत्स्वरं समासाद्य त्रिणवत्रयस्त्रिꣳशाविति निदर्शनम् ॥ प्रथममेव रङ्गेण नकारेणैव संयुतम् ॥ एतद्रञ्जितमासाद्य वृष्टिमानिति निदर्शनम् ॥ एते ककारादयो मकारपर्यवसानाः कृष्णा व्याख्याताः ॥ शनैश्चरदैवत्याः ॥ चत्वार्यन्तस्था यरलवाः कपिलवर्णाः अग्निदैवत्याः ॥ चत्वार्यूष्माणः शषसहा अरुणवर्णा आदित्यदैवत्याः ॥ त्रयस्त्रिꣳशद्व्यञ्जनानि स्पर्शा अन्तःस्था ऊष्माणश्चेति ॥ चतुर्विधं करणम् । स्पृष्टमस्पृष्टं संवृतं विवृतं चेति ॥ संवृतो घोषा विवृता अघोषाः ॥ विꣳशतिर्घोषास्ते गजडदबा घझढधभा ङञणनमाः यरलवाश्चेति ॥ त्रयोदश अघोषास्ते

कचटतपाः खछठथफाः शषसाश्चेति ॥ अष्टौ वर्णस्थानानि भवन्ति ॥ उरःकण्ठ्यमूर्द्धन्यतालु-
दन्त्ये । जिह्वामूलयमानुनासिक्याश्चेति ॥ द्वौ औरस्यौ । ह हा इति । अआआ ३ त्रयः कण्ठ्याः ॥
ऋषट्रमूर्द्धन्याः । टठडढणष इति ॥ दश तालव्याः चछजझञयशइईई ३ इति ॥ अष्ट दन्त्याः ।
तथदधनलृलसाः ॥ एकादश ओष्ठ्याः । पफबभमा उऊऊ ३ छउपध्माचेत्यादयः ॥ एको दन्त-
मूलयो रेफः ॥ जिह्वामूलीयाः पञ्च । कुंखुंगुंघुंङुंइति ॥ क्मख्मग्मघ्मकुंखुंगुंघुं इति यमाश्चत्वारः ॥
रुक्मेति प्रथमो ज्ञेयः सक् इत्यपरो भवेत् ॥ तृतीयः सघ्न इत्याहुः उपध्मेति चतुर्थकः ॥ प्रथमौ
चौष्ठनासिक्यावोष्ठनासे उपाश्रितौ ॥ द्वितीयः कण्ठ्यदन्त्यश्च नासामूलमुपाश्रितः ॥ तृतीयः
कण्ठ्यजिह्वाग्रे नासायामेव निर्दिशेत् ॥ चतुर्थो हृदि नासिक्यः कण्ठे चाभिहिता यमाः ॥
आपञ्चमैश्चैकपादः संयुक्तं पञ्चमाक्षरम् ॥ यमास्तत्र निवर्तन्ते श्मशानादिव बान्धवाः ॥ यत्किं- ॥ १८९ ॥
चिद्वाङ्मयं लोके सर्वमत्र प्रतिष्ठितम् ॥ सर्वमत्र प्रतिष्ठितमिति ॥ ऋवर्णेतित्परे सादावनुस्वारो
द्विमात्रकः ॥ संयोगे परभूतेषु ह्रस्व एवोच्यते बुधैः ॥ इति श्रीयाज्ञवल्क्यशिक्षा समाप्ता ॥

* * * * *

## ॥ अथ प्रतिज्ञासूत्रम् ॥

॥ श्रीगणेशाय नमः ॥ प्रतिज्ञामन्त्रब्राह्मणयोर्वेदनामधेयं तस्मिञ्शुक्ले याजुषाम्नाये माध्यन्दिनीयके मन्त्रे स्वरप्रक्रिया ह्यधनुदात्तो मूर्ध्न्युदात्तः श्रुतिमूले स्वरितः । एवं जात्यादयोऽभिहिताः ॥ ब्राह्मणे तूदात्तानुदात्तौ भाषिकस्वारौ तानस्वराणि छन्दोवत्सूत्राणि ॥ १ ॥ अथान्तःस्थानामाद्यस्य पदादिस्थस्यान्यहलसंयुक्तस्य संयुक्तस्यापि रेफोष्मान्त्याभ्यामृकारेण चाविशेषेणादिमध्यावसानेषूच्चारणे जकारोच्चारणं द्विर्भावेऽप्येवमथापरान्तःस्थस्यायुक्तान्यहलसंयुक्तस्योष्मऋकारेकारसहितोच्चारणमेवं तृतीयान्तःस्थस्य क्वचिद्दकारस्य तु संयुक्तासंयुक्तस्याविशेषेण सर्वत्रैवमथान्त्यस्यान्तःस्थानां पदादिमध्यान्तःस्थस्य त्रिविधं गुरुमध्यमलघुवृत्तिभिरुच्चारणमथो मूर्द्धन्योष्मणोऽसंयुक्तस्य टुमृते संयुक्तस्य च खकारोच्चारणमध्ययनादिकर्मस्वर्थवेलायां प्रकृत्या ॥ २ ॥ अथानुस्वारस्यङ्इत्यादेशः शषसहरेफेषु तस्य त्रैविध्यमाख्यातम् ॥ ह्रस्वदीर्घगुरुभेदैर्दीर्घात्परो ह्रस्वो ह्रस्वात्परो दीर्घो गुरौ परे गुरुः परसवर्णेषत्प्रकृत्या चान्यत्र विसर्गेष्वीषद्विरामः पदाद्यस्य संयुक्ताकारस्येषद्दीर्घता च भवतीषद्दीर्घता च भवतीति ॥ ३ ॥ इति कात्यायनपरिशिष्टप्रतिज्ञासूत्रं समाप्तम् ॥ ॥ ॥

# ॥ अथ सर्वानुक्रमसूत्रम् ॥

श्रीगणेशाय नमः ॥ अथ सर्वानुक्रमसूत्रप्रारम्भः ॥ ॐमण्डलं दक्षिणमक्षिहृदयं चाधिष्ठितं येन शुक्लानि यजूꣳषि भगवान्याज्ञवल्क्यो यतः प्राप तं विवस्वन्तं त्रयीमयमर्चिष्मन्तमभिध्याय माध्यन्दिनीये वाजसनेयके यजुर्वेदाम्नाये सर्के सशुक्रियऋषिदैवतछंदाꣳस्यनुक्रमिष्यामो यजुषामनियताक्षरत्वादेकेषां छन्दो न विद्यते द्रष्टारो ऋषयः स्मर्तारः परमेष्ठ्यादयो देवता मन्त्रान्तर्भूता अग्न्यादिका हविर्भाजः स्तुतिभाजो वानः शाखोखाशम्योपवेषकपालेध्मोलूखलाद-यश्च प्रतिमाभूताश्छन्दाꣳसि गायत्र्यादीन्येतान्यविदित्वा योऽधीतेऽनुब्रूते जपति जुहोति यजते याजयते तस्य ब्रह्म निर्वीर्यं यातयामं भवत्यथान्तराश्वगर्त्तं वापद्यते स्थाणुं वार्च्छति प्रमीयते वा पापीयान्भवत्यथ विज्ञायैतानि योऽधीते तस्य वीर्यवदथ योऽर्थवित्तस्य वीर्यवत्तरं भवति जपित्वा हुत्वेष्ट्वा तत्फलेन युज्यते ॥ १ ॥ इषेत्वादि खंब्रह्मान्तं विवस्वानपश्यत्ततः प्रतिकर्मविभागेन ब्राह्मणानुसारेण ऋषयो वेदितव्याः परमेष्ठी प्राजापत्यो दर्शपूर्णमासमन्त्राणामृषिर्देवा वा प्राजा-

पत्या इषेत्त्वाशाखानुष्टुब्विनियोगः कल्पकारोक्त एवमूर्ज्जेत्त्वा वायवो वायव्यं देवोवऽऐन्द्रं यजमानस्य शाखावसोर्व्वायव्यं द्यौर्मातरिश्वन उखा वसोर्व्वायव्यं देवस्त्वापयः कामधुक्षः प्रश्नः सा विश्वायुस्त्रीणि गव्यानीन्द्रस्यैन्द्रं विष्णोः पयः ॥ २ ॥ योऽअग्नऽइदमाग्नेये कस्त्वा प्राजापत्यं कर्मणे स्रुक्शूर्पं प्रत्युष्टं द्वे राक्षसे उरुब्रह्मरक्षोघ्नꣳ सर्वत्र धूरसि धूर्देवानां विष्णुस्त्वानऽउरुहविष्याऽअपहतꣳ रक्षोयच्छन्ताꣳहविष्या देवस्य त्वा सावित्रꣳसर्वत्राग्नये लिंगोक्ते भूताय त्वा हविः स्वः सूर्यो दꣳहन्तां गृहाः पृथिव्यास्त्वा हव्यं पवित्रे लिङ्गोक्तꣳसवितुर्देवीः प्रोक्षिताऽआपान्यग्नये लिङ्गोक्ते दैव्याय पात्राणि ॥ ३ ॥ शर्मास्यदित्याः कृष्णाजिनमवधूतꣳराक्षसमद्रिर्ग्रावोलूखलेऽअग्नेर्हविर्बृहत्सऽइदम्मौसले हविष्कृदधिदैवतं वागधियज्ञं पत्नी कुक्कुटो वाग्वर्षवृद्धꣳ शूर्पं प्रतित्वा हविः परापूतमपहतꣳराक्षसे वायुर्वो देवो वस्तण्डुला धृष्टिरुपवेषोपाग्नऽआदेवयजनमाग्नेये ध्रुवमसि पण्णां कपालान्यग्ने ब्रह्माग्नेयं धिषणासि दार्षदंदिवः शम्या धिषवणौपलं धान्यमसि पण्णाꣳहविर्महीनामाज्यम् ॥ ४ ॥ संवपामि हविः समापऽआपं जनयत्यै त्वेदꣳहविरिपेत्वाज्यं

१२१

घर्म्मोसि षण्णां पुरोडाशस्त्रिताय त्रयाणां त्रितोद्वितऽएकतः क्रमेणाददऽइन्द्रस्य स्फ्यः पृथिवी वेदिर्व्रजं पुरीषं वर्षतु वेदिर्बिधान सावित्रमपाररुमररोऽआसुरे द्रप्सस्ते वेदिर्गायत्रेण त्रीणि वैष्णव-वानि सूक्ष्मा त्रयाणां वेदिः पुराघशꣳ सोपश्यश्चान्द्रमसीं त्रिष्टुभं प्रोक्षणीः प्रैषो द्विषतः आभि-चारिकमनिशितः स्रुवो निशितास्रुगदित्यै विष्णोर्योक्त्रमूर्ज्जे त्रयाणामाज्यꣳसवितुरार्ष तेजोसिधा-माज्यम् ॥५॥ इति० संहितायां प्रथमोऽध्यायः ॥१॥ कृष्णोसीध्मो वेदिर्बर्हिर्लिङ्गोक्तेऽअदित्याऽआपं विष्णोः प्रास्तरमूर्णम्रदसं वेदिर्भुवपतये त्रीण्याग्नेयानि गन्धर्वस्त्रयाणां परिधयो वीतिहोत्रं विश्वावसुराग्नेयीं गायत्रीꣳसमिदाग्नेयꣳसूर्यस्त्वालिङ्गोक्तꣳसवितुर्विधृतीऊर्णम्रदसमात्वाप्रास्तरे घृता-च्यसि त्रयाणां जुहूपभृद्ध्रुवाः क्रमेण प्रियेण हविर्ध्रुवाऽअसदन्पाहि मां वैष्णवेऽअग्नेवाजजिदाग्नेयं नमोदेवꣳस्वधापित्र्यꣳसुयमे स्रुचावंघ्रिणा वैष्णवं वसुमतीमाग्नेयमितऽऐंद्रꣳसञ्ज्योतिषाज्यं मयी-दमाशीः प्रतिग्रहणमुपहूताद्यावापृथिव्यम् ॥ ६ ॥ ब्रह्मत्वं प्रतिष्ठान्तं बृहस्पतिरांगिरसोपश्यदग्नेष्ठा प्राशित्रमेतन्ते वैश्वदेवमेषा तेऽनुष्टुबाग्नेवाजꣳयग्ने वाजजिदाग्नेयमग्नीषोमयोश्चत्वारि लिङ्गोक्तानि

॥ १९१ ॥

वसुभ्यस्त्रयाणां परिधयः सञ्ज्ञानाथाव्यन्तु प्रास्तरे मरुताऽकपिर्बृहतीं प्रास्तरीमन्त्यः पादऽआग्नेयो
यम्परिधिं देवलऽआग्नेयीं त्रिष्टुभं विराड्रूपां यजुरन्तामग्नेः प्रियं यजुःसꣳस्त्रवभागाः सोमसूक्ष्मो
वैश्वदेवीं त्रिष्टुभं यजुरन्ताꣳस्वाहा वाड्यजुर्घृताचीस्त्रुचौ यज्ञनमः शूर्प्यां यवमान्कुपिरुद्दालत्वां
धानां तर्वानिति पञ्चार्षे यो यज्ञोदेवताग्नेदब्धायोगार्हपत्योग्नये दक्षिणाग्निः सरस्वत्यै लिङ्गोक्तं वेदोसि
वेदो देवामनसस्पतिर्वातदेवत्यांविराजꣳसम्बर्हिर्लिङ्गोक्ता त्रिष्टुब्विराड्रूपा कस्त्वा प्राजापत्यꣳरक्षसाꣳ
राक्षसम् ॥ ७ ॥ अथ याजमानꣳसंवर्चसा त्वाष्ट्री त्रिष्टुब्दिविविष्णुस्त्रीणि वैष्णवान्यस्माद्भागोस्यै
भूमिरगन्मै दैवꣳसञ्ज्योतिषाऽऽहवनीयः स्वयम्भूः सूर्यस्य सौरेऽअग्ने गृहपते गार्हपत्यः सूर्यस्य सौर-
मग्नऽइदमाग्नेये ॥ ८ ॥ पितृयज्ञः प्रजापतेरार्षमग्नये सोमाय द्वे दैवे स्वाहाकारश्रुतेरपहताऽआसुरं ये
रूपाणि कव्यवाहनोऽग्निस्त्रिष्टुब् अत्रामीमदन्त पित्र्ये नमोवः षड्लिङ्गोक्तानि परे पित्र्यैऽआधत्त
पित्र्यागायत्र्यूर्जमापिंविराट् ॥ ९ ॥ इति० संहितायां द्वितीयोऽध्यायः ॥ २ ॥ अग्न्याधेयं प्रजा-
पतेरार्षं देवानामग्नेर्गन्धर्वाणां वा समिधाग्नेय्यश्चतस्रो गायत्र्यः समिधाविरूपऽआङ्गिरसः सुस-

मिद्धाय वसुश्रुतस्तन्त्वां भरद्वाजो भूर्भुवःस्वस्तिस्रो महाव्याहृतयोऽग्निवायुसूर्यदेवत्याः क्रमेण द्यौरिव यजमानाशीर्लिङ्गोक्तदेवताऽआयङ्गौः सार्पराज्ञस्तृचो गायत्र्योऽग्निः परावररूपेण देवता ॥ १० ॥ अग्निहोत्रं प्रजापतेरार्षं अग्निर्ज्योतिः सप्तलिङ्गोक्तदेवता गायत्र्य आद्याः पञ्चैकपदाः अग्निर्वर्चो द्वे तक्षापश्यत्परा जीवलश्चैलकिः ॥ ११ ॥ यजमानाभ्युपस्थानं बृहद्देवानामार्षम् उपप्रयन्तऽइत्यनुवाकऽआद्ये द्वे आग्नेय्यौ गायत्र्यावुपवत्या गोतमो राहूगणो मूर्द्धन्वत्या विरूपः उभावा भरद्वाजऽ ऐन्द्राग्नीं त्रिष्टुभमयन्ते देवश्रवा देववातश्च भारतावाग्नेयीमनुष्टुभमयमिह वामदेवो जगतीमस्य प्रत्नामवत्सारोगव्यां वाग्नेयीं वा पयो देवत्यां वा गायत्रीं तनूपाऽआग्नेयानिऽइन्धानाऽआग्नेयीं महापाङ्क्त्यवसाना ॥ १२ ॥ चित्रावसोरात्रिदेवत्यमृषयो पश्यन्सन्त्वमाग्नेयमन्धःस्थरेवतीःस६ हितेति त्रीणि गव्यानि । उपस्त्वाग्नेयं तृचं गायत्रं मधुच्छन्दा वैश्वामित्रोऽग्नेत्वं चतस्रो द्विपदाऽआग्नेयीर्बन्धुः सुबन्धुः श्रुतबन्धुर्विप्रबन्धुरेकैकशऽइडेकाम्याकव्ये सोमानं ब्राह्मणस्पत्यं तृचं गायत्रं ब्रह्मणस्पतिर्मेधातिथिर्वामहित्रीणा९ंसत्यधृतिर्वारुणिरादित्यदैवतं तृचं गायत्रं पथि स्वस्त्ययनं

कदाचनैन्द्रीं पथ्याबृहतीं मधुच्छन्दास्तत्सवितुर्विश्वामित्रः सावित्रीं गायत्रीं परिते वामदेवऽआग्ने-
यीमनिरुक्तां गायत्रीम् ॥ १३ ॥ क्षुल्लकोपस्थानमासुरेरार्षं, भूर्भुवः स्वः प्रवत्स्यदुपस्थानमागतोपस्थानं
चादित्यस्यार्षं नर्यगार्हपत्यः शꣳस्याहवनीयोथर्वदक्षिणाग्निरागन्माहवनीयोनुष्टुवयमग्निर्न्यंकुसारि-
णीबृहती गार्हपत्योयमग्निरन्वाहार्यपचनोऽनुष्टुब्गृहामा त्रिष्टुब्विराड्रूपा येषामानुष्टुबुपहूतामहा-
पंक्तिर्द्व्यवसानास्तिस्रोऽपि वास्तवीः शंयुर्बार्हस्पत्यः ॥ १४ ॥ चातुर्मास्यानि प्रजापतेरार्षं, प्रघासिनो
मारुती गायत्री यद्ग्रामेमारुत्यनुष्टुबनिरुक्तामोपूणोगस्त्यऐन्द्रामारुतीं विराजमक्रंनन्निरुक्ताग्नेय्यनुष्टुब्
अवभृथयज्ञदैवतं पूर्णादर्विद्वे और्णवाभऽऐन्द्यावनुष्टुभावक्षंद्वे गोतमऽऐन्द्यौ पङ्क्ती मनोनुमानसं तृचं
बन्धुर्गायत्रं वयꣳसोमीं गायत्रीं बन्धुरेषते द्वे रौद्रे अवरुद्रꣳरौद्यावेकापंक्तिरपराककुप् त्र्यम्बकं द्वे
अनुष्टुभौ पूर्वस्या वसिष्ठऽ एतदास्तारपंक्तिरुयायुषं नारायणऽउष्णिहं यजमानाशीर्षꣳशिवोनाम
क्षौरं निवर्त्तयामिलिङ्गोक्तदैवतमाशीःप्रायम् ॥ १५ ॥ इति॰ संहितायां तृतीयोऽध्यायः ॥ ३ ॥
अग्निष्टोमः प्रजापतेरार्षं, एदंद्वेऽउ- रीत्र्यवसाने आद्यावर्द्धर्चौ देवयजनदेवत्याविमाऽआपऽओषधे

कुशतरुणꣳस्वधितेक्षौरमापोऽअस्मानापन्दीक्षातपसोर्वासोमहीनां नवनीतं वृत्रस्याजनं चित्पतिर्द्वे
प्राजापत्ये देवोमा सावित्रमावोदैव्यनुष्टुबाशीःस्वाहायज्ञं चतुर्णां यज्ञऽआकूत्यै चतुर्णामौद्गृभणानाम-
ग्निरापोदेवीलिंगोक्तदेवताविराट् ॥१६॥ विश्वोदेवस्य स्वस्त्यात्रेयः सावित्रीमनुष्टुभमृक्सामयोः कृष्णा-
जिनेशर्मासि कृष्णाजिनमूर्गस्यांगिरोभिर्दृष्टंमेखलꣳसोमस्यनीविर्विष्णोर्वासऽइन्द्रस्य सुसस्याः कृष्ण-
विषाणोच्छ्रयस्वदण्डोव्रतंयज्ञेदेवींधीर्येदेवावाक्प्राणोदानौ चक्षुःश्रोत्रमध्यात्ममग्निर्मित्रावरुणावादि-
त्यो विश्वेदेवाऽअधिदैवतꣳश्रोत्राऽआपोजगतीयंते लोष्टमपोमूत्रंपृथिव्यालोष्टमग्नेत्वमाग्नेय्यनुष्टु-
प्पुनर्मनऽआग्नेयं त्वमग्ने व्रतसऽआग्नेयींगायत्रीꣳरास्वेयत्सौम्यमेषातेहिरण्ययाज्यदैवतंजूरसिवाग्दै-
वतꣳशुक्रमसिहिरण्यं चिदसि गौःसोमक्रयणी वाग्रूपाध्यारोपकल्पनया ॥ १७ ॥ वस्व्यस्यनुष्टुब्बृ-
हतीसोमक्रयण्यास्तुतिरदित्याऽआज्यमस्मेषण्णां लिङ्गोक्तादेवताः समख्येपत्न्याशीरास्तारपंक्तिरेपते- ॥ १९३ ॥
लिङ्गोक्तदैवतमास्माकोसि सौम्यमभित्यꣳसावित्र्यष्टिः प्रजाभ्यस्त्वा प्रजास्त्वा शुक्रन्त्वा सौम्यानि
सग्मेस्मेलिङ्गोक्तेतपसोर्द्धेजार्द्धे सोमोमित्रो नऽइन्द्रस्य सौम्ये स्वानादीनिधिष्ण्यानामानिपरिमाग्नेयी

पुरस्ताद्बृहती प्रतिपन्थामनुष्टुप्पथिदेवत्यादित्याः कृष्णाजिनमदित्यै सौम्यमस्तभ्नात्रिष्टुभौ वारुण्यौ सूर्यस्यानुष्टुप्कृष्णाजिनमुस्त्रावूर्ध्वबृहत्यानडुही भद्रो[1] मे सौम्यं नमोमित्रस्याभितपनः सूर्यः सौरीं जगतीं वरुणस्य पञ्चवारुणानि याते सोमीं त्रिष्टुभं गौतमः ॥ १८ ॥ इति० संहितायां चतुर्थोऽध्यायः ॥ ४ ॥ अग्नेस्तनूरसिपञ्च वैष्णवान्यग्नेः शकलं वृषणौद्भेतरुणैकेऽउर्वश्यसित्रयाणां लिंगोक्ता देवता गायत्रेण त्रीण्याग्नेयानि भवतन्नः पंक्तीरग्नावग्निर्विराडेतयोर्निर्मथ्याहवनीयावग्नीदेवतेऽआपतयेवायव्यमनाधृष्टमाज्यमग्नेव्रतपाऽआग्नेयमꣳशूरꣳशुः प्रकृतिश्चतुरवसाना सौम्यन्त्योर्द्ध्वचौ लिंगोक्तदैवतोयातेत्रीण्याग्नेयानि तप्तायनीचत्वारि पार्थिवानि विदेदाग्नेयमग्नेऽअङ्गिरो योस्यामनुत्वालिंगोक्तानि सिꣳह्यसित्रयाणां वेदिरिंद्रघोषश्चतुर्णामुत्तरवेदिरिदमहमापाꣳसिꣳह्यसि पञ्चानां वाग्भूतेभ्यः स्रुग्ध्रुवोसिपरिधयस्त्रयाणामग्नेः संभारागुल्गुलवादयः ॥ १९ ॥ युञ्जतेश्यावाश्वः सावित्रीं जगतीम् । इदंविष्णुर्मेधातिथिर्वैष्णवीं गायत्रीमिरावतीवसिष्ठस्त्रिष्टुभं देवश्रुतावक्षधुरौप्राचीस्वंगोष्ठमत्रहविर्द्धानेविष्णोर्नुतिस्रो वैष्णव्यस्त्रिष्टुभऽआद्ये द्वे यजुरंते विष्णोर्नुप्रद्दीर्घतमाऔतथ्यो विष्णो-

१ भद्रोमेमित्रस्या.

रराटंपंच वैष्णवान्याददेऽअभ्रिरिदमहꣳरक्षोघ्नं बृहन्नौपरवाणीदमहं पंच लिंगोक्तानि स्वराडस्यौ पर्वाणि
चत्वारि रक्षोहणौवः सप्त वैष्णवानि यवोसि यवोदिवेत्वौदुंबरी शुंधंतां पित्र्ये उद्दिवं पंचानामौ-
दुंबरी घृतेनद्यावापृथिव्यमिंद्रस्यैंद्रं परित्वा मधुच्छंदाऽअनिरुक्तामैंद्रीमनुष्टुभमिंद्रस्यैंद्राणि त्रीणि
चतुर्थं वैश्वदेवम् ॥ २० ॥ विभूरस्यष्टानां धिष्ण्या अग्नयः सम्राडाहवनीयः परिषद्योवहिष्पवमान-
देशोनभोसि चात्वालः मृष्टोसि शामित्रःऋतधामौदुंवरीसमुद्रोसि ब्रह्मासनम् ज्योतिरसि शाला-
द्वार्योहिरग्मिप्राजहितो वागग्निमदःऋतस्य द्वार्येअध्वनाꣳसूर्योमित्रस्यर्त्विजोग्नयो धिष्ण्याः ॥ २१ ॥
ज्योतिरसि वैश्वदेवं त्वꣳसोमक्रतुर्भार्गवः सौमीं गायत्रीमनवसानां जुषाणो अस्तुदेवत्यैकपदा-
विराड्यजुरंताऽग्नेनयागस्त्यऽआग्नेयीं त्रिष्टुभमयन्नत्रिष्टुब्यजुरंताग्नेयी उरुविष्णोवैष्णव्यनुष्टुब्यजुरंता
देवश्राविनः सावित्रमेनत्त्वꣳसौम्यꣳस्वाहा निर्लिंगोक्तदेवतामग्नेव्रतपाऽआग्नेयमत्यन्यान्वनस्पतिरो-
पधेकुशानमणꣳस्वधितेपरशुर्द्यामातस्त्वंवनस्पतिः ॥ २२ ॥ इति० संहितायां पंचमोऽध्यायः ॥ ५ ॥
अग्रेणीः शकलं । देवस्त्वागृपः सुपिप्पलाभ्यश्च । वालंद्यामग्रेणगृपो याते दीर्घतमागृपदेवत्यां

त्रिष्टुभं ब्रह्मवनि ब्रह्मदृꣳह स्रुपदेवत्ये विष्णोः कर्माणि द्वे मेधातिथिर्वैष्णव्यौ गायत्र्यौ परिवीर्यूपो-
दिवस्त्वरूपन्ते स्रुपउपावीस्तृणसुपदेवां लिंगोक्तमृतस्यत्वा पशुरग्नीषोमाभ्यां लिंगोक्तमद्भ्योपां
पशुरापोदेवीरापꣳसंते पशुर्घृतेन स्वरुशासौरेवतीवाग्वर्पोतृणꣳस्वाहादेवे ॥ २३ ॥ माहिर्भूरज्जुर्न-
मस्ते यज्ञोदेवीरापोर्द्धमापमर्द्धमाशीर्वाचंते मनस्तेपशुः शंलिंगोक्तमोषधे तृणꣳस्वधितेसीरक्षसां
लिंगोक्तं निरस्तमिदमहꣳरक्षोहणीघृतेनद्यावापृथिव्यंवायोवायव्यमग्निराज्यस्याग्नेयꣳस्वाहाकृतेवपा-
श्रपण्याविदमापआपीमहापंक्तिरूर्ध्ववसानापावमानश्चांत्यःपादःसंते हृदयꣳरेडसिवसाप्रयुतं लिंगोक्तं
घृतं वैश्वदेवं दिशः पंचादिश्यान्यैंद्रः प्राणः पश्वंगः प्राणदानं लिंगोक्तं देवत्वाष्ट्री त्रिष्टुप् ॥ २४ ॥
समुद्रंलिंगोक्तानि द्वादशादिवंते स्वरुमापोहृदयशूलं धाम्नो धाम्नोवारुणं यदाहुर्वारुणी गायत्र्यनव-
साना सुमित्रियानआपꣳहविष्मतीलिंगोक्तदेवतानुष्टुवग्नेर्वश्चत्वार्यापाद्यमूरापां गायत्रीं मेधाति-
थिर्हृदेवा सौम्यनुष्टुप् सोमराजन्त्सौम्ये श्रृणोतु लिंगोक्तदेवतात्रिष्टुब्देवीरापऽआपीपंक्तिः कार्षि-
राज्यमनुष्टुप्समुद्रस्य समापऽआपो यमग्नेमधुच्छंदाऽआग्नेयीं गायत्रीमाददेग्रावानिग्राभ्याआपमि-

न्द्रायत्वा पञ्चसौम्यानि यत्तेसौमी विपरीता बृहती श्वात्राःपथ्याबृहती माभेः सौम्यमर्द्धंयात्वा-
पृथिव्यमर्द्धंप्रागपाक्सौम्युष्णिक् त्वमंगगोतमऽऐन्द्रीं पथ्याबृहतीम् ॥ २५ ॥ इति० संहितायां
षष्ठोऽध्यायः ॥ ६ ॥ वाचस्पतयेप्राणदेवत्याविराट् मधुमतीर्लिङ्गोक्तं यत्ते सौम्यॐस्वाहोरुयजुषी-
लिङ्गोक्ते स्वाङ्कृतोस्युपाॐशुर्देवेभ्यस्त्वादेवं देवाॐशोलिङ्गोक्तमाभिचारिकं प्राणायाग्रहोव्याना-
यउपाॐशुसवनऽउपयामगृहीतोस्यंतरैन्द्रमन्तस्ते मघवदेवत्यात्रिष्टुबुदानायग्रहः आवायो वसिष्ठो-
वायव्यां त्रिष्टुभमिन्द्रवायू मधुच्छन्दा ऐन्द्रवायवींगायत्रीमयंवाग्रत्समदोमैत्रावरुणीॐरायावयं
त्रसदस्युस्त्रिष्टुभं यावां मेधातिथिराश्विनीं गायत्रीं तंप्रत्नथावत्सारः काश्यपोवैश्वदेवीं जगतीम-
च्छिन्नस्यसौम्यॐसा प्रथमैन्द्रीत्रिष्टुप्तृपंत्वयाऽग्नीलिङ्गोक्ते ॥ २६ ॥ अयं वेनोवेनस्य त्रिष्टुप् सोम-
स्तुतिरधिदैवतमधियज्ञं च मनोनत्रिष्टुप्सोमस्तुतिरधियज्ञानुवादिव्यपमृष्टः शंडोपमृष्टोमर्कऽ- ॥ १९५ ॥
आभिचारिके देवास्त्वा शुक्रामंथिनावनाधृष्टासिदक्षिणोत्तरवेदिश्रोण्यौसुवीरः सुप्रजाः शुक्रामंथिनौ
निरस्तोद्दे आभिचारिके शुक्रस्य मंथिनः शकलं येदेवासः परुच्छेपोवैश्वदेवीं त्रिष्टुभमाग्रयणोसि-

लिङ्गोक्तदैवतम् ॥ २७ ॥ सोमः पवते वैश्वदेवमिन्द्रायत्वा पञ्च लिङ्गोक्तानि । मूर्द्धानं भरद्वाजो वैश्वानरीं त्रिष्टुभं ध्रुवोसिध्रुवोध्रुवं ध्रुवेण बृहती पूर्वोर्द्धर्चोध्रौवउत्तरऽऐन्द्रोयस्ते देवश्रवाः सौमीं त्रिष्टुभं यजुरंतान्देवानां चात्वालदैवतं प्राणायमे लिंगोक्तदेवतान्येकादश कोसिप्राजापत्यो-ष्णिग्वर्द्धमानामधवेत्वा लिङ्गोक्तदेवतानि त्रयोदश ॥ २८ ॥ इंद्राग्नीं विश्वामित्रऽऐन्द्राग्नीं गाय-त्रींमाघत्रिशोकऽआग्न्यैंद्रीमोमासोमधुच्छंदा वैश्वदेवीं विश्वेदेवासो गृत्समदऽइंद्रमरुत्वश्चतस्रो-विश्वामित्रऽऐन्द्रामारुतीस्त्रिष्टुभोमरुतांत्वायजुर्मरुत्वतीयंमहाँ२ऽइंद्रोभरद्वाजोमाहेंद्रीत्रिष्टुभं यऽ-ओजसा वत्सोगायत्री मुदुत्यंप्रस्कण्वः सौरीं गायत्रीं चित्रं कुत्सऽआंगिरसस्त्रिष्टुभꣳरूपेण वोद-क्षिणाश्चतुर्णां ब्राह्मणमद्य लिङ्गोक्तदेवतान्यष्टौ ॥ २९ ॥ इति० संहितायां सप्तमोऽध्यायः ॥ ७ ॥ विष्णोर्वैष्णवं कदाचनादित्यदेवत्येबृहत्यौ यज्ञोदेवानां कुत्सस्त्रिष्टुभं विवस्वन्यजुः श्रदस्मै जगत्या-शीर्वाममद्य भरद्वाजोबार्हस्पत्यः सावित्रींत्रिष्टुभꣳसावित्रोसिसावित्रꣳसुशर्मासि वैश्वदेवं बृहस्पति-सुतस्य लिंगोक्तमहंप्रजापतिरूपेणाऽत्मादेवतात्रिष्टुबग्ना३ऽइपत्नीवन्नाग्नेयं प्रजापतिः प्राजापत्यꣳहरि-

रस्यूक्सामेहयोर्यस्तेलिङ्गोक्तेदेवक्कतस्याऽग्नेयानि षट् ॥ ३० ॥ समिन्द्राग्निर्वैश्वदेवीं त्रिष्टुभं धातालिं-
गोक्तबहुदेवत्यासुगावोदेवीयाँ२ऽआवहोवयमाग्नेय्यौयज्ञायज्ञमेषतेलिंगोक्तेयजुषीउरुꣳहिशुनःशेपो-
वारुणींत्रिष्टुभं नमोवारुणमग्नेरनीकमाग्नेयी त्रिष्टुप् समुद्रेते सौमी विराड्देवीरापःपंक्तिर्बृहती वा
पूर्वोर्द्धर्चेऽआपऽउत्तरःसौम्योदेवानामाग्नेयमेजतुत्र्यवसानामहापंक्तिर्यस्यैते वशापुरुदस्मोगर्भोमरुतो-
यस्य गोतमोमारुतीं गायत्रीं महीद्यौर्मेधातिथिर्द्यावापृथिव्यामित्यग्निष्टोमः ॥ ३१ ॥ अथषोड-
श्यातिष्ठगोतमऽऐन्द्रीमनुष्टुभं । युक्ष्वाहि मधुच्छंदाः । इंद्रमिद्गोतमः । यस्मान्नैंद्री त्रिष्टुप्परब्रह्म-
रूपेण षोडशिनस्तुतिरिंद्रश्चेंद्राग्नावरुणीषोडशिदेवत्यावायजुरंताग्नेपवस्व वैखानसऽआग्नेयीं गायत्री-
मुत्तिष्ठन्कुरुस्तुतिरैन्द्रीमहश्वं प्रस्कण्वः सौरीं अतिस्रोपियजुरन्ताः उदुत्यं देवानामार्षमाजिघ्रेडे-
कौसुरुविंदुर्गव्ये महापंक्तिःप्रस्तारपंक्तिः विनःशासोभारद्वाजऽऐन्द्रीमनुष्टुभं वाचस्पतिं वैश्वकर्मणीं ॥ १९६ ॥
त्रिष्टुभं विश्वकर्मन्नैंद्रीवैश्वकर्मण्यग्नयेत्वा देवार्षाण्यदाभ्यदेवत्यानिव्रेशीनांत्वा सौम्यानि ॥ ३२ ॥
सत्रोत्थानं देवानामार्षमिहरतिः पशुदैवतमुपसृजन्नुष्णिगाग्नेयी सत्रस्य बृहती यजमानानामात्म-

स्तुतिर्युवंतंपरुच्छेपऽऐंद्रीमत्यष्टिर्त्र्यवसानामाद्योर्द्धर्चऽऐंद्रापार्वतः परमेष्ठीनैमित्तिकान्याध्याद्वसिष्ठ-
स्यार्षं लिंगोक्तदेवतानि चतुस्त्रिंशद्वयोर्वैष्णववारुणीं त्रिष्टुब्देवान्दिवमाशीर्लिंगोक्तदेवताश्चतुस्त्रिं-
शद् वर्मदेवत्यापंक्तिस्त्रिष्टुब्वायज्ञस्य यज्ञदेवत्या त्रिष्टुबापवस्व सौमीं गायत्रीं नैध्रुविः कश्यपः ॥ ३३ ॥
इति० संहितायां अष्टमोऽध्यायः ॥ ८ ॥ अथ वाजपेयोबृहस्पतेरार्षम् इंद्रस्य च देवसवितःसावित्री
त्रिष्टुप् ध्रुवसदमैंद्राणित्रीण्यपाꣳरसदेवत्यानुष्टुब्महालिंगोक्तदेवतानुष्टुप्संपृचौ यजुषीन्द्रस्य रथोवाः
जस्य पार्थिव्यतिजगत्यंत्यःपादःसावित्रोऽप्स्वन्तरश्वदेवत्यानवसानापुरऽउष्णिग्वातोवातिस्त्रोश्वस्तु-
तयऽउष्णिक्त्रिष्टुब्जगत्योवाजिनोश्वाःदेवस्याहं लिंगोक्तानि वाजिनोश्वाऽएषस्य द्वे दधिक्रावावाम-
देव्योश्वदेवत्ये जगत्यौ शन्नोवसिष्ठोविराजंतेनोनाभानेदिष्ठोजगतीं वाजेवाजे वसिष्ठस्त्रिष्टुभमामा-
प्राजापत्यांवाजिनोश्वाः ॥३४॥ आपयऽआयुर्यज्ञेनप्राजापत्यानि प्रजापतेः स्वरसृतायजमानोस्मेदिशो-
नमः पृथिवीयमासंदीयंतासुन्वन्वाजस्य प्राजापत्यं तृचं त्रैष्टुभꣳसोमं तृचंतापसऽआद्या वैश्वदेव्य-
निरुक्तानुष्टुब्द्वितीया लिंगोक्तदेवता तृतीयाग्नेयीप्रनोलिंगोक्ता गायत्री सरस्वत्यैसुन्वन्नग्निःसप्तदश

लिंगोक्तदेवतानि ॥ ३५॥ अथ राजसूयोवरुणस्यार्षम् एषते पार्थिवमग्निनेत्रेभ्यो देवार्षाण्याध्याया-
दशाद्यानि दैवान्यग्नेसहस्व देवश्रवादेववातश्च भारतावाग्नेयीमनुष्टुभमुपाꣳशोत्रीणि रक्षोघ्नानि
सवितार्द्धेयजमानः ॥ ३६ ॥ इति० संहितायां नवमोऽध्यायः ॥९॥ अपोदेवाऽआपीत्रिष्टुप् वृष्णऽऊर्मि-
लिङ्गोक्तानि मधुमतीरनाधृष्टाआपसोमस्य चर्माग्नये लिंगोक्तान्यनिभृष्टमापꣳसधमादोवारुणीत्रिष्टुप्
क्षत्रस्य चतुर्णांतार्प्यपांड्वाधीवासोष्णीषाणींद्रस्यधनुर्म्मित्रस्य बाहूत्वयायंधनुर्देवापाणामिषवऽआविः
प्राजापत्यंपराणि लिंगोक्तानि ॥ ३७ ॥ अवेष्टामृत्युनाशनं प्राचीं पंचानां यजमानःप्रत्यस्तमासुरं
मृत्योरोजोसिरुक्मोहिरण्यरूपौ मैत्रावरुणीत्रिष्टुब्यजुरन्तासोमस्यसुन्वन्प्रपर्वतस्यापीत्रिष्टुब्विष्णो-
स्त्रीणिलिंगोक्तानि सुन्वन्प्रजापतेन प्राजापत्यांत्रिष्टुब्यजुर्मध्याअयममुष्यजूरुद्रयद्रौद्रम् ॥ ३८ ॥
इंद्रस्यलिंगोक्तानिमाते संवरणः प्राजापत्यऽऐंद्रींत्रिष्टुभमग्नये लिंगोक्तानि पृथिविमातर्भूमिर्हꣳ-
सोवामदेवः सौरीꣳसप्रपंचपरब्रह्माभिधायिनीमतिजगतीमियच्छतमानावूर्गसिशाखेन्द्रस्य बाहूस्यो-
नास्यामंदीक्षत्रस्याधीवासꣳस्योनाꣳसुन्वन्निषसाद शुनःशेपोवारुणीं गायत्रीमभिभूरस्यक्षायज

मानोवाब्रह्मँस्त्वमामंत्रणानि पंच लिंगोक्तानींद्रस्य स्क्योग्निः पृथुराग्नेयꣳस्वाहाकृता अक्षाः
सवित्रालिंगोक्तदैवतम् ॥ ३९ ॥ अथ चरकसौत्रामण्यश्विनोरार्षम् अश्विभ्यां त्रीणि लिंगोक्तानि
वायुः सौमी गायत्री कुविदङ्ग सुकीर्तिः काक्षीवतऽआद्या सौम्यनिरुक्ता त्रिष्टुब्युवमनुष्टुप्पुत्र-
मिवत्रिष्टुबश्विसरस्वतींद्रदेवत्यअश्विसरस्वतींद्रदेवत्ये ॥ ४० ॥ इति० संहितायां दशमोऽध्यायः ॥१०॥
इतिसर्वानुक्रमणिकायां प्रथमोऽध्यायः ॥ १ ॥ अथाग्निंप्रजापतिरपश्यत् ॥ साध्यावापश्यन्त्सोग्निः-
पंचचितिकः प्रथमाचितिः ॥ प्रजापतेर्द्वितीयादेवानांतृतीयेंद्राग्न्योर्विश्वकर्मणश्चतुर्थ्यर्षीणां पंचमी
परमेष्ठिनोऽथ प्रतिकर्मदर्शिनो युञ्जानोष्टौसावित्राणिसवितापश्यदाद्यातृतीयाचानुष्टुप्चतुर्थी-
षष्ठ्यौ जगत्यौ द्वितीयागायत्रीपंचमीत्रिष्टुबिमंनोयजुरंतागायत्र्यनवसानाऽआददेभ्रिर्हस्तेनुष्टुब्य-
जुरंता ॥ १ ॥ प्रतूर्त्तनाभानेदिष्टऽआश्वीमास्तारपंक्तिंयुंजाथां कुश्रिर्गार्दभीं गायत्रींयोगेयोगेशुनःशेप
आर्जींप्रतूर्वंस्त्रिष्टुब्विराड्रूपायजुर्गर्भोरुयजुःपृथिव्यास्त्रीण्याग्नेयान्यन्त्यग्निराग्नेयीं त्रिभष्टुं पुरोधसऽआ-
गत्य मयोभुवऽआश्वीमनुष्टुभमाक्रम्यानुष्टुप् द्यौस्तेबृहत्युत्क्रामविराडुदक्रमीत्रिष्टुबात्वाद्दे गृत्समं-

दआग्नेय्यौपरिसोमकोगायत्रीं परित्वापायुरनुष्टभंत्वामग्नेगृत्समदोजगतीम् ॥ २ ॥ पृथिव्याऽआ-
ग्नेयं। अपांपुष्करपर्ण्णᳬस्वराट्पंक्तिःशर्मद्वेऽअनुष्टुभौकृष्णाजिनपुष्करपर्ण्णे पुरीष्योग्निस्त्वामग्नेतृचं-
भारद्वाजऽआग्नेयं गायत्रᳬसीदहोतर्देवश्रवादेववातश्च त्रिष्टुभं निहोतागृत्समदःसᳬसीदस्वप्रस्कण्वो-
बृहतीम् ॥ ३ ॥ अपोदेवीः सिंधुद्वीपऽआपीन्यंकुसारिणीᳬ संतेत्रिष्टुप्पार्थिवोर्द्धोवायव्योर्द्धः
सुजातोनुष्टुवाग्नेयीऽउदुतिष्ठविश्वमनाः पथ्याबृहतीमूर्द्धःकण्वःउपरिष्टाद्बृहतीᳬसजातस्त्रितस्त्रिष्टुभ-
ᳬस्थिरोरासभेऽन्यनुष्टुबुष्णिग्वाशिवोभवाजीपथ्या बृहती प्रैतुलिंगोक्तामहापंक्तिर्त्र्यवसानाग्नेगायत्र्ये-
कपदाग्नेय्यातमग्निमाग्नेये ओषधयस्त्रिष्टुवनुष्टुभावोषधिदेवत्येअव्यस्यन्नाग्नेयोर्द्धचंविपाजसोत्कील-
कात्यआग्नेयीं त्रिष्टुभम् ॥ ४ ॥ आपोह्यापᳬसिंधुद्वीपस्तृचंगायत्रंमित्रउपरिष्टाद्बृहतीमैत्रीरुद्रा अनुष्टुब्-
रौद्रीसᳬसृष्टां द्वे सिनीवालीदेवत्येउखामादित्यामखस्य मृत्पिंडोवसवस्त्वा लिंगोक्तानि सर्वत्रादित्यै-
रास्नादितिरौषंकृत्वायादित्योष्णिगदितिरावटंदेवानां पंचौखानि मित्रस्यविश्वामित्रोमैत्रीं देवस्त्वा ॥१९८॥

१ गायत्रीं.

सावित्री बृहत्युत्थायपूर्वार्द्धर्चऔपऽउत्तरोमैत्रः ॥ ५ ॥ आकूति लिंगोक्तान्यौद्भणानि मास्वौख्यौ-
गायत्री त्रिष्टुभावग्निश्च पादाआग्नेयोद्गन्नः सोमाहुतिराग्नेयीं गायत्रीं परस्याविरूपऽआंगिरसः
परमास्याऽआरुणिरनुष्टुभं यदग्नेद्वेजमदग्निःअहरहर्नाभानेदिष्टस्त्रिष्टुभौ याःसेनाऽअनुष्टुभः सर्वाऽ-
आग्नेय्योंत्योपरिष्टाद्बृहती ॥ ६ ॥ इति० संहितायां एकादशोऽध्यायः ॥ ११ ॥ दृशानोवत्सप्री
त्रिष्टुभः१गैक्मींन्नक्तोपासा कुत्सऽआग्नेयीं विश्वाश्यावाश्वःसावित्रीं जगतीᳫँसुपर्ण्णः कृतिश्चतुर-
वसानागारुत्मती विपश्ची विष्णो लिंगोक्तान्यक्रंदद्वत्सप्रीराग्नेयीं त्रिष्टुभमग्नऽऊर्ध्वबृहत्यग्ने महाबृहती
पुनर्गायत्र्यावात्वाध्रुवोऽनुष्टुभमुदुत्तमः१शुनःशेपोवारुणींत्रिष्टुभमग्नेत्रितऽआग्नेयीᳫँहᳫँसऽउक्ताजग-
तीह यजुरन्तांतेबृहद्यजुःसीदत्वमाग्नेयीं त्रिष्टुभमंतरग्नेनुष्टुभौ ॥ ७ ॥ दिवस्पर्य्याग्नेयंत्रैष्टुभंद्वादशर्च्चं
वत्सप्रीर्भालंदनः समिधाग्निं विरूपाक्षऽआंगिरसऽआग्नेयं गायत्रीमुदुत्वातापसोनुष्टुभं प्रेदनुष्टुप्प्र-
प्रायमग्नेयीं वसिष्ठस्य त्रिष्टुभमापोदेवीराप्यप्स्वग्ने विरूपऽआग्नेयींगायत्रींगर्भोऽअसितिस्त्रोऽनुष्टुभो-
वोधामे दीर्घतमास्त्रिष्टुभः१सर्वोधिसोमाहुतिराग्नेयीं यजुरंतां गायत्रीं यजुर्वैश्वकर्म्मणं पुनस्त्वा-

त्रिष्टुबाग्नेयी ॥ ८ ॥ अपेतालिंगोक्तबहुदेवत्यासंज्ञानमूषदैवत्यमग्नेः सिकताश्रितः परिश्रितोयदःसः
पंचर्चमाग्नेयं त्रैष्टुभं विश्वामित्रश्चतुर्थ्यनुष्टुप्अयंतेनुष्टुप्त्विदैष्टकेलोकंलिंगोक्तानुष्टुप्ताऽअस्यापींद्रि-
यमेभ्यऽऐंद्रऽइंद्रजेतामाधुच्छंदसऐंद्री७ंसमितंचतस्रोद्ग्यग्निदेवत्याउष्णिगुपरिष्टाद्बृहत्युष्णिकपंक्तयो-
मातेवो खास्तुतिस्त्रिष्टुप् ॥९॥ असुन्वंतं नैर्ऋतं तृचं त्रैष्टुभं यतेयजमानदेवत्यानमोविभूतिदेवत्येकपदा
निवेशनऽआग्नेयीं त्रिष्टुभं विश्वावसुर्देवगंधर्वः सीराद्वे सीरदेवत्येबुधः सौम्योगायत्री त्रिष्टुभौशुनंच-
तस्त्रः सीतादेवत्याः कुमारहरितोद्वे त्रिष्टुभौ तृतीयापंक्तिश्चतुर्थ्यनुष्टुब्विमुच्यध्वमानडुहीगायत्री
सजूर्लिंगोक्तदैवतम् ॥ १० ॥ याऽओषधीःसप्तविꣳशतिरनुष्टुभऽओषधिस्तुतिमाथर्वणोभिषग्मुंचंतु-
बंधुर्द्वादशानारभ्याधीताःमामाहिरण्यगर्भः कार्यीत्रिष्टुभमभ्यावर्त्तस्वोष्णिगाग्नेयी अग्नेयद्गायत्रीयं
त्रिष्टुबग्नेतवपावकोग्निराग्नेयꣳषड्र्चंप्रथमेविष्टारपंक्तिस्तिस्रःसतोबृहत्यऽउपरिष्टाज्ज्योतिः षष्ठ्याप्याय- ॥ १९९ ॥
स्वगोतमः सौम्योगायत्री त्रिष्टुबुष्णिहः आतेवत्सारस्तुभ्यंताद्वेविरूपस्तिस्रो गायत्र्यऽआग्नेय्यः ॥११॥
इति० संहितायां द्वादशोऽध्यायः ॥ १२ ॥ मयिककुबाग्नेयीब्रह्मादित्यदेवत्यात्रिष्टुप्हिरण्यगर्भः

कार्यींत्रिष्टुभन्द्रप्सोदेवश्रवाऽआदित्योनमोस्तुसार्प्यंतृचमानुष्टुभंकृणुष्वपंचप्रतिसराराक्षोघ्नादेवाना-
सार्पꣳसर्वास्त्रिष्टुभऽआग्नेयीर्वामदेवश्चापश्यदग्नेष्ट्वायजुराग्नेयमिंद्रस्येंद्रंभुवस्त्रिशिराऽआग्नेयींत्रिष्टुभम्
॥ १२ ॥ ध्रुवास्यूर्ध्वबृहतीप्रजापतिरनुष्टुप्भूरसिप्रस्तारपंक्तिरासाꣳस्वयमातृणादेवताविश्वस्माइत्ये-
तस्य च यजुषः कांडात्कांडादानुष्टुभंद्व्यृचमग्निनादृष्टंदूर्वेष्टकादैवतं यास्तऽआग्नेयं द्व्यृचमानुष्टुभमिन्द्रा-
ग्निभ्यां दृष्टं विराडयंलोकःस्वराडसौलोकः प्रजापतिष्ट्वाविश्वज्योतिषं मधुश्चर्तुदैवतमषाढासिसविता-
पश्यद्देवावापश्यन्निष्टकादैवतम् ॥ १३ ॥ मधुवातावैश्वदेवंतृचंगायत्रंगोतमोपांगंभन्पङ्क्तिस्त्रीन्त्समुद्रां-
स्त्रिष्टुप्कौम्यं द्व्यृचं ध्रुवासित्रिष्टुविषेबृहत्यौरवंद्व्यृचमग्नेयुक्ष्वाग्नेयंद्व्यृचं गायत्रमाद्यायां भरद्वाजोद्विती-
यस्यां विरूपः सम्यक्त्रिष्टुब्लिंगोक्तदेवताश्चेत्वाबृहत्यग्निर्ज्योतिषोष्णिगादित्यंगर्भं पंचर्चमाग्नेयं त्रैष्टु-
भमिमंमापंचर्चमाग्नेयं त्रैष्टुभमेवद्वेद्वेचांतेयजुषीत्वंयविष्ठोशनाः काव्यआग्नेयीमनिरुक्तांगायत्रीमपां-
त्वाविꣳशतिरैष्टकान्ययंपुरःपंचाशत्प्राणभृद्देवत्यानि लोकंताऽइंद्रं तिस्रः प्रतीकोक्ताः एवꣳसर्वत्र
सं. ७३ ॥ १४ ॥ इति० संहितायां त्रयोदशोऽध्यायः ॥ १३ ॥ अथ द्वितीया चितिः ॥ ध्रुवक्षितिः पंचाश्वि-

न्यस्तासां प्रथमाविराड्वतस्त्रस्त्रिष्टुभो यजुरंताः शुक्रश्चर्तव्य१४सजूःपंच विश्वेषां देवानामार्षं ता एव
देवताः प्राणं मे पंच वायव्यान्यपः पंचायानि मूर्द्धावय एकोनविꣳशतिर्लिंगोक्तदैवतानि ॥ १५ ॥
अथतृतीयेंद्राग्नीअनुष्टुप् पूर्वोर्द्धर्चऐंद्राग्नऽउत्तरः स्वयमातृणादैवतोविश्वकर्मावायव्यꣳराड्यसि पंच-
दिग्दैवत्यानिविश्वकर्मावायव्यं नभश्चैषश्चर्तव्येआयुर्मे दश लिंगोक्तदैवतानि माच्छंदश्चषट्त्रिꣳशन्मू-
र्द्धानुष्टुब्यंत्रीपरोष्णिक्चतुर्दशयजूꣳषि प्राणदैवत्यानि ॥ १६ ॥ अथचतुर्थ्यांशुरष्टादशाग्नेर्दशैकया
सप्तदश सर्वाणि लिंगोक्तदैवतानि सहश्चर्तव्यम् ॥ १७ ॥ इति० संहितायां चतुर्दशोऽध्यायः ॥ १४ ॥
अथ पंचमी अग्नेजातानाग्नेय्यौत्रिष्टुभौषोडशीचतुश्चत्वारिꣳशल्लिंगोक्ते अग्नेस्त्रिष्टुप्एवश्चत्वारिꣳशद्र-
श्मिनैकोत्रिꣳशद्राड्यसि पंचायंपुरः पंचैतानि सर्वाणि लिंगोक्तदैवतानि ॥१८॥ अग्निर्मूर्द्धाग्नेयोनुवाकः
प्रथमस्तृचोगायत्रोद्वितीयस्त्रैष्टुभोभुवंस्तृतीयोजागतोऽयामिहचतुर्थआनुष्टुभः सखायःसं पंचमःप्रगा-
थएनावस्तत्रपूर्वा बृहती सतोबृहत्युत्तराताभ्यां तिस्रोबृहत्यः संपादिताः षष्ठऔष्णिहोग्नेवाजस्य गोत-
मःसप्तमः पुनः ककुभः प्रगाथोभद्रोनस्तत्रपूर्वाककुप्सतोबृहत्युत्तराताभ्यां तिस्रः ककुभः संपादिता-

अष्टमः पांक्तोऽग्निर्नवपदपांक्तोनवमोऽग्निमग्निंहोतारमतिछंदाऽव्यवसानाग्नेत्वंद्वैपदस्तृचः ॥ १९ ॥ अय-
मग्निर्विरूपोबोधिबुधगविष्ठिरोजनन्यस्तुतम्भरः सखाय इषःसंसमित्संवननस्त्वांप्रस्कण्व एनावो
वसिष्ठोऽग्नेवाजस्यगोतमोभद्रोनः सौभग्गिर्षिं तं कुमारवृषौ येनाष्टावाग्नेय्यः पट्त्रिष्टुभो द्वे अनुष्टुभौ
तदश्वर्त्तव्यंपरमेष्ठीसौरं प्रोथदश्वोवामिष्टन्त्रिष्टुभमाग्नेयीमायोद्वेस्वयमातृणदैवत्ये सहस्त्रस्यपंचाग्नेयानि
॥ २० ॥ इति॰ संहितायां पंचदशोऽध्यायः ॥ १५ ॥ रौद्रोऽध्यायः परमेष्ठिन आर्षं देवानां वा प्रजा-
पतेर्वाऽद्योनुवाकः षोडशर्च एकरुद्रदेवत्यः प्रथमागायत्रीतिस्त्रोऽनुष्टुभस्तिस्त्रःपङ्क्तयः सप्तानुष्टुभोद्वे-
जगत्यौ साम्नोद्वेकुत्सः ॥ २१ ॥ अंत्यानुवाकेसप्तैकरुद्रस्तुतिः आद्योपरिष्टाद्बृहती द्वितीया जगती
कुत्सस्य तृतीयानुष्टुब्द्वे त्रिष्टुभौ द्वे अनुष्टुभावसंख्याना बहुरुद्रदेवत्यादशानुष्टुभोमंत्राऽअवतानसंज्ञ-
कास्ततोऽन्यानित्रीणियजूꣳषि बहुरुद्रदेवत्यानि प्रत्यवरोहसंज्ञकामंत्राः ॥२२॥ मध्ये सर्वाणि यजूꣳ-
षिहिरण्यबाहवइति तिस्त्रोऽशीतयोरुद्राणां तेषामुभयतोनमस्कारा अन्येन्यतरतोनमस्कारा अपरे-
जातानामरुद्राः सभाभ्यइत्यादयो नमोवःकिरिकेभ्यइत्यग्निवायुसूर्यहृदयभूताः पंचव्याहृतयोबहु-

रुद्रदेवत्याः ॥ २३ ॥ इति० संहितायां षोडशोऽध्यायः ॥ १६ ॥ अश्मन्मारुतमश्मँस्ते इमामऊषा-
शीर्ष्यंद्विष्मऽआभिचारिकमिमामऽआग्नेयमृतवोबृहतीपंक्तिर्वा समुद्रस्य द्वे गायत्र्यावुपज्मं जगती
त्रिष्टुब्वाऽपामिदं बृहत्यग्नेपावकवसूयवः सनोमेधातिथिःपरेतेआग्नेऊषौ गायत्र्यौ पावकया जगतीं
भरद्वाजो नमस्ते बृहतीमाग्नेयीमृषिसुना लोपामुद्रा ॥ २४ ॥ नृषदे पंचाग्नेयानि ये देवा जगत्यौ
प्राणदेवत्ये प्राणदा बृहतीपंक्तिर्वाऽऽग्नेय्याग्निस्तिग्मेनाग्नेयीं गायत्रीं भरद्वाजोषऽइमा वैश्वकर्म्मणी-
स्त्रिष्टुभोविश्वकर्माभौवनः ॥२५॥ आशुरैन्द्रीर्द्वादश त्रिष्टुभोऽप्रतिरथोवस्त्वष्टानुष्टुबिषुदेवत्याप्रेतयोध्वृ-
न्स्तौत्यनुष्टुवसौयामारुतीत्रिष्टुब्यत्रलिंगोक्तदेवता पंक्तिर्मर्म्माणि लिंगोक्तैवत्रिष्टुबुदेनंतिस्रोनुष्टुभ-
ऽआद्याग्नेयीद्वितीयैंद्री तृतीया लिंगोक्तदेवता पंचदिशः पंचयज्ञाग्निसाधनवादिन्यऽआद्येद्वे त्रिष्टुभौ
तृतीया पंक्तिर्बृहती वा चतुर्थीबृहत्येवान्त्यात्रिष्टुब्विमानो द्वे आदित्यदेवत्येऽआद्या विश्वावसोर्द्वितीया- ॥२०१॥
प्रतिरथस्यदेवहूर्विधृतिरनुष्टुब्यज्ञदेवत्या वाजस्यैंद्यनुष्टुबुद्ग्राभमैंद्राग्न्यनुष्टुबेव ॥२६॥ क्रमध्वंपंचाग्नेय्य-
ऽआद्यानुष्टुप्पृतनात्रिष्टुप्पृतनोबृहतीपिपीलिकमध्या ततोनुष्टुप्त्रिष्टुबंत्या अग्नेसहस्राक्षविराडाग्नेयीसुप-

पणोंद्वेपंक्तित्रिष्टुभौताॅंसवितुःसावित्रीं त्रिष्टुभं पुरस्ताज्ज्योतिषंकण्वोददर्श विधेमाग्नेयीं गृत्समदस्त्रि-
ष्टुभमस्यास्त्रिस्थानाग्निर्देवता प्रेद्धोविराडाग्नेयी वसिष्ठस्य चित्तिं वैश्वकर्मण्यतिजगती सप्ततऽआग्नेयी
त्रिष्टुप्सप्तऽऋषीणाम् ॥ २७ ॥ शुक्रज्योतिः षण्मारुत्यऽआद्या चतुर्थीचोष्णिग्द्वितीयातृतीयाचगा-
यत्री पंचमीजगती षष्ठीगायत्र्युष्णिग्वाइन्द्रंदैवीर्मारुतमिमंत्रयोदशर्चऽआग्नेयस्त्रैष्टुभोऽनुवाको यज्ञ-
स्तुतिर्घृतस्तुतिर्वावसोर्द्धाराभिवादिनी वा घृतंमिमिक्षेगृत्समदः समुद्राद्वामदेवश्चत्वारिशृङ्गायज्ञ-
पुरुषदेवत्यऽऋषभोमंत्रः ॥ २८ ॥ इति० संहितायां सप्तदशोऽध्यायः ॥ १७ ॥ वाजश्चदेवानामार्षम्
एतैर्यजुर्भिर्यजमानोग्नेः कामान्याचते वाजप्रसवीयꣳसप्तर्चं विश्वेत्रैष्टुभं वैश्वदेवं कुशोधानाकः
वाजोनस्तिस्त्रोन्नदेवत्या आद्यानुष्टुब्द्वे त्रिष्टुभौ संमाविराजावाग्नेय्यौ सरस्वत्यै लिंगोक्तदैवतम् ॥ २९ ॥
ऋताषाड्गन्धर्वाप्सरसः सनः प्राजापत्या प्रस्तारपंक्तिः समुद्रोसि वायव्यानि त्रीणि रुचमाग्नेय्यनु-
ष्टुप्त्वा वारुणीं त्रिष्टुभꣳशुनःशेपः स्वर्णाग्नेयानि पंचाग्निंयुनज्म्याग्नेय्यस्तिस्त्रऽआद्येद्वे त्रिष्टुभौ पंक्ति-
स्तृतीयादिवोद्वेआग्नेय्यौ परौष्णिग्महापदपंक्तीऽइष्टोयज्ञोभृचं यजमानाग्निदैवत्यं गालवऽआद्योष्णि-

ग्द्वितीयागायत्री ॥ ३० ॥ यदाकूतादष्टर्चमाग्नेयम् विश्वकर्म्मणस्तृतीया दैवीवाद्याजगती तिस्रस्त्रि-
ष्टुभश्चतस्रोनुष्टुभोग्निरस्म्यहश्यद्वैतवादिनीं त्रिष्टुभं देवश्रवादेववातश्च भारतावृचोयजुर्येअग्नेयोनुष्टुवा-
ग्नेयी ॥ ३१ ॥ वार्त्रहत्याय सप्तर्चमिन्द्रोऽपश्यत् । आद्ये द्वे वार्त्रघ्न्यौगायत्रीत्रिष्टुभौ विश्वामित्रस्य
चविनोऽनुष्टुप्मृगोनत्रिष्टुप्प्रथमा ॐ शासोभारद्वाजोद्वितीयांजथऐंद्रोद्वेवैश्वानर्य्यौगायत्रीत्रिष्टुभौ
पृष्ठोदिविकुत्सस्य चाश्यामद्वेत्रिष्टुभावाग्नेय्यौ कामवत्यावश्यामभरद्वाजस्य च वयंते कात्यस्योत्कीलस्य
च धामच्छदनुष्टुब्वैश्वदेवी ॥ ३२ ॥ इति० संहितायां अष्टादशोऽध्यायः ॥ १८ ॥ अथ सौत्रामणी
प्रजापतेरार्षम् अश्विनोः सरस्वत्याश्च स्वाद्वींत्वानुष्टुप्सुरासोमदेवत्या सोमोसि चत्वारि सौराणि परि-
तोभारद्वाजः सौमीं बृहतीं वायोस्तृचोगायत्रः सौम्यः आमूतेर्ब्रह्मक्षत्रं त्रिष्टुप्सुरासोमदेवत्या नानाहि
जगती सुरासोमदेवत्या तेजोसि पयोदेवत्यान्योजोसि सुरादेवत्यानि याव्याग्रहंहैमवर्चेरनुष्टुन्न्विषूचि-
कास्तुतिर्यदापिपेषाग्नेयी बृहती सम्पृचस्थपयोग्रहाः विप्रचस्थ सुराग्रहाः देवायज्ञंब्राह्मणानुवाको विं-
शतिरनुष्टुभःसोमसंपत् ॥ ३३ ॥ सुरावंतंचतुर्ऋचंत्रैष्टुभं अश्विसरस्वतींद्रदेवत्यंपितृभ्यः सप्त पित्र्याणि ॥२०२॥

पुनन्तुमा नवर्चं पावमानमाद्येद्वे पित्र्येअनुष्टुभौ प्रजापतिस्तृतीयां वैखानसऽआग्नेयीं गायत्रीं चतुर्थीलिंगोक्तदेवतानुष्टुप्पंचम्याग्नेयीगायत्री षष्ठ्याग्नेयीब्राह्मी च गायत्री ब्राह्मस्तृतीयःपादःसौमीसावित्र्यष्टमी नवमीत्रिष्टुब्वैश्वदेवी येसमानाऽअनुष्टुभौपित्र्याद्या द्वितीया यजमानाशीर्द्वेसृती त्रिष्टुब्देवपानपितृपाणौपंथानौब्रवीतीदꣳहविर्त्र्यवसानाष्टिर्यजमानाशीः ॥ ३४ ॥ उदीरतांत्रयोदशर्चंपैत्र्यं त्रैष्टुभꣳशंखएकादशी तु जगत्याद्याजानुदशर्चोनुवाकोनवपित्र्या दशम्यैंद्रीगायत्री तृतीयाचतुर्थीनवम्योऽनुष्टुभस्त्रिष्टुभऽइतराः सोमोराजाष्टर्चमश्विसरस्वतीन्द्राऽ अपश्यन्नद्यास्तिस्रोमहाबृहत्यऽउपान्त्याचचतुर्थ्यन्ते अतिजगत्यौ शेषेअतिशक्कर्यौत्र्यवसाने सीसेनतंत्रमश्विसरस्वतींद्रदेवत्याः षोडशजगत्यः ॥ ३५ ॥ इति॰ संहितायां एकोनविंशोऽध्यायः ॥ १९ ॥ क्षत्रस्ययोनिर्द्विपदागायत्रीआसन्दीदेवताकामात्वाकृष्णाजिनं मृत्योरक्षमावश्विनोर्भैषज्येनलिंगोक्तदेवतानि त्रीणि कोसिप्राजापत्यागायत्री शिरोमेपंचर्चमिन्द्रशरीरावयवदेवताकं तृतीयागायत्र्यंत्यासहापंक्तित्र्यवसानानुष्टु-

१ सप्तमी ।

भोंत्याः प्रतिक्षत्रे वैश्वदेवं त्रयादेवा दैवीपंक्तिर्त्र्यवसाना प्रथमाद्वितीयैर्वैश्वदेवमाशीर्लिंगं लोमान्य-
नुष्टुब्लिंगोक्तदेवता ॥ ३६ ॥ यद्देवास्तिस्रोऽग्निवायुसूर्यदेवत्याऽअनुष्टुभः कूष्माण्डीर्यद्ग्रामे लिंगोक्त-
देवतꣳसमुद्रेतेद्विपदा विराडापी द्रुपदादिवानुष्टुबाप्युद्वयꣳसौर्य्यनुष्टुप्प्रस्कण्वस्यापोऽअद्याग्नेयी
पंक्तिरेधोसिसमिद्देवत्ये यजुषी समाववर्त्यनिरुक्तागायत्री वैश्वानरज्योतिर्यजुरभ्यादधाम्याग्नेयं तृच-
मानुष्टुभमाश्वतराश्विरꣳशुनासौर्य्यनुष्टुप्सिंचंतिपरिसौर्य्यैन्द्रीचानुष्टुब्धानावंतमैंद्रीगायत्री विश्वा-
मित्रस्य च बृहदिंद्राय बृहती नृमेधपुरुषमेधयोरध्वर्योगायत्री ॥ ३७ ॥ योभूतानामात्मप्रवादा-
पंक्तिर्नारायणीयाकौण्डिन्यस्यप्राणपामे द्वे अनुष्टुबुपरिष्टाद्बृहत्यौ लिंगोक्तदेवते समिद्धऽइंद्रऽएका-
दशाप्रीस्त्रिष्टुभऽआंगिरसऽइध्मस्तनूनपान्नराशꣳ सऽइडोबर्हिर्द्वारऽउषासानक्ता दैव्याहोतारा तिस्रो-
देवीस्त्वष्टा वनस्पतिः स्वाहाकृतयऽइत्येताऽआप्रीदेवताऽआयातु सप्तत्रिष्टुभऐंद्र्यऽआमन्द्रैर्बृहत्यायातु
वामदेवस्त्रातारं गर्ग्गऽआमन्द्रैर्विश्वामित्रऽएवेद्वासिष्ठः ॥ ३८ ॥ अथहोत्रंत्रिपशोः समिद्धोऽअग्नि-
राप्रीर्द्वादशविदर्भिराश्विसरस्वतीन्द्रदेवत्या अनुष्टुभोऽश्विनाहविस्तिस्रोनुष्टुभऽएकैकाश्विसरस्वतींद्र-

देवत्याःयइंद्रंसवितृवरुणदेवत्यास्तिस्रोऽनुष्टुभोऽश्विनागोभिस्तिस्रोनुष्टुभो युवंपुत्रमिवानुष्टुप्त्रिष्टु-
भौयस्मिन्नश्वासऽआग्नेय्यौ जगतीत्रिष्टुभावश्विनातेजसैकादशर्चऽशास्त्रंगोमद्भूत्समदस्तृचमाश्विनं
गायत्रं पावकानो मधुच्छंदाः सारस्वतमिंद्रायाहीँद्रंमधुच्छंदाएवानुक्तमानुष्टुभमाश्विसरस्वतींद्रदेव-
त्यम् ॥ ३९ ॥ इति० संहितायां विंशोऽध्यायः ॥ २०॥ इमंमे गायत्रीत्रिष्टुभौवारुण्यौशुनःशेपस्त्वन्न-
स्त्रिष्टुभावावारुण्यौ वामदेवो महीमूषुत्रिष्टुबादित्या सुत्रामाणंगयः प्लातः सुनावन्नौस्वर्ग्यागायत्र्या-
नोमैत्रावरुणींगायत्रींविश्वामित्रः प्रवाहवावसिष्टस्त्रिष्टुभऽसमिद्धोऽअग्निरेकादशाप्रमानुष्टुभऽस्वस्त्या-
त्रेयस्यार्षं वयोधाइंद्रोदेवता वसंतेनऽऋतुना पडचामानुष्टुभांलिंगोक्तदेवतऽहोतायक्षद्द्वादशाप्रीः
प्रैषाआश्विसरस्वतींद्रदेवत्या अश्विनौछागस्यसप्तलिंगोक्तदेवताःप्रैषाः वनस्पतिसभिमूपोऽग्निᳪंस्विष्ट-
कृदग्निर्देवंबर्हिरेकादशानुयाजप्रैषा अश्विसरस्वतीन्द्रदेवत्याऽअग्निमद्यसूक्तवाकप्रैषोलिंगोक्तदेवतो-
लिंगोक्तदेवतः ॥ ४० ॥ इति० संहितायां एकविंशोऽध्यायः ॥ २१ ॥ इति सर्वानुक्रमणिकायां

१ इंद्र. २ तस्विष्टᳪंकृ.

द्वितीयोऽध्यायः ॥ २ ॥ ॐअथाश्वमेधश्चतुरोऽध्यायान्प्रजापतिरपश्यत् तेजोसिसौवर्णं निष्कमिमाम-
गृभ्णन्संवत्सरो यज्ञपुरुषस्त्रिष्टुभमभिधालिंगोक्तानि योऽअर्वन्तंगायत्र्यर्द्धेनाश्वस्तुतिः परोर्द्धेलिंगो-
क्ताऽग्नयेलिंगोक्तान्येव हिंकारायेत्यश्वस्यैकोनपंचाशच्चेष्टितानि हिरण्यपाणिपंचर्चंऽसावित्रं गायत्र-
माद्यां मेधातिथिरग्निऽस्तोमेनाग्नेयंतृचंगायत्रंऽसुतंभरोविश्वामित्रोविरूपोयथासंख्यमजीजनोहि-
पावमानींकृतिंपिपीलिकमध्यामनुष्टुभं त्र्यरुणत्रसदस्यूर्विभूरश्वदैवतं देवादैवमिहरतिराग्नेयानि
चत्वारि कायौद्गृभणानिलिंगोक्तान्याब्रह्मालिंगोक्तान्येवाध्यायात् ॥ १ ॥ इति० संहितायां द्वाविंशो-
ऽध्यायः ॥ २२ ॥ प्रजापतये प्राजापत्यम् यस्ते देवं यः प्राणतस्त्रिष्टुप्कायी हिरण्यगर्भस्य युञ्जन्ति-
मधुच्छन्दाआदित्यदेवत्यांगायत्रीं युंजंत्यस्याश्वस्तुतिर्यद्वातोबृहतीमौ वसवस्त्वालिंगोक्तानिलाजीं ३
नश्वदेवत्यंकःस्विच्चतस्रोऽनुष्टुभःप्रश्नप्रतिप्रश्नभूताब्रह्मोद्ये होतुर्ब्रह्मणश्चवायुष्टा लिंगोक्तानि सऽशित- ॥२०४॥
स्तिस्रोश्वदेवत्याअनुष्टुब्विराड्त्रिष्टुभोऽग्निः पशुराश्वानित्रीण्ण्यंवेऽनुष्टुबश्वस्तुतिर्गणानांत्वाचत्वारि-
लिंगोक्तानि ॥ २ ॥ उत्सक्थ्यागायत्र्याश्री येकादशर्चमानुष्टुभं द्वितीयातूपरिष्टाद्बृहत्यध्वर्य्वादीनां

कुमार्य्यादिभिरश्लीलभाषणं ताऽएवदेवताः दधिक्राव्णोदधिक्रावावामदेव्यः सुरभिमतीमनुष्टुभ-
माश्वींगायत्री९षड्टचमाश्वमुष्णिगाद्याश्चतस्रोनुष्टुभौऽत्यात्रिष्टुप्कस्त्वाषड्टचमाश्वमाद्यागायत्रीपंचा
नुष्टुभः कःस्विदष्टादशर्चं ब्रह्मोद्यꣳहोत्रादीनां प्रश्नप्रतिप्रश्नभूतमाद्याश्चतस्रोनुष्टुभः कास्विदाद्याश्च-
तस्रोनुष्टुभः कास्विदाद्याश्चतस्रश्चांत्यादशत्रिष्टुभः सुभूरनुष्टुब्लिंगोक्तदेवताहोतायक्षत्प्राजापत्यः प्रैष-
प्रजापतेर्हिरण्यगर्भः प्राजापत्यांत्रैष्टुभम् ॥ ३ ॥ इति० संहितायां त्रयोविंशोऽध्यायः ॥ २३ ॥ अश्व-
स्तूपर इत्यादयः पशवोऽध्यायेनोक्ता देवतावापर्यग्यास्तथारोहितादयोगुणयुक्ताऽआरण्याश्च कपिंज-
लादयऽआध्यायात् शादंदद्भिरित्यादित्वगित्येतदंतं द्रव्यदैवतमुक्तम् अश्वस्तूपरोब्राह्मणोऽध्यायः॥४॥
इति० संहितायां चतुर्विंशोऽध्यायः ॥ २४ ॥ शादंदद्भिस्त्वचांतश्चजुंबकायवारुणीं द्विपदां मुंडिभ
ओदन्यएषा चाघनाशन्यंतर्ज्जले यस्येमे काव्यौत्रिष्टुभौ हिरण्यगर्भःप्राजापत्यऽआनोदशर्च्चं जागतं
वैश्वदेवं गोतमःस्वस्तिनो विराट्स्थाना भद्रंकर्णेभिस्तृचं त्रैष्टुभं मानोश्वस्तोमीयंदीर्घतमास्त्रैष्टुभं-
द्वाविꣳशत्यृचमश्वस्तुतिस्तृतीयापङ्क्त्यौ जगत्याविमानुद्वैपदं वैश्वदेवं तृचं भौवनआप्त्यो वा साधन-

भौवनो वा ॥ ५ ॥ इति० संहितायां पञ्चविंशोऽध्यायः ॥ २५ ॥ अग्निश्चस्तलिंगोक्तानिप्रियोदेवानां लौगाक्षिरनुष्टुभमनवसानां बृहस्पतेगृत्समदोब्राह्मींत्रिष्टुभमिंद्रगोमन्नैंद्यौगायत्र्यौरम्याक्षिर्ऋतावानं प्रादुराक्षिर्वैश्वानरीयांवैश्वानरस्य त्रिष्टुभं कुत्सोग्निर्ऋषिराग्नेयीं गायत्रीं वसिष्ठभरद्वाजौमहाँ२ऽइंद्रो माहेंद्रींवसिष्ठस्तंव ऐंद्रींपथ्याबृहतींनोधागोतमोयद्वाहिष्ठंवसूयवआग्नेयीमनुष्टुभमेहिभरद्वाजोगायत्री मृतवस्तेबृहतीत्युपह्वरेवत्सो गायत्रीं ॥ ६ ॥ उच्चाते गायत्रं तृचꣳसौम्यमामहीयवोनुवीरैर्मुद्गलो यज्ञपुरुषस्त्रिष्टुभमग्नेपत्नीर्मेधातिथिराग्नेयीं गायत्रीमभियज्ञंतृचमृतुदैवतं मेधातिथिस्तवायमैंद्रीत्रिष्टु- भंविश्वामित्रोऽमेवनोजगतींगृत्समदःस्वादिष्ठया मधुच्छंदाः सौम्यावनुक्तानांगायत्रम् ॥ ७ ॥ इति० संहितायां षड्विंशोऽध्यायः ॥ २६ ॥ समास्त्वाग्निकोध्यायः प्रजापतेरार्षꣳसामिधेन्यो नवाग्नेय्यस्त्रि- ष्टुभोऽग्निनाद्दष्टाऽअग्निर्ऋषिः कर्मांगभूतमग्निꣳस्तौत्यूर्ध्वद्वींद्वादशर्च्चमाप्रियमौष्णिहं विषमपदं प्राजा- ॥२०५॥
पत्यमाग्नेयमग्निरपश्यदग्निर्हिप्रजापतित्वेन संस्तूयते तेन प्राजापत्यम् ॥ ८ ॥ पीवोऽअन्ना द्वे वायव्ये त्रिष्टुभौवसिष्ठऽआपोहद्वे प्राजापत्ये हिरण्यगर्भः प्राजापत्यः प्रयाभिर्द्वे वायव्ये वसिष्ठोनियुत्वान्वा-

यव्याः षड्वायोशुक्रोऽनुष्टुबेकया च त्रिष्टुबंत्यागायत्र्यो नियुत्वान्वायोषेगृत्समदोवायोशुक्रः पुरुमीढा-
जमीढौ तववायोऽव्यश्वऽआङ्गिरसोभित्वा वसिष्ठऐंद्रंप्रगाथं प्रथमाबृहती द्वितीयासतोबृहती त्वामि-
देवश्शंयुर्बार्हस्पत्यः कयानऐंद्रं तृचं गायत्रं वामदेवोंऽत्यातु पादनिचृद्यज्ञायज्ञावऽऊर्जोनपातश्शंयुः
पाहिनोगर्भः प्रागाथएतं तृचं प्रागाथमाग्नेयंद्वेबृहत्यौ तृतीयासतोबृहती संवत्सरोऽस्याग्नेयम् ॥ ९ ॥
इति० संहितायां सप्तविंशोऽध्यायः ॥ २७ ॥ इन्द्रमिडः सौत्रामणिकोऽध्यायः एकादशप्रयाजप्रैषा-
ऐंद्रा आप्रीदेवत्या आद्येऽनुवाके देवंबर्हिरनुयाजप्रैषाऐंद्राएकदशैवाग्निमद्यैन्द्रः सूक्तवाकप्रैषस्त्वामद्य
प्रतीक उभयत्रापि समिधानं महद्वायोधस आप्रिय एकादश प्रयाजप्रैरत्रास्तथैव देवंबर्हिरनुयाज-
प्रैरवाऽअग्निमद्यवायोधसः सूक्तवाकप्रैषः ॥ १० ॥ इति० संहितायां अष्टाविंशोऽध्यायः ॥ २८ ॥
समिद्धोऽअञ्जन्नाश्वमेधिकोऽध्याय आद्या आप्रीस्त्रिष्टुभएकादशाश्वस्तुतिर्बृहदुक्थोवामदेव्योददर्शा-
श्वोवासामुद्रिरुर्षदक्रंदस्त्रयोदशाश्वस्तुतिस्त्रिष्टुभोभार्गवोजमदग्निर्ददर्शदीर्घतमाश्च समिद्धोऽअद्यद्वा-
सं. ७४ दशाप्रीस्त्रिष्टुभोजमदग्निः ॥ ११ ॥ केतुं कृण्वन्नाग्नेयीस्त्वनिरुक्तां गायत्रीं मधुच्छन्दाः जीमूतस्येव

पायुर्भारद्वाजः संग्रामांगान्यृक्षोस्तौषीत्सन्नाहंकार्मुकं गुणमार्त्नीतूणं जगत्यर्द्धेन सारथिमर्द्धेन रश्मीन् हरीन् रथगोपायितॄन् जगत्यालिंगोक्तदेवता द्वाभ्यां त्रिष्टुबनुष्टुब्भ्यामिषुमनुष्टुभाकशां ततोहस्तघ्नं ततस्तृचौ रथदुन्दुभिदेवत्यावैन्द्रोर्द्धर्चोन्त्यः सर्वास्त्रिष्टुभोऽनुक्ता आग्नेय्यः कृष्णग्रीव इत्याद्या एकादशिन्योर्द्वयोः पशुदेवता अग्नये गायत्रायेति दश हविषोवेष्ठेर्देवता ॥ १२ ॥ इति० संहितायां एकोनत्रिंशोऽध्यायः ॥ २९ ॥ देवसवितर्द्वावध्यायौ पुरुषमेधोनारायणः पुरुषोददर्श विश्वानिदेवगायत्रीॐसावित्रीॐइयात्राश्वोविभक्तारंमेधातिथिर्ब्रह्मणेब्राह्मणमिति द्वे कंडिके तपसेऽनुवाकश्च ब्राह्मणम् ॥ १३ ॥ इति० संहितायां त्रिंशोऽध्यायः ॥ ३० ॥ सहस्रशीर्षाषोडशर्चमानुष्टुभं त्रिष्टुवंत्यंपुरुषोजगद्बीजमब्देवताद्भ्यः षडृचउत्तरनारायणोमंत्र आद्यास्तिस्त्रिष्टुभौद्वे अनुष्टुभावंत्यात्रिष्टुप् ॥ १४ ॥ इति० संहितायां एकत्रिंशोऽध्यायः ॥ ३१ ॥ तदेवसर्वमेधोऽध्याय आत्मदैवतः सप्तमेऽहनि सर्वहोमे विनियुक्तः सर्वमेधं ब्रह्म स्वयम्भ्वैक्षत तदीयं मंत्रगणं प्रजायुमच्छेत्येतस्मादाद्येद्वे अनुष्टुभौ नतस्य द्विपदागायत्री हिरण्यगर्भश्चतस्रोमामाहिंसीद्यश्चात्रद्वे एताः प्रतीकचोदिता ब्रह्मयज्ञेऽ-

ध्येयाः सर्वत्रैवमेषोहचतस्त्रस्त्रिष्टुभ आपोहयश्चित्प्रतीकचोदिते ॥१५॥ वेगस्तत्पश्च त्रिष्टुभः सदसस्पतिं
तृचेन मेधाकामो मेधां याचते प्रथमा गायत्री लिंगोक्तदेवता द्वितीयाग्नेय्यनुष्टुप्तृतीयालिंगोक्त-
देवतानुष्टुबिदंमे मांत्रवर्णिक्यनुष्टुबे तयादेवेभ्यःश्रीकामोयाचते श्रियम् ॥ १६ ॥ इति० संहितायां
द्वात्रिंशोऽध्यायः ॥३२॥ अस्याजरासः सप्तदशाग्निष्टुत्याग्निष्टोमिके प्रथमेऽहनि पुरोरुच आग्नेय्यऽआद्ये
द्वे ऐंद्रवायवस्यास्याजरासोवत्सप्रीर्हरयोधूमकेतवो विरूपोयजमानो द्वे मैत्रावरुणस्य यजमानो गोत-
मोद्वे विरूपे शुक्रस्य कुत्सोयमिहमंथिनोवैश्वदेवग्रहग्रहणे त्रीणिशता विश्वामित्रऐंद्राग्नस्याग्निर्वृत्राणि
भरद्वाजो वैश्वदेवस्य विश्वेभिः सोम्यंमेधातिथिरायन्मरुत्वतीययोर्द्वे आयतपराशरः शाक्त्योऽग्नेशर्द्धी-
त्रिदुहिताविश्ववारा त्वाꣳहि भरद्वाजस्त्वे अग्नेद्वे बृहत्यावादित्यस्य त्वेऽअग्ने वसिष्ठः श्रुधिप्रस्कण्व
आदित्यग्रहग्रहणे विश्वेषामदितिर्वामदेवो गोतमो महोअग्नेः सावित्रस्य लुशोधानाकोऽनुक्तंगयात्रं
त्रैष्टुभम् ॥ १७ ॥ इन्द्रस्तुत्युक्थ्येद्वितीयेऽहनि ऐन्द्र्यःपुरोरुचो द्वादशप्रतीकचोदिते च द्वे तिस्त्रश्चा-
पश्चिद्वसिष्ठो गावऽउपपुरुमीढाजमीढौ यदद्य वसिष्ठऽआसुते सुनीतिरातिष्ठतं विश्वामित्रः प्रवः

सुचीकोबृहन्नित्रिशोकऽइंद्रेहि मधुच्छन्दाऽइन्द्रोवृत्रं विश्वामित्रः कुतस्त्वमगस्त्यऽआतद्गौरीवीतिः शाक्त्यऽइमान्ते कुत्सो जगतीमनुक्तं गायत्रं त्रैष्टुभम् ॥ १८ ॥ सूर्यस्तुत्युक्थ्ये तृतीयेऽहनि सौर्यश्चतुर्दश पुरोरुचस्तिस्रश्च प्रतीकोक्ताः विभ्राड्बृहज्जगतीं विभ्राट्सौर्यऽउदुत्यं तिस्रः प्रस्कण्वऽआनोगस्त्यो यदद्य श्रुतकक्षः सुतकक्षौ तरणिः प्रस्कण्वस्तत्सूर्यस्य द्वे कुत्सो बण्महाँ २ द्वे जमदग्निर्बृहतीसतोबृहत्यौ श्रायंतइवनृमेधोबृहतीमद्यादेवाः कुत्सऽआकृष्णेन हिरण्यस्तूप आङ्गिरसो नाख्यातꣳसौर्यं गायत्रं त्रैष्टुभम् ॥ १९ ॥ वैश्वदेवस्तुतिश्चतुर्थेऽहनि वैश्वदेव्यः पुरोरुच एकादश षट् च प्रतीकोक्ताः प्रवावृजे वसिष्ठस्त्रिष्टुभं इन्द्रवायूबृहस्पतिंद्वे मेधातिथिरधिनः कुसीदीकाण्वोम्न इन्द्रप्रतिक्षत्र इन्द्राग्नीमित्रावरुणा जगतीं काश्यपोऽवत्सारोस्मेरुद्राः प्रगाथोर्वाचो अद्यकूर्म्मोगार्त्समदो विश्वेअद्य लुशोधानाको विश्वेदेवाः सुहोत्रोदेवेभ्योहि वामदेवो जगतीमनुक्तं गायत्रं त्रैष्टुभम् ॥२०॥ अथाऽनारस्याधीतं मंत्रगणं अर्वाक्पितृमेधादादित्ययाज्ञवल्क्यौ ददृशतुः प्रवायुं पंचदशर्च्चः पुरोरुग्गणो द्वे च प्रतीकोक्ते प्रवायुमृजिश्वो मित्रꣳहुवे द्वे मधुच्छन्दामित्रं लिंगोक्ता दस्रायुवाकवऽआ-

श्विनीं विदद्वचैन्द्रीं कुशिको नहिस्पशं विश्वामित्रो वैश्वानरीमुग्राविघनिनैन्द्राग्नीं भरद्वाजऽउपास्मै
सौमीं देवलोसितोवा येत्वा विश्वामित्रो जनिष्टाऽउग्रो गौरिवीतिरातु वामदेवस्तृचमैन्द्रं त्वमिन्द्रे-
न्द्यौनृमेधः पथ्याबृहतीसतोबृहत्यौ यज्ञोदेवानां कुत्सोऽदब्धेभिः सावित्रीं जगतीं भरद्वाजः ॥ २१ ॥
प्रवीरयापंचदशर्च्चः पुरोरुग्गणो द्वे च प्रतीकोक्ते प्रवीरया वसिष्ठोवायव्यां काव्ययोराजानेषु दक्ष-
स्तिरश्चीनः परमेष्ठीं प्रजापतिर्भाववृत्तं तृचमारोदसीं जगतीं विश्वामित्र उक्थेभिर्वृत्रहंतमा वसिष्ठ-
ऽउपनः सुहोत्रो वैश्वदेवीं ब्रह्माणिमेऽगस्त्यो द्वे इंद्रमरुत्संवादे तदिदाथर्वणो बृहद्दिवऽइमाऽउत्वा द्वे
बृहत्यौ मेधातिथिरय६ सहस्रं मेधातिथिः सतोबृहतीम् ॥ २२ ॥ आनस्त्रयोदशर्च्चः पुरोरुग्गणश्चतु-
र्ऋचं प्रतीकचोदितं चानोवायव्यां जमदग्निरिन्द्रवायूसुसन्दृशैन्द्रवायव्यान्तापसऋधगित्थामैत्राव-
रुणीं जमदग्निरायातमाश्विनीं वसिष्ठः प्रैतु वैश्वदेवींकण्वश्चन्द्रमाः अप्स्वैन्द्रीमारुतीपरिणामवादिनीं
त्रितआप्त्यो देवंदेवंवो मनुर्वैवस्वतो वैश्वदेवीं दिविपृष्टोमृधऐन्द्रऽइन्द्राग्नीऽअपारसुहोत्रोदेवासोहिम-
नुरपाधमद्वेनृमेधोस्येन्मेधातिथिर्दशम्येकादश्यन्त्याश्चसतोबृहत्यः शेषाबृहत्यः शेषाबृहत्यः ॥ २३ ॥

इति॰ संहितायां त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ इति सर्वानुक्रमणिकायां तृतीयोऽध्यायः ॥ ३ ॥ यज्जा-
ग्रतः षडृचं मानसं त्रैष्टुभꣳशिवसंकल्पः पितुन्नूष्णिहमगस्त्योन्नस्तुतिमन्विच्चतुर्ऋचमानुष्टुभं द्वयो-
रनुमितिर्द्वयोः सिनीवालीसरस्वत्यौ सिनीवालीपृथुष्टुके द्वे गृत्समदस्त्वमग्नेद्वे आग्नेय्यौ जगत्यौ
हिरण्यस्तूप आंगिरसः उत्तानायां द्वे देवश्रवादेववातश्च भारतावाद्यात्रिष्टुब्द्वितीयानुष्टुप्प्रमन्महे
नोधाद्व्यृचमैन्द्रं त्रैष्टुभमिच्छन्नित्वा द्व्यृचमैन्द्रंत्रैष्टुभमेव देवश्रवादेववातश्च भारतौ ॥ १ ॥ अषाढं-
युत्सुगोतमश्चतुर्ऋचं त्रैष्टुभꣳसौम्यमग्नेव्यग्न्यच्चतुर्ऋचं त्रैष्टुभꣳसावित्रमांगिरसोहिरण्यस्तूपो
द्वितीयाजगत्युभापिबतमाश्विनं तृचमुभापिबतं प्रस्कण्वो गायत्रीमप्नस्वतीमश्विना त्रिष्टुभौ कुत्स
अरात्रि पथ्याबृहतीꣳरात्रिर्देवत्यां कशिपाभरद्वाजदुहितोपस्तदुपस्यापरोष्णिहं गोतमः प्रातरग्निं
वसिष्ठः सप्तर्चमाद्याजगती बहुदेवत्या पंचभगदेवत्यास्त्रिष्टुभोंत्योपस्याः ॥ २ ॥ पूषन्तव सुहोत्रः ॥२०८॥
पथस्पथः परिपतिमृजिश्वैतेपौष्ण्यौ गायत्रीत्रिष्टुभौ त्रीणिपदा वैष्णव्यौ गायत्र्यौ मेधातिथिर्घृतव-
तीभुवनानां भरद्वाजो द्यावापृथिव्यां जगतीं येनोलिंगोक्तदेवतां त्रिष्टुभं विहव्याऽआनासत्या हिर-

ण्ण्यस्तूप आश्विनीमेषवोमारुती त्रिष्टुभमगस्त्यः सहस्तोमा ऋषिस्तुष्टिप्रतिपादिका त्रिष्टुभं यज्ञः प्राजापत्य आयुष्यं वर्च्चस्यं तृचं दक्षउष्णिक्शाकरीत्रिष्टुभोहिरण्यस्तुतिरुतनऋत्विजो बहुदेवत्या-त्रिष्टुभमिमागिरः कूर्मोगार्त्समदआदित्यदेवत्यां त्रिष्टुभ४सप्तऋषयोऽध्यात्मवादिनी जगत्युत्तिष्ठ-तृचोब्रह्मणस्पत्य आद्ये बृहत्यौ कण्वोघोरोन्त्यांत्रिष्टुभं गृत्समदोयइमा चतुर्ऋचं प्रतीकोक्तम् ॥ ३ ॥ इति० संहितायां चतुर्स्त्रिंशोऽध्यायः ॥३४॥ अपेतोऽध्यायः पित्र्यआदित्यस्य देवानां वाआद्यागायत्री परंयजुःसवितातेगायत्री वायुः पुनातु चत्वारि लिंगोक्तानि सवितातेगायत्री परंमृत्यो संकसुकस्त्रि-ष्टुभं मृत्युदेवत्या ॐ शंवातोऽनुष्टुप्बृहत्यौ वैश्वदेव्यावइमन्वती सुचीकस्त्रिष्टुभं वैश्वदेवीमपाघं लिंगो-क्तदेवतामनुष्टुभ४शुनःशेपोदुःस्वप्ननाशनीमनड्वाहमानडुह्यनुष्टुप् इमंजीवेभ्यः संकसुकोमृत्युदेवत्यां त्रिष्टुभमायुष्मानग्नआग्नेयीं त्रिष्टुभं वैखानसःपरीमेऽनुष्टुभमैंद्रीं भारद्वाजः शिरिंविहः क्रव्यादमग्निं त्रिष्टुभमाग्नेयीं दमनो वहवपां जातवेदसी त्रिष्टुप् स्योनापृथिवी मेधातिथिः पार्थिवीं गायत्रीमस्मा-त्त्वमाग्नेयी गायत्र्यनिरुक्ता ॥ ४ ॥ इति० संहितायां पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥ ऋचंवाचं पंचा-

ध्यार्यीं दध्यङ्ङाथर्वणोददर्शाग्निकाश्वमेधिकवर्ज्जमाद्योऽध्यायः शान्त्यर्थोवैश्वदेव आद्यानि यजू᳘ंषि
यन्मे बार्हस्पत्या पंक्तिः कयात्वमैंद्र्यनिरुक्ता गायत्रींद्रोविश्वस्यविराड् द्विपदा शन्नोदे अनुष्टुभावहानि
द्विपदागायत्री शन्नऽइन्द्राग्नी त्रिष्टुब् गायत्र्यावन्त्याशीर्द्यौः शांतिर्यजू᳘ंषि नमस्ते अस्त्वनुष्टुभौ
तच्चक्षुः पुरऽउष्णिक्सौरी ॥ ५ ॥ इति० संहितायां षट्त्रिंशोऽध्यायः ॥ ३६ ॥ आददेनारिरस्य-
भ्रिर्दैवतं देवीद्यावापृथिव्यं देव्योवम्र्यो वल्मीकवपेयत्यग्रेवराहविहतामिंद्रस्यौजआदाराः प्रैतु
मग्वस्याश्वस्यर्त्वेयमायदेवस्त्वार्च्चिरसि घर्मदेवत्यानि योघर्मःसआदित्योयएषतपत्यनाधृष्टापुरस्ता-
त्सप्तपार्थिवानि यजमानाशीर्मधुप्राणदेवत्यानि गर्भोदेवानामवकाशा मामाहिꣳसीरित्येनदन्ताघर्म-
देवत्या धर्तादिवऽऊर्ध्वबृहत्यपश्यङ्गोपां त्रिष्टुभं दीर्घतमाहृदेत्वा परोष्णिक्त्वष्टमन्तः पदयाशीरहः-
केतुना यजुषी घर्मदेवत्ये ॥ ६ ॥ इति० संहितायां सप्तत्रिंशोऽध्यायः ॥ ३७ ॥ आददेदित्यै रज्जुः ॥२०९॥
इडऽएहि गौर्यस्ते त्रिष्टुभं दीर्घतमाः इन्द्राश्विना वैश्वदेवानि समुद्रायत्वा वातनामानि स्वाहाघर्मा-
यघर्मदेवत्ये विश्वाऽआशा आश्विन्यनुष्टुब् दिविधा घर्मदेवत्यमाश्विनाघर्ममुष्णिगपातां ककुबसेव्य-

स्रेखरः स्वाहापूष्णे सतालिंगोक्तदेवतानिस्वाहासंपयोदेवत्यं मधुहुतं घर्म्मो भीमं गायत्रीबृहत्याव-
नवसाने अनिशकरी वाग्नेयी समस्ता त्र्यवसाना स्रातेघर्मक्षत्रस्य बृहती चतुःस्रक्तिर्महाबृहती
घर्मैतदनुष्टुबचिक्रदत्परोष्णिक् यावतीद्यावापृथिवी दधिघर्मो मयित्यत्पंक्तिर्यजमानाशीः पयसो
रेतोगायत्र्यनवसाना विषःसंवृग्दधिघर्मोऽनुक्तं घर्मदैवतम् ॥ ७ ॥ इति० संहितायां अष्टात्रिंशो-
ऽध्यायः ॥ ३८ ॥ स्वाहाप्राणेभ्यो मांत्रवर्णिक्योदेवतामनसःकाममनुष्टुब्यजमानाशीः श्रीर्देवता
प्रजापतिःसंभ्रियमाणो यथाकालं प्रायश्चित्तदेवताः सविताप्रथमेहन्प्रत्यहं क्रमेणोग्रश्च मारुती
गायत्री विमुखाख्यो मंत्रोऽग्नौ विनियुक्तस्तस्मादाग्निकऽएवास्य ऋषिः परमेष्ठी प्राजापत्योवाग्निꣳहृद-
येनाश्वमेधिकानि त्रीणि तंत्रोक्त एव ऋषिर्लोमभ्यःस्वाहेति प्रायश्चित्ताहुतयो द्विचत्वारिꣳशत्
॥ ८ ॥ इति० संहितायां एकोनचत्वारिंशोध्यायः ॥ ३९ ॥ ईशावास्यमात्मदेवत्य आनुष्टुभोऽध्यायः
अनेजदेकं त्रिष्टुप् सपरि जगती वायुरनिलं यजुषि ॐ ३ मिति परमाक्षरस्य योगिनामालम्ब-
भूतस्य परस्य ब्रह्मणः प्रणवाख्यास्यास्थूलादिगुणयुक्तस्य ब्रह्म ऋषिछन्दोगायत्रं परमात्मा देवता

ब्रह्मारंभे विरामे च यागहोमादिषु शांतिपुष्टिकर्मसु चान्येष्वपि काम्यनैमित्तिकादिषु सर्वेषु विनि-
योगोऽस्यक्रतोत्रिभिर्य्यजुर्भिरंते यज्ञान्योगी स्मारयत्यग्नेनयान्तेनमस्कारोक्तिर्हिरण्मयेनादित्यो-
पासनम् ॐ ३ मिति नामनिर्देशो ब्रह्मणः खंब्रह्मेत्याकाशरूपमन्ते ब्रह्म ध्यायेत् ॥ ९ ॥ ॥ ४० ॥
अथातश्छन्दोदेवता गायत्र्या अग्निरुष्णिहः सवितानुष्टुभः सोमोबृहत्याबृहस्पतिः पंक्तेर्वरुणास्त्रिष्टुभ-
ऽइन्द्रोजगत्या विश्वेदेवाविराजोमित्रः स्वराजोरुणोतिच्छन्दसः प्रजापतिर्विच्छन्दसो वायुर्द्विपदायाः
पुरुषऽएकपदाया ब्रह्मा सर्वा ऋच आग्नेय्यः सर्वाणि यजूꣳषि वायव्यानि सर्वाणि सामानि
सौराणि सर्वाणि ब्राह्मणानि च स्वाहाकारस्याग्निर्वषट्कारस्य विश्वेदेवाः कर्मारंभे मंत्राणां देवता
वेदितव्याः संन्यस्यमनसिदेवतां ततो हविर्हूयते देवतामविज्ञाय योजुहोति देवास्तस्य हविर्नजुषन्ते
स्वाध्यायमपियोऽधीते मंत्रदेवज्ञः सोऽमुष्मिंल्लोके देवैरपीड्यते तस्माच्च देवता वेद्या मंत्रे मंत्रे प्रय-
तो मंत्राणां देवताज्ञानान्मंत्रार्थमधिगच्छति मंत्रार्थज्ञानात्तु विधूतपाप्मा नाकमभ्येति न हि
कश्चिदविज्ञाय याथातथ्येन देवताः श्रौतानां कर्मणां विप्रः स्मार्तानां चाश्नुते फलम् ॥ १० ॥ अना-

दिष्टमध्वरादौ सर्वांतकर्मणो परिभाषितं मंत्रगणं वक्ष्यामः सर्वमाग्नेयं गायत्रं गौतमी यꣳसर्वꣳसा-
वित्रमौष्णिहंभारद्वाजीयꣳसर्वꣳसौम्यमानुष्टुभमाथर्वणिकꣳसर्वं वार्हस्पत्यं वार्हतमाङ्गिरसꣳसर्वं
वारुणं पांक्तमालंवायनीयꣳ सर्वमैंद्रं त्रैष्टुभं याज्ञवल्कीयꣳसर्वमादित्यदैवतं जागतं कौत्सम ॥ ११ ॥
ज्योतिष्टोमे दीक्षाप्रभृति वक्ष्यामो दीक्षायां भृगुरग्नाविष्णूगायत्री प्रायणीय आंगिरसोऽदितिरु-
ष्णिक्त्रये विश्वामित्रः सोमोऽनुष्टुवातिथ्ये वसिष्ठो विष्णुर्वृहती प्रवर्ग्ये कश्यप आदित्यपाङ्क्तिरुप-
सत्स्वात्रेयउपसद्देवता त्रिष्टुवग्नीषोमीयेऽगस्त्योऽग्नीषोमौ जगती प्रायणीयेऽतिरात्र आग्निवेश्योऽहो-
रात्रे अतिजगतीचतुर्विꣳशत्यहेसौकरायणः संवत्सरः शक्वर्यभिप्लवे षडहे सौपर्णोऽर्द्धमासामासाश्चा-
तिशक्करीपृष्ठ्येषडहे सायकायनऋतवोष्टिरभिजितिप्रियघृतोग्निरत्यष्टिः स्वरसामसु सरस्वत्यापोधृति-
र्विषुवति रौहिणायन आदित्योतिधृतिर्विश्वजिति सौभरऽइंद्रः कृतिर्गोआयुषो वाष्कलिर्मित्रावरुणौ
प्रकृतिर्दशरात्र आचार्यो विश्वेदेवा आकृतिर्द्वादशरात्रिके पृष्ठ्ये षडहे भाल्लवेयो दिशोविकृतिश्छ-
न्दोमेषु शौल्वायन इमे लोकाः संकृतिर्दशमेहनि पराशरःसंवत्सरोभिकृतिर्महाव्रते शैलिनः प्रजा-

य.
हेता.
॥११॥

पतिरुत्कृतिरुदयनीयेतिरात्रे भौवायनो वायुश्छन्दाꣳसि सर्वाणि ॥ १२ ॥ ऋषिभिरुपलक्षितं वाक्यं
ऋषयश्छंदोभिरुपलक्षिता देवता मंत्रवर्णादृग्यजुषयोर्विनियोगतश्च विज्ञेयाः सर्वमेतच्छंन्दोदैवत-
मार्षं च विज्ञाय यत्किंचिज्जपहोमादिकरोति तस्य फलमश्नुते ब्रह्मयज्ञारंभे यथाविधि स्नात्वा
छन्दःपुरुषमेनोनिर्णोदनꣳशरीरं न्यसेत्तिर्र्यग्बिलश्चमसऊर्द्ध्वबुध्नस्तस्याक्षिणी गोतमभरद्वाजौ श्रोत्रे
विश्वामित्रजमदग्नी नासिके वसिष्ठकश्यपौ वागत्रिर्गायत्रींछंदोऽग्निर्देवताꣳशिरसि विन्यसेदेवमेवो-
ष्णिहꣳसवितारं ग्रीवास्वनूकेबृहतीं बृहस्पतिं बाह्वोर्बृहद्रथन्तरे द्यावापृथिवीमध्येत्रिष्टुभमिन्द्रꣳश्रो-
ण्योर्जगतीमादित्यं मेंढ्रेऽतिछंदसं प्रजापतिं पायौ यज्ञायज्ञियं वैश्वानरमूर्वोरनुष्टुभं विश्वान्देवानष्ठी-
वतोः पंक्ति मरुतः पादयोर्द्विपदाविष्णुं प्राणेषु विछन्दसं वायुं न्यूनातिरिक्तेष्वङ्गेषु न्यूनाक्षरं छन्द
आपोदेवतेत्यवꣳसर्वांगेषु योजयित्वा वेदमयः संपद्यते शापानुग्रहसमर्थो भवति ब्राह्मं तेजश्च वर्द्धते
न कुतश्चिद्भयं विन्दते ऋङ्मयो यजुर्मयः साममयस्तेजोमयो ब्रह्ममयोऽमृतमयः संभूय ब्रह्मैवा-
भ्येति तस्मादेवं नाब्रह्मचारिणे नातपस्विने नासंवत्सरोषितायं नाप्रवक्त्रेऽनुब्रूयादनेनाधीतेन चांद्रा-

यणाब्दफलमवाप्नोत्यनेन च सम्यग्ज्ञातेन ब्रह्मणः सायुज्यꣳसलोकतामाप्नोत्याप्नोति ॥ १३ ॥ इति सर्वानुक्रमणिकायां चतुर्थोऽध्यायः ॥ ४ ॥ ॥ अथ छन्दाꣳसि गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगत्यतिजगती शक्वर्यतिशक्वर्यष्ट्यत्यष्टीधृत्यतिधृतयः कृतिप्रकृत्याकृतिर्विकृतिसंकृत्यभिकृत्युत्कृतयश्चतुर्विꣳशत्यक्षरादीनि चतुरुत्तराण्यूनाधिकेनैकेननिचृद्भुरिजौ द्वाभ्यां विराट्स्वराजौ पादपूरणार्थं तु क्षैप्रसंयोगैकाक्षरीभावान् व्यूहेदाद्ये तु सप्तवर्गे पादविशेषान् संज्ञाविशेषांस्ताननुक्रामन्त एवोदाहरिष्यामो विराड्रूपाविराट्स्थानाश्च बहूनामपि त्रिष्टुभ एवेत्युद्देशस्तत्र दशैकादशद्वादशाक्षराणां वैराजत्रैष्टुभजागता इति संज्ञा अनादेशेष्टाक्षराः पादाश्चतुष्पदाश्चर्चः ॥ १ ॥ प्रथमं छन्दस्त्रिपदा गायत्री पञ्चकाश्चत्वारषट्कश्चैकश्चतुर्थश्चतुष्को वा पदपंक्तिः षट्सप्तैकादशा उष्णिग्गर्भास्त्रयः सप्तकाः पादनिचृन्मध्यमः षट्कश्चेदतिनिचृद्दशकश्चेद्यवमध्या यस्यास्तु षट्सप्तकाष्टकाः सा वर्द्धमाना विपरीता प्रतिष्ठा द्वौ षट्कौ सप्तकश्चेति ह्रसीयसी ॥ २ ॥ द्वितीयमुष्णिक्त्रिपदान्त्यो द्वादशक आद्यश्चेत्पुरउष्णिङ्मध्यमश्चेत्ककुप्त्रैष्टुभजागतचतुष्काः ककुब्न्यंकुशिरैकादशिनोःपरःषट्कस्तनुशिरा मध्ये

सं. ५६

चेत्पिपीलिकमध्याद्यःपंचकस्त्रयोऽष्टका अनुष्टुब्गर्भाश्चतुःसप्तकोष्णिगेव ॥ ३ ॥ तृतीयमनुष्टुप्चतुष्पदाथ पञ्चपञ्चकाः पङ्क्तश्चैकौ महापदपंक्तिर्जागतावष्टकश्च कृतिर्मध्ये चेदष्टकः पिपीलिकमध्या नवकयोर्मध्ये जागतः कविराणनववैराजत्रयोदशैर्नैष्टुरूपादेकास्त्रयो विराडेकादशका वा ॥ ४ ॥ चतुर्थं बृहतीतृतीयो द्वादशक आद्यश्चेत्पुरस्ताद्बृहती द्वितीयश्चेन्न्यंकुसारिण्युरोबृहती स्कन्धो ग्रीवीवान्त्यश्चेदुपरिष्टाद्बृहत्याष्टिनोर्मध्ये दशकौ विष्टारबृहती त्रिजागतोर्ध्वबृहती त्रयोदशिनोर्मध्येऽष्टकः पिपीलिकमध्या नवकाष्टकैकादशाष्टिनो विषमपदाचतुर्नवका बृहत्येव ॥ ५ ॥ पञ्चमं पंक्तिः पञ्चपदाऽथ चतुष्पदाविराट्दशका अयुजौ जागतौ सतो बृहती युजौ चेद्विपरीता आद्यौ चेद्विष्टारपंक्तिरन्त्यौ चेदास्तारपंक्तिराद्यान्त्यौ चेत्सँस्तारपङ्क्तिर्मध्यमौ चेद्विष्टारपंक्तिः ॥६॥ षष्ठं त्रिष्टुप् त्रैष्टुभपदा द्वौ तु जागतौ यस्याः सा जागते जगती त्रैष्टुभे त्रिष्टुब्वैराजौ जागतौ चाभिसारिणी नवकौ वैराजस्त्रिष्टुभश्च द्वौ वा वैराजौ नवकस्त्रैष्टुभश्चाविराट्स्थानैकादशिनस्त्रयोऽष्टकश्च विराड्रूपा द्वादशि-

॥२१२॥

१ प्रस्तार.

नस्त्रयोष्टकश्च ज्योतिष्मती यतोऽष्टकस्ततो ज्योतिश्चत्वारोऽष्टका जागतश्च महाबृहतीमध्ये जागतश्चे-
यवमध्याद्यौदशकावष्टकास्त्रयः पंक्त्युत्तरा विराट्पूर्वा वा ॥ ७॥ सप्तमं जगती जागतपदाष्टिनस्त्रयः
स्त्रौ च द्वौ महासतो बृहत्यष्टकौ सप्तकः षट्को दशको नवकश्च षडष्टका वा महापंक्तिर्माध्यन्दिनीये
वाजसनेयके सर्वानुक्रमणिकैषा कृतिर्भगवतः कात्यायनस्यैषा कृतिर्भगवतः कात्यायनस्य ॥ ८ ॥
इति सर्वानुक्रमणिकायां पञ्चमोऽध्यायः ॥ ५ ॥ कंडिका संख्या ॥ १२४ ॥ समाप्ता ॥ ॥

# श्रीशुक्लयजुर्वेदिनां[1] पारस्करगृह्यसूत्रम् ॥

॥ श्रीगणेशाय नमः । अथातो गृह्यस्थालीपाकानां कर्म परिसमुह्योपलिप्योल्लिख्योद्धृत्याभ्युक्ष्याग्नि-
मुपसमाधाय दक्षिणतो ब्रह्मासनमास्तीर्य प्रणीय परिस्तीर्यार्थवदासाद्य पवित्रे कृत्वा प्रोक्षणीः
सँस्कृत्यार्थवत्प्रोक्ष्य निरुप्याऽऽज्यमधिश्रित्य पर्यग्नि कुर्यात्स्रुवं प्रतप्य सम्मृज्याभ्युक्ष्य पुनः प्रतप्य
निदध्यादाज्यमुद्वास्योत्पूयावेक्ष्य प्रोक्षणीश्च पूर्ववदुपयमनान्कुशानादाय समिधोऽभ्याधाय पर्युक्ष्य
जुहुयादेष एव विधिर्यत्र क्वचिद्धोमः ॥ १ ॥ आवसथ्याधानं दारकाले दायाद्यकाल एकेषां वैश्यस्य
बहुपशोर्गृहादग्निमाहृत्य चातुष्प्राश्यपचनवत्सर्वमरणिप्रदानमेके पञ्चमहायज्ञा इति श्रुतेरभ्याधेय-

॥२१३॥

१ "छन्दोवत्सूत्राणि" इत्युच्चारणे याजुषां नियमः । ये ये धर्माश्छन्दसि ते सर्वे सूत्रेष्वपि ज्ञेयाः । अतोऽध्ययनवेलायामेव तत्र तत्र गुरोः सकाशाद् षकारोच्चारणं खकारोच्चारणं द्वित्त्वादिकञ्चावगन्तव्यं तज्ज्ञानेच्छुना ।

देवताभ्यः स्थालीपाकँश्रपयित्वाऽऽज्यभागाविष्ट्वाज्याऽऽहुतीर्जुहोति त्वन्नोऽअग्ने, स त्वन्नोअग्न इमं मे वरुण, तत्त्वायामि, ये ते शतमयाश्चाग्नऽउदुत्तमं, भवतन्न इत्यष्टौ पुरस्तादेवमुपरिष्टात्स्थालीपाकस्याग्न्याधेयदेवताभ्यो हुत्वा जुहोति स्विष्टकृते चायास्यग्नेर्वषट्कृतं यत्कर्मणाऽत्यरीरिचं देवा गातुविद् इति बर्हिर्हुत्वा प्राश्नाति ततो ब्राह्मणभोजनम् ॥ २ ॥ षडर्घ्या भवन्त्याचार्य ऋत्विग्वैवाह्यो राजा प्रियः स्नातक इति प्रतिसंवत्सरानर्हयेयुर्यक्ष्यमाणास्त्वृत्विज आसनमाहार्याह साधु भवानास्तामर्चयिष्यामो भवन्तमित्याहरन्ति विष्टरं पद्यं पादार्थमुदकमर्धमाचमनीयं मधुपर्कं दधिमधुघृतमपिहितङ्काँस्ये काँस्येनान्यस्त्रिस्त्रिः प्राह विष्टरादीनि विष्टरं प्रतिगृह्णाति वर्ष्मोऽस्मि समानानामुद्यतामिव सूर्यः ॥ इमं तमभितिष्ठामि यो मा कश्चाभिदासतीत्येनमभ्युपविशति पादयोरन्यं विष्टर आसीनाय सव्यं पादं प्रक्षाल्य दक्षिणं प्रक्षालयति ब्राह्मणश्चेद्दक्षिणं प्रथमं विराजो दोहोऽसि विराजो दोहमशीय मयि पाद्यायै विराजो दोह इत्यर्घं प्रतिगृह्णात्यापः स्थ युष्माभिः सर्वान्कामानवाप्नवानीति निनयन्नभिमन्त्रयते, समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत ॥ अरिष्टा अस्माकं

वीरा मा परासेचिमत्पय इत्याचामत्यामागन्यशसा सꣳसृज वर्चसा ॥ तं मा कुरु प्रियं प्रजानाम-
धिपतिं पशूनामरिष्ठिन्ततनूनामिति मित्रस्य त्वेति मधुपर्कं प्रतीक्षते देवस्य त्वेति प्रतिगृह्णाति सव्ये
पाणौ कृत्वा दक्षिणस्यानामिकया त्रिः प्रयौति नमः श्यावास्यायान्नशने यत्त आविद्धं तत्ते
निष्कृन्तामीत्यनामिकाङ्गुष्ठेन च त्रिर्निरुक्षयति तस्य त्रिः प्राश्नाति यन्मधुनो मधव्यं परमꣳरूपम-
न्नाद्यम् ॥ तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योऽन्नादोऽसानीति मधुमती-
भिर्वा प्रत्यृचं पुत्रायान्तेवासिने वोत्तरत आसीनायोच्छिष्टं दद्यात्सर्वं वा प्राश्नीयात्प्राग्वा सञ्चरे
निनयेदाचम्य प्राणान्सम्मृशति वाङ्म आस्ये नसोः प्राणोऽक्ष्णोश्चक्षुः कर्णयोः श्रोत्रं बाह्वोर्बलमूर्वो-
रोजोऽरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सहेत्याचान्तोदकाय शासमादाय गौरिति त्रिः प्राह प्रत्याह
माता रुद्राणां दुहिता वसूनाꣳस्वसादित्यानाममृतस्य नाभिः ॥ प्रनुवोचं चिकितुषे जनाय
मागामनागामदितिं वधिष्ट ॥ मम चामुष्य च पाप्मानꣳ हनोमीति यद्यालभेताथ यद्युत्सिसृक्षे-
न्मम चामुष्य च पाप्माहत ओमुत्सृजत तृणान्यत्त्विति ब्रूयान्न त्वेवामाꣳ सोऽर्घस्यादधियज्ञम-

धिविवाहं कुरुतेत्येव ब्रूयाद्यद्यप्यसकृत्संवत्सरस्य सोमेन यजेत कृताघ्यां एवैनं याजयेयुर्नाकृताघ्या- इति श्रुतेः ॥ ३ ॥ चत्वारः पाकयज्ञा हुतोऽहुतः प्रहुतः प्राशित इति पञ्चसु बहिःशालायां विवाहे चूडाकरण उपनयने केशान्ते सीमन्तोन्नयन इत्युपलिप्त उद्धूतावोक्षितेऽग्निमुपसमाधाय निर्मन्थ्य- मेके विवाह उदगयन आपूर्यमाणपक्षे पुण्याहे कुमार्याः पाणिं गृह्णीयात्रिषु त्रिपूत्तरादिषु स्वातौ मृगशिरसि रोहिण्यां वा तिस्रो ब्राह्मणस्य वर्णानुपूर्व्येण द्वे राजन्यस्यैका वैश्यस्य सर्वेषाꣳशूद्रा- मप्येके मन्त्रवर्जमथैनां वासः परिधापयति जराङ्गच्छ परिधत्स्व वासो भवाकृष्टीनामभिशस्तिपावा ॥ शतं च जीव शरदः सुवर्चा रयिश्च पुत्राननुसंव्ययस्वायुष्मतीदं परिधत्स्व वास इत्यथोत्तरीयं या अकृन्तन्नवयं या अतन्वत । याश्च देवीस्तन्तूनभितो ततन्थ तास्त्वा देवीर्जरसे संव्ययस्वायु- ष्मतीदं परिधत्स्व वास इत्यथैनौ समञ्जयति समञ्जन्तु विश्वेदेवाः समापो हृदयानि नौ ॥ सम्मा- तरिश्वा सन्धाता समुदेष्ट्री दधातु नाविति पित्रा प्रत्तामादाय गृहीत्वा निष्क्रामति यदैषि मनसा दूरं दिशोऽनु पवमानो वा ॥ हिरण्यपर्णो वैकर्णः स त्वा मन्मनसां करोत्वित्यसावित्यथैनौ

समीक्षयत्यघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः ॥ वीरसूर्देवकामा स्योनाशन्नो भव द्विपदे शं चतुष्पदे ॥ सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः ॥ तृतीयोऽग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः ॥ सोमोऽददद्गन्धर्वाय गन्धर्वोऽददद्ग्नये ॥ रयिं च पुत्राँश्चादादग्निर्मह्यमथो इमाम् ॥ सा नः पूषा शिवतमामेरय सा न ऊरू उशती विहर ॥ यस्यामुशन्तः प्रहराम शेपं यस्यामु कामा बहवो निविष्ट्या इति ॥ ४ ॥ प्रदक्षिणमग्निं पर्याणीयैके पश्चादग्नेस्तेजनीङ्कटं वा दक्षिणपादेन प्रहृत्योपविशत्यन्वारब्ध आघारावाज्यभागौ महाव्याहृतयः सर्वप्रायश्चित्तं प्राजापत्यꣳस्विष्टकृच्चैतन्नित्यꣳ सर्वत्र प्राङ्महाव्याहृतिभ्यः स्विष्टकृदन्यच्चेदाज्याद्धविः सर्वप्रायश्चित्तं प्राजापत्यान्तरमेतदावापस्थानं विवाहे राष्ट्रभृत इच्छञ्जयाभ्यातानाँश्च जानन्येन कर्मणेर्त्स्येदिति वचनाच्चित्तञ्च चित्तिश्चाकूतं चाकूतिश्च विज्ञातं च विज्ञातिश्च मनश्च शक्वरीश्च दर्शश्च पौर्णमासं च बृहच्च रथन्तरं च प्रजापतिर्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतना जयेषु ॥ तस्मै विशः समनमन्त सर्वाः स उग्रः स इहव्यो बभूव स्वाहेत्यग्निर्भूतानामधिपतिः स मावत्विन्द्रो ज्येष्ठानां यमः पृथिव्या वायुरन्त-

रिक्षस्य सूर्यो दिवश्चन्द्रमा नक्षत्राणां बृहस्पतिर्ब्रह्मणो मित्रः सत्यानां वरुणोऽपाᳬसमुद्रः स्रोत्या-
नामन्नᳬसाम्राज्यानामधिपति तन्मावतु सोम ओषधीनाᳬसविता प्रसवानाᳬरुद्रः पशूनां त्वष्टा
रूपाणां विष्णुः पर्वतानां मरुतो गणानामधिपतयस्ते मावन्तु पितरः पितामहाः परेऽवरे ततास्त-
तामहाः ॥ इह मावन्त्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देव-
हूत्याᳬस्वाहेति सर्वत्रानुषजत्यग्निरैतु प्रथमो देवतानाᳬसोस्यै प्रजां मुञ्चतु मृत्युपाशात् ॥
तदयᳬराजा वरुणोऽनुमन्यतां येथयᳬस्त्री पौत्रमघन्नरोदात्स्वाहा ॥ इमामग्निस्त्रायतां गार्हपत्यः
प्रजामस्यै नयतु दीर्घमायुः ॥ अशून्योपस्था जीवतामस्तु माता पौत्रमानन्दमभिविबुध्यता-
मियᳬस्वाहा ॥ स्वस्ति नो अग्ने दिवा पृथिव्या विश्वानि धेह्ययथा यजत्र ॥ यदस्यां महि दिवि
जातं प्रशस्तं तदस्मासु द्रविणं धेहि चित्रᳬस्वाहा ॥ सुगन्नु पन्थां प्रदिशन्न एहि ज्योतिष्मध्ये
ह्यजरन्न आयुः ॥ अपैतु मृत्युरमृतन्म आगाद्वैवस्वतो नो अभयं कृणोतु स्वाहेति परं मृत्यविति
चैके प्राशनान्ते ॥ ५ ॥ कुमार्या भ्राता शमीपलाशमिश्राँल्लाजानञ्जलिनाञ्जलावावपति तां जुहोति

०।००

सꣳहतेन तिष्ठत्यर्यमणं देवङ्कन्या अग्निमयक्षत। स नो अर्यमा देवः प्रेतो मुञ्चतु मा पतेः स्वाहा॥ इयन्नार्युपब्रूते लाजानावपन्तिका॥ आयुष्मानस्तु मे पतिरेधन्तां ज्ञातयो मम स्वाहा॥ इमाँल्लाजानावपाम्यग्नौ समृद्धिकरणं तव॥ मम तुभ्यं च संवननं तदग्निरनुमन्यतामियꣳस्वाहेत्यथास्यै दक्षिणꣳहस्तं गृह्णाति साङ्गुष्ठं गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः॥ भगो अर्यमा सविता पुरन्धिर्मह्यं त्वादुर्गार्हपत्याय देवाः॥ अमोहमस्मि सा त्वꣳसात्वमस्यमो-अहम्॥ सामाहमस्मि ऋक्त्वं द्यौरहं पृथिवी त्वम्। तावेहि विवहावहै सह रेतो दधावहै॥ प्रजां प्रजनयावहै पुत्रान्विन्द्यावहै बहून्॥ ते सन्तु जरदष्टयः सम्प्रियौ रोचिष्णू सुमनस्यमानौ॥ पश्येम शरदः शतं जीवेम शरदः शतꣳशृणुयाम शरदः शतमिति॥ ६॥ अथैनामश्मानमारोहयत्युत्तरतोऽग्नेर्दक्षिणपादेनारोहेममश्मानमश्मेव त्वꣳस्थिरा भव॥ अभितिष्ठ पृतन्यतोऽववाधस्व पृतनायत इत्यथ गाथां गायति सरस्वति प्रेदमव सुभगे वाजिनीवती॥ यां त्वा विश्वस्य भूतस्य प्रजायामस्याग्रतः॥ यस्यां भूतꣳसमभवद्यस्यां विश्वमिदं जगत्॥ तामद्य गाथां गास्यामि या

स्त्रीणामुत्तमं यश इत्यथ परिक्रामतस्तुभ्यमग्रे पर्यवहं सूर्यां वहतु ना सह॥ पुनः प्रतिभ्यो जाया-
न्दाग्ने प्रजया सहेत्येवं द्विरपरं लाजादि चतुर्थꣳशूर्पकुष्ठया सर्वांल्लाजानावपति भगाय स्वाहेति त्रिः परि-
णीतां प्राजापत्यꣳ हुत्वा॥ ७॥ अथैनामुदीचीꣳ सप्त पदानि प्रक्रामयत्येकमिषे द्वे ऊर्ज्जे त्रीणि
रायस्पोषाय चत्वारि मायोभवाय पञ्च पशुभ्यः षडृतुभ्यः सखे सप्तपदा भव सा मामनुव्रता भव
विष्णुस्त्वानयत्विति सर्वत्रानुषजति निष्क्रमणप्रभृत्युदकुम्भꣳस्कन्धे कृत्वा दक्षिणतोऽग्नेर्वाग्यतः
स्थितो भवत्युत्तरत एकेषान्तत एनां मूर्धन्यभिषिञ्चत्यापः शिवाः शिवतमाः शान्ताः शान्ततमा-
स्तास्ते कृण्वन्तु भेषजमित्यापोहिष्ठेति च तिसृभिरथैनाꣳ सूर्यमुदीक्षयति तच्चक्षुरित्यथास्यै दक्षि-
णाꣳसमधिहृदयमालभते मम व्रते ते हृदयं दधामि मम चित्तमनुचित्तं तेऽअस्तु॥ मम वाच-
मेकमना जुषस्व प्रजापतिष्ट्वा नियुनक्तु मह्यमित्यथैनामभिमन्त्रयते सुमङ्गलीरियं वधूरिमाꣳसमेत
पश्यत॥ सौभाग्यमस्यै दत्त्वायाथास्तं विपरेतनेति तान्दृढपुरुष उन्मथ्य प्राग्वोदग्वानुगुप्त आगार-
आनडुहे रोहिते चर्मण्युपवेशयतीह गावो निषीदन्त्विहाश्वा इह पूरुषाः॥ इहो सहस्रदक्षिणो

यज्ञ इह पूषा निषीदन्त्विति ग्रामवचनं च कुर्युर्विवाहश्मशानयोर्ग्रामं प्राविशनादिति वचनात्त-
स्मात्तयोर्ग्रामः प्रमाणमिति श्रुतेराचार्याय वरं ददाति गौर्ब्राह्मणस्य वरो ग्रामो राजन्यस्याश्वो
वैश्यस्याधिरथꣳशतं दुहितृमतेऽस्तमिते ध्रुवं दर्शयति ध्रुवमसि ध्रुवं त्वा पश्यामि ध्रुवैधिपोष्ये मयि
मह्यं त्वादात् ॥ बृहस्पतिर्मया पत्या प्रजावती सञ्जीव शरदः शतमिति सा यदि न पश्येत्पश्या-
मीत्येव ब्रूयात् त्रिरात्रमक्षारालवणाशिनौ स्यातामधः शय्याताꣳ संवत्सरं न मिथुनमुपेयातां
द्वादशरात्रꣳषड्रात्रं त्रिरात्रमन्ततः ॥ ८ ॥ उपयमनप्रभृत्यौपासनस्य परिचरणमस्तमितानुदित-
योर्दध्ना तण्डुलैरक्षतैर्वाग्नये स्वाहा प्रजापतये स्वाहेति सायꣳसूर्याय स्वाहा प्रजापतये स्वाहेति
प्रातः पुमाꣳसौ मित्रावरुणौ पुमाꣳसावश्विनावुभौ ॥ पुमानिन्द्रश्च सूर्यश्च पुमाꣳसंवर्ततां मयि
पुनः स्वाहेति पूर्वाङ्गर्भकामा ॥ ९ ॥ राज्ञोऽक्षभेदे नद्धविमोक्षे यानविपर्यासेऽन्यस्यां वा व्यापत्तौ
स्त्रियाश्चोद्वहने तमेवाग्निमुपसमाधायाऽऽज्यꣳसंस्कृत्येह रतिरिति जुहोति नानामन्त्राभ्यामन्ययान-
मुपकल्प्य तत्रोपवेशयेद्राजानꣳस्त्रियं वा प्रतिक्षत्र इति यज्ञान्तेनात्वाहार्षमिति चैतया धुर्यौ दक्षिणा

प्रायश्चित्तिस्ततो ब्राह्मणभोजनम् ॥ १० ॥ चतुर्थ्यामपररात्रेऽभ्यन्तरतोऽग्निमुपसमाधाय दक्षिणतो ब्रह्माणमुपवेश्योत्तरत उदपात्रं प्रतिष्ठाप्य स्थालीपाकꣳश्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोत्यग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै पतिघ्नी तनूस्तामस्यै नाशय स्वाहा ॥ वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै प्रजाघ्नी तनूस्तामस्यै नाशय स्वाहा ॥ सूर्य प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै पशुघ्नी तनूस्तामस्यै नाशय स्वाहा ॥ चन्द्र प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै गृहघ्नी तनूस्तामस्यै नाशय स्वाहा ॥ गन्धर्व प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै यशोघ्नी तनूस्तामस्यै नाशय स्वाहेति । स्थालीपाकस्य जुहोति प्रजापतये स्वाहेति हुत्वा हुत्वैतासामाहुतीनामुदपात्रे सꣳस्रवान्समवनीय तत एनां मूर्द्धन्यभिषिञ्चति या ते पतिघ्नी प्रजाघ्नी पशुघ्नी गृहघ्नी यशोघ्नी निन्दिता तनूर्जारघ्नीं तत एनां करोमि सा जीर्य त्वं मया सहासावित्यथैनाꣳस्थालीपाकं

प्राशयति प्राणैस्ते प्राणान्सन्दधाम्यस्थिभिरस्थीनि माꣳसैर्माꣳसानि त्वचा त्वचमिति तस्मादेवं
विच्छ्रोत्रियस्य दारेण नोपहासमिच्छेदुत ह्येवंवित्परो भवति तामुदुह्य यथर्त्तुप्रवेशनं यथा कामी वा
काममाविजनितोः सम्भवामेति वचनाद्थास्यै दक्षिणाꣳसमधिहृदयमालभते यत्ते सुशीमे हृदयं
दिवि चन्द्रमसि श्रितम् ॥ वेदाहं तन्मां तद्विद्यात्पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम
शरदः शतमित्येवमत ऊर्ध्वम् ॥११॥ पक्षादिषु स्थालीपाकꣳ श्रपयित्वा दर्शपूर्णमासदेवताभ्यो हुत्वा
जुहोति ब्रह्मणे प्रजापतये विश्वेभ्यो देवेभ्यो द्यावापृथिवीभ्यामिति विश्वेभ्यो देवेभ्यो बलिहरणं
भूतगृह्येभ्य आकाशाय च वैश्वदेवस्याग्नौ जुहोत्यग्नये स्वाहा प्रजापतये स्वाहा विश्वेभ्यो देवेभ्यः
स्वाहाग्नये स्विष्टकृते स्वाहेति प्राशनान्ते बाह्यतः स्त्रीबलिꣳ हरति. नमः स्त्रियै नमः पुꣳसे वयसेऽवयसे
नमः शुक्लाय कृष्णदन्ताय पापिनां पतये नमो ये मे प्रजामुपलोभयन्ति ग्रामे वसन्त उत वारण्ये
तेभ्यो नमोऽस्तु बलिमेभ्यो हरामि स्वस्ति मेऽस्तु प्रजां मे ददत्विति शेषमद्भिः प्लाव्य ततो
ब्राह्मणभोजनम् ॥१२॥ अथ गर्भाधानꣳ स्त्रियाः पुष्पवत्याश्चतुरहादूर्ध्वꣳ स्नात्वा विरजायास्तस्मिन्नेव

दिवा आदित्यङ्गर्भमित्यादित्यमवेक्षते गृहे वा स्नापयित्वा तामभिगच्छेदिति श्रुतेस्तस्मिन्प्रजायाः सम्भवकाले निशायां कुर्याद्यदि दिवा मैथुनं व्रजेत्क्लीवा अल्पवीर्या अल्पायुषाश्च प्रसूयन्ते तस्माद्दिवा तद्वर्जयेत्प्रजाकामो गृही श्रुतिस्मृतिविरोधाभ्यां दक्षिणेन पाणिनोरू प्रसार्य प्रजास्थानमभिमृशति पूषा भगꣳ सविता मे ददातु रुद्रः कल्पयति ललामगुं विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिꣳशतु ॥ आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ॥ गर्भं धेहि सिनीवालि गर्भं धेहि पृथुष्टुके ॥ गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजाविति सꣳसृजेथास्तेजो वैश्वानरो दद्याद् ब्रह्माणमामन्त्रयते ब्रह्मा गर्भं दधात्विति प्राङ्मुख उदङ्मुखो वोपविष्टो मन्यते रेतो मूत्रमिति चैके श्रावणं कुर्यात् ॥ १३ ॥ अथर्तुमतीं जायामधिगच्छेत्पिण्डपितृयज्ञेन यजेत मध्यमपिण्डं पत्नी प्राश्नाति पुत्रकामा तत एतामाहुतिं जुहोत्याधत्त पितर इत्यलङ्कारसवाजिघ्रत्वायन्तु न इति जपत्येवमथर्तुमतीं जायाहृदयमालभ्य पूर्ववत्सव्येन पाणिनोपस्थमभिमृशति भगप्प्रणेतरिति प्रागुतेदानीमिति रेतोमूत्रमिति सन्धत्ते गायत्रेणेति प्रतिमन्त्रं मन्थयति पुत्रकामोऽभिगच्छेन्नित्यम् ॥ १४ ॥ सा यदि गर्भं

न दधीत सिंह्याः श्वेतपुष्प्या उपोष्य पुष्येण मूलमुत्थाप्य चतुर्थेऽहनि स्नातायां निशायामुदपेषं पिष्ट्वा दक्षिणस्यां नासिकायामासिञ्चतीयमोषधी त्रायमाणा सहमाना सरस्वती ॥ अस्या अहं बृहत्याः पुत्रः पितुरिव नाम जग्रभमिति ॥ १५ ॥ अथ पुꣳसवनं पुरा स्पन्दत इति मासे द्वितीये तृतीये वा यदहः पुꣳसा नक्षत्रेण चन्द्रमा युज्येत तदहरुपवास्याऽऽप्लाव्याहते वाससी परिधाप्य न्यग्रोधावरोहाञ्छुङ्गाँश्च निशायामुदपेषं पिष्ट्वा पूर्ववदासेचनꣳ हिरण्यगर्भोऽद्भ्यः सम्भृत इत्येताभ्याङ्कुशकण्टकꣳ सोमाꣳशुं चैके कूर्मपित्तं चोपस्थे कृत्वा स यदि कामयेत वीर्यवान्स्यादिति विकृत्यैनमभिमन्त्रयते सुपर्णोऽसीति प्राग्विष्णुक्रमेभ्यः ॥१६॥ अथ सीमन्तोन्नयनम् ॥ पुꣳसवनवत् प्रथमगर्भे मासे षष्ठेऽष्टमे वा तिलमुद्गमिश्रꣳस्थालीपाकꣳ श्रपयित्वा प्रजापतेर्हुत्वा पश्चादग्नेर्भद्रपीठ उपविष्टायां युग्मेन सटालुग्रप्सेनौदुम्बरेण त्रिभिश्च दर्भपिञ्जुलैस्त्रेण्या शलल्या वीरतरशङ्कुना पूर्णचात्रेण च सीमन्तमूर्द्ध्वं विनयति भूर्भुवः स्वरिति प्रतिमहाव्याहृतिभिर्वा त्रिवृतमाबध्नात्ययमूर्जावतो वृक्ष उर्ज्जीव फलिनी भवेत्यथाऽऽह वीणागाथिनौ राजानꣳसङ्गायेतां यो वाऽप्यन्यो वीरतर इति

नियुक्तामप्येके गाथामुपोदाहरन्ति सोम एव नो राजेमा मानुषीः प्रजाः ॥ अविमुक्तचक्र आसी-
रँस्तीरे तुभ्यमसाविति यां नदीमुपावसिता भवति तस्या नाम गृह्णाति ततो ब्राह्मणभोजनम् ॥१७॥
सोष्यन्तीमद्भिरभ्युक्षत्येजतु दशमास्य इति प्रागयस्यैत इत्यथावरावपतनमवैतु प्रश्निशेवलᳩशुने
जराय्वत्तवे नैव माᳩसेन पीवरीं न कस्मिंश्चनायतनमवजरायुपद्यतामिति जातस्य कुमारस्याच्छि-
न्नायान्नाड्यां मेधाजननाऽऽयुष्ये करोत्यनामिकया सुवर्णान्तर्हितया मधुघृते प्राशयति घृतं वा
भूस्त्वयि दधामि भुवस्त्वयि दधामि स्वस्त्वयि दधामि भूर्भुवःस्वः सर्वं त्वयि दधामीत्यथास्याऽऽयुष्यं
करोति नाभ्यां दक्षिणे वा कर्णे जपत्यग्निरायुष्मान्स वनस्पतीभिरायुष्माँस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं
करोमि सोम आयुष्मान्सौषधीभिरायुष्माँस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि ब्रह्माऽऽयुष्मत्तद्ब्राह्मणै-
रायुष्मत्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि देवा आयुष्मन्तस्तेऽमृतेनाऽऽयुष्मन्तस्तेन त्वाऽऽयुषाऽऽ-
युष्मन्तं करोमि ऋषय आयुष्मन्तस्ते व्रतैरायुष्मन्तस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि पितर आयु-
ष्मन्तस्ते स्वधाभिरायुष्मन्तस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि यज्ञ आयुष्मान्स दक्षिणाभिरायुष्माँ-

स्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि समुद्र आयुष्मान्स स्रवन्तीभिरायुष्माँस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि त्रिस्त्रिरुयायुषमिति च स यदि कामयेत सर्वमायुरियादिति वात्सप्रेणैनमभिमृशेद्दिवस्परीत्येतस्यानुवाकस्योत्तमामृचं परिशिनष्टि प्रतिदिशं पञ्च ब्राह्मणानवस्थाप्य ब्रूयादिममनुप्राणितेति पूर्वो ब्रूयात्प्राणेति व्यानेति दक्षिणोऽपानेत्यपर उदानेत्युत्तरः समानेति पञ्चम उपरिष्टादवेक्षमाणो ब्रूयात्स्वयं वा कुर्यादनुपरिक्राममविद्यमानेषु स यस्मिन्देशे जातो भवति तमभिमन्त्रयते वेद ते भूमि हृदयं दिवि चन्द्रमसि श्रितम् ॥ वेदाहं तन्मां तद्विद्यात्पश्येम शरदः शतं जीवेम शरदः शतꣳ श्रृणुयाम शरदः शतमित्यथैनमभिमृशत्यश्मा भव परशुर्भव हिरण्यमश्रुतं भव ॥ आत्मा वै पुत्रनामासि स जीव शरदः शतमित्यथास्य मातरमभिमन्त्रयत इडासि मैत्रावरुणी वीरे वीरमजीजनथाः ॥ सा त्वं वीरवती भव याऽस्मान्वीरवतोऽकरदित्यथास्यै दक्षिणꣳस्तनं प्रक्षाल्य प्रयच्छतीमꣳ स्तनमिति यस्ते स्तन इत्युत्तरमेताभ्यामुदपात्रꣳशिरस्तो निदधात्यापो देवेषु जाग्रथ यथा देवेषु जाग्रथ ॥ एवमस्याꣳ सूतिकाया सपुत्रिकायां जाग्रथ इति द्वारदेशे सूतिकाग्निमुपसमाधायोत्थाना-

त्सन्धिवेलयोः फलीकरणमिश्रान्सर्षपानग्नावावपति शण्डामर्का उपवीरः शौण्डिकेय उलूखलः ॥ मलिम्लुचो द्रोणासश्च्यवनो नश्यतादितः स्वाहा ॥ आलिखन्ननिमिषः किंवदन्त उपश्रुतिर्हर्यक्षः कुम्भी शत्रुः पात्रपाणिर्नृमणिर्हन्त्रीमुखः सर्षपारुणश्च्यवनो नश्यतादितः स्वाहेति यदि कुमार उपद्रवेज्जालेन प्रच्छाद्योत्तरीयेण वा पिताङ्क आधाय जपति कूर्कुरः सुकूर्कुरः कूर्कुरो बालबन्धनः ॥ चेच्चेच्छुनक सृज नमस्ते अस्तु सीसरो लपेतापह्वर तत्सत्यम् ॥ यत्ते देवा वरमददुः स त्वं कुमारमेव वा वृणीथाः ॥ चेच्चेच्छुनक सृज नमस्ते अस्तु सीसरो लपेतापह्वर तत्सत्यम् ॥ यत्ते सरमा माता सीसरः पिता श्यामशबलौ भ्रातरौ ॥ चेच्चेच्छुनक सृज नमस्ते अस्तु सीसरो लपेतापह्वरेत्यभिमृशति न नामयति न रुदति न हृष्यति न ग्लायति यत्र वयं वदामो यत्र चाभिमृशामसीति ॥ १८ ॥ अथातो यमलजनने प्रायश्चित्तं व्याख्यास्यामो यस्य भार्या गौर्दासी महिषी वडवा वा विकृतं प्रसवे प्रायश्चित्ती भवेत्पूर्णे दशाहे चतुर्णां क्षीरवृक्षाणां कापायमुपसंहरेत् प्लक्षवटौदुम्बराश्वत्थशमीदेवदारुगौरसर्षपास्तेषामपो हिरण्यदूर्वाङ्कुराम्रपल्लवैरष्टौ कलशान्प्र-

पूर्य सर्वौषधीनां दम्पती स्नापयित्वाऽऽपो हिष्ठेति तिसृभिः कयानश्चित्र इति द्वाभ्यां पञ्चैन्द्रेण पञ्च वारुणेनेदमापः प्रवहतेत्यपाघमिति स्नापयित्वालङ्कृत्य तौ दर्भेषूपवेश्य तत्र मारुतꣳस्थालीपाकꣳ श्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति पूर्वोक्तैः स्नपनमन्त्रैः स्थालीपाकस्य जुहोत्यग्नये स्वाहा सोमाय स्वाहा पवमानाय स्वाहा पावकाय स्वाहा मरुताय स्वाहा मारुताय स्वाहा मरुद्भ्यः स्वाहा यमाय स्वाहान्तकाय स्वाहा मृत्यवे स्वाहा ब्रह्मणे स्वाहाग्नये स्विष्टकृते स्वाहेत्येतदेव गृहोत्पातेपूलूककपोतगृध्रः श्येनो वा प्रविशेत्स्तम्भः प्ररोहेद्वल्मीकं मधुजालं वा भवेदुदकुम्भप्रज्वलनाशनशयनयानभङ्गेषु गृहगोधिकाकृकलासशरीरसर्पण इत्येवं छत्रध्वजविनाशे सार्पे नैर्ऋते गण्डयोगेष्वन्येष्वप्युत्पातेषु भूकम्पोल्कापातकाकसर्पसङ्गमप्रेक्षणादिष्वेतदेव प्रायश्चित्तं ग्रहशान्त्योक्तेन विधिना कृत्वाऽऽचार्याय वरं दत्त्वा ब्राह्मणान्भोजयित्वा स्वस्ति वाच्याशिषः प्रतिगृह्य शान्तिर्भवति शान्तिर्भवति ॥२२१॥
॥ १९ ॥ अथातो यमलचरुं मारुतं व्याख्यास्यामो यस्य च यमलौ पुत्रौ दारिका वा प्रजायते पूर्णे दशाहे चतुर्णां क्षीरवृक्षाणां काषायमाहृत्याश्वत्थप्लक्षन्यग्रोधौदुम्बराश्चत्वारो विधवाः स्नापयति

ब्रह्मचारिणो वा शुक्लवासस ऐन्द्रीं दिशमुदिचीं वा मङ्गलं पूर्ववद्गायन्त्यो यमलिनीश्स्नापयन्त्याचार्यः
स्नापयति वसोः पवित्रेण शतधारेण चाष्टभिः कलशैः स्नात्वाऽप्रतिरथं जपेदिदमापः प्रवहतेति तौ
स्नापितौ वरं प्रयच्छत्यानडुहमातृभ्यश्च हिरण्यं वस्त्रमेव परीतोषणं वाजेवाजेवतेति पतेपद्याद्वादि-
त्याघारं मारुतं चरुं जुहोति मरुताय स्वाहा मारुती स्वाहा मरुद्भ्यो विष्णवे प्रजापतयेऽग्नये स्विष्ट-
कृते स्वाहेति प्राशनान्ते शेषं चरुं गृहीत्वाऽश्वत्थं प्रदक्षिणीकृत्योपविशेत्तदेव तन्त्रꣳसमाप्य ततो
ब्राह्मणभोजनम् ॥ २० ॥ अथातो मूलविधिं व्याख्यास्यामो मूलांशे प्रथमे पितुर्नष्टो द्वितीये
मातुस्तृतीये धनधान्यस्य चतुर्थे कुलशोकावहः स्वयं पुण्यभागी स्यान्मूलनक्षत्रे मूलविधानं कुर्या-
त्सर्वौषध्यात्सर्वगन्धैश्च सञ्युक्तं तत्रोदकुम्भं कृत्वा स वस्त्रगन्धपुष्परत्नसहितꣳश्वेतसिद्धार्थकुसुमा-
युक्तं कुर्यात्तस्मिन्रुद्रं जपित्वाऽप्रतिरथꣳराक्षोघ्नं च सूक्तं द्वितीयोदकुम्भं कृत्वा चतुःशतपाठः प्रस्र-
वणसञ्युक्तन्तस्मिन्नुपरिष्टान्मूलानि धारयेद्वंशपात्रे कृत्वा वस्त्रे बद्ध्वा तस्मिन्प्रधानानि मूलानि वक्ष्यामि
हिरण्मयमूलꣳ सप्त धान्यं प्रथमाकाश्मर्या सहदेव्याऽपराजिता बाला पाठा शङ्खपुष्प्यधोपुष्पी

मधुयष्टिका चक्राङ्किता मयूरशिखा काकजङ्घा कुमारीद्वयं जीवन्त्यपामार्गभृङ्गारकलक्ष्मणाः
सुलक्ष्मणा जाती व्याघ्रपत्रश्चक्रमर्दकः सिद्धेश्वरोऽश्वत्थोदुम्बरपालाशप्लक्षवटार्कदूर्वारोहितक-
शमीशतावरीत्येवमादिमूलशतं पूरयित्वा तस्मिन्निषिद्धानि मूलानि वक्ष्यामि वैल्वधवनिम्ब-
कदम्बराजवृक्षाक्षशालाप्रयालुदधिकपित्थकोविदारश्लेष्मान्तकविभीतकशाल्मलीररलुसर्वकण्टकि-
वर्जं तत्राभिषेकं कुर्यात्पितुः शिशोर्जनन्या देवस्य त्वेत्यौदुम्बर्यात्सन्दीमुदगग्रामास्तृणानि तत्रासी-
नान्सम्पातेनाभिषिञ्चति शिरसोऽध्यनुलोमꣳशिरो मे श्रीर्यश इति यथालिङ्गमङ्गानि सम्मृशति
स्नानादूर्ध्वं नैर्ऋतं पायसꣳ श्रपयित्वा काश्मर्यमयꣳ स्रुक्स्रुवं प्रतप्य सम्मृज्यान्वारब्ध आघारा-
वाज्यभागौ हुत्वाऽसुन्वन्तमिति चतस्रः स्थालीपाकेन जुहुयात्पञ्चदशाऽऽज्याहुतीश्चतुर्गृहीतेन
जुहोति कृणुष्व पाज इति पञ्च मा नस्तोक इति द्वे या ते रुद्र शिवा तनूरिति षडग्नी रक्षाꣳसि
सधेति शुक्रज्योतिरमर्त्यः शुचिः पावक ईड्य इति त्वन्नः सोम विश्वतो रक्षा राजन्नघायतो न
रिष्ये त्वावतः सखेति स्विष्टकृदादि प्राशनान्ते कृष्णा गौः कृष्णाश्च तिला हेममयमूलꣳसप्त-

धान्यसञ्युक्तमाचार्याय वरं दद्यात्कृष्णोऽनड्वान्ब्रह्मणे दद्यान्नक्षत्रसूचकेभ्यो वासो दद्यादन्येभ्यो ब्राह्मणेभ्यः सुवर्णं दद्यात्कृसरापायसेन ब्राह्मणान्भोजयेत्सार्पदैवते गण्डजात एष एव विधिः कात्यायनेनोक्तः कात्यायनेनोक्तः ॥ २१ ॥ दशम्यामुत्थाप्य ब्राह्मणान्भोजयित्वा पिता नाम करोति द्व्यक्षरं चतुरक्षरं वा घोषवदाद्यन्तरन्तःस्थं दीर्घाभिनिष्ठानं कृतं कुर्यान्न तद्धितमयुजाक्षर-माकारान्तꣳ स्त्रियै तद्धितꣳशर्म ब्राह्मणस्य वर्म क्षत्रियस्य गुप्तेति वैश्यस्य चतुर्थे मासि निष्क्रम-णिका सूर्यमुदीक्षयति तच्चक्षुरिति ॥ २२ ॥ प्रोष्येत्य गृहानुपतिष्ठते पूर्ववत्पुत्रं दृष्ट्वा जपत्यङ्गा-दङ्गात्सम्भवसि हृदयादधिजायसे ॥ आत्मा वै पुत्रनामासि स जीव शरदः शतमित्यथास्य मूर्द्धानमवजिघ्रति प्रजापतेष्ट्वाहिंकारेणावजिघ्रामि सहस्रायुषाऽसौ जीव शरदः शतमिति गवां त्वा हिंकारेणेति च त्रिर्दक्षिणेऽस्य कर्णे जपत्यस्मे प्रयन्धि मघवन्नृजीषिन्निन्द्ररायो विश्ववारस्य भूरेः ॥ अस्मे शतꣳशरदो जीवसेऽधा अस्मे वीराञ्छश्वत इन्द्रशिप्रिन्नितीन्द्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे ॥ पोषꣳरयीणामरिष्टिं तनूनाꣳ स्वात्मानं वाचः सुदिन त्वमह्ना-

९९३

स्मिति सव्ये त्रिर्यै तु मूर्द्धानमेवावजिघ्रति तूष्णीम् ॥ २३ ॥ षष्ठे मासेऽन्नप्राशनꣳ स्थालीपाकꣳ श्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति ॥ सा नो मन्द्रेषमूर्जन्दुहाना धेनुर्वागस्मानुपसुष्टुतैतु स्वाहेति वाजो नो अद्येति च द्वितीयाꣳ स्थालीपाकस्य जुहोति प्राणेनान्नमशीय स्वाहाऽपानेन गन्धानशीय स्वाहा चक्षुषा रूपाण्यशीय स्वाहा श्रोत्रेण यशोऽशीय स्वाहेति प्राशनान्ते सर्वान्रसान्सर्वमन्नमेकत उद्धृत्याथैनं प्राशयेत्तूष्णीꣳ हन्तेति वा हन्तकारं मनुष्या इति श्रुतेर्भारद्वाज्या माꣳसेन वाक्प्रसारकामस्य कपिञ्जलमाꣳसेनान्नाद्यकामस्य मत्स्यैर्जवनकामस्य कृकषाया आयुष्कामस्याऽऽट्या ब्रह्मवर्चसकामस्य सर्वैः सर्वकामस्यान्नपर्याय वा ततो ब्राह्मणभोजनमन्नपर्याय वा ततो ब्राह्मणभोजनम् ॥ २४ ॥

इति पारस्करगृह्यसूत्रे प्रथमं काण्डं समाप्तम् ॥ १ ॥

# अथ द्वितीयं काण्डम् ।

सांवत्सरिकस्य चूडाकरणं तृतीये वाऽप्रतिहते षोडशवर्षस्य केशान्तो यथामङ्गलं वा सर्वेषां ब्राह्मणा-
न्भोजयित्वा माता कुमारमादायाप्लाव्याहते वाससी परिधाप्याङ्क आधाय पश्चादग्नेरुपविशत्यन्वा-
रब्ध आज्याहुतीर्हुत्वा प्राशनान्ते शीतास्वप्सूष्णा आसिञ्चत्युष्णेन वाय उदकेनेह्यदिते केशान्वपेति
केशश्मश्र्विति च केशान्तेऽथात्र नवनीतपिण्डं घृतपिण्डं दध्नो वा प्रास्यति तत आदाय दक्षिणं
गोदानमुन्दति सवित्रा प्रसूता दैव्या आप उन्दन्तु ते तनूम् ॥ दीर्घायुत्वाय वर्चस इति त्र्येण्या
शलल्या विनीय त्रीणि कुशतरुणान्यन्तर्दधात्योषध इति शिवो नामेति लोहक्षुरमादाय निवर्त्त-
यामीति प्रवपति, येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान् ॥ तेन ब्रह्माणो वपतेद-
मस्याऽऽयुष्यं जरदष्टिर्यथासदिति सकेशानि प्रच्छिद्यानडुहे गोमयपिण्डे प्रास्यत्युत्तरतो ध्रियमाण एवं
सं.अ.७७ द्विरपरं तूष्णीमितरयोश्चोन्दनाद्यथ पश्चात् त्र्यायुषमित्यथोत्तरतो येन भूरिश्चरा दिवं ज्योक् च

पश्चाद्धि सूर्यम् ॥ तेन ते वपामि ब्रह्मणा जीवातवे जीवनाय सुश्लोक्याय स्वस्तय इति त्रिः क्षुरेण शिरः प्रदक्षिणं परिहरति समुखं केशान्ते यत्क्षुरेण मज्जयता सुपेशसा वप्त्वा वाऽऽवपति केशाञ्छिन्धि शिरो माऽस्याऽऽयुः प्रमोषीर्मुखमिति च केशान्ते ताभिरद्भिः शिरः समुद्य नापिताय क्षुरं प्रयच्छत्यक्षण्वं परिवपेति यथामङ्गलं केशशेषकरणमनुगुप्तमेतꣳसकेशं गोमयपिण्डं निधाय गोष्ठे पल्वल उदकान्ते वाऽऽचार्याय वरं ददाति गां केशान्ते संवत्सरं ब्रह्मचर्यमवपनं च केशान्ते द्वादशरात्रꣳ षड्रात्रं त्रिरात्रमन्ततः ॥ १ ॥ ( अथ कर्णवेधो वर्षे तृतीये पञ्चमे वा पुष्येन्दुचित्राहरिरेवतीषु पूर्वाह्णे कुमारस्य मधुरं दत्त्वा प्राङ्मुखायोपविष्टाय दक्षिणं कर्णमभिमन्त्रयते भद्रंकर्णेभिरिति सव्यं वक्ष्यन्तीवेदिति चाथ भिन्द्यात्ततो ब्राह्मणभोजनम् ॥ २ ॥ ) अष्टवर्षं ब्राह्मणमुपनयेद्गर्भाष्टमे वैकादशवर्षꣳराजन्यं द्वादशवर्षं वैश्यं यथामङ्गलं वा सर्वेषां ब्राह्मणान्भोजयेत्तं च पर्युप्तशिरसमलङ्कृतमानयन्ति पश्चादग्नेरवस्थाप्य ब्रह्मचर्यमागामिति वाचयति ब्रह्मचार्यसानीति चाथैनं वासः



---

१ वप्त्रेति जयरामः । वप्त्वा ( मुण्डयित्वा ) इति गदाधरः ।

परिधापयति येनेन्द्राय बृहस्पतिर्वासः पर्यदधादमृतम् ॥ तेन त्वा परिदधाम्यायुषे दीर्घायुत्वाय बलाय वर्चस इति मेखलां बध्नीत इयं दुरुक्तं परिबाधमाना वर्णं पवित्रं पुनती म आगात् ॥ प्राणापानाभ्यां बलमादधाना स्वसा देवी सुभगा मेखलेयमिति युवा सुवासाः परिवीत आगात्स उ श्रेयान्भवति जायमानः ॥ तन्धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्त इति वा तूष्णीं वात्र यज्ञोपवीतपरिधानम् ॥ (यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् ॥ आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥ यज्ञोपवीतमसि यज्ञस्य त्वा यज्ञोपवीतेनो-पनह्याम्मीत्यथाजिनं प्रयच्छति मित्रस्य चक्षुर्धरुणं बलीयस्तेजो यशस्वि स्थविरꣳसमिद्धम् ॥ अनाहनस्यं वसनं जरिष्णुः परीदं वाज्यजिनं दधेऽहमिति तूष्णीं वा) दण्डं प्रयच्छति तं प्रति-गृह्णाति यो मे दण्डः परापतद्वैहायसोऽधिभूम्याम् ॥ तमहं पुनरादद आयुषे ब्रह्मणे ब्रह्मवर्चसायेति दीक्षावदेके दीर्घसत्रमुपैतीति वचनादथास्याद्भिरञ्जलिनाऽञ्जलिं पूरयत्यापोहिष्ठेति तिसृभिरथैनꣳ-सूर्यमुदीक्षयति तच्चक्षुरित्यथास्य दक्षिणाꣳसमधि हृदयमालभते मम व्रते ते हृदयं दधामि

मम चित्तमनु चित्तं ते अस्तु ॥ मम वाचमेकमना जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यमित्यथास्य दक्षिणꣳहस्तं गृहीत्वाऽऽह को नामासीत्यसावहं भो ३ इति प्रत्याहाथैनमाह कस्य ब्रह्मचार्यसीति भवत इत्युच्यमान इन्द्रस्य ब्रह्मचार्यस्यग्निराचार्यस्तवाहमाचार्यस्तवासावित्यथैनं भूतेभ्यः परिददाति प्रजापतये त्वा परिददामि देवाय त्वा सवित्रे परिददाम्यद्भ्यस्त्वौषधीभ्यः परिददामि द्यावापृथिवीभ्यां त्वा परिददामि विश्वेभ्यस्त्वा देवेभ्यः परिददामि सर्वेभ्यस्त्वा भूतेभ्यः परिददाम्यरिष्ट्या इति ॥ ३ ॥ प्रदक्षिणमग्निं परीत्योपविशत्यन्वारब्ध आज्याहुतीर्हुत्वा प्राशनान्तेऽथैनꣳसꣳशास्ति ब्रह्मचार्यस्यपोऽशान कर्म कुरु मा दिवा सुषुप्था वाचं यच्छ समिधमाधेह्यपोऽशानेत्यथास्मै सावित्रीमन्वाहोत्तरतोऽग्नेः प्रत्यङ्मुखायोपविष्टायोपसन्नाय समीक्षमाणाय समीक्षिताय दक्षिणतस्तिष्ठत आसीनाय वैके पच्छोऽर्द्धर्चशः सर्वां च तृतीयेन सहानुवर्तयन्संवत्सरे षण्मास्ये चतुर्विंꣳशत्यहे द्वादशाहे षडहे त्र्यहे वा सद्यस्त्वेव गायत्रीं ब्राह्मणायानुब्रूयादाग्नेयो वै ब्राह्मण इति श्रुतेस्त्रिष्टुभꣳराजन्यस्य जगतीं वैश्यस्य सर्वेषां वा गायत्रीम् ॥ ४ ॥ अत्र समिदाधानं

पाणिनाऽग्निं परिसमूहत्यग्ने सुश्रवः सुश्रवसं मा कुरु यथा त्वमग्ने सुश्रवः सुश्रवा अस्येवं माᳲ-सुश्रवः सौश्रवसं कुरु ॥ यथा त्वमग्ने देवानां यज्ञस्य निधिपा अस्येवमहं मनुष्याणां वेदस्य निधिपो भूयासमिति प्रदक्षिणमग्निं पर्युक्ष्य[1]त्तिष्ठन्त्समिधमादधात्यग्नये समिधमहार्षं[2] बृहते जात-वेदसे ॥ यथा त्वमग्ने समिधा समिध्यस एवमहमायुषा मेधया वर्चसा प्रजया पशुभिर्ब्रह्मवर्चसेन समिन्धे जीवपुत्रो ममाचार्यो मेधाव्यहमसान्यनिराकरिष्णुर्यशस्वी तेजस्वी ब्रह्मवर्चस्यन्नादो भूयासꣳस्वाहेत्येवं द्वितीयां तथा तृतीयामेषा त इति वा समुच्चयो वा पूर्ववत्परिसमूहनपर्युक्षणे पाणी प्रतप्य मुखं विमृष्टे तनूपा अग्नेऽसि तन्वं मे पाह्यायुर्दा अग्नेस्यायुर्मे देहि वर्चोदा अग्नेऽसि वर्चो मे देहि ॥ अग्ने यन्मे तन्वा ऊनं तन्म आपृण ॥ मेधां मे देवः सविता आदधातु मेधां मे देवी सरस्वती आदधातु ॥ मेधामश्विनौ देवावाधत्तां पुष्करस्रजाविति । (अङ्गान्यालभ्य जपत्यङ्गानि च म आप्या-यन्तां वाक्प्राणश्चक्षुः श्रोत्रं यशो बलमिति त्र्यायुषाणि करोति भस्मना ललाटे ग्रीवायां दक्षिणेऽꣳसे

१ पर्युक्ष्योत्थायेति बहूनां पाठः सम्मतः । २ माहार्यमित्यपि पाठो दृश्यते ।

हृदि च त्र्यायुषमिति प्रतिमन्त्रम्) ॥ ५ ॥ अत्र भिक्षाचर्यचरणम्। भवत्पूर्वां ब्राह्मणो भिक्षेत भवन्मध्याꣳराजन्यो भवदन्त्यां वैश्यस्तिस्रोऽप्रत्याख्यायिन्यः षड् द्वादशापरिमिता वा मातरं प्रथमामेक आचार्याय भैक्षं निवेदयित्वा वाग्यतोऽहःशेषं तिष्ठेदित्येकेऽहिꣳसन्नरण्यात्समिधमाहृत्य तस्मिन्नग्नौ पूर्ववदाधाय वाचं विसृजतेऽधःशाय्यक्षारालवणाशी स्याद्दण्डधारणमग्निपरिचरणं गुरुशुश्रूषा भिक्षाचर्या मधुमाꣳसमज्जनोपर्यासनस्त्रीगमनानृतादत्ताऽऽदानानि वर्जयेदष्टाचत्वारिꣳशद्वर्षाणि वेदब्रह्मचर्यं चरेद्द्वादश द्वादश वा प्रतिवेदं यावद्ग्रहणं वा वासाꣳसि शाणक्षौमाविकान्यैणेयमजिनमुत्तरीयं ब्राह्मणस्य रौरवꣳ राजन्यस्याऽऽजं गव्यं वा वैश्यस्य सर्वेषां वा गव्यमसति प्रधानत्वान्मौञ्जी रशना ब्राह्मणस्य धनुर्ज्या राजन्यस्य मौर्वी वैश्यस्य मुञ्जाभावे कुशाश्मन्तकबल्वजानां पालाशो ब्राह्मणस्य दण्डो वैल्वो राजन्यस्यौदुम्बरो वैश्यस्य केशसम्मितो ब्राह्मणस्य ललाटसम्मितः क्षत्रियस्य घ्राणसम्मितो वैश्यस्य सर्वे वा सर्वेषामाचार्येणाऽऽहुत उत्थाय प्रतिशृणुयाच्छयानं चेदासीन आसीनं चेत्तिष्ठꣳस्तिष्ठन्तं चेदभिक्रामन्नभिक्रामन्तं चेदभिधावन्स एवं वर्त्तमानोऽमुत्राद्य वसत्यमुत्राद्य वस-



१०००

तीति तस्य स्नातकस्य कीर्तिर्भवति त्रयः स्नातका भवन्ति विद्यास्नातको व्रतस्नातको विद्याव्रतस्नातक इति समाप्य वेदमसमाप्य व्रतं यः समावर्त्तते स विद्यास्नातकः समाप्य व्रतमसमाप्य वेदं यः समावर्त्तते स व्रतस्नातक उभयꣳ समाप्य यः समावर्त्तते स विद्याव्रतस्नातक इत्याषोडशाद्वर्षाद्ब्राह्मणस्या[1]नतीतः कालो भवत्याद्वाविꣳशाद्राजन्यस्याचतुर्विꣳशाद्वैश्यस्यात ऊर्ध्वं पतितसावित्रीका भवन्ति नैनानुपनयेयुर्नाध्यापयेयुर्न याजयेयुर्न चैभिर्व्यवहरेयुः कालातिक्रमे नियतवत्त्रिपुरुषं पतितसावित्रीकाणामपत्ये संस्कारो नाध्यापनं च तेषाꣳ संस्कारेप्सुर्व्रात्यस्तोमेनेष्ट्वा काममधीयीरन्व्यवहार्या भवन्तीति वचनात् ॥ ६ ॥ सूत्रस्यार्द्धः ॥ खण्डानि ॥ ३० ॥ अथोपनीतो ब्राह्मणस्त्रिशिखः शिखी जटिलो मुण्डो वाऽक्षारालवणाशी स्यात्सावित्रꣳ षड्रात्रं त्रिरात्रꣳ सद्यःकालं वा चरेत्तदेव व्रतमुदीक्ष्य दण्डमपो निधाय मेखलां यज्ञोपवीतं चाप्स्वन्तरिति प्रत्यृचं नमो वरुणायेति त्रिमधुरं दत्त्वा ततोऽस्याऽऽग्नेयं प्रथमं वेदव्रतमादिशेद्ब्राह्मणक्षत्रियविशां पञ्च सांवत्सरिकाणि

---

१ अनतीतः काल इति हरिहरगदाधरजयरामाः । नातीतः काल इति कर्कः ।

वेदव्रतानि भवन्त्याग्नेयꣳशुक्रियमौपनिषदꣳ शौलभं गोदानमिति पञ्च सांवत्सरिकाणि वेदव्रतानि चरित्वा स्नात्वोपव्रतं चरेत्रिष्ववगुण्ठनꣳ शुक्रियादिषु शुक्रियꣳ शुक्रभिः श्रावयेदौपनिषदमौपनिषद्भिः शौलभꣳ शौलभिनीभिरथवा विद्यमान आब्रह्मन्नुदीरतामानो भद्रा आशुः शिशान इमानुकमिति च वेदशिरसाऽवगुण्ठयेदवगुण्ठनीं त्रिवलिं पञ्चवलिं वा नाभिदेशात्प्रच्छाद्य वाग्यतोऽरण्येऽधः शयीत ग्रामे गोष्ठे देवतायतने वा व्युष्टायामवगुण्ठनीमरण्ये विसृजेदृदृश्रमस्योदुत्त्यं चित्रन्देवानामित्युदितेऽर्के जपति वर्षति द्यौः शान्तिरिति शान्तिं करोति शान्तिभाजनं गुरवे दद्यादेवमेवावगुण्ठनीं च गोदाने गोमिथुनं तस्माद्गोदानमिति तस्माद्गोदानमिति ॥ ७ ॥ वेदꣳसमाप्य स्नायाद्ब्रह्मचर्यं वाऽष्टाचत्वारिꣳशकं द्वादशकेऽप्येके गुरुणाऽनुज्ञातो विधिर्विधेयस्तर्कश्च वेदः षडङ्गमेके न कल्पमात्रे कामं तु याज्ञिकस्योपसङ्गृह्य गुरुꣳ समिधोऽभ्याधाय परिश्रितस्योत्तरतः कुशेषु प्रागग्रेषु पुरस्तात्स्थित्वाऽष्टानामुदकुम्भानां येऽप्स्वन्तरग्नयः प्रविष्टा गोह्य उपगोह्यो मयूषो मनोहास्खलो विरुजस्तनूदूषुरिन्द्रियहा तान्विजहामि यो रोचनस्तामिह गृह्णामीत्येकस्मादपो

गृहीत्वा तेनाभिषिञ्चते तेन मामभिषिञ्चामि श्रियै यशसे ब्रह्मणे ब्रह्मवर्चसायेति येन श्रियमकृ-
णुतां येनावमृशताꣳसुरां येनाक्ष्यावभ्यषिञ्चतां यद्वा तदश्विना यश इत्यापोहिष्ठेति च प्रत्यृचं
त्रिभिस्तूष्णीमितरैरुदुत्तममितिमेखलामुन्मुच्य दण्डं निधाय वासोऽन्यत्परिधायाऽऽदित्यमुपतिष्ठत
उद्यन्भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थात्प्रातर्यावभिरस्थाद्दशसनिरसि दशसनिं मा कुर्वाविदन्मागम-
योद्यन्भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थाद्दिवा यावभिरस्थाच्छतसनिरसि शतसनिं मा कुर्वाविदन्मा-
गमयोद्यन्भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थात्सायं यावभिरस्थात्सहस्रसनिरसि सहस्रसनिं मा कुर्वा-
विदन्मा गमयेति दधि तिलान्वा प्राश्य जटालोमनखान्[१] सꣳहृत्यौदुम्बरे दन्तान्धावेताऽन्नाद्याय
व्यूहध्वꣳसोमो राजाऽयमागमत् ॥ स मे मुखं प्रमार्क्ष्यते यशसा च भगेन चेत्युत्साद्य पुनः
स्नात्वाऽनुलेपनं नासिकयोर्मुखस्य चोपगृह्णीते प्राणापानौ मे[२] तर्पय चक्षुर्मे तर्पय श्रोत्रं मे तर्पयेति
पितरः शुन्धध्वमिति पाण्योरवनेजनं दक्षिणानिषिच्यानुलिप्य जपेत्सुचक्षा अहमक्षीभ्यां भूयास-

१ "नखानि" इत्यपि पाठः। २ समानव्यानौ मे तर्पय इति पाठः॥

१००३

ॐ सुवर्चा मुखेन ॥ सुश्रुत्कर्णाभ्यां भूयासमित्यहतं वासो धौतं वाऽमौत्रेणाच्छादयीत परिधास्यै यशो धास्यै दीर्घायुत्वाय जरदष्टिरस्मि ॥ शतं च जीवामि शरदः पुरूची रायस्पोषमभिसंव्ययिष्य इत्यथोत्तरीयं यशसा मा द्यावापृथिवी यशसेन्द्राबृहस्पती ॥ यशो भगश्च मा विन्दद्यशो मा प्रतिपद्यतामित्येकं चेत् पूर्वस्योत्तरवर्गेण प्रच्छादयीत सुमनसः प्रतिगृह्णाति या आहरज्जमदग्निः श्रद्धायै कामायेन्द्रियाय ता अहं प्रतिगृह्णामि यशसा च भगेन चेत्यथाबध्नीते यद्यशोऽप्सरसामिन्द्रश्चकार विपुलं पृथु ॥ तेन सङ्ग्रथिताः सुमनस आबध्नामि यशो मयीत्युष्णीषेण शिरो वेष्टयते युवा सुवासा इत्यलङ्करणमसि भूयोऽलङ्करणं भूयादिति कर्णवेष्टकौ वृत्रस्येत्यपङ्क्तेऽक्षिणी रोचिष्णुरसीत्यात्मानमादर्शे प्रेक्षते छत्रं प्रतिगृह्णाति बृहस्पतेश्छदिरसि पाप्मनो मामन्तर्धेहि तेजसो यशसो मामन्तर्धेहीति प्रतिष्ठेस्थो विश्वतो मा पातमित्युपानहौ प्रतिमुञ्चते विश्वाभ्यो मा नाष्ट्राभ्यस्परिपाहि सर्वत इति वैणवं दण्डमादत्ते दन्तप्रक्षालनादीनि नित्यमपि वासश्छत्रोपानहश्चापूर्वाणि चेन्मन्त्रः ॥ ८ ॥ स्नातस्य यमान्वक्ष्यामः । कामादितरो नृत्यगीतवादित्राणि न कुर्यान्न च गच्छे-

त्कामं तु गीतं गायति वैव गीते वा रमत इति श्रुतेर्ह्यपरं क्षेमे नक्तं ग्रामान्तरं न गच्छेन्न च धावेदुदपानावेक्षणवृक्षारोहणफलप्रपतनसन्धिसर्पणविवृतस्नानविषमलङ्घनशुष्कवदनसन्ध्याऽऽदित्यप्रेक्षणभैक्षणानि न कुर्यान्न ह वै स्नात्वा भिक्षेतापह वै स्नात्वा भिक्षां जयतीति श्रुतेर्वर्षत्यप्रावृतो व्रजेदयं मे वज्रः पाप्मानमपहनदित्यप्स्वात्मानं नावेक्षेताजातलोम्नीं विपुंश्सीं षण्ढं च नोपहसेन्न गच्छेद्गर्भिणीं विजन्येति ब्रूयात्सकुलमिति नकुलं भगालमिति कपालं मणिधनुरितीन्द्रधनुर्गां धयन्तीं परस्मै नाचक्षीतोर्वरायामनन्तर्हितायां भूमावुत्सर्पंस्तिष्ठन्न मूत्रपुरीषे कुर्यात्स्वयं प्रशीर्णेन काष्ठेन गुदं प्रमृजीत विकृतं वासो नाच्छादयीत दृढव्रतो वधत्रः स्यात्सर्वत आत्मानं गोपायेत् सर्वेषां मित्रमिव ॥ (शुक्रियमध्येष्यमाणः पाठः) ॥९॥ तिस्रो रात्रीर्व्रतं चरेदमांसाश्यमृण्मयपायी स्त्रीशूद्रशवकृष्णशकुनिशूनां च दर्शनमसम्भाषणं च तैः शवशूद्रसूतकान्नानि च नाद्यान्मूत्रपुरीषे ष्ठीवनं चातपे न कुर्यात्सूर्याच्चात्मानं नान्तर्दधीत तप्तेनोदकार्थान्कुर्वीताऽवज्योत्य रात्रौ भोजनं सत्यवदनमेव वा दीक्षितोऽप्यातपादीनि कुर्यात्प्रवर्ग्यवांश्चेत् ॥ १० ॥ इति षोडशकर्म समाप्तम् ॥ अथातः

पञ्च महायज्ञा वैश्वदेवादन्नात्पर्युक्ष्य स्वाहाकारैर्जुहुयाद्ब्रह्मणे प्रजापतये गृह्याभ्यः कश्यपायानुमत-
य इति भूतगृह्येभ्यो मणिके त्रीन् पर्जन्यायाद्भ्यः पृथिव्यै धात्रे विधात्रे च द्वार्ययोः प्रतिदिशं
वायवे दिशां च मध्ये त्रीन्ब्राह्मणेऽन्तरिक्षाय सूर्याय विश्वेभ्यो देवेभ्यो विश्वेभ्यश्च भूतेभ्यस्ते-
षामुत्तरत उषसे भूतानां च पतये परं पितृभ्यः स्वधा नम इति दक्षिणतः पात्रं निर्णिज्योत्तरा-
परस्यां दिशि निनयेद्यक्ष्मैतत्त इत्युद्धृत्याग्रं ब्राह्मणायावनेज्य दद्याद्धन्तत इति यथार्हं भिक्षुकान-
तिथींश्च सम्भजेरन् बालज्येष्ठा गृह्या यथार्हमश्नीयुः पश्चाद्गृहपतिः पत्नी च पूर्वो वा गृहपतिः तस्मादु
स्वादि(द्वि)ष्टं गृहपतिः पूर्वोऽतिथिभ्योऽश्नीयादिति श्रुतेरहरहः स्वाहा कुर्यादन्नाभावे केनचिदा-
काष्ठाद्देवेभ्यः पितृभ्यो मनुष्येभ्यश्चोदपात्रात् ॥११॥ अथातो धर्मजिज्ञासा। केशान्तादूर्ध्वमपत्नीक
उत्सन्नाग्निरनग्निको वा प्रवासी ब्रह्मचारी चान्वग्निरिति ग्रामाग्निमाहृत्य पृष्टो दिवीत्यधिष्ठाप्य
त्रिभिश्च सावित्रैः प्रज्वाल्य ताꣳसवितुस्तत्सवितुर्विश्वानि देवसवितरिति पूर्ववदक्षतैर्हुत्वा पाकं
पचेत्तत्र वैश्वदेवं ब्रह्मणे प्रजापतये गृह्याभ्यः कश्यपायानुमतये विश्वेभ्यो देवेभ्योऽग्नये स्विष्टकृतऽ-

इत्युपस्पृश्य पूर्ववद्बलिकर्मैवं कृते न वृथा पाको भवति न वृथा पाकं पचेन्न वृथापाकमश्नीयादत्र पिण्डपितृयज्ञः पश्चाद्याग्रायणानि कुर्यात् ॥ १२ ॥ अथातोऽध्यायोपाकर्मौषधीनां प्रादुर्भावे श्रवणेन श्रावण्यां पौर्णमास्याᳬ श्रावणस्य पञ्चमीᳬ हस्तेन वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति पृथिव्या अग्नय इत्यृग्वेदेऽन्तरिक्षाय वायव इति यजुर्वेदे दिवे सूर्यायेति सामवेदे दिग्भ्यश्चन्द्रमस इत्यथर्ववेदे ब्रह्मणे छन्दोभ्यश्चेति सर्वत्र प्रजापतये देवेभ्य ऋषिभ्यः श्रद्धायै मेधायै सदसस्पतयेऽनुमतय इति चैतदेव व्रतादेशनविसर्गेषु सदसस्पतिमित्यक्षतधानास्त्रिः सर्वेऽनुपठेयुर्हुत्वा हुत्वौदुम्बर्यस्तिस्रस्तिस्रः समिध आदध्युरार्द्राः सपलाशा घृताक्ताः सावित्र्या ब्रह्मचारिणश्च पूर्वकल्पेन शन्नो भवन्त्वित्यक्षतधाना अखादन्तः प्राश्नीयुर्दधिक्राव्ण्ण इति दधि भक्षयेयुः स यावन्तं गणमिच्छेत्तावतस्तिलानाकर्षफलकेन जुहुयात्सावित्र्या शुक्रज्योतिरित्यनुवाकेन वा प्राशनान्ते प्रत्यङ्मुखेभ्य उपविष्टेभ्य ओंकारमुक्त्वा त्रिश्च सावित्रीमध्यायादीन्प्रब्रूयादृषिमुखानि बह्वृचानां पर्वाणि छन्दोगानाꣳसूक्तान्यथर्वणानाꣳ

सं. ७८ सर्वे जपन्ति सह नोऽस्तु सह नोऽवतु सह न इदं वीर्यवदस्तु ब्रह्म ॥ इन्द्रस्तद्वेद येन यथा न

विद्विषामह इति त्रिरात्रं नाधीयीरँल्लोमनखानामनिकृन्तनमेके प्रागुत्सर्गात् ॥ १३ ॥ वातेऽमावास्यायामिति सर्वानध्यायः ॥ श्राद्धाशने चोल्कावस्फूर्ज्जद्भूमिचलनाग्न्युत्पातेष्वृतुसन्धिषु चाकालमुत्सृष्टेष्वभ्रदर्शने सर्वरूपे च त्रिरात्रं त्रिसन्ध्यं वा भुक्त्वाऽऽर्द्रपाणिरुदके महानिशायाᳪसन्धिवेलयोरन्तःशवे ग्रामे ग्रामान्तर्दिवाकीर्त्ये [1]धावतोऽभिशस्तपतितदर्शनाश्चर्याभ्युदयेषु च तत्कालं नीहारे वादित्रशब्द आर्त्तस्वने ग्रामान्ते श्मशाने श्वगर्दभोलूकशृगालसामशब्देषु शिष्टाचरिते च तत्कालं गुरौ प्रेतेऽपोऽभ्यवेयाद्दशरात्रं चोपरमेत्ससतानूनप्त्रिणि सब्रह्मचारिणि च त्रिरात्रमेकरात्रमसब्रह्मचारिण्यर्द्धषष्ठान्मासानधीत्योत्सृजेयुरर्द्धसप्तमासान्वाऽथेमामृचं जपन्त्युभा कवी युवा यो नो धर्मः परापतत् ॥ परिसख्यस्य धर्मिणो विसख्यानि विसृजामह इति त्रिरात्रᳪसहोष्य विप्रतिष्ठेरन् ॥ १४ ॥
पौषस्य रोहिण्यां मध्यमायां वाऽष्टकायामध्यायानुत्सृजेयुरुदकान्तं गत्वाऽद्भिर्देवाँश्छन्दाᳪसि वेदानृषीन्पुराणाचार्यान् गन्धर्वानितराचार्यान्त्संवत्सरं च सावयवं पितृनाचार्यान्स्वाँश्च तर्पयेयुः सावित्रीं ॥२३०॥

---

१ दिवाकीर्तिरिति कर्कसम्मतः पाठः ।

चतुरनुद्रुत्य विरता स्म इति प्रब्रूयुः क्षपणं प्रवचनं च पूर्ववत् ॥ १५ ॥ पुण्याहे लाङ्गलयोजनं ज्येष्ठया वैन्द्रदैवत्यमिन्द्रं पर्जन्यमश्विनौ मरुत उद्लाकाश्यपꣳ स्वातिकारीꣳ सीतामनुमतिं च दध्ना तण्डुलैर्गन्धैरक्षतैरिष्ट्वाऽनडुहौ मधुघृते प्राशयेत्सीरा युञ्जन्तीति योजयेच्छुनꣳसुफाला इति कृषेत् फालं वा लभेत न वाऽग्न्युपदेशाद्वपनाषड्गाच्चाऽयमभिषिच्याकृष्टं तदा कृषेयुः स्थालीपाकस्य पूर्ववद्देवता यजेदुभयोर्व्रीहियवयोः प्रवपन्सीतायज्ञे च ततो ब्राह्मणभोजनम् ॥१६॥ (अथातो वापी-कूपतडागारामदेवतायतनानां प्रतिष्ठापनं व्याख्यास्यामस्तत्रोदगयन आपूर्यमाणपक्षे पुण्याहे तिथि-वारनक्षत्रकरणे च गुणान्विते तत्र वारुणं यवमयं चरुꣳ श्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति त्वन्नोऽअग्ने स त्वन्नोऽअग्नऽइमम्मे वरुण तत्त्वा यामि ये ते शतमयाश्चाग्नऽउदुत्तममुरुꣳहि राजा वरुणस्योत्तम्भनमग्नेरनीकमिति दशर्चꣳ हुत्वा स्थालीपाकस्य जुहोत्यग्नये स्वाहा सोमाय स्वाहा वरुणाय स्वाहा यज्ञाय स्वाहोग्राय स्वाहा भीमाय स्वाहा शतक्रतवे स्वाहा व्युष्ट्यै स्वाहा स्वर्गाय स्वाहेति

---

१ पुष्करिण्याम्.

यथोक्तꣳ स्विष्टकृत्प्राशनान्ते जलचराणि क्षिप्त्वाऽलङ्कृत्य गां तारयित्वा पुरुषसूक्तं जपन्नाचार्याय वरं दत्त्वा कर्णवेष्टकौ वासाꣳसि धेनुर्दक्षिणा । ततो ब्राह्मणभोजनम् ॥ ) ॥ १७ ॥ अथातः श्रवणाकर्म श्रावण्यां पौर्णमास्याꣳस्थालीपाकꣳ श्रपयित्वाऽक्षतधानाश्चैककपालं पुरोडाशं धानानां भूयसीः पिष्ट्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुती जुहोत्यप श्वेतपदा जहि पूर्वेण चापरेण च ॥ सप्त च वारुणीरिमाः प्रजाः सर्वाश्च राजबान्धवैः स्वाहा ॥ न वै श्वेतस्याध्याचारेऽहिर्ददर्श कश्चन ॥ श्वेताय वैदर्व्याय नमः स्वाहेति स्थालीपाकस्य जुहोति विष्णवे श्रवणाय श्रावण्यै पौर्णमास्यै वर्षाभ्यश्चेति धानावन्तमिति धानानां घृताक्तान्सक्तून्सर्पेभ्यो जुहोत्याग्नेयपाण्डुपार्थिवानाꣳसर्पाणामधिपतये स्वाहा श्वेतवायवान्तरिक्षाणाꣳ सर्पाणामधिपतये स्वाहाऽभिभूःसौर्यदिव्यानाꣳ सर्पाणामधिपतये स्वाहेति सर्वहुतमेककपालं ध्रुवाय भौमाय स्वाहेति प्राशनान्ते सक्तूनामेकदेशꣳशूर्पे न्युप्योपनिष्क्रम्य बहिःशालायाः स्थण्डिलमुपलिप्योल्कायां ध्रियमाणायां माऽन्तरागमतेत्युक्त्वा वाग्यतः सर्पानवनेजयत्याग्नेयपाण्डुपार्थिवानाꣳसर्पाणामधिपतेऽवनेनिक्ष्व श्वेतवायवान्तरिक्षाणाꣳसर्पाणामधिपतेऽवनेनिक्ष्वाभिभूःसौर्यदिव्या-



१०१०

नाꣳ सर्पाणामधिपतेऽवनेनिक्ष्वेति यथावनिक्तं दर्व्योपघातꣳ सक्तून्सर्पेभ्यो वलिꣳ हरत्याग्नेयपाण्डु-
पार्थिवानाꣳ सर्पाणामधिपत एष ते वलिः श्वेतवायवान्तरिक्षाणाꣳ सर्पाणामधिपत एष ते वलि-
रभिभूःसौर्यदिव्यानाꣳसर्पाणामधिपत एष ते वलिरित्यवनेज्य पूर्ववत्कङ्कतैः प्रलिखत्याग्नेयपाण्डु-
पार्थिवानाꣳ सर्पाणामधिपते प्रलिखस्व श्वेतवायवान्तरिक्षाणाꣳ सर्पाणामधिपते प्रलिखस्वाभिभूः-
सौर्यदिव्यानाꣳसर्पाणामधिपते प्रलिखस्वेत्यञ्जनानुलेपनꣳस्रजश्चाञ्जस्वानुलिम्पस्व स्रजोऽपि नह्यस्वेति
सक्तुशेषꣳस्थण्डिले न्युप्योदपात्रेणोपनिनीयोपतिष्ठते नमोऽस्तु सर्पेभ्य इति तिसृभिः स यावत्का-
मयेत न सर्पा अभ्युपेयुरिति तावत्सन्ततयोदधारया निवेशनं त्रिः परिषिञ्चन्परीयादपश्वेतपदा
जहीति द्वाभ्यां दर्वीꣳ शूर्पञ्च प्रक्षाल्य प्रतप्य प्रयच्छति द्वारदेशे मार्जयन्त आपोहिष्ठेति तिसृभि-
रनुगुप्तमेतꣳसक्तुशेषं निधाय ततोऽस्तमितेऽस्तमितेऽग्निं परिचर्य दर्व्योपघातꣳसक्तून्सर्पेभ्यो वलिꣳ
हरेदाग्रहायण्यास्तꣳ हरन्तमग्न्यन्तरेण गच्छेयुर्दर्व्याचमनं प्रक्षाल्य निदधाति धानाः प्राश्नन्त्यसꣳ

१ सार्पराज्ञ्य [illegible] जुहोतान्द्राय स्वाहेति वैदिकपाठः ॥

१०११

स्यृतास्ततो ब्राह्मणभोजनम् ॥ १८ ॥ प्रौष्ठपद्यामिन्द्रयज्ञः । पायसमैन्द्रꣳश्रपयित्वाऽपूपाँश्चापूपैस्तीर्त्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोतीन्द्रायेन्द्राण्या अजायैकपदेऽहिर्बुध्न्याय प्रौष्ठपदाभ्यश्चेति प्राशनान्ते मरुद्भ्यो बलिꣳ हरत्यहुतादो मरुत इति श्रुतेराश्वत्थेषु पलाशेषु मरुतोऽश्वत्थे तस्थुरिति वचनाच्छुक्रज्योतिरिति प्रतिमन्त्रं विमुखेन च मनसा नामान्येषामेतानीति श्रुतेरिन्द्रं दैवीरिति जपति ततो ब्राह्मणभोजनम् ॥ १९ ॥ आश्वयुज्यां पृषातकाः पायसमैन्द्रꣳ श्रपयित्वा दधिमधुघृतमिश्रं जुहोतीन्द्रायेन्द्राण्या अश्विभ्यामाश्वयुज्यै पौर्णमास्यै शरदे चेति प्राशनान्ते दधिपृषातकमञ्जलिना जुहोत्यूनं मे पूर्यतां पूर्णं मे मा व्यगात्स्वाहेति दधिमधुघृतमिश्रममात्या अवेक्षन्त आयात्विन्द्र इत्यनुवाकेन मातृभिर्वत्सान्सꣳसृज्य ताꣳरात्रिमाग्रहायणीं च ततो ब्राह्मणभोजनम् ॥ २० ॥ अथ सीतायज्ञो व्रीहियवाणां यत्र यत्र यजेत तन्मयꣳ स्थालीपाकꣳ श्रपयेत्कामादीजानोऽन्यत्रापि व्रीहियवयोरेवान्यतरꣳस्थालीपाकꣳश्रपयेन्न पूर्वचोदितत्वात्सन्देहोऽसम्भवाद्विनिवृत्तिः क्षेत्रस्य पुरस्तादुत्तरतो वा शुचौ देशे कृष्टे फलानुपरोधेन ग्रामे वोभयसम्प्रयोगाद-

विरोधाद्यत्र श्रपयिष्यन्नुपलिप्य उद्धत्यावोक्ष्याग्निमुपसमाधाय निर्मथ्य दर्भैस्तीर्त्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति पृथिवी द्यौः प्रदिशो दिशो यस्मै द्युभिरावृताः । तमिहेन्द्रमुपह्वये शिवा नः सन्तु हेतयः स्वाहा । यन्मे किञ्चिदुपेप्सितमस्मिन्कर्मणि वृत्रहन् ॥ तन्मे सर्वꣳ समृध्यतां जीवतः शरदः शतꣳ स्वाहा ॥ सम्पत्तिर्भूतिर्भूमिर्वृष्टिर्ज्यैष्ठ्यꣳ श्रैष्ठ्यꣳ श्रीः प्रजामिहावतु स्वाहा ॥ यस्या भावे वैदिकलौकिकानां भूतिर्भवति कर्मणाम् ॥ इन्द्रपत्नीमुपह्वये सीताꣳ सा मे त्वनपायिनी भूयात्कर्मणि कर्मणि स्वाहा ॥ अश्वावती गोमती सूनृतावती बिभर्ति या प्राणभृतो अतन्द्रिता ॥ खलमालिनीमुर्वरामस्मिन्कर्मण्युपह्वये ध्रुवाꣳ सा मे त्वनपायिनी भूयात्स्वाहेति स्थालीपाकस्य जुहोति सीतायै यजायै शमायै भूत्या इति मन्त्रवत्प्रदानमेकेषाꣳ स्वाहाकारप्रदाना इति श्रुतेर्विनिवृत्तिः स्तरणशेषकुशेषु सीतागोप्तृभ्यो बलिꣳ हरति पुरस्ताद्ये त आसते सुधन्वानो निषङ्गिणः ॥ ते त्वा पुरस्ताद्गोपायन्त्वप्रमत्ता अनपायिनो नम एषां करोम्यहं बलिमेभ्यो हरामीममित्यथ दक्षिणतो निमिषा वर्मिण आसते ॥ ते त्वा दक्षिणतो गोपायन्त्वप्रमत्ता अनपायिनो

नम एषां करोम्यहं बलिमेभ्यो हरामीममित्यथ पश्चाद्धासुवः प्रभुवो भूतिर्भूमिः पार्ष्णिः शुनङ्कुरिः ॥ ते त्वा पश्चाद्गोपायन्त्वप्रमत्ता अनपायिनो नम एषां करोम्यहं बलिमेभ्यो हरामीममित्यथोत्तरतो भीमा वायुः समाजवे ॥ ते त्वोत्तरतः क्षेत्रे खले गृहेऽध्वनि गोपायन्त्वप्रमत्ता अनपायिनो नम एषां करोम्यहं बलिमेभ्यो हरामीममिति प्रकृतादन्यस्मादाज्यशेषेण च पूर्ववद्बलिकर्म स्त्रियश्चोपयजेरन्नाचरितत्वात्सꣳस्थिते कर्मणि ब्राह्मणान्भोजयेत् सꣳस्थिते कर्मणि ब्राह्मणान्भोजयेत् ॥ २१ ॥ ॥ ॥ ॥ ॥

इति पारस्करगृह्यसूत्रे द्वितीयकाण्डं समाप्तम् ॥



1014

# अथ तृतीयं काण्डम् ।

अनाहिताग्नेर्नवप्राशनन्नवं स्थालीपाकं श्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति शतायुधाय शतवीर्याय शतोतये अभिमातिषाहे ॥ शतं यो नः शरदोऽजीजानिन्द्रो नेषदति दुरितानि विश्वा स्वाहा । ये चत्वारः पथयो देवयाना अन्तरा द्यावापृथिवी वियन्ति ॥ तेषां योऽज्यानिमजीजिमा-वहात्तस्मै नो देवाः परिधत्तेह सर्वे स्वाहेति । स्थालीपाकस्याऽऽग्रयणदेवताभ्यो हुत्वा जुहोति स्विष्ट-कृते च स्विष्टमग्ने अभितत्पृणीहि विश्वाँश्च देवः पृतना अविष्यत् । सुगन्नु पन्थां प्रदिशन्न एहि ज्योतिष्मध्ये ह्यजरन्न आयुः स्वाहेति । अथ प्राश्नात्यग्निः प्रथमः प्राश्नातु स हि वेद यथा हविः । शिवा अस्मभ्यमोषधीः कृणोतु विश्वचर्षणिर्भद्रान्नः श्रेयः समनैष्ट देवास्त्वयावशेन समशीमहि त्वा । स नो मयोभूः पितो आविशस्व शं तोकाय तनुवे स्योन इत्यन्नपतीयया वाथ यवानामेत-

---

१ अन्नपतिशब्दो विद्यते यस्यां सा अन्नपतीया तया अन्नपतीयया अत्र छप्रत्ययः ।

१०१५

मुत्यं मधुना सञ्युतं यवꣳसरस्वत्या अधिवनाय चक्रुषुः ॥ इन्द्र आसीत्सीरपतिः शतक्रतुः कीनाशा आसन्मरुतः सुदानव इति ततो ब्राह्मणभोजनम् ॥ १ ॥ मार्गशीर्ष्यां पौर्णमास्यामाग्रहायणीकर्म स्थालीपाकꣳ श्रपयित्वा श्रवणवदाज्याहुतीर्हुत्वाऽपरा जुहोति यां जनाः प्रतिनन्दन्ति रात्रीन्धेनुमिवायतीम् ॥ संवत्सरस्य या पत्नी सा नो अस्तु सुमङ्गली स्वाहा ॥ संवत्सरस्य प्रतिमा या ताꣳ रात्रिमुपास्महे ॥ प्रजाꣳ सुवीर्यां कृत्वा दीर्घमायुर्व्यश्नवै स्वाहा ॥ संवत्सराय परिवत्सरायेदावत्सरायेद्वत्सराय वत्सराय कृणुते बृहन्नमः ॥ तेषां वयꣳसुमतौ यज्ञियानां ज्योग्जीता अहताः स्याम स्वाहा ग्रीष्मो हेमन्त उत नो वसन्तः शिवा वर्षा अभया शरन्नः । तेषामृतूनाꣳ शतशारदानां निवात एषामभये वसेम स्वाहेति स्थालीपाकस्य जुहोति सोमाय मृगशिरसे मार्गशीर्ष्यै पौर्णमास्यै हेमन्ताय चेति प्राशनान्ते सक्तुशेषꣳशूर्पे न्युप्योपनिष्क्रमणप्रभृत्यामार्जनान्मार्जनान्त उत्सृष्टो बलिरित्याह पश्चादग्नेः स्रस्तरमास्तीर्याहतं च वास आप्लुता अहतवाससः प्रत्यवरोहन्ति दक्षिणतः स्वामी जायोत्तरा यथाकनिष्ठमुत्तरतो दक्षिणतो ब्रह्माणमुपवेश्योत्तरत उदपात्रꣳशमी-

शाखसीतालोष्ठाश्मनो निधायाग्निमीक्षमाणो जपत्ययमग्निर्वीरतमोऽयं भगवत्तमः सहस्रसातमः ॥
सुवीर्योऽयं श्रैष्ठ्ये दधातु नाविति पश्चादग्नेः प्राञ्चमञ्जलिं करोति दैवीं नावमिति तिसृभिः स्रस्त-
रमारोहन्ति ब्रह्माणमामन्त्रयते ब्रह्मन्प्रत्यवरोहामेति ब्रह्मानुज्ञाताः प्रत्यवरोहन्त्यायुः कीर्त्तिर्यशो बल-
मन्नाद्यं प्रजामित्युपेता जपन्ति सुहेमन्तः सुवसन्तः सुग्रीष्मः प्रतिधीयतान्नः ॥ शिवा नो वर्षाः सन्तु
शरदः सन्तु नः शिवा इति स्योना पृथवि नो भवेति दक्षिणपार्श्वैः प्राक्शिरसः संविशन्त्युपोदुत्ति-
ष्ठन्त्युदायुषा स्वायुषोत्पर्जन्यस्य वृष्ट्या पृथिव्याः सप्तधामभिरित्येवं द्विरपरं ब्रह्मानुज्ञाता अधःशयीरँ-
श्चतुरो मासान्यथेष्टं वा ॥ २ ॥ ऊर्ध्वमाग्रहायण्यास्तिस्रोऽष्टका ऐन्द्री वैश्वदेवी प्राजापत्या पित्र्यत्य-
पूपमाꣳसशाकैर्यथासङ्ख्यं प्रथमाऽष्टका पक्षाष्टम्याꣳस्थालीपाकꣳश्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्या-
हुतीर्जुहोति त्रिꣳशत्स्वसार उपयन्ति निष्कृतꣳसमानं केतुं प्रतिमुञ्चमानाः ॥ ऋतूँस्तन्वते कवयः
प्रजानतीर्मध्ये छन्दसः परियन्ति भास्वतीः स्वाहा ॥ ज्योतिष्मती प्रतिमुञ्चते नभो रात्री देवी सूर्यस्य
व्रतानि ॥ विपश्यन्ति पशवो जायमाना नानारूपामातुरस्या उपस्थे स्वाहा ॥ एकाऽष्टका तपसा

तप्यमाना जजान गर्भं महिमानमिन्द्रम् ॥ तेन दस्यून्व्यसहन्त देवा हन्ताऽसुराणामभवच्छ-
चीभिः स्वाहा ॥ अनानुजामनुजां मामकर्त्त सत्यं वदन्त्यन्विच्छ एतत् ॥ भूयासमस्य सुमतौ यथा
यूयमन्या वो अन्यामति मा प्रयुक्त स्वाहा ॥ अभून्मम सुमतौ विश्ववेदा आष्ट प्रतिष्ठामविदद्धि
गाधम् ॥ भूयासमस्य सुमतौ यथा यूयमन्या वो अन्यामति मा प्रयुक्त स्वाहा ॥ पञ्च व्युष्टीरनु पञ्च-
दोहा गां पञ्चनाम्नी मृतवोऽनु पञ्च ॥ पञ्च दिशः पञ्चदशेन क्लृप्ताः समानमूर्ध्नीरधिलोकमेकꣳ-
स्वाहा ॥ ऋतस्य गर्भः प्रथमा व्यूषिष्यपामेका महिमानं बिभर्ति । सूर्यस्यैका चरति निष्कृतेषु
धर्मस्यैका सवितैकान्नियच्छतु स्वाहा । या प्रथमा व्यौच्छत्सा धेनुरभवद्यमे ॥ सा नः पयस्वती धुक्ष्वो-
त्तरामुत्तराꣳ समाꣳ स्वाहा ॥ शुक्रऋषभा नभसा ज्योतिषाऽगाद्विश्वरूपा शवली अग्निकेतुः ॥
समानमर्थꣳ स्वपस्यमाना बिभ्रती जरामजर उष आगाः स्वाहा ॥ ऋतूनां पत्नी प्रथमेयमागादह्नां
नेत्री जनित्री प्रजानाम् ॥ एका सती बहुधोषो व्योच्छत्सा जीर्णा त्वं जरयसि सर्वमन्यत्स्वाहेति ।
स्थालीपाकस्य जुहोति शान्ता पृथिवी शिवमन्तरिक्षꣳशन्नो द्यौरभयं कृणोतु ॥ शन्नोऽदिशः प्रदिश

आदिशो नोऽहोरात्रे कृणुतं दीर्घमायुर्व्यश्नवै स्वाहा ॥ आपो मरीचीः परिपान्तु सर्वतो धाता समुद्रो अपहन्तु पापम् । भूतं भविष्यदकृन्तद्विश्वमस्तु मे ब्रह्माभिगुप्तः सुरक्षितः स्याᳬस्वाहा ॥ विश्वे आदित्या वसवश्च देवा रुद्रा गोप्तारो मरुतश्च सन्तु ॥ ऊर्जं प्रजाममृतन्दीर्घमायुः प्रजापतिर्मयि परमेष्ठी दधातु नः स्वाहेति च । अष्टकायै स्वाहेति मध्यमा गवा तस्यै वपां जुहोति वह वपां जातवेदः पितृभ्य इति श्वोऽन्वष्टकासु सर्वासां पार्श्वसक्थिसव्याभ्यां परिवृते पिण्डपितृयज्ञवत्स्त्रीभ्यश्चोपसेचनञ्च कर्षूषु सुरया तर्पणेन चाञ्जनानुलेपनᳬस्रजश्चाचार्यायान्तेवासिभ्यश्चानपत्येभ्य इच्छन् मध्या वर्षे च तुरीया शाकाष्टका ॥ ३ ॥ अथातः शालाकर्म पुण्याहे शालां कारयेत्तस्या अवटमभिजुहोत्यच्युताय भौमाय स्वाहेति स्तम्भमुच्छ्रयतीमामुच्छ्रयामि भुवनस्य नाभिं वसोर्धारां प्रतरणीं वसूनाम् ॥ इहैव ध्रुवान्निमिनोमि शालां क्षेमे तिष्ठतु घृतमुक्षमाणा ॥ अश्वावती गोमती सूनृतावत्युच्छ्रयस्व महते सौभगाय ॥ आ त्वा शिशुराक्रन्दत्वा गावो धेनवो वाश्यमानाः ॥ आ
सं. ७९ त्वा कुमारस्तरुण आवत्सो जगदैः सह ॥ आ त्वा परिस्रुतः कुम्भ आदध्नः कलशैरुप क्षेमस्य

पत्नी बृहती सुवाग्मा रयिन्नो धेहि सुभगे सुवीर्यम् ॥ अश्वावद्गोमदूर्जस्वत्पर्णं वनस्पतेरिव ॥ अभि-
नः पूर्य्यताᳪरयिरिदमनुश्रेयो वसान इति चतुरः प्रपद्यतेऽभ्यन्तरतोऽग्निमुपसमाधाय दक्षिणतो
ब्रह्माणमुपवेश्योत्तरत उदपात्रं प्रतिष्ठाप्य स्थालीपाकᳪश्रपयित्वा निष्क्रम्य द्वारसमीपे स्थित्वा
ब्रह्माणमामन्त्रयते ब्रह्मन्प्रविशामीति ब्रह्मानुज्ञातः प्रविशत्यृ(चं)तं प्रपद्ये शिवं प्रपद्य इत्याज्यᳪ-
सँस्कृत्येह रतिरित्याज्याहुतीर्हुत्वाऽपरा जुहोति वास्तोष्पते प्रतिजानीह्यस्मान्स्वावेशो अनमीवो
भवा नः ॥ यत्त्वेमहे प्रति तन्नो जुषस्व शन्नो भव द्विपदे शञ्चतुष्पदे स्वाहा ॥ १ ॥ वास्तोष्पते
प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिन्दो ॥ अजरासस्ते सख्ये स्याम पितेव पुत्रान्प्रति तन्नो
जुषस्व शन्नो भव द्विपदे शञ्चतुष्पदे स्वाहा ॥२॥ वास्तोष्पते शग्मया सᳪसदा ते सक्षीमहि रण्वया
गातुमत्या ॥ पाहि क्षेम उत योगे वरन्नो यूयम्पात स्वस्तिभिः सदा नः स्वाहा ॥ ३ ॥ अमीवहा
वास्तोष्पते विश्वा रूपाण्याविशन् ॥ सखा सुशेव एधि नः स्वाहेति स्थालीपाकस्य जुहोत्यग्निमिन्द्रं
बृहस्पतिं विश्वान्देवानुपह्वये ॥ सरस्वतीं च वाजीं च वास्तु मे दत्त वाजिनः स्वाहा ॥ सर्पदेव-

जनान्सर्वान् हिमवन्तꣳसुदर्शनम्। वसूꣳश्च रुद्रानादित्यानीशानं जगदैः सह॥ एतान्सर्वान्प्रपद्येऽहं वास्तु मे दत्त वाजिनः स्वाहा॥ पूर्वाह्णमपराह्णश्चोभौ मध्यन्दिना सह॥ प्रदोषमर्द्धरात्रं च व्युष्टां देवीं महापथाम्॥ एतान्सर्वान्प्रपद्येऽहं वास्तु मे दत्त वाजिनः स्वाहा। कर्तारं च विकर्तारं विश्वकर्माणमोषधींश्च वनस्पतीन्॥ एतान्सर्वान्प्रपद्येऽहं वास्तु मे दत्त वाजिनः स्वाहा॥ धातारं च विधातारं निधीनां च पतिꣳसह॥ एतान्सर्वान्प्रपद्येऽहं वास्तु मे दत्त वाजिनः स्वाहा॥ स्योनꣳ शिवमिदं वास्तु दत्तं ब्रह्मप्रजापती॥ सर्वाश्च देवताः स्वाहेति प्राशनान्ते काꣳस्ये सम्भारानोप्यौदुम्बरपलाशानि ससुराणि शाड्वलं गोमयं दधि मधु घृतं कुशान्यवाँश्चासनोपस्थानेषु प्रोक्षेत्पूर्वे सन्धावभिमृशति श्रीश्च त्वा यशश्च पूर्वे सन्धौ गोपायेतामिति। दक्षिणे सन्धावभिमृशति यज्ञश्च त्वा दक्षिणा च दक्षिणे सन्धौ गोपायेतामिति पश्चिमे सन्धावभिमृशति॥ अन्नं च त्वा ब्राह्मणश्च पश्चिमे सन्धौ गोपायेतामित्युत्तरे सन्धावभिमृशत्यूर्क्च त्वा सूनृता चोत्तरे सन्धौ गोपायेतामिति निष्क्रम्य दिश उपतिष्ठते केता च मा सुकेता च पुरस्ताद्गोपायेतामित्यग्निर्वै

केतादित्यः सुकेता तौ प्रपद्ये ताभ्यां नमोऽस्तु तौ मा पुरस्ताद्गोपायेतामित्यथ दक्षिणतो गोपायमानं च मा रक्षमाणा च दक्षिणतो गोपायेतामित्यहर्वै गोपायमानꣳरात्री रक्षमाणा ते प्रपद्ये ताभ्यां नमोऽस्तु ते मा दक्षिणतो गोपायेतामित्यथ पश्चाद्दीदिविश्च मा जागृविश्च पश्चाद्गोपायेतामित्यन्नं वै दीदिविः प्राणो जागृविस्तौ प्रपद्ये ताभ्यां नमोऽस्तु तौ मा पश्चाद्गोपायेतामित्यथोत्तरतः स्वप्नश्च मानवद्राणश्चोत्तरतो गोपायेतामिति चन्द्रमा वा अस्वप्नो वायुरनवद्राणस्तौ प्रपद्ये ताभ्यां नमोऽस्तु तौ मोत्तरतो गोपायेतामिति निष्ठितां प्रपद्यते धर्मस्थूणा राजꣳश्रीस्तूपमहोरात्रे द्वारफलके ॥ इन्द्रस्य गृहा वसुमन्तो वरूथिनस्तानहं प्रपद्ये सह प्रजया पशुभिः सह ॥ यन्मे किंचिदस्त्युपहूतः सर्वगणसखायसाधुसंवृतः । तां त्वा शालेरिष्टवीरा गृहान्नः सन्तु सर्वत इति ततो ब्राह्मणभोजनम् ॥ ४ ॥ अथातो मणिकावधानमुत्तरपूर्वस्यां दिशि यूपवदवटं खात्वा कुशानास्तीर्याक्षतानरिष्टकाँ( सुमनसः कपर्दिकान् )श्चान्यानि चाभिमङ्गलानि तस्मिन्निनोति मणिकꣳ समुद्रोऽसीत्यप आसिञ्चत्यापो रेवतीः क्षयथा हि वस्वः क्रतुं च भद्रं बिभृथामृतं च ॥

रायश्च स्थ स्वपत्यस्य पत्नी सरस्वती तद्गृणते वयोऽधादित्यापोहिष्ठेति च तिसृभिस्ततो ब्राह्मण-
भोजनम् ॥ ५ ॥ अथातः शीर्षरोगभेषजं पाणी प्रक्षाल्य भ्रुवौ विमार्ष्टि चक्षुर्भ्यां श्रोत्राभ्यां
गोदानाच्छुबुकादधि । यक्ष्मꣳशीर्षण्यꣳरराटाद्विवृहामीमामित्यर्द्धश्चेदवभेदकविरूपाक्ष श्वेतपक्ष
महायशः । अथो चित्रपक्ष शिरो मास्याभिताप्सीदिति क्षेम्यो ह्येव भवति ॥ ६ ॥
उतूलपरिमेः हस्वपतो जीवविषाणे स्वं मूत्रमासिच्यापसल(मेव)वि त्रिः परिषिञ्चन्परीयात् परिस्त्वा
गिरेरहं परिमातुः परिस्वसुः परिपित्रोश्च भ्रात्रोश्च सख्येभ्यो विसृजाम्यहम् ॥ उतूल परिमीढोऽसि
परिमीढः क्व गमिष्यसीति स यदि भ्रम्याद्दावाग्निमुपसमाधाय घृताक्तानि कुशेण्ड्वानि
जुहुयात्परित्वा ह्वलनो ह्वलनिर्वृत्तेन्द्रवीरुधः ॥ इन्द्रपाशेन सित्वा मह्यं मुक्त्वाऽथान्यमानये दिती
क्षेम्यो ह्येव भवति ॥ ७ ॥ शूलगवः स्वर्ग्यः पशव्यः पुत्र्यो धन्यो यशस्य आयुष्य औपासनमरण्यꣳ
हृत्वा वितानꣳसाधयित्वा रौद्रं पशुमालभेत साण्डं गौर्वा शब्दाद्वपाꣳश्रपयित्वा स्थालीपाक-
मवदानानि च रुद्राय वपामन्तरिक्षाय वसाꣳस्थालीपाकमिश्राण्यवदानानि जुहोत्यग्नये रुद्राय

शर्वाय पशुपतय उग्रायाशनये भवाय महादेवायेशानायेति च वनस्पतिस्विष्टकृदन्ते ॥ दिग्व्याघारणं व्याघारणान्ते पत्नी सञ्ज्याजयन्तीन्द्राण्यै रुद्राण्यै शर्वाण्यै भवान्या अग्निं गृहपतिमिति लोहितं पालाशेषु कूर्चेषु रुद्राय सेनाभ्यो बलिꣳ हरति यास्ते रुद्र पुरस्तात्सेनास्ताभ्य एष ते बलिस्ताभ्यस्ते नमो यास्ते रुद्र दक्षिणतः सेनास्ताभ्य एष ते बलिस्ताभ्यस्ते नमो यास्ते रुद्र पश्चात्सेनास्ताभ्य एष बलिस्ताभ्यस्ते नमो यास्ते रुद्रोत्तरतः सेनास्ताभ्य एष ते बलिस्ताभ्यस्ते नमो यास्ते रुद्रोपरिष्टात्सेनास्ताभ्य एष ते बलिस्ताभ्यस्ते नमो यास्ते रुद्राधस्तात्सेनास्ताभ्य एष ते बलिस्ताभ्यस्ते नम इत्यूवध्यँल्लोहितलिप्तमग्नौ प्रास्यत्यधो वा निखनत्यनुवातं पशुमवस्थाप्य रुद्रैरुपतिष्ठते प्रथमोत्तमाभ्यां वाऽनुवाकाभ्यां नैतस्य पशोर्ग्राममꣳहरन्त्येतेनैव गोयज्ञो व्याख्यातः पायसेनानर्थलुप्तस्तस्य तुल्यवया गौर्दक्षिणा ॥ ९ ॥ अथ वृषोत्सर्गो गोयज्ञेन व्याख्यातः कार्त्तिक्यां पौर्णमास्याꣳ रेवत्यां वाऽऽश्वयुजस्य मध्येगवाꣳसुसमिद्धमग्निं कृत्वाऽऽज्यꣳसंस्कृत्येहरतिरिति षट् जुहोति प्रतिमन्त्रं पूषा गा अन्वेतु नः पूषा रक्षत्वर्वतः ॥ पूषा वाजꣳसनोतु नः स्वाहेति

पौष्णस्य जुहोति रुद्रान् जपित्वैकवर्णं द्विवर्णं वा यो वा यूथं छादयति यं वा यूथं छादयेद्रोहितो वैव स्यात्सर्वाङ्गैरुपेतो जीववत्सायाः पयस्विन्याः पुत्रो यूथे च रूपस्वित्तमः स्यात्तमलङ्कृत्य यूथे मुख्याश्चतस्रो वत्सतर्यस्ताश्चालङ्कृत्य एतं युवानं पतिं वो ददामि तेन क्रीडन्तीश्चरथ प्रियेण ॥ मानः साप्तजनुषाऽसुभगा रायस्पोषेण समिषा मदेमेत्येतयैवोत्सृजेरन्नभ्यस्थमभिमन्त्रयते मयोभूरित्यनुवाकशेषेण ( वामे चक्रं दक्षिणे त्रिशूलम् )। सर्वासां पयसि पायसꣳ श्रपयित्वा ब्राह्मणान्भोजयेत् पशुमप्येके कुर्वन्ति तस्य शूलगवेन कल्पो व्याख्यातः ॥ १० ॥ अथोदककर्माद्विवर्षे प्रेते मातापित्रोराशौचꣳशौचमेवेतरेषामेकरात्रं त्रिरात्रं वा शरीरमदग्ध्वा निखनन्त्यन्तःसूतके चेदोत्थानादाशौचꣳसूतकवन्नात्रोदककर्म द्विवर्षप्रभृति प्रेतमाश्मशानात्सर्वेऽनुगच्छेयुर्यमगाथां गायन्तो यमसूक्तं च जपन्त इत्येके यद्युपेतो भूमिजोषणादिसमानमाहिताग्नेरोदकान्तस्य गमनाच्छालाग्निना दहन्त्येनमाहितश्चेत्तूष्णीं ग्रामाग्निनेतरं सम्युक्तं मैथुनं वो याचेरन्नुदकं करिष्यामह इति कुरुध्वं मा चैवं पुनरित्यशतवर्षे प्रेते कुरुध्वमित्येवेतरस्मिन् सर्वे ज्ञातयोऽपोऽभ्यवयन्त्यासप्तमात्पुरुषाद्-

शमाद्वा समानग्रामवासे यावत्सम्बन्धमनुस्मरेयुरेकवस्त्राः प्राचीनावीतिनः सव्यस्यानामिकयाऽपनो-
द्यापनः शोशुचदघमिति दक्षिणामुखा निमज्जन्ति प्रेतायोदकं सकृत्प्रसिञ्चन्त्यञ्जलिनाऽसावेतत्त
उदकमित्युत्तीर्णाञ्छुचौ देशे शाद्वलवत्युपविष्टांस्तत्रैतानपवदेयुरनवेक्षमाणा ग्राममायान्ति रीती-
भूताः कनिष्ठपूर्वा निवेशनद्वारे पिचुमन्दपत्राणि विदश्याचम्योदकमग्निं गोमयं गौरसर्षपांस्तैल-
मालभ्याश्मानमाक्रम्य प्रविशन्ति त्रिरात्रं ब्रह्मचारिणोऽधःशायिनो न किञ्चन कर्म कुर्युर्न प्रकुर्वी-
रन् क्रीत्वा लब्ध्वा वा दिवैवान्नमश्नीयुरमांसं प्रेताय पिण्डं दत्त्वाऽवनेजनप्रत्यवनेजनेषु नामग्राहं
मृन्मये हताः रात्रौ क्षीरोदके विहायसि निदध्युः प्रेतात्र स्नाहीति त्रिरात्रं शावमाशौचं दश-
रात्रमित्येके न स्वाध्यायमधीयीरन् नित्यानि निवर्तेरन्वैतानवर्जं शालाग्नौ चैकेऽन्य एतानि कुर्युः
प्रेतस्पर्शिनो ग्रामं न प्रविशेयुरा नक्षत्रदर्शनाद्रात्रौ चेदादित्यस्य प्रवेशनादि समानमितरैः पक्षं द्वौ ॥२३१॥
वाऽऽशाचमाचार्ये चैवं मातामहयोश्च स्त्रीणां चाप्रत्तानां प्रत्तानामितरे कुर्वीरन् ताश्च तेषां प्रोषित-
श्चेत्प्रेयाच्छ्रवणप्रभृति कृतोदकाः कालशेषमासीरन्नतीतश्चेदेकरात्रं त्रिरात्रं वाथ कामोदकान्युत्वि-

श्वशुरसखिसम्बन्धिमातुलभागिनेयानां प्रत्तानां चैकादश्यामयुग्मान्ब्राह्मणान्भोजयित्वा मांऽस-
वत्प्रेतायोद्दिश्य गामप्येके घ्नन्ति पिण्डकरणे प्रथमः पितॄणां प्रेतः स्यात्पुत्रवाँश्चेन्निवर्तेत चतुर्थः
संवत्सरं पृथगेके न्यायस्तु न चतुर्थः पिण्डो भवतीतिश्रुतेरहरहरन्नमस्मै ब्राह्मणायोदकुम्भं च दद्या-
त्पिण्डमप्येके निपृणन्ति ॥ ११ ॥ पशुश्चेदाप्लव्या गामग्रेणाग्नीन्परीत्य पलाशाखान्निहन्ति परिव्यय-
णोपाकरणनियोजनप्रोक्षणान्यावृता कुर्याद्यच्चान्यत्परिपशव्ये हुत्वा तूष्णीमपराः पञ्च वपोद्धरणं
चाभिघारयेद्देवताश्चादिशेदुपाकरणनियोजनप्रोक्षणेषु स्थालीपाके चैवं वपाऽहुत्वाऽवदानान्यवद्यति
सर्वाणि त्रीणि पञ्च वा स्थालीपाकमिश्राण्यवदानानि जुहोति पश्वङ्गं दक्षिणा यद्देवते तद्दैवतं यजे-
त्तस्मै च भागं कुर्यात्तं च ब्रूयादिममनुप्रापयेति नद्यन्तरे नावं कारयेन्न वा ॥ १२ ॥ अथातोऽवकीर्णि-
प्रायश्चित्तममावास्यायां चतुष्पथे गर्दभं पशुमालभते निर्ऋतिं पाकयज्ञेन यजेताप्स्ववदानहोमो भूमौ
पशुपुरोडाशश्रपणं तां छविं परिदधीतोर्ध्ववालामित्येके संवत्सरं भिक्षाचर्यं चरेत्स्वकर्म परिकीर्तयनथा-
परमाऽऽज्याहुतीर्जुहोति कामावकीर्णोऽस्म्यवकीर्णोऽस्मि कामकामाय स्वाहा ॥ कामाभिदु(द्रु)ग्धोऽ-

स्म्यभिदु(द्रु)ग्धोऽस्मि कामकामाय स्वाहेत्यथोपतिष्ठते सम्मा सिञ्चन्तु मरुतः समिन्द्रः सम्बृहस्पतिः सम्मायमग्निः सिञ्चतु प्रजया च धनेन चेत्येतदेव प्रायश्चित्तम् ॥ १३ ॥ अथातः सभाप्रवेशनꣳ सभामभ्येति सभाङ्गिरसि नादिर्नामासि त्विषिर्नामासि तस्यै ते नम इत्यथ प्रविशति सभा च मा समितिश्चोभे प्रजापतेर्दुहितरौ सचेतसौ ॥ यो मानविद्यादुपमास तिष्ठेत्सचेतनो भवतु शꣳसथे जन इति पर्षदमेत्य जपेदभिभूरहमागमविराडप्रतिवाश्याः ॥ अस्याः पर्षद ईशानः सहसा सुदुष्टरो जन इति स यदिमन्येत क्रुद्धोऽयमिति तमभिमन्त्रयते यात एषा रराट्या तनूर्मन्योः क्रोधस्य नाशनी ॥ तां देवा ब्रह्मचारिणो विनयन्तु सुमेधसः ॥ द्यौरहं पृथिवी चाहं तौ ते क्रोधं नयामसि गर्भमश्वतर्य्य- सहासावित्यथ यदि मन्येत द्रुग्धो यमिति तमभिमन्त्रयते तां ते वाचमास्य आदत्ते हृदय आदधे यत्र यत्र निहिता वाक्तां ततस्तत आददे यदहं ब्रवीमि तत्सत्यमधरोमत्तांद्यस्वेत्येतदेव वशीकर- णम् ॥ १४ ॥ अथातो रथारोहणं युङ्क्तेतिरथꣳ सम्प्रेष्य युक्त इति प्रोक्ते सा विराडित्येत्य चक्रे अभिमृशति रथन्तरमसीति दक्षिणं बृहदसीत्युत्तरं वामदेव्यमसीति कूबरीꣳ हस्तेनोपस्थमभि-

मृशत्यङ्कौ न्यङ्कावभितो रथं यौ ध्वान्तं वाताग्रमनुसञ्चरन्तं दूरेहेतिरिन्द्रियवान्पतत्रि ते नोऽग्नयः पप्रयः पारयन्त्विति नमो माणिचरायेति दक्षिणं धुर्यं प्राजति ( गवां मध्ये स्थापयति ) अप्राप्य देवताः प्रत्यवरोहेत्सम्प्रति ब्राह्मणान्मध्ये गा अभिक्रम्य पितृन्स्त्रीब्रह्मचारिणौ सारथी स्यातां मुहूर्त्तमतीयाय जपेदिहरतिरिहरमध्वमेके मास्त्विहरेतिरिति च स यदि दुर्बलो रथः स्यात्तमास्थाय जपेदयं वामश्विना रथो मा दुर्गे मास्तरोरिषदिति स यदि भ्रम्यात्स्तम्भमुपस्पृश्य भूमिं वा जपेदेष वामश्विना रथो मा दुर्गे मास्तरोरिषदिति तस्य न काचनार्त्तिर्न रिष्टिर्भवति या त्वा ध्वानं विमुच्य रथं यवमोदके दापयेदेष उ ह वाहनस्यापह्नव इति श्रुतेः ॥ १५ ॥ अथातो हस्त्यारोहणमेत्य हस्तिनमभिमृशति हस्तियशसमसि हस्तिवर्चसमसीत्यथावरोहतीन्द्रस्य त्वा वज्रेणाभितिष्ठामि स्वस्ति मा सम्पारयेत्येतेनैवाश्वारोहणं व्याख्यातमुष्ट्रमारोक्ष्यन्नभिमन्त्रयते त्वाष्ट्रोऽसि त्वष्टृदेवत्यः स्वस्ति मा सम्पारयेति रासभमारोक्ष्यन्नभिमन्त्रयते शूद्रोऽसि शूद्रजन्माग्नेयो वै द्विरेताः स्वस्ति मा सम्पारयेति नावमारोक्ष्यन्नभिमन्त्रयते सुनावमित्युत्तरिष्यन्नभिमन्त्रयते सुत्रामाणमिति वनम-

भिमन्त्रयते नमो रुद्राय वनसदे स्वस्ति मा सम्पारयेति गिरिमभिमन्त्रयते नमो रुद्राय गिरिषदे स्वस्ति मा सम्पारयेति चतुष्पथमभिमन्त्रयते नमो रुद्राय पथिषदे स्वस्ति मा सम्पारयेति नदीमुत्तरिष्यन्न- भिमन्त्रयते नमो रुद्रायाप्सुषदे स्वस्ति मा सम्पारयेति श्मशानमभिमन्त्रयते नमो रुद्राय पितृषदे स्वस्ति मा सम्पारयेति गोष्ठमभिमन्त्रयते नमो रुद्राय शकृत्पिण्डसदे स्वस्ति मा सम्पारयेति यत्र चान्यत्रापि नमो रुद्रायेत्येव ब्रूयाद्रुद्रो ह्येवेदꣳसर्वमिति श्रुतेः सिचाऽवधुतोऽभिमन्त्रयते सिगसि न वज्रोऽसि नमस्तेऽस्तु मा मा हिꣳसीरिति स्तनयित्नुमभिमन्त्रयते शिवा नो वर्षाः सन्तु शिवा नः सन्तु हेतयः शिवा नस्ताः सन्तु यास्त्वꣳसृजसि वृत्रहन्निति शिवां वाश्यमानामभिमन्त्रयते शिवो नामेति शकुनिं वाश्यमानमभिमन्त्रयते हिरण्यपर्ण शकुने देवानां प्रहितं गम ॥ यमदूत नमस्तेऽस्तु किन्त्वाकार्कारिणोऽब्रवीदिति क्षेम्यो ह्येव भवति लक्षण्यं वृक्षमभिमन्त्रयते मा त्वाशनिर्मा परशुर्मा वातो मा राजप्रेषितो दण्डः ॥ अङ्कुरास्ते प्ररोहन्तु निवाते त्वाऽभिवर्षत्वग्निष्टे मूलं मा हिꣳसीत्स्वस्ति तेऽस्तु वनस्पते स्वस्ति मेऽस्तु वनस्पत इति स यदि किञ्चिल्लभेत तत्प्रतिगृह्णाति

द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णात्विति साऽस्य न ददतः क्षीयते भूयसी च प्रतिगृहीता भवत्यथ यद्योदनं लभेत तत्प्रतिगृह्य द्यौस्त्वेति तस्य द्विः प्राश्नाति ब्रह्मा त्वाऽश्नातु ब्रह्मा त्वा प्राश्नात्वित्यथ यदि मन्थं लभेत तत्प्रतिगृह्य द्यौस्त्वेति तस्य त्रिः प्राश्नाति ब्रह्मा त्वाऽश्नातु ब्रह्मा त्वा प्राश्नातु ब्रह्मा त्वा पिबत्विति ॥ अथातोऽधीत्याधीत्यानिराकरणं प्रतीकं मे विचक्षणं जिह्वा मे मधु यद्वचः। कर्णाभ्यां भूरि शुश्रुवे मात्वꣳहार्षीः श्रुतं मयि ब्रह्मणः प्रवचनमसि ब्रह्मणः प्रतिष्ठानमसि ब्रह्मकोशोऽसि सनिरसि शान्तिरस्यनिराकरणमसि ब्रह्मकोशं मे विश ॥ वाचा त्वा पिदधामि वाचा त्वा पिदधासीति ( तिष्ठ प्रतिष्ठ ) स्वरकरणकण्ठ्यौरस्यदन्त्यौष्ठ्यग्रहणधारणोच्चारणशक्तिर्मयि भवत्वाप्यायन्तु मेऽङ्गानि वाक्प्राणश्चक्षुः श्रोत्रं यशो बलम्। यन्मे श्रुतमधीतं तन्मे मनसि तिष्ठतु तिष्ठतु ॥ १६ ॥

इति श्रीपारस्करगृह्यसूत्रे तृतीयकाण्डः समाप्तः ॥ ३ ॥

सं. ८० 1031

# ( अथ पारस्करगृह्यसूत्रपरिशिष्टम् । )



## अथ श्राद्धसूत्रम् ।

अपरपक्षे श्राद्धं कुर्वीतोर्ध्वं वा चतुर्थ्या यदहः सम्पद्येत तदहर्ब्राह्मणानामन्त्र्य पूर्वेद्युर्वा स्नातकानेके यतीन् गृहस्थान् साधून् वा श्रोत्रियान् वृद्धाननवद्यान् स्वकर्मस्थानभावेऽपि शिष्यान् स्वाचारान् द्विर्नग्नशुक्लविक्लिधश्यावदन्तविद्धप्रजननव्याधितव्यङ्गिश्वित्रिकुष्ठिकुनखिवर्जमनिन्द्यनामन्त्रितो नापक्रामेदामन्त्रितो वाऽन्यदन्नं न प्रतिगृह्णीयात्स्नाताञ्छुचीनाचान्तान्प्राङ्मुखानुपवेश्य दैवे युग्मानयुग्मान्यथाशक्ति पित्र्य एकैकस्योदङ्मुखान्द्वौ वा दैवे त्रीन् पित्र्य एकैकमुभयत्र वा मातामहानाञ्चैवं तन्त्रं तत्र वा वैश्वदेविकᳬश्रद्धान्वितः श्राद्धं कुर्वीत शाकेनापि वाऽपरपक्षमतिक्रामेन्मासि मासि वोशनमिति श्रुतेस्तदहः शुचिरक्रोधनोऽत्वरितोऽप्रमत्तः सत्यवादी स्यादध्वमैथुनश्रमस्वाध्यायान्वर्जयेदावाहनादि वाग्यत उपस्पर्शनादामन्त्रिताश्चैवम् ॥ १ ॥ दैवपूर्वᳬ श्राद्धं पिण्डपितृयज्ञवदुपचारः पित्र्ये द्विगुणास्तु दर्भाः पवित्रपाणिर्दद्यादासीनः सर्वत्र प्रश्नेषु पङ्क्ति-

मूर्धन्यं पृच्छति सर्वान्वाऽऽसनेषु दर्भानास्तीर्य विश्वान्देवानावाहयिष्य इति पृच्छत्यावाहयेत्यनुज्ञातो विश्वे देवास आगतेत्यनयाऽऽवाह्यावकीर्य विश्वेदेवाः शृणुतेममिति जपित्वा पितॄनावाहयिष्य इति पृच्छत्यावाहयेत्यनुज्ञात उशन्तस्त्वेत्यनयाऽऽवाह्यावकीर्याऽऽयन्तु न इति जपित्वा यज्ञियवृक्षचमसेषु पवित्रान्तर्हितेष्वेकैकस्मिन्नप आसिञ्चति शन्नो देवीरित्येकैकस्मिन्नेव तिलानावपति तिलोऽसि सोमदेवत्यो गोसवो देवनिर्मितः ॥ प्रत्नमद्भिः पृक्तः स्वधया पितॄनिमाँल्लोकान्प्रीणाहि नः स्वाहेति सौवर्णराजतौदुम्बरखड्गमणिमयानां पात्राणामन्यतमेषु यानि वा विद्यन्ते पत्रपुटेष्वेकैकस्यैकैकं ददाति सपवित्रेषु हस्तेषु या दिव्या आपः पयसा सम्बभूवुर्या अन्तरिक्षा उत पार्थिवीर्याः ॥ हिरण्यवर्णा यज्ञियास्ता न आपः शिवाः शंस्योनाः सुहवा भवन्त्वित्यसावेष तेऽर्घ इति प्रथमे पात्रे संस्रवान्समवनीय पितृभ्यः स्थानमसीति न्युब्जं पात्रं निदधात्यत्र गन्धपुष्पधूपदीपवाससाञ्च प्रदानम् ॥ २ ॥ उद्धृत्य घृताक्तमन्नं पृच्छत्यग्नौ करिष्य इति कुरुष्वेत्यनुज्ञातः पिण्डपितृयज्ञवद्धुत्वा हुतशेषं दत्त्वा पात्रमालभ्य जपति पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे

अमृते अमृतं जुहोमि स्वाहेति वैष्णव्यर्चा यजुषा वाऽङ्गुष्ठमन्नेऽवगाह्यापहता इति तिलान्प्रकीर्योष्णꣳस्विष्टमन्नं दद्याच्छक्त्या वाऽश्नत्सु जपेत् व्याहृतिपूर्वां गायत्रीꣳ सप्रणवाꣳ सकृत्त्रिर्वा राक्षोघ्नीः पित्र्यमन्त्रान्पुरुषसूक्तमप्रतिरथमन्यानि च पवित्राणि तृप्तान् ज्ञात्वाऽन्नं प्रकीर्य सकृत्सकृदपो दत्त्वा पूर्ववद्गायत्रीं जपित्वा मधुमतीर्मधु मध्विति च तृप्ताः स्थेति पृच्छति तृप्ताः स्म इत्यनुज्ञातः शेषमन्नमनुज्ञाप्य सर्वमन्नमेकतोद्धृत्योच्छिष्टसमीपे दर्भेषु त्रीँस्त्रीन्पिण्डानवनेज्य दद्यादाचान्तेष्वित्येक आचान्तेषूदकं पुष्पाण्यक्षतानक्षय्योदकं च दद्यादघोराः पितरः सन्तु सन्त्वित्युक्ते गोत्रं नो वर्धतां वर्धतामित्युक्ते दातारो नोऽभिवर्धन्तां वेदाः सन्ततिरेव च ॥ श्रद्धा च नो मा व्यगमद्बहु देयं च नोऽस्त्वित्याशिषः प्रतिगृह्य स्वधावाचनीयान्सपवित्रान्कुशानास्तीर्य स्वधां वाचयिष्य इति पृच्छति वाच्यतामित्यनुज्ञातः पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यो मातामहेभ्यः प्रमातामहेभ्यो वृद्धप्रमातामहेभ्यश्च स्वधोच्यतामित्यस्तु स्वधेत्युच्यमाने स्वधावाचनीयेष्वपो निषिञ्चत्यूर्जमित्युत्तानं पात्रं कृत्वा यथाशक्ति दक्षिणां दद्याद्ब्राह्मणेभ्यो विश्वेदेवाः प्रीयन्ता-

मिति दैवे वाचयित्वा वाजेवाजेवतेति विसृज्यामावाजस्येत्यनुव्रज्य प्रदक्षिणीकृत्योपविशेत् ॥ ३ ॥ अथैकोद्दिष्टमेकोऽर्घ एकं पवित्रमेकः पिण्डो नावाहनं नाग्नौकरणं नात्र विश्वेदेवाः स्वदितमिति तृप्तिप्रश्नः सुस्वदितमितीतरे ब्रूयुरुपतिष्ठतामित्यक्षय्यस्थानेऽभिरम्यतामिति विसर्गोऽभिरताः स्म इतीतरे ॥ ४ ॥ ततः संवत्सरे पूर्णे त्रिपक्षे द्वादशाहे वा यदहर्वा वृद्धिरापद्येत चत्वारि पात्राणि सतिलगन्धोदकानि पूरयित्वा त्रीणि पितॄणामेकं प्रेतस्य प्रेतपात्रं पितृपात्रेष्वासिञ्चति ये समाना इति द्वाभ्यामेतेनैव पिण्डो व्याख्यातोऽत ऊर्ध्वं संवत्सरे संवत्सरे प्रेतायान्नं दद्याद्यस्मिन्नहनि प्रेतः स्यात् ॥ ५ ॥ आभ्युदयिके प्रदक्षिणमुपचारः पूर्वाह्णे पित्र्यमन्त्रवर्जं जपः ऋजवो दर्भा यवैस्तिलार्थाः सम्पन्नमिति तृप्तिप्रश्नः सुसम्पन्नमितीतरे ब्रूयुर्दधिबदराक्षतमिश्राः पिण्डा नान्दीमुखान्पितॄनावाहयिष्य इति पृच्छत्यावाहयेत्यनुज्ञातो नान्दीमुखाः पितरः प्रीयन्तामित्यक्षय्यस्थाने नान्दीमुखान्पितॄन्वाचयिष्य इति पृच्छति वाच्यतामित्यनुज्ञातो नान्दीमुखाः पितरः पितामहाः प्रपितामहा मातामहाः प्रमातामहा वृद्धप्रमातामहाश्च प्रीयन्तामिति न स्वधां प्रयुञ्जीत युग्माना-

१०३५

शयेदत्र ॥ ६ ॥ अथ तृप्तिर्ग्राम्याभिरोषधीभिर्मासं तृप्तिस्तदभाव आरण्याभिर्मूलफलैरोषधीभिर्वा
सहान्नेनोत्तरास्तर्पयन्ति छागोस्रमेषानालभ्य क्रीत्वा लब्ध्वा वा न स्वयं मृतानाहृत्य पचेन्मासद्वयं
तु मत्स्यैर्मासत्रयं तु हारिणेन चतुर औरभ्रेण पञ्च शाकुनेन पट् छागेन सप्त कौर्मेणाष्टौ वाराहेण
नव मेषमांसेन दश माहिषेणैकादश पार्षतेन संवत्सरं तु गव्येन पयसा पायसेन वा वार्ध्रीण-
समांसेन द्वादश वर्षाणि ॥ ७ ॥ अथाक्षय्यतृप्तिः खड्गमांसं कालशाकं लोहच्छागमांसं मधु
महाशल्को वर्षासु मघाश्राद्धं हस्तिच्छायायाश्च मन्त्राध्यायिनः पूताः शाखाध्यायी षडङ्गविज्ज्येष्ठ-
सामगो गायत्रीसारमात्रोऽपि पञ्चाग्निः स्नातकस्त्रिणाचिकेतस्त्रिमधुस्त्रिसुपर्णी द्रोणपाठको ब्राह्मोढा-
पुत्रो वागीश्वरो याज्ञिकश्च नियोज्या अभावेऽप्येकं वेदविदं पङ्क्तिमूर्द्धनि नियुञ्ज्यात् ॥ आसहस्रा-
त्पङ्क्तिं पुनातीति वचनात् ॥ ८ ॥ अथ काम्यानि भवन्ति स्त्रियोऽप्रतिरूपाः प्रतिपदि द्वितीयायांस्त्री-
जन्म श्वास्तृतीयायां चतुर्थ्यां क्षुद्रपशवः पुत्राः पञ्चम्यां द्यूतर्द्धिः षष्ठ्यां कृषिः सप्तम्यां वाणिज्य-
मष्टम्यामेकशफं नवम्यां दशम्यां गावः परिचारका एकादश्यां धनधान्यानि द्वादश्यां कुप्यं



१०३६

हिरण्यं ज्ञातिश्रैष्ठ्यं च त्रयोदश्यां युवानस्तत्र म्रियन्ते शस्त्रहतस्य चतुर्दश्याममावास्यायाᳪंसर्व-मित्यमावास्यायाᳪंसर्वमिति ॥ ९ ॥ ॥ ॥ ॥

इति कात्यायनप्रोक्तं पारस्करगृह्यसूत्रस्य परिशिष्टं समाप्तम् ।

## श्रीकात्यायनोक्तं त्रिकण्डिकास्नानसूत्रम् ।

अथातो नित्यस्नानं नद्यादौ मृद्गोमयकुशतिलसुमनस आहृत्योदकान्तं गत्वा शुचौ देशे स्थाप्य प्रक्षाल्य पाणिपादं कुशोपग्रहो बद्धशिखी यज्ञोपवीत्याचम्योरुदृंहीति तोयमामन्त्र्यावर्तयेद्ये ते शतमिति सुमित्रिया न इत्यपोऽञ्जलिनाऽऽदाय दुर्मित्रिया इति द्वेष्यं प्रति निषिञ्चेत्कटिं वस्तयूरू जङ्घे चरणौ करौ मृदा त्रिस्त्रिः प्रक्षाल्याचम्य नमस्योदकमालभेदग्नानि मृदं विष्णुरिति सूर्याभिमुखो निमज्जेदापो अस्मानिति स्नात्वोदिदाभ्य इत्युन्मज्य निमज्योन्मज्याचम्य गोमयेन विलिम्पेन्मानस्तोक इति ततोऽभिषिञ्चेदिमम्मे वरुणेति चतसृभिर्माप उदुत्तमं मुञ्चन्तववभृथेत्यन्ते चतस्त्रिमज्योन्मज्याचम्य दर्भैः पावयेदापोहिष्ठेति तिसृभिरिदमापो हविष्मतीर्देवीराप इति द्वाभ्यामपोदेवा द्रुपदादिव शन्नो देवीरपाᳪंरसमपोदेवीः पुनन्तुमेति नवभिश्चित्पतिर्म्मेत्योङ्कारेण व्याहृतिभिर्गायत्र्या चादावन्ते चान्तर्जलेऽघमर्षणं त्रिरावर्त्तयेद् द्रुपदादिवायङ्गौरिति वा तृचं प्राणायामं वा सशिरसमोमिति वा विष्णोर्वा स्मरणम् ॥ १ ॥ उत्तीर्य धौते वाससी परिधाय मृदोरू करौ प्रक्षाल्याचम्य त्रिरायम्यासून् पुष्पाण्यम्बुमिश्राण्यूर्ध्वं क्षिप्त्वोर्ध्वबाहुः सूर्यमुदीक्षेदुदयमुदुत्यं चित्रं तच्चक्षुरिति गायत्र्या च

यथाशक्ति विश्राडित्यनुवाकपुरुषसूक्तशिवसङ्कल्पमण्डलब्राह्मणैरित्युपस्थाय प्रदक्षिणीकृत्य नमस्कृत्योपविशेत् दर्भेषु दर्भपाणिः स्वाध्यायञ्च यथाशक्त्या-दावारभ्य वेदम् ॥ २ ॥ ततस्तर्पयेद्ब्रह्माणं पूर्वं विष्णुꣳ रुद्रं प्रजापतिं देवाँश्छन्दाꣳसि वेदानृषीन् पुराणाचार्यान् गन्धर्वानितराचार्यान्संवत्सरञ्च सावयवं देवीरप्सरसो देवानुगान्नागान्सागरान्पर्वतान्सरितो मनुष्यान् यक्षान् रक्षाꣳसि पिशाचान्सुपर्णान् भूतानि पशून् वनस्पतीनोषधीर्भूतग्रामश्चतुर्विधस्तृप्यतामिति ॐकारपूर्वं ततो निवीती मनुष्यान् । सनकञ्च सनन्दनं तृतीयञ्च सनातनम् । कपिलमासुरिञ्चैव वोढुं पञ्चशिखन्तथा । ततोऽपसव्यं तिलमिश्रं कव्यवाडनलꣳ सोमं यममर्यमणमग्निष्वात्तान् सोमपो बर्हिषदो यमाँश्चैके । यमाय धर्मराजाय मृत्यवे चान्तकाय च । वैवस्वताय कालाय सर्वभूतक्षयाय च । औदुम्बराय दध्नाय नीलाय परमेष्ठिने । वृकोदराय चित्राय चित्रगुप्ताय वै नम इति "एकैकस्य तिलैर्मिश्राँस्त्रींस्त्रीन्दद्याज्जलाञ्जलीन् । यावज्जीवकृतं पापं तत्क्षणादेव नश्यति जीवत्पितृकोऽप्येतानन्याँश्चेतर उदीरतामङ्गिरस आयन्तु न ऊर्जं वहन्ती पितृभ्यो ये चेह मधुव्वाता इति तृचञ्जपन् प्रसिञ्चेत्तृप्यध्वमिति त्रिर्नमो व इत्युक्त्वा मातामहानाञ्चैवं गुरुशिष्यर्त्विग्ज्ञातिबान्धवानतर्पिता देहाद्रुधिरं पिबन्ति वासो निष्पीड्याचम्य ब्राह्मवैष्णवरौद्रसावित्रमैत्रवारुणैस्तल्लिङ्गैरर्चयेदद्दश्रꣳ हꣳस इत्युपस्थाय प्रदक्षिणीकृत्य दिशश्च देवताश्च नमस्कृत्योपविश्य ब्रह्माग्निपृथिव्योषधिवाग्वाचस्पतिविष्णुमहद्भ्योऽद्भ्योऽपाम्पतये वरुणाय नम इति सर्वत्र संवर्चसेति मुखं विमृष्टे देवागातुविद इति विसर्जयेदेष स्नानविधिरेष स्नानविधिः ॥ ३ ॥ इति श्रीकात्यायनोक्तं त्रिकण्डिकास्नानसूत्रं समाप्तम् ॥

---

# ॥ अथ भोजनसूत्रम् ॥



अथातः श्रुतिस्मृतीरनुसृत्य भोजनविधिं व्याख्यास्यामः ॥ आचान्तो धृतोत्तरीयवस्त्रो धृतश्रीखण्ड-गन्धपुण्ड्रो भोजनशालामागत्य गोमयेनोपलिप्य शुचौ देशे विहितपीठाधिष्ठितो नित्यं प्राङ्मुखो

न दक्षिणामुखो न प्रत्यङ्मुखो न विदिङ्मुखो श्रीकामश्चेत्प्रत्यङ्मुख सत्यकामश्चेदुदङ्मुखो यशः स्कामश्चेद्दक्षिणामुखो जीवन्मातृकवर्जं हस्तपादास्येषु पञ्चस्वार्द्रो नीवारचूर्णैर्गोमृदा भस्मनोदकेन वा मण्डलं कुर्याच्चतुष्कोणं ब्राह्मणस्य त्रिकोणं क्षत्रियस्य मण्डलाकृति वैश्यस्याभ्युक्षणः शूद्रस्य यथा चक्रायुधो विष्णुस्त्रैलोक्यं परिरक्षति ॥ एवं मण्डलभस्मैतत्सर्वभूतानि रक्षत्विति तत्र भूमौ निहितपात्रेऽन्ने परिविष्टे पितुन्नुस्तोषमित्यन्नँ स्तुत्वा मानस्तोके नमो वः किरिकेभ्यो नमः शम्भवायेत्यभिमन्त्र्य प्रोक्षयेत् ॥ सत्यं त्वर्त्तेन परिषिञ्चामीति प्रातर्ऋतं त्वा सत्येन परिषिञ्चामीति सायं तेजोसि शुक्रमस्यमृतमसीति यजुषाऽन्नमभिमृश्याऽग्निरस्मीत्यात्मानमग्निं ध्यात्वा भूपतये भुवनपतये भूतानां पतये इति चित्राय चित्रगुप्ताय सर्वेभ्यो भूतेभ्यो नम इति दिवा प्रणवादिकैः स्वाहा नमोऽन्तैर्मन्त्रैः प्रतिमन्त्रं बलीन्हरेदन्तश्चरति भूतेषु गुहायां विश्वतोमुखः ॥ त्वं ब्रह्म त्वं यज्ञस्त्वं वषट्कारस्त्वमोङ्कारस्त्वं विष्णोः परमं पदममृतोपस्तरणमसि स्वाहेति विष्णुमन्नमभिध्यायन्नाचम्यान्नममृतं ध्यायन्मौनी हस्तचापल्यादिरहितो मुखे पञ्च प्राणाहुतीर्जुहोति प्राणाय

१०३९

स्वाहाऽपानाय स्वाहा व्यानाय स्वाहा समानाय स्वाहोदनाय स्वाहेति क्रमं याज्ञवल्क्यो मन्यत उदानाय स्वाहेति शौनकबौधायनौ याज्ञवल्क्योदितक्रमो वाजसनेयिनां दन्तैर्नोपस्पृशेज्जिह्वया ग्रसेदङ्गुष्ठप्रदेशिनीमध्यमाभिः प्रथमामङ्गुष्ठमध्यमानामिकाभिर्द्वितीयामङ्गुष्ठानामिकाकनिष्ठिकाभिस्तृतीयां कनिष्ठिकातर्जन्यङ्गुष्ठैश्चतुर्थीᳪं सर्वाभिरङ्गुलीभिः साङ्गुष्ठाभिः पञ्चमीमङ्गुष्ठानामिकाग्राह्यान्नेनैता आहुतय इति हारीतव्याख्यातारः सर्वाभिरेता इति बौधायनः ॥ मौनं त्यक्त्वा प्राग्द्रवरूपमश्नीयान्मध्ये कठिनमन्ते पुनर्द्रवाशी स्यान्मधुरं पूर्वं लवणाम्लौ मध्ये ॥ कटुतिक्तादिकान्पश्चाद्यथासुखं भुञ्जीत भुञ्जानो वामहस्तेनान्नन्न स्पृशेन्न पादौ न शिरो न वस्तिं न पराभोजनᳪं स्पृशेदेवं यथारुचि भुक्त्वा भुक्तशेषमन्नमादाय ॥ "मद्भुक्तोच्छिष्टशेषं ये भुञ्जते पितरोऽधमाः ॥ तेषामन्नं मया दत्तमक्षय्यमुपतिष्ठतु" इति ॥ १ ॥ पितृतीर्थेन दत्वाऽमृतापिधानमसि स्वाहेति हस्तगृहीतानामपामर्धं पीत्वाऽर्धं भूमौ निक्षिपेत् ॥ "रौरवे पूयनिलये पद्मार्बुदनिवासिनाम् ॥ अर्थिनाᳪं सर्वभूतानामक्षय्यमुपतिष्ठतु" इति तस्माद्देशादपसृत्य गण्डूषशलाकादिभिस्तर्जनीवर्जमा-



१०४०

स्य७शोधयेन्न भार्यादर्शनेऽश्नीयान्न भार्या सह न सन्ध्ययोर्न मध्याह्ने नार्धरात्रे नायज्ञोपवीती नार्द्र-शिरा नार्द्रवासा नैकवासा न शयानो न ताम्रभाजने न भिन्नेन राजतसौवर्णशङ्खस्फाटिककाँस्य-भाजनवर्जं न लौहे न मृन्मये न सन्धिम७ंस्थिते न भुवि न पाणौ न सर्वभोजी स्यात्किञ्चिद्भोज्यं परित्यजेदन्यत्र घृतपायसदधिसक्तुपललमधुभ्यः साध्वाचान्तो दक्षिणपादाङ्गुष्ठे पाणिं निःस्रावये-दङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठं च समाश्रितः ॥ ईशः सर्वस्य जगतः प्रभुः प्रीणातु विश्वभुगिति श्वाद्भाः पीता इति नाभिमालभेत अमुना इत्यतः प्राग् "अगस्त्यं वैनतेयं च शनिश्च वडवानलम्। आहार-परिणामार्थं स्मरेद्भीमञ्च पञ्चमम्" ॥ इत्युदरमालभ्य "शर्यातिं च सुकन्याञ्च च्यवनं शक्रमश्विनौ ॥ भोजनान्ते स्मरेन्नित्यं तस्य चक्षुर्न हीयते" इति स्मृत्वा मुखशुद्धिं कुर्यान्नमो भगवते वाजसनेयाय याज्ञवल्क्याय नमो भगवते वाजसनेयाय याज्ञवल्क्याय ॥ ॥ ॥

इति परिशिष्टे भोजनसूत्रम् ॥

१०४१

इति याज्ञवल्क्यशिक्षा-प्रतिज्ञासूत्र-सर्वानुक्रमसूत्र-
पारस्करगृह्यसूत्र-परिशिष्टप्रकरणानि समाप्तानि ॥

१०४२

## श्लोकपञ्चकम् ।

द्विसप्तत्युत्तरे शाके ह्यष्टादशशते युते । चैत्रे तिथौ प्रतिपदि शुक्ले च रविवासरे ॥ १ ॥
सौराष्ट्रान्तर्गतश्रीमज्जामनगरवासिना । आचार्यामृतलालेन त्रिकंजित्तनुजन्मना ॥ २ ॥
शास्त्रिणा, श्रीयजुर्वेदसंहिता विदुषां कृते । पीयूषवर्षिणीनाम्न्या टिप्पण्या समलङ्कृता ॥ ३ ॥
याज्ञवल्क्यकृतां शिक्षामालोक्यैव यथामति । इयं संशोधिता सुष्ठु प्रातिशाख्यानुसारतः ॥ ४ ॥
प्रसन्नमानसाः सन्तु पितरो गुरवस्तथा । प्रीणातु ललितादेवी चास्मच्छ्रीकुलदेवता ॥ ५ ॥

१०४३

इति प्रास्ताविक-संहितामन्त्राणामकाराद्यनुक्रमणिका-वेदपारायणविध्यनुवाकसूत्राध्यायार्णविकृति-
याज्ञवल्क्यशिक्षा-प्रतिज्ञासूत्र-सर्वानुक्रमसूत्र-पारस्करगृह्यसूत्रादिभिरलङ्कृता

# शुक्लयजुर्वेदमाध्यन्दिनीयसंहिता समाप्ता ॥